4. श्रीनिवासाचार्य—He appears to have been the pupil of Venkatanátha Vedantácharya from the statement in the colophon of his Nyáyasára, a commentary on Venkatanátha's Nyáyapariśuddhi.[2] He must have therefore lived in the 14th century somewhere near Kánchi in the Madras Presidensy. His father's name was Devarájácharya of the Bháradvája Gottra. He seems to have written commentaries on Venkatanáthá's Śatadûshaní, Pádukásahasra and on some other works. In the commentary on Nyáyaparishuddhi he says that he has explained the methods of Mahávidyá syllogisms in the first Chapter on Pratibandha[3] (in the Nyáya-parishuddhi). Thus it seems that the Mahávidyá syllogisms were keenly studied in Southern India in the 14th century. It is not known whether he wrote any original works.

5. शेषशार्ङ्गधर—He is the author of Nyáya Muktávali, a commentary on Udayanácharya's Lakshanávali. He has also written a brief commentay on Śiváditya Miśra's Saptapadárthi. He seems to have flourished about A. D. 1450.[4] His son Śesha Ananta too has written a commentry on

1. See the life of Vedánta Deshika in the 1st volume of Yádavábhyudaya (Váni Vilás).

2 इति श्रीमद्वेदान्ताचार्यचरणारविन्दानुसन्धानविशदप्रतिबोधेन भरद्वाजकुलजलधिकौस्तुभश्रीदेवराजाचार्यसूनुना श्रीनिवासदासेन विरचितायां न्यायपरिशुद्धिव्याख्यायां न्यायसारसमाख्यायां प्रत्यक्षाध्याये प्रथममाह्निकम् ।

न्यायपरिशुद्धिः पृ. ५३ (चौखम्बा)

3 महाविद्यारीतयश्च प्रतिबन्धायाह्निकेऽस्माभिः प्रपञ्चितास्तत्र द्रष्टव्याः ।

न्यायपरिशुद्धिटीका पृ. १९९ (चौखम्बा)

4 See Introduction to Anandajnána's Tarkasangraha pp. xvii and xviii.

Shiváditya's Saptapadárthi and also one. on the Nyáya-siddhanta-dípa of Śaśadharácharya (A. D. 1156).

6. प्रत्यग्रूपभगवान् or प्रत्यक्स्वरूपभगवान्—As he has mentioned Vádindra, author of Mahávidyá-vidambana (A. D. 1225) in his commentary Nayana-prasádini on Chitsukhácharya's Tattvapradípika. he cannot have lived earlier thah A. D. 1225. He has not mentioned any authors of the 15th or 16th centuries. The India Office Manuscript of his work bears the date Samvat 1546 (A. D. 1490). He may therefore be placed in the interval between A. D. 1300–1400. His preceptor was a Sannyási by name Pratyakprakásha. In the Nayanaprasádini he has alluded to a number of ancient authors and their works on Nyáya, Vedánta, Mimansá &a.[1]

The poet Bhavabhûti's another name is Umbeka.—Among the authors the name of Umbaka or Umbeka is mentioned by Pratyagrûpabhagaván. As he is not generally know it would be better to make an inquiry about him and his works. On page 235 of his Nayanaprasádini, Pratyagrúpa-bhagaván while commenting upon the portion of the text of Chitsukhi which criticires the definition of Avinábháva (invariable concommitance), mentions the name of the author Umbaka[2] and quotes his interpretation of the line "[illegible] लिङ्गिना" from Kumárila-Bhatta's Ślokavártika (p. 348). On page 265 in explaining the text "इमं चैनद्रुक्रेवेन"&c,[3] he states that Umbeka is poet Bhavabhuti.[4]

---

1. I have collected the names after careful perusal of the work and give them here for the information of researchers as they might be useful in deciding dates of some of the authors. The names of the authors alluded to are—

[illegible]

The names of books mentioned are—

[illegible]

2 [illegible]

3 [illegible]

writer on Mimánsá also. Perhaps his commentary on Ślokavártika fell in the back ground after the composition of the commentaries by Sucharitamishra, Párthasárathi Mishra and others.

So far we have given an account of Vádindra and his works and the authors mentioned by him and of the authors who have referred to him. We shall now turn to the authors of the two commentaries on Mahávidyá–Vidambana.

Commentator Ánandpûrṇa—The author of the 1st commentary published with the text in this edition is Ánandapûrṇa. Only one incomplete Manuscript[1] of it was furnished to me as copies of it appear to be extremely rare. The Manuscript consists only of a portion of the commentary on the first out of the three Parichhedas. Hence there are two gaps in the printed commentary of Ánandapûrṇa viz. one from page 1 to 6 at the commencement and the other in the middle from page 26 to 45. Ánandapurna's commentary appears to be rather brief when compared with that of Bhuvanasundara.

No information about the time and place of Ánandapurṇa can be gathered from the fragment of his commentary on Mahávidyá-vidambana published in this volume. Even the colophon at the end of the first Chapter does not give any particulars of the author except his name.[2]

But I think we can safely identify this Ánandapûrṇa with the Ánandapûrṇa, author of the Vidyáságari commentary on Khandana. For the latter has quoted a Mahávidyá syllogism[3] in the Vidyáságari as stated before. Ánandapûrṇa was well-versed in the Nyáya and other Sástras as is evident from the profound scholarship shown by him in the Vidyáságari. As this commentary discloses that its author Ánandapûrṇa was well-acquainted with Mahávidyá syllogisms, I think we can safely identify him with the Ánandapûrṇa, author of the commentary on Mahávidyá-vidambana. He has also written (3) a commentary on Sureshwaráchâryas Bramhasiddhi[4] named भावशुद्धि. His other works are (4) टीकारत्न a commentary on the मोक्षधर्म of महाभारत, (5) पंचपादिकाटीका, (6) and a समन्वयसूत्र विवृति comment on पंचपादिका विवरण(?) Mr. S. Kuppusvami Śástri has lately obtained a copy of (7) his न्यायचंद्रिका, a work on the Vaisheshika system. One other unknown work of his is बृहदारण्यकवार्त्तिकटीका called न्यायकल्पलतिका referred to by Nándillagopa in his commentary on Prabodha-chandrodaya Nátaka (p. 204 N. S. Ed.)–एतदस्माभिर्बृहदारण्यकभाष्ये वार्त्तिके विद्यासागरीये द्रष्टव्यम्।)

---

1 See the description of the Manuscript घ in the annexed list of Manuscripts.

2 The colophon is as follows—इति महाविद्याविडम्बनव्याख्याने श्रीमदानन्दपूर्णविरचिते प्रथमः परिच्छेदः।
महाविद्या० पृ. ४५

3 [illegible] ।
खण्डनखण्डखाद्य पृ. ११८३ (चौखम्बा)

4 My friend Mr. T. M. Tripathi informs me that Mr. Kuppuswami Shastri of Madras has secured a copy of this commentary, and there is another copy of it at the Royal Asiatic Society of Bengal, Calcutta.

The Vidyáságari furnishes the following information about Anandapûrṇa. His Vidyáguru was a sannyási by name Śvetagiri.[1] The name of his spiritual preceptor was Abhayánanda. Anandpûrna also was a sannyási which fact can be inferred from the epithet Bhagavat prefixed to his name.[2] His name in the Pûrváshrama i. e. as a house holder seems to have been Vidyáságara which has supplied the popular name Vidyáságarî to his commentary on Khandana, the real title of it as stated by himself in the colophon being Khandana-fakkiká-vibhajana.[3]

Again the colophon of the India office Manuscript of पंचपादिकाटीका runs:—
"इति श्रीमत्परमहंसपरिव्राजकचार्याभयानंदपूज्यपादशिष्यस्यानन्दपूर्णमुनीन्द्रस्य विद्यासागरापरनामधेयस्य कृतौ पञ्चपादिकाटीका समाप्ता ॥"

Madhusûdana Sarasvatî (A. D. 1700) has quoted in his Advaitasiddhi a syollogism under the name of Vidyáságara.[4] It is not to be found in the commentaries on Khandana and Mahávidyá-vidambana. Perhaps it may have been extracted from some unknown work of Vidyáságara. As no Vidyáságara other than the author of the commentary on Khandana is known in Sanskrit Philosophical literature, I think the Vidyásagara mentioned by Madhusûdana Sarasvati must be the author of the Vidyáságari.

Ánandapurna's date—Now as regards the date of Ánandapûrna neither of his two commentaries supplies any information. But as mentioned before, his बृहदारण्यवार्त्तिकटीका is referred to by Nádinla (Nándilla) Gopa in his commentary on Prabodha-chandrodaya. Nândilla Gopa flourished about A. D. 1520. He was governor of Kondvidu in the reign of King Krishṇaráya of Vijayanagara. There is a pillar inscription of his at Kondvidu in Guntur District dated Śaka 1442 (A. D. 1520) (See Ep. Ind. Vol VI). Again the copy of his समन्वयसूत्रविवृति (at the Government College, Benares) is said to bear the date of its transcription Samvat 1461 (i. e. A. D. 1405). (see F. E. Hall's Bibliography p. 96 and 204). From these circumstances, Ánandpûrṇa seems to have flourished somewhere between *A. D. 1252 and 1400.* However I have found one circumstance which will help us to assign some

1 अवोधपङ्काविलबोधनीरे यदीयवाचः कतकायमानाः ।
वन्देमुनीन्द्रान्मुनिवृन्दवद्यान् श्रीमद्गुरून् श्वेतगिरीन्वरिष्ठान् ॥

खण्डन टीका पृ. २ (चौखम्बा)

श्रीमच्छ्वेतगिरिं वन्दे शिष्यधीपद्मभास्करम् ।
यत्पादस्मरणं लोके भवरोगस्य भेषजम् ॥

खण्डन टीका पृ. १२४४

2 इति श्रीपरमहंसपरिव्राजकाचार्याभयानन्दपूज्यपादशिष्यस्य भगवदानन्दपूर्णस्य कृतौ खण्डनफक्किकाविभजने निग्रहानिरुक्तिर्नाम तृतीयः परिच्छेदः । खण्डन टीका पृ. १०२७

3 See the colophon of the Vidyáságari commentary at the end of each chapter.

4 एवं च विमतं ज्ञानव्यतिरेकेण असत्, ज्ञानव्यतिरेकेण अनुपलभ्यमानत्वात् स्वप्नादिवदिति विद्यासागरोक्तमपि साधु । अद्वैतसिद्धि पृ. ३२५ (नि. सा.)

particular period to Ánandapûrṇa. He seems to have flourished after Śankara Miśra (A. D. 1529), author of the Śánkari commentary on Khandana. We meet with the following passage in the refutation of a definition of Pratyaksha (direct perception) in Sriharsha's Khandana:—

अथ यदनन्तरं न विजातीयदनभिलत्ता तद्भावत्वयात्वम् । तन्न । तत्साजात्यानवगतौ तद्विजातीयत्वानवगतेः, अपि संपदि अनुमानादिविषयायां प्रत्यक्षादिनुनिष्टेश्च ।

खण्डन पृ. ३१८ (Lazarus Edition) Ditto पृ. ५८६ (चौखम्बा)

Sankar Miśra in commenting upon this passage says that the reading अनुमानादिविषयायां is gramatically inaccurate and accepts अनुमानादिविषये as the correct reading.[1] But Ánandpûrṇa in his Vidyasâgari recites the implied objection of Śankara Miśra against the reading अनुमानादिविषयायां and answers the objection by stating reasons in support of the said reading.[2] From this circumstance it is clear that Ánandpûrṇa who has criticised Sankara Miśra's view must have lived after him i.e. after A. D. 1529. We have already stated above that Madhusûdana who lived in the 17th century has referred[3] to Anandapûrṇa under the name of Vidyâsâgara. We must therefore place Ánandapûrṇa between A. D. 1529 and 1600.

The Commentator Bhuvanasundara—We now turn to Bhuvanasundara [illegible] sûri, author of the second commentary published with the text of Mahâvidyâvidambana in the present volume.

From the verses at the commencement and at the end of his commentary we gather the following information about Bhuvanasundara :—He was a pupil of Śri Somasundara sûri belonging to Tapâ-gachha sect. He wrote the commentary at the command of his preceptor.[4] He studied logic under Guṇaratna (author of Shad-darśana-samuchaya-Vritti A. D. 140[illegible]). The commentary on Mahâvidyâ-vidambana which he calls Vyâkhyânadipikâ was composed by him in the temple of Śri Pârsvanâtha at Hambhapura.[5] Châritra [illegible] and Ratnashekhar Suri, two Jain scholars revised Bhuvanasundara's commentary and

---

1 [illegible]

[illegible]

2 [illegible]

[illegible]

3 [illegible]

[illegible]

4 [illegible]

[illegible]

5 [illegible]

[illegible]

got the first fair copy of it made and placed on record.[1] This is all that we can know about Bhuvanasundara from his own commentary.

Bhuvanasundara has said that he was a pupil of Somasundara sûri belonging to the Tapágachha. We shall explain what is meant by Tapágachha. The Jains have two Sampradáyas (schools) viz Śvetámbara and Digambara. Among the Svetámbaras generally there are 84 Gachhas or sects, although the number has increased. A Gachha[2] means a group i. e. a congregation. Some of these Gachhas received their names from the village or town where one of the great Áchâryas flourished, some were named after their founder and others bore their names from some distinguishing quality (विशिष्टगुण) of their founders. The tradition regarding the name Tapágachha is as follows:— One Jagatchandra sûri took the vow of observing *Áchámla* (in Gujarati आंबेल) *tapa*. When he successfully performed the *tapa* for 12 years, the king of Medapáta (Mewád) conferred in Samvat 1285 (A. D. 1229) the Biruda (title) of *Tapá* on him and since then the Gachha, which was successively known as Vatagachcha and Brihadagachcha came to be called Tapá-gachha. At present the principal Gachhas among the Śvetambara Jainas are Tapá, Kharatara and Ánchalika.

The Harshapur mentioned by Bhuvanasundara cannot be identified with any modern village or town for want of sufficient particulars. There was a town called Harshapura, from a former Acharya of which place one Gachha came to be called Harshapurîya Gachha. But the present name of tha town is not known. However there are two Villages in the Jodhpur Territory, one called Harasor (16 miles from Degana), and one called Harasolá (4 miles from Gothana). There is another Harshapur the Modern Harsol, which is a village in the Prantij subdivision of the Ahmedábád District and situated 30 miles North-West of Ahmedábád. All these three contain Jaina temples, but as the temples at the last two places are modern, and the temple at the first place Harasor is old, it is probable that this Harasor is the Harshapura of Bhuvanasundara.

From a Jain Work named Gurvávali in Sanskrita verse, we can trace Bhuvansundara as follows[3]:—
Devasundara sûri (A. D. 1340–1385) was the 50th head of the Tapágachha sect. He had five pupils, Jnánaságara, Kulamandana, Gunaratna,[4] Soma-

1 षट्तर्कीपरितर्ककर्कशमतिश्चारित्रराजो यति-
त्रैविद्योत्तमरत्नशेखरमुनिर्वादीन्द्रवृन्दाग्रणीः ।
एतौद्वावपि शुद्धबुद्धिविभवौ टीकामिमां सादरं
संशोध्य प्रथमप्रतौ गुणयुतौ संस्थापयामासतुः ॥ महाविद्यावि० टीका पृ. १५०

2 The definition of a Gachha is "एकवाचनायतिसमुदायः गच्छः।"

3 See Munisundara's Gurvavali, pagee 69 to 98.

4 He is the author of the Shad-darshana-samuchaya-Vritti and Kriyá-ratna-samuchaya (A. D. 1409).

sundara and Sádhuratna. Jnánaságara (A. D. 1349–1404) became the 51st head of the Tapágachha sect and Somasundara succeeded him as the 52nd head in A. D. 1404. Somasundara had five pupils, Munisundara,[1] Jayachandra, Bhuvanasundara, Jinasundara, and Jinakirti. Now Bhuvanasundara being a pupil of Somasundara may be considered to have been younger than his preceptor by 25 years. And thus we can fix the approximate date of Bhuvanasundara as A. D. 1399 to 1460.

Munisundara who was a co-student with Bhuvanasundara has praised him in the following Áryá in his Gurvávali:—

श्रीभुवनसुन्दरा अपि वाचकवर्या न कस्य हर्षाय ।
सत्यपि येषां वाणी प्रतिचतुरं लीयते हृदये ॥ २३ ॥
गुर्वावली पृ. १७ (काशी)

Bhuvanasundara's Works—As regards Bhuvanasundara's works, three of them have been published in this volume. They are:–1 Mahávidyá-vidambana-Vyákhyána, (pages 1 to 150), 2 Laghu-mahávidya-vidambana, a very brief refutation of Mahavidya syllogisms in imitation of Vádindra (pages 152 and 153), and 3 Mahávidyá-vivarana-tippana (pages 157 to 189). A work of the name of (4) Parabramhotthápana-sthala is mentiond in a Gujaráti work entitled Jaina-granthávali (which is a list prepared from a number of catalogues belonging to Jain Bhándárs) as being written by Bhuvansundara. But as the book is not available, nothing, can be said about it. One of his pupils Ratnaśekhara, in his Śrávakapratikramaṇasûtra-tika (A. D. 1440), mentions one more work of his called (5) Vyákhyána-dipiká.[2]

Mahávidyá-vivaraṇa—Lastly we come to the author of the Mahávidyá-vivaraṇa which is a short commentary on the 10 verses of the Mahávidyá-sútra. The author has not mentioned his name either in the introductory or concluding verses. Nor is it mentioned in the colophon which is "इति महाविद्याविवरणं समाप्तम्[3] ।". It seems that even Bhuvanasundara did not know the author's name as he does not mention it in the Tippana. If he was aware of it he would have stated it in the introduction as he has done in the case of Vadindra in his commentary on the Mahávidyá-vidambana. Thus there is no means to ascertain the name of the author of Mahávidya-vivaraṇa. From the puport of the Mangala verse at the commencement of the Vivaraṇa, he seems to have been a Vedantin,[4] although well versed in Nyáya. For the

---

1 He is the author of Gurvávali, a poem in praise of some of the Gurus or Head preceptors of the Tapágachha in succession. The book is published in the Jaina-Yashovijaya series at Benares.

2 तेषां विनयरत्ना [illegible] ॥

3 महाविद्याविवरण पृ. १८८

4 [illegible] ।
[illegible] ॥ १ ॥ महाविद्याविवरण पृ. १५७

word 'swarûpa' which signifies 'Bramha' would not be used in saluting God by a follower of any other school of philosophy except a Vedántin. Besides while explaining the relation of Upalakshana he has alluded to the relation of Máyá with Bramha.[1] At the end of the Vivaraṇa he states that the Mahávidyá verses were explained by older authors before him.[2] So he may have flourished after Śivâditya (A. D. 975-1025).

Bhuvansundara mentions a Brihadvritti (a larger commentary) on the Mahávidyásûtra.[3] But nothing is known about it.

Thus we have tried to give a short account of the authors and their works published in this volume together with a few historical notes on other authors connected with those works in one way or other, hoping that they may be of use to researchers in Sanskrit literature.

I must now sincerely acknowledge the valuable assistance rendered to me by my friend Mr. T. M. Tripathi, B. A. of Bombay by making a loan of his two manuscripts and by furnishing information about Bhuvanasundara's date, place &c.

In conclusion I take this opportunity to thank His Highness the Mahárájá Sáyaji Rao Gaekwád on behalf of Sanskrita loving public for the liberal patronage extended to ancient Oriental Literature. In the absence of such patronage the valuable and hitherto unknown works now published in this series would have remained sealed to the general public.

NOTE ON THE MANUSCRIPTS.

Following is the description of the Manuscripts used for collation in preparing this edition:—

क—Belongs to the *Central Library at Baroda*. This is the first copy of Mahávidyá-vivarna, Folios 1 to 15. Size 9×4 inches, with 9 lines on each side. It is written on old rough paper. The writing is indifferent. It does not contain the 3 Mangala verses at the commencement. There are many omissions and mistakes made by the copyist. It begins with ॐ नमो गणेशाय and ends with श्रीरस्तु। शुभं भवतु। लेखकपाठकयोः कल्याणं भूयात्।

1 ननु उपलक्षणत्वमपि कदाचित्संबन्धिनि भवति। विपक्षसपक्षयोस्तु पक्षत्वेन संबन्धाभावात् कथं तदिति चेत्। न। यद्रजतमभात् सैषा शुक्तिरित्यत्र रजतस्य शुक्तिकोपलक्षकत्ववदुपपत्तिः, लिप्यक्षराणां वर्णोपलक्षकत्वमिव, वेदान्तिमते मायाया ब्रह्मोपलक्षकत्वमिवेति। महाविद्याविवरण पृ. १६१–१६२

2 महाविद्या दशश्लोकी विवृतापि चिरन्तनैः।
मन्दधीवृद्धिसिद्ध्यर्थं विवृतेयं यथागमम्॥

महाविद्याविवरण पृ. १८८

3 एषात्र महाविद्या अनेक दोषदुष्टत्वेन चिन्त्येत्युक्तं महाविद्याबृहद्वृत्तिकृता।
महाविद्याविवरणटिप्पन पृ. १८९

ख—This is also from the *Central Library at Baroda*. This manuscript forms the second copy of Mahávidyá-vivarana and first copy of its commentary called Mahávidyá-vivarana-tippana. Folios 2 to 6, size 10½×4½ inches. The first folio or leaf is lost. The manuscript is beautifully and neatly written in very small hand on Ahmedabad paper. The text is written in 6 to 10 lines in the middle of each page and the commentary is written in 9 lines above and below the text on each page. This manuscript is generally correct excepting some omissions. It ends with समाप्ता महाविद्याटीका। and the words "ग्रन्थ ग्रन्थ ८०८" are written in the margin of the last page.

ग—This belongs to the *Parshvanátha Bhándára Patan* and was supplied by the Central Library, Baroda. This is the first copy of Mahávidyá-vidambana, Folios 1 to 20 with 14 lines on each page. Size 12×4¾ inches. It is written on old Ahmedabad paper and is generally correct, excepting a few omissions and copyists mistakes. It begins with ॐ शिवाय नमः and ends with शुभं भवतु.

घ—This belongs to the *Travancore State Library* at Trivandrum and was supplied by the Central Library, Baroda. This is a manuscript of Mahavidyá-vidambana with the commentary of Ánandapúrna. It is in book-form contains folios 1 to 92 with writing on one side only. Size 13¼ × 8 inches. It is incomplete. It begins with the 23rd Anumána of the 1st Parichheda and ends with a portion of the 3rd Parichheda beginning with the words "पक्षीकृतवाक्यमात्रनित्यनित्यपर्यन्ताद्यन्तम्, उभयोः प" (printed page 144, line 21).

The commentary of Ánandapúrna as found in this Manuscript is on a part of the 1st Parichheda only.

The following note is written on the title-page of the manuscript in Sanskrit and in English:—

"महाविद्याविडम्बने इदमेव पुस्तकमाचार्यपरमपण्डितवादीन्द्रविरचितं प्रथमपरिच्छेदैकदेशाना-रभ्य तृतीयपरिच्छेदैकदेशपर्यन्तम् । महाविद्याविडम्बनव्याख्या आनन्दपूर्णविरचिता प्रथमपरिच्छेदमात्रम् । तत्रापि आदौ विंशोऽनुमानं नास्ति । ६२ [illegible] 'नन्वाद्यपक्षम्' इत्यत आरभ्य [illegible] इति प्रतिभाति ।"

"This manuscript was copied from a palm-leaf copy of the works on (in?) Malayalam character in the year 1913 belonging to Mr. Idappalli Valiya Raja and was compared with the palm-leaf original. In the original palm-leaf manuscript the following numbers of leaves are missing:—1-6, 15, 25, 29-32, 34-38 and 45-53."

ङ—This belongs to the [illegible] at Baroda and was supplied by the Central Library, Baroda. This is the first copy of Mahávidya-vidambana-vritti of Bhuvanasundara. Folios 1 to 42, with [illegible] lines on each page. Size [illegible] inches. This is an [illegible]

manuscript but the first 6 leaves and the 9th leaf are written on new paper. The old leaves appear to have been lost. The manuscript has been carefully corrected and there are marginal notes. The manuscript begins with "ॐ नमः सर्वज्ञाय" and ends with "भद्रम्।"

छ—This belongs to the *Jain Mandira Jain Library at Chhani* (छाणी). and was supplied by the Central Library, Baroda. This is a second copy of Maháviḍyá-vidambana-vritti. Folios 1 to 68 with 14 lines on each page.

Size 10¾×4¾ inches. The colour of the paper shows it to be a recently made copy. This is generally correct. This begins with "ॐ नमः सर्वज्ञाय"

ज—This belonged to the late *Pandit Jyeshthárám Mukundaji of Bombay.* He presented it to Mr. T. M. Tripathi of Bombay who made a loan of it to the editor for use in preparing this edition.

This is the second copy of Mahávidyá-vidambana. Folios 1 to 14 with 18 lines on each page. Size 10½×4½ inches. The writer has given consecutive paging to the leaves of the manuscript but from the context and comparison with the other manuscripts it seems that two leaves were wanting in the original manuscript from which this copy was prepared. It is generally correct and appears to be very old.

त—This also was lent *by* my friend *Mr. T. M. Tripathi* B. A. of Bombay. This is the 3rd copy of Mahávidyá-vivarana-tippana of Bhuvanasundara. The writer of this seems to be the same as that of manuscript ज. Folios 1 to 8 with 18 lines on each page. This is generally correct excepting a few omissions and copyists' mistakes. It begins with "ॐ नम सर्वज्ञाय." There is a marginal note at the end as follows:— "ग्रं० ६००." This is an old manuscript.

थ—This belongs to the *Sanghvi Pádá Bhándára at Patan* (in Gujarat) and was supplied by the Central Library, Baroda.

This is the 3rd copy of Mahávidyá-vidambana. Folios 1 to 17 with 16 lines on each page, size 10½×4½ inches. This is written neatly in a beautiful hand on Ahmedabad paper. Leaves 3 to 9 are worn out and torn in some places. It begins with "ॐ नमः शिवाय" and ends with "शुभं भवतु। कल्याणमस्तु।" There are a few omissions and copyist's mistakes.

द—This also belongs to *the Sanghvi Pádá Bhándára at Pátan* and was supplied by the Central Library, Baroda.

This is a third copy of Mahávidyá-vidambana-vritti. Folios 1 to 6 with 15 lines on each page. size 10½×4½ inches. This is a carefully written manuscript and generally accurate. It begins with "ॐ नमः सर्वज्ञाय" and ends with the Prashasti verses printed in the present edition on page 151.

ध—This too belongs to the *Sanghvi Páda Bhandára at Pátan*, and was supplied by the Central Library, Baroda.

This is the 4th copy of Mahávidya-vivaraṇa-tippana. Folios 1 to 9 with 18 lines on each page, size $10\frac{1}{2} \times 4\frac{1}{2}$ inches. It is a neatly and carefully written Manuscript. It is generally correct excepting a few omissions. It begins with "ॐ नमः".

*न—This and प and फ belong to the *Sangha's Bhandara at Pátan*, was supplied by the Central Library, Baroda. This is the 3rd copy of Mahávidyá-Vivarana. This is generally correct. The writing is indifferent. It ends with "इति महाविद्या-विवरणं परतीर्थिकग्रन्थातगतम् ॥ इतिश्री ॥

*प—This is the only copy of Laghu-Mahávidyá-Vidambana of Bhuvana-Sundara. It is not carefully written.

*फ—This is the only copy of Mahávidyá or Dashashloki-Mahávidya-suttra. This contians Marginal notes.

द—This belongs to the *Central Library at Baroda*. This is the 5th copy of Mahávidya-Vivarana with the Tippana of Bhuwana-Sundara. It is carefully written and almost correct. Folios 1 to 12 with 18 lines on each page. It ends with the words "ग्रन्थाग्र १००० ".

---

* न. प and फ form one Manuscript consisitng of 1 to 7 folios. Size $10\frac{1}{2} \times 4\frac{1}{2}$ inches with 16 to 18 lines on each page. It ends with "लिखित [illegible] सं. १५३६ वर्षे [illegible] । [illegible] ।".

Extracts from the works of ancient Sanskrit authors who have mentioned Mahávidyá, Kulárkapandita and Vádindra:—

तत्त्वप्रदीपिका–(चित्सुखी–चित्सुखाचार्यकृता)

पृ. १३ अथवा अयं घटः एतद्घटान्यत्वे सति वेद्यत्वानधिकरणान्यपदार्थत्वात्पटवदित्यादिमहाविद्याप्रयोगैरप्यवेद्यत्वप्रसिद्धिरप्यूहनीया ।

पृ. १८० तदेवं जातौ व्यञ्जकप्रमाणयोरसंभवेन आकाशवृत्तिसत्ताव्याप्यजातियोगि क्रियासमानाधिकरणसत्तावान्तरजातियोगि संयोगवद्वृत्तिसत्तावान्तरजातियोगि द्रव्यमित्येवमादीनि जातिपुरस्कारप्रवृत्तानि महाविद्यालक्षणानि निरस्तानि वेदितव्यानि ।

तत्त्वप्रदीपिकाटीका नयनप्रसादिनी–(प्रत्यग्रूपभगवत्कृता)

पृ. १३ ये तु वक्रगीर्भिः रोचयन्ते तान्प्रति महाविद्याभिरपि साध्यप्रसिद्धिं सुलभयति—अथवेति ।

पृ. २१ अर्वाचीनपदनाचार्यैरकार्यान्वयगोचराः । महाविद्याः पुनर्दिव्या दैन्यन्त्यनानिवारितम् ॥ तथाहि विमतं ज्ञानमेतद्ज्ञानविज्ञानविषयत्वे सति वेद्यत्वरहितज्ञानविषयः पदविषयत्वात् घटवदित्यादिमहाविद्याभिरपि समर्थनीयं स्वप्रकाशत्वम् ।

पृ. १८० यानि च महाविद्यानुमानानि द्रव्यत्वजातौ प्रवर्तन्ते तान्यपि परमाणुनिराकरणवादे निवेदनीयदूषणदूषितानीति नोदाहृतानि आचार्येण ।

पृ. १८१ महाविद्यालक्षणानीति—महाविद्यारीत्या प्रवृत्तानीत्यर्थः ।

:: :: वादीन्द्रस्तु एतानि लक्षणानि दूषयित्वा स्वमतेन कार्याश्रयो द्रव्यं, गुणाश्रयो द्रव्यमित्यादिलक्षणान्युदाजहार । तानि च तत्रैव निरस्तप्रायाणीति ।

:: :: वादीन्द्रस्तु पृथक्त्वानाश्रयः संख्यानाश्रयः संयोगकारणत्वे सति विभागनिरपेक्षकारणत्वरहितो गुण इत्यादि प्रत्यवादीत् । तन्न । संख्यापृथक्त्वयोराश्रयत्वस्य पूर्वमेवोपपादनात् ।

पृ. १८३ यत्तु वादीन्द्रेण तदुभयान्यतरत्वं [illegible] नाधिकरणमिति निर्वचनं कृतं······तदयुक्तम् । [illegible] ततो वादीन्द्र दर्शिते तदन्यतरादिषु । [illegible]

पृ. २०६ तेन [illegible] वादीन्द्रा[illegible] गुणानि [illegible] । अपि च । वादीन्द्र[illegible] । [illegible] ······ [illegible] महाविद्या[illegible] । [illegible] महाविद्याभिः [illegible] ।

पृ. २२१ वादीन्द्रस्य चाभिमतमानन्त्याभावोऽप्यभिमतमित्याह ।

पृ. २३५ एतेनास्य नन्दिग्रिगोस्त पूर्वं प्रतीतत्वेऽपि एतदर्थानिरासात् पूर्वमप्रतीतिरिति यद-न्वादीन्द्रोऽपि निरस्तः ।

पृ. २४३ पक्षधर्मताखण्डनेन महाविद्यानुमानमपि खण्डितं वेदितव्यम् । केवलान्वयिनि व्यापके प्रवर्तमानो हेतुः पक्षे व्यापकप्रतीत्यर्थसामान्यलक्षणव्याप्तिविशिष्टं वाद्य-भिमतं साधयन्ति महाविद्यानुमाने । तथा च व्यापकप्रतीत्यर्थसामान्यविरो तासामप्यनिष्टेः दृष्टान्तं नेदं वादीन्द्रमतानुसारेण महाविद्याविनिमिति ना-स्माभिस्तद्दर्शनाभावात् संरम्भो ।

पृ. २८४ महाविद्यानुमानमप्याह—अयं घट इति ।

पृ. २८९ तथा निरवयवत्वं स्वेतरवृत्तिज्ञानविषयत्वमूर्तनिष्ठात्यन्ताभावप्रतियोगिकत्वं मे-यत्वात् इत्यादि महाविद्याभिरेतासां सत्प्रतिपक्षता केन वार्यते । ...... एवं हि महाविद्याकोविदाः प्राहुः श्रमादुपरमेऽपि न दोष इति । ...... तदित्थं स्वपरपक्षाणामेषां पारिप्लावता । आरादेव परित्याज्या महाविद्याभिसारिका ॥

पृ. ३०४ एवं प्रत्यक्षं जातौ प्रत्याख्याय कुलार्कपण्डितोपनीतमनुमानमुन्द्रावयति दूषयितुं-तर्हीति ।

वेदान्तकल्पतरुः–(अमलानन्दयतिकृतः)

पृ. ५६७ एवं सर्वा महाविद्यास्तच्छाया वान्ये प्रयोगाः खण्डनीया इति ।

शास्त्रदर्पणः–(अमलानन्दयतिकृतः)

पृ. १३७ महाविद्याश्चैतद्विषया वेदान्त कल्पतरौ निर्भर्त्सिताः ।

तर्कसंग्रहः–(आनन्दज्ञानविरचितः)

पृ. २२ आत्मत्वं स्पर्शवद्वृत्तिज्ञानवद्वृत्तिजात्यन्यत् जातित्वादिति आभाससमानता इति चेत् । तर्हि सर्वास्वेव महाविद्यासु एवमाभाससमानतासंभवादुच्छिन्नसंकथास्ताः स्युः ।

न्यायपरिशुद्धिः–(वेङ्कटनाथवेदान्ताचार्यकृता)

पृ. १२५ अत एव महाविद्यादिरूपकेवलान्वयिनामप्यनवकाशः । अव्याहतसाध्यविपर्ययत्वात् । अन्यथा तेषां सर्वसाधकत्वसामर्थ्याभ्युपगमभङ्गप्रसङ्गात् ।

पृ. १९९ अत एव हि दत्तैर्महाविद्यादिरीतीनां प्रयोगोऽभ्युपगम्यत इति ।

पृ. २७२ तत्र यद्यप्यस्मिन्नुदाहरणे लक्षणमसंभवि तथापि महाविद्यादिप्रस्थानेषु केषाञ्चिद्धे-तूनां साध्यतदभावयोः समानाकारतया संभवं पश्यामः ।

पृ. २७५ प्रमाणान्तरबलात्तु सिद्ध्यतः साध्यविशेषस्य विपर्यये बाधकमप्यस्तु, न पुनः महा-विद्यादिहेतुभिरप्रयोजकैः सिद्ध्यतः ।

पृ. २७८ तस्मादव्याप्तभेद एवायमप्रयोजकः । तत्स्वभावानतिलङ्घनाच्च श्रीमहाविद्या–मान-मनोहर–प्रमाणमञ्जर्यादिपठितवक्रानुमानस्यापि तथात्वम् ।

न्यायपरिशुद्धिटीका न्यायसाराख्या–(श्रीनिवासाचार्यकृता)

पृ. १२६ अव्याहतसाध्यविपर्ययत्वादेव कुदृष्टिभिः स्वाभिमतसाधनत्वेनोत्प्रेक्षितानि महाविद्यानुमानानि आभासीकृतानीत्याह—अत एवेति ।

पृ. १९९ महाविद्यारीतीनामिति । महाविद्यारीतयश्च प्रतिकथायामाह्निकेऽस्माभिः प्रपञ्चितास्तत्र द्रष्टव्याः ।

पृ. २७६ तथा च मानान्तरात्साध्यसिद्धौ महाविद्यायाः साधनत्वं न पुरस्कार्यमित्यप्रयोजिकैः महाविद्या इति भावः ।

पृ. २७८ श्रीमहाविद्या मानमनोहर प्रमाणमञ्जरीति ग्रन्थनामधेयानि । एवंजातीयका अन्येऽपि ग्रन्थाः सन्ति । तत्र तत्र पठितानि परपक्षबाधकानि वक्रानुमानान्यप्रयोजकतया व्याप्यत्वासिद्ध्यन्तर्भूतान्येवेत्यर्थः ।

तत्त्वमुक्ताकलापः सर्वार्थसिद्धिसमाख्यटीकायुतः–(श्रीवेङ्कटनाथवेदान्ताचार्यकृतः)

पृ. ४७८ अत्र मतभेदेन लक्षणद्वयमाह । साधनाव्यापकत्वे सति साध्यसमव्याप्तो धर्म उपाधिरित्युदयनः । साधनाव्यापकत्वे सति साध्यव्यापक इति समशब्दप्रतिक्षेपेण वादीन्द्रः ।

पृ. ४८६ अतो वक्रानुमानं केवलान्वयित्वमपि साधनजातिरेव, स्वव्याघातात् । जातिर्द्विविधा, साधनजातिर्दूषणजातिश्च । तत्र साधनजातिर्महाविद्या, दूषणजातिः प्रतिधर्मसमाधिरिति विचक्षणानां निर्णयः । एतत्सर्वं विडम्बने विस्तरेण द्रष्टव्यम् । अतो वक्रानुमानस्य नानुमानत्वभङ्ग इति ।

पृ. ४८९ कुमारिलादयो व्यतिरेकिणं निरस्यन्ति, वादीन्द्रादयोऽन्वयिनमिति विशेषं दर्शयति ।
,, ,, एवं केवलान्वय्यङ्गीकारे महाविद्याप्यङ्गीकार्या, तस्या अपि केवलान्वयित्वात् । तथा च पूर्वोक्तं तन्निराकरणं न युज्यते । किञ्च सकलतन्त्रमहाप्रमितिः केवलान्वयी महाविद्येत्युच्यते । तच्च न संभवति । प्रमेयत्वाभिधेयत्वादीनां सर्वत्र स्वात्मन्यपि वृत्तिमत्त्वात्, तदभावे केवलान्वयित्वाभावादिति चोदयति—सर्वस्य इति ।

पृ. ४९० इत्थं बहुविधतर्ककर्कशं महाविद्यानुमानं न प्रतिक्षेप्तुं शक्यमित्याह—तत्र चैवं विरुध्यादिति । यथासंभवं विकल्पानां दूषणत्वादित्यर्थः । इत्थमुक्तेषु केवलान्वयिव्यतिरेकि-महाविद्यादिविभागं विवदन्तु न वा, सर्वथा अन्वयव्यतिरेकिण्यप्रामाण्य [illegible]-कुरेत्याह—स्तौतीति । न चैतदुक्त्या विभागविवरणं न [illegible] । अत्राभिमानः—महाविद्या चेत् स्वमत [illegible] प्रमेय दूषिता, [illegible] साधकं प्रमेयत्वादिकं तु सर्वथा केवलान्वयि च भवति । तस्य स्वदुष्टदूषणा- [illegible] इति न दूषितेति ।

पृ. ४९१ [illegible] दूषणं सुन्दरं दुर्घटं । अनन्तरं, दुर्महाविद्या [illegible] विडम्बनत् न [illegible], [illegible] ।

पृ. २२१ वादीन्द्रस्तु बाधितत्वात्यन्ताभावोऽबाधितत्वमित्याह ।

पृ. २३५ एतेनास्य वन्हिविशेषस्य पूर्वं प्रतीतत्वेऽपि एतत्पर्वतनिष्ठतया पूर्वमप्रतीतिरिति वदन्वादीन्द्रोऽपि विद्रावित: ।

पृ. २४३ पक्षधर्मताखण्डनेन महाविद्याजीवनमपि खण्डितं वेदितव्यम् । केवलान्वयिनि व्यापके प्रवर्तमानो हेतु: पक्षे व्यापकप्रतीत्यपर्यवसानबलादन्वयव्यतिरेकिसाध्यविशेषं वाद्यभिमतं साधयन्हि महाविद्येत्युच्यते । तथा च व्यापकप्रतीत्यपर्यवसानानिरुक्तौ तासामप्यनिरुक्ते: दग्धसारं चेदं वादीन्द्रदावानलेन महाविद्याविपिनमिति नास्माभिस्तद्भस्मीभावाय संरम्यते ।

पृ. २८४ महाविद्यानुमानमप्याह—अयं घट इति ।

पृ. २८९ तथा निरवयवत्वं स्वस्वेतरवृत्तित्वानधिकरणमूर्तनिष्ठत्वरहितनिष्ठधर्माधिकरणत्वं मेयत्वात् इत्यादि महाविद्याभिरेवार्थत: सत्प्रतिपक्षता केन वार्यते । ...... एवं हि महाविद्याकोविदा: प्राहु: श्रमाद्धुपरमेऽपि न दोष इति । ...... तदित्थं स्वपरपक्षाणामेषां पारिप्लवावहा । आरादेव परित्याज्या महाविद्याभिसारिका ॥

पृ. ३०४ एवं प्रत्यक्षं जातौ प्रत्याख्याय कुलार्कपण्डितोन्नीतमनुमानमुद्भावयति दूषयितुं—तर्हीति ।

वेदान्तकल्पतरु:–(अमलानन्दयतिकृत:)

पृ. ५६७ एवं सर्वा महाविद्यास्तच्छाया वान्ये प्रयोगा: खण्डनीया इति ।

शास्त्रदर्पण:–(अमलानन्दयतिकृत:)

पृ. १३७ महाविद्याश्चैतद्विषया वेदान्त कल्पतरौ निर्भर्त्सिता: ।

तर्कसंग्रह:–(आनन्दज्ञानविरचित:)

पृ. २२ आत्मत्वं स्पर्शवदवृत्तिज्ञानवद्वृत्तिजात्यन्यत् जातित्वादिति आभाससमानता इति चेत् । तर्हि सर्वास्वेव महाविद्यासु एवमाभाससमानतासंभवादुच्छिन्नसंकथास्ता: स्यु: ।

न्यायपरिशुद्धि:–(वेङ्कटनाथवेदान्ताचार्यकृता)

पृ. १२५ अत एव महाविद्यादिरूपकेवलान्वयिनामप्यनवकाश: । अव्याहतसाध्यविपर्ययत्वात् । अन्यथा तेषां सर्वसाधकत्वसामर्थ्याभ्युपगमभङ्गप्रसङ्गात् ।

पृ. १९९ अत एव हि दत्तैर्महाविद्यादिरीतीनां प्रयोगोऽभ्युपगम्यत इति ।

पृ. २७२ तत्र यद्यप्यस्मिन्नुदाहरणे लक्षणमसंभवि तथापि महाविद्यादिप्रस्थानेषु केषाञ्चिद्धेतूनां साध्यतदभावयो: समानाकारतया संभवं पश्याम: ।

पृ. २७५ प्रमाणान्तरबलात्त सिद्धयत: साध्यविशेषस्य विपर्यये बाधकमप्यस्तु, न पुन: महाविद्यादिहेतुभिरप्रयोजकै: सिद्धयत: ।

पृ. २७८ तस्मादव्यातभेद एवायमप्रयोजक: । तत्स्वभावानतिलङ्घनाच श्रीमहाविद्या–मानमनोहर–प्रमाणमञ्जर्यादिपठितवक्रानुमानस्यापि तथात्वम् ।

न्यायपरिशुद्धिटीका न्यायसाराख्या–(श्रीनिवासाचार्यकृता)

पृ. १२६ अन्याहततात्प्यविपर्ययत्वादेव कुदृष्टिभिः स्वाभिमतसाधनत्वेनोत्प्रेक्षितानि महाविद्या-नुमानानि आभासीकृतानीत्याह—अत एवेति ।

पृ. १९९ महाविद्यारीतीनामिति । महाविद्यारीतयश्च प्रतितत्त्वाद्याह्निकेऽस्माभिः प्रपञ्चि-तास्तत्र द्रष्टव्याः ।

पृ. २७६ तथा च मानान्तरात्ताव्यत्सिद्धौ महाविद्यायाः साधनत्वं न पुरस्कार्यमित्यप्रयोजिकै-महाविद्या इति भावः ।

पृ. २७८ श्रीमहाविद्या मानमनोहरः प्रमाणमञ्जरीति ग्रन्थनामधेयानि । एवंजातीयका अन्येऽपि ग्रन्थाः सन्ति । तत्र तत्र पठितानि परपक्षसाधारणानि वक्रानुमानान्यनयोजक-तया व्याप्तत्वात्सिद्धान्तमूलान्येवेत्यर्थः ।

तत्त्वमुक्ताकलापः सर्वार्थसिद्धिसमाख्यटीकायुतः–(श्रीवेङ्कटनाथवेदान्ताचार्यकृतः)

पृ. ४७८ अत्र मतभेदेन लक्षणद्वयमाह । साधनाव्यापकत्वे सति साध्यसमव्याप्तो धर्म उपा-धिरित्युदयनः । साधनाव्यापकत्वे सति साध्यव्यापक इति समशब्दप्रतिक्षेपे-ण वादीन्द्रः ।

पृ. ४८६ अतो वक्रानुमानं केवलान्वयित्वमपि साधनजातिरेव, स्वव्याघातात् । जातिर्द्विविधा, साधनजातिर्दूषणजातिश्च । तत्र साधनजातिर्महाविद्या, दूषणजातिः प्रतिधर्मसमा-धिरिति विचक्षणानां निर्णयः । एतत्तत्वं विडम्बने विस्तरेण द्रष्टव्यम् । अतो वक्रानुमानस्य नानुमानत्वमसङ्ग इति ।

पृ. ४८९ कुमारिलादयो व्यतिरेकिणं निरस्यन्ति, वादीन्द्रादयोऽन्वयिनमिति विशेषं दर्शयति ।
,, ,, एवं केवलान्वय्यङ्गीकारे महाविद्याप्यङ्गीकार्या, तस्या अपि केवलान्वयित्वात् । तथा च पूर्वोक्तं तन्निराकरणं न युज्यते । किञ्च सकलसम्मतिः केवलान्वयी महाविद्येत्युच्यते । तच्च न संभवति । प्रमेयत्वाभिधेयत्वादीनां सर्वस्यत्वे स्वात्म-न्यपि वृत्तिप्रसङ्गात्, तदभावे केवलान्वयित्वाभावादिति चोदयति—प्रमेयस्य इति ।

पृ. ४९० इत्थं बहुविधतर्ककर्कशं महाविद्यानुमानं न प्रतिष्ठितमित्याह—तत्र चैवं विक-ल्पादिति । यथासम्भवं विकल्पानां सुपरत्वादित्यर्थः । इत्यनुप्रेक्षा केवलान्वयिरूप-महाविद्यादिविभागं विघटयतु न च, सर्वथा अन्वयव्यतिरेकिव्याप्तिग्रहानि-वृत्तेरित्याह—इतीति । न चेत्युक्त्या विभागविघटनं न सिद्ध्यतीत्यभिप्रैति । अय-मभिप्रायः—महाविद्या चेत् स्वव्याघातादिभिः प्रागेव दूषिता, अनित्यत्वादि-साधकं कृतकत्वादिकं तु सर्वथा केवलान्वयि च भवति । तस्य तद्दृष्टान्ता-भावेऽपि न दूषणमिति ।

पृ. ४९१ एतत्केवलान्वयिविशेषैर्दूषणप्रयोगे सूत्रकारो दुर्वचः । ... कुर्महाविद्याभि-र्विडम्बयन् न सूत्रकारः, ...

सर्वदर्शनसंग्रहः-(माधवाचार्यकृतः)

पृ. ९८ एवं च कर्तृजन्यत्वेऽनुपाधिसमस्तकारकत्वानुमानकारणककार्यत्वोपाधिसम्भव इति स्थूलः प्रमादः । तथा निरटङ्कि शङ्करकिङ्करेण—" अनुकूलेन तर्केण सनाथे सति साधने । साध्यव्यापकताभङ्गात्पक्षे नोपाधिसंभवः " ॥ इति ।

लक्षणावलीटीका न्यायमुक्तावली-(शेषशार्ङ्गधरकृता)

पृ. ६ न च केवलान्वयित्वेन सत्प्रतिपक्षत्वासंभवः । केवलान्वयित्वस्यैवासंभवात् । दशश्लोकीविडम्बने तदनिरुक्तेरुक्तत्वात् ।

पृ. २३ वादीन्द्रास्तु त्रसरेणुः सावयवावयवो महत्त्वे सति चाक्षुषत्वात् घटवदित्याहुः ।

पृ. ४२ वादीन्द्रास्त्वेवमाहुः—कालार्थत्वं तु अनाशङ्कनीयमेव, गुणत्वेनैवाभ्युपगमात् परत्वापरत्ववत् ।

महाविद्याविडम्बनग्रन्थस्थविषयानुक्रमणी ।

प्रथमः परिच्छेदः ।

द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः ।

(सूचीपत्राणि)

ॐ

श्रीवादीन्द्रपण्डितविरचितं

महाविद्याविडम्बनम् ।

वाक्कायचेतःप्रभवापराधप्रबन्धसम्बन्धतमःप्रकाश ।
उन्मुद्रितज्ञानसुधानिधान गौरीपते त्वां शरणं प्रपद्ये ॥ १ ॥

श्रीभुवनसुन्दरसूरिविरचिता

महाविद्याविडम्बनवृत्तिः ।

श्रीगौर्यस्य त्रिलोक्यपि पदैर्युक्ताऽष्टमैः पर्यय-
द्रव्यौघव्ययवद्ध्रुवाप्य्य नयानन्तेक्षणप्रेक्षणा ।
लोकालोकमनेयगोचरमिता स्याद्वादवादं स्वं
दत्ते शाश्वतसौख्यदं स जयतान्मायाक्षरेन्द्रो जिनः ॥ १ ॥
यां कन्दप्रभवन्मृणालबिलसत्तन्त्वात्मना मूर्धगां
शक्तिं कुण्डलिनीं समुज्ज्वलसुधाधाराः किरन्तीं बुधाः ।
पश्यन्त्यन्तरपि विचिन्त्य कवितैश्वर्येण वाचस्पतिं
बिद्रुर्वन्ति मुदेऽस्तु सा भगवती श्रीशारदादेवता ॥ २ ॥
तर्कादिग्रन्थविषये यत्किञ्चिद्व्याख्यायते मया ।
तत्र श्रीगुरुरत्नाकराणां वाग्विजृम्भितम् ॥ ३ ॥
श्रीमत्तपागणनभोऽङ्गणभानुकल्पश्रीसोमसुन्दरगुरोः प्रवरोपदेशम्
आसाद्य सारमिदं क्रियते मयैतद्ग्रन्थस्य दुर्गमपदार्थविवेचनम् ॥ ४ ॥
अथ व्याख्यायते किञ्चिन्महाविद्याविडम्बनम् ।
स्वाभ्यासानुसारेण मन्दधीभिरिह हृदे ॥ ५ ॥

(भुवन०)—इह हि [illegible] श्रीमद्वादीन्द्रो महाविद्या [illegible] महाविद्या [illegible] महाविद्याविडम्बनं [illegible]

१ [illegible]

१ महाविद्या०

शिष्टाः कचिदिष्टे वस्तुनि प्रवर्तमानाः स्वाभीष्टदेवतानमस्कारपूर्वं प्रवर्तन्ते इति पूर्वपुरुषमार्गानुवर्तनाय निर्विघ्नं शास्त्रपरिसमाप्तये स्वपरयोर्मङ्गलाभ्युदयाय चादौ नमस्कारमाह—वाक्कायचेतः प्रभवेत्यादि । हे गौरीपते महेश, त्वामहं शरणं प्रपद्ये । गौर्याः पतिः गौरीपतिरित्युक्तेऽन्योऽपि पुरुषविशेषः स्यादित्याशङ्क्याह—उन्मुद्रितेत्यादि । उन्मुद्रितं प्रकटीकृतं ज्ञानमेव सुधानिधानं येन सः। तथा तस्य संबोधनं हे उन्मुद्रितेत्यादि । एतावत्युक्ते कियज्ज्ञानशाली पुरुषविशेषोऽप्येवंविधः स्यात्, तद्व्यवच्छेदायाह—वाक्कायचेत इत्यादि । वाक्कायचेतोभ्यः प्रभवो योऽपरावो दुष्टभाषणकरणचिन्तनादिरूपस्तस्य प्रबन्धः सातत्यम् । तस्य यः संबन्धः, तद्रूपमेव यत्तमः तिमिरं, तस्मिन्प्रकाशः प्रकाशरूपः । यथा हि भान्वादिप्रकाशेन तमःपटलं विलीयते, तथा महेशोपासनया वाचिककायिकमानसदोषसंततिरपीत्यर्थः । एतावता एवंविधविशेषणविशिष्टत्वं महेश्वरस्यैव जाघटीति नान्यस्येति कर्तुरभिप्रायः । इति प्रथमपद्यार्थः ॥ १ ॥

समुल्लसति वादीन्द्रचन्द्रे शङ्करकिङ्करे ।
उन्मीलन्ति महाविद्यादोषकैरवकोरकाः ॥ २ ॥

(भुवन०)—अथ ग्रन्थकारः स्वस्य महाविद्यादूषणोद्घोषणायां कौशलं प्रचिकटयिषुराह—**समुल्लसति वादीन्द्रचन्द्रे इत्यादि** । वादीन्द्र एव चन्द्रः । तस्मिन्समुल्लसति दोषकैरवकुड्मला उन्मीलन्ति विकसन्तीत्यन्वयः । यश्चन्द्रः स भगवतो भालोपासनलालसतया शङ्करकिङ्करः स्यात् । तथा तदुदये कैरवकोरकोल्लासः स्यादेवेति युक्त एवायमर्थः ॥ २ ॥

अथ महाविद्या कथं समुत्पन्नेतिवाच्यमार्याद्वयमुच्यते—

भाट्टा नित्यं शब्दं यौगाद्या वादिनस्त्वनित्यं च ।
प्रतिजानते ततोऽयं जातस्तेषां विवादोऽत्र ॥ १ ॥
तत्तस्यानित्यत्वं प्रतिपादयितुं तु भाट्टवादीन्द्रान् ।
यौगाचार्यो[1] वर्यः कृतवानेतां महाविद्याम् ॥ २ ॥

अत्राद्यपरिच्छेदे महाविद्यानुमानानि **वादीन्द्रेण** प्रोक्तानि । तत्र महाविद्यास्वरूपमज्ञात्वा महाविद्या दुरधिगमेत्यतो महाविद्यारहस्यं पद्यत्रयेण प्रकाश्यते । तथा हि—

अन्वयिव्यतिरेकित्वोपेतमूलानुमाविधौ ।
महाविद्यानुमानं तु प्रयोज्यं केवलान्वयि ॥ ३ ॥

यत्र मूलानुमानं मुख्यानुमानमन्वयव्यतिरेकि स्यात् तत्र महाविद्यानुमानं प्रयोज्यम् । किं विशिष्टं, केवलान्वयि । तथाहि—अनित्यः शब्दः कृतकत्वात् घटवत् इत्यत्रान्वयव्यतिरेकिणि मूलानुमाने महाविद्यानुमानं यथा—अयं शब्दः स्वस्वेतरवृत्तित्वानधिकरणेत्यादि । इदं च केवलान्वयि एवेत्यर्थः ॥ महाविद्यानुमानेषु सर्वेष्वेते भावा विचार्याः । तथाहि—

शब्दस्यास्थिरतोपलक्षणमिदं साध्यं तु चित्तेप्सितं
दृष्टान्ताय च केवलान्वयितया स्थाप्याः पदार्थाः समे ।

---

१ योगाचार्यो' इति च पुस्तकपाठः ।

सर्वत्रैव यथार्थसिद्धियुगलावृत्तिर्विचार्या त्रिधे-
त्याद्यं सर्वमवेक्षणीयमखिलप्रौढानुमानेष्विह ॥ ४ ॥

अत्र महाविद्यानुमानेषु यत् शब्दानित्यता साध्यते तदुपलक्षणम् । तेनानेन प्रकारेण स्वचिकीर्षितं नित्यत्वानित्यत्वसत्त्वासत्त्वपौरुषेयत्वापौरुषेयत्वसकर्तृकत्वाकर्तृकत्वादि सर्वं साधनीयम् । तत्र शब्दस्यानित्यतासाधनायानुमानं क्रियते । तथाहि—अयं शब्दः स्वस्वेतरवृत्तित्वानधिकरणानित्यनिष्ठधर्मवान्, मेयत्वात्, घटवत् । अथानेनैवानुमानेन श्रुतेः पौरुषेयत्वं साध्यते । तथाहि—श्रुतिः स्वस्वेतरवृत्तित्वरहितपौरुषेयनिष्ठाधिकरणं, मेयत्वात्, घटादिवत् । एवमनेन प्रकारेणान्यदपि सर्वानुमानैः सर्वं साधनीयम् । दृष्टान्ताय च केवलान्वयीति । अत्र महाविद्यानुमानेषु सर्वे नित्या अनित्याश्च पदार्थास्तद्धर्माश्च दृष्टान्तीकार्याः । पक्षं पक्षतुल्यं च वर्जयित्वा पक्षतुल्यानां पक्षवत्सन्दिग्धसाध्यवत्त्वात् । पक्षे च स्वसाध्यसाधने तद्वदेव । पक्षतुल्येष्वपि तत्साध्यसिद्धेः । अत्र च सर्वेऽपि सपक्षाः कुत इत्याशङ्कायां केवलान्वयीत्युक्तम् । महाविद्याहेतोः केवलान्वयित्वात्, केवलान्वयिनि विपक्षाभावात्, सर्वेऽपि पदार्थाः सपक्षा एव । सर्वत्रैवेत्यादि । सर्वत्र महाविद्यानुमानेषु प्रायो युगलावृत्तिर्विचार्या त्रिधा । तथाहि—यो धर्मः स्वस्मिन्नेव वर्तते न स्वेतरस्मिन्, सोऽपि स्वस्वेतररूपे युगले न वर्तते । तथा यः स्वेतरस्मिन्नेव वर्तते न स्वस्मिन्, सोऽपि स्वस्वेतरयुगले न वर्तते । तथा यः स्वस्मिन्स्वेतरस्मिंश्च न वर्तते, सोऽपि स्वस्वेतरयुगले न वर्तते । अत्र चानुमाने शब्दे विचार्यमाणो धर्मः शब्दत्वादिः स्वस्मिन्नेव वर्तते न स्वेतरस्मिन्, ततः स युगलावृत्तिरुच्यते । तथा दृष्टान्ते घटादौ विचार्यमाणाः घटत्वादयः स्वेतरस्मिन्नेव वर्तन्ते न स्वस्मिन्, तथा क्वाप्युभयत्राप्यवर्तिनो भवन्ति, तेऽपि युगलावर्तिन उच्यन्त इत्यर्थः । इत्यादि सर्वं यथार्थसिद्धि अर्थसिद्ध्यनतिक्रमेण विचार्यमिति काव्यार्थः ॥

एवंविधं साध्यमनित्यतां विना शब्दस्य नोत्पद्यत एव तस्मात् ।
शब्दोऽस्थिरः स्यादिति पारिशेष्यात्सर्वानुमानेष्विह साध्यसिद्धिः ॥ ५ ॥

एवंविधं स्वस्वेतरवृत्तित्वानधिकरणानित्यवृत्तिधर्मवानित्यादिरूपं महाविद्यासाध्यं शब्दस्य पक्षीकृतस्यानित्यतां विना नोत्पद्यते । तस्माच्छब्दोऽनित्यः स्यादित्येवंविधपारिशेष्यात्सर्वमहाविद्यानुमानेषु अनित्यत्वादिरूपसाध्यसिद्धिर्विधेया । यतः प्रायेण हि महाविद्यानुमानेषु पारिशेष्येणैव विवक्षितसाध्यसिद्धिर्विधीयते । परिशेषलक्षणं चेदम्—“ प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः । ” इति पद्यार्थः ॥

केवलान्वयिनि व्यापके प्रवर्त्तमानो हेतुः पक्षे व्यापकप्रतीत्यपर्यवसानबलादन्वयव्यतिरेकिसाध्यविशेषं वाद्यभिमतं साधयन्महाविद्येत्युच्यते । तस्य च महाविद्यात्वमसिद्धत्वादिसकलदोषविरहः । प्रमेयत्वादीनां निर्णीतपक्षवृत्तित्वेन पक्षधर्मत्वासिद्धेरसम्भवात् । केवलान्वयिनि साध्याभावाप्रसिद्धौ साध्या-

---

१. 'सर्वमहा' इति च पुस्तकपाठः । २. 'पि च स्वेतर' इति च पुस्तकपाठः । ३. 'सिद्धादिर्' इति च पुस्तकपाठः ।

भावाधिकरणविपक्षरूपव्यावर्त्यासम्भवेन यस्य कस्यचिदुपाधित्वेनाभिधीयमानस्यावश्यकपक्षे[१]तरत्व[२]दोषग्रस्तत्वेनोपाधित्वानुपपत्तौ व्याप्यत्वासिद्धेरपि निरस्तत्वात् । केवलान्वयिनि साध्याभावाप्रसिद्धत्वेनैव च साध्याभाववन्मात्रवृत्तित्व[३]साध्याभाववद्वृत्तित्वसाध्याभावसाधकसमानबलसाध्याभावसाधकाधिकबलरूपाणां विरुद्धत्वानैकान्तिकत्व[४]प्रतिपक्षबाधानामप्यनुपपत्तेः । विपक्षाभावेन च विपक्षवृत्तित्वशङ्कासंभवेन तन्निवृत्त्यर्थं तर्काकाङ्क्षाभावेन तर्कविरहादीनामप्यदूषणत्वादिति ।

(भुवन०)—खण्डनीयस्वरूपानिरूपणे खण्डनरूपविडम्बनं निरूपयितुं न शक्यम । अतो ग्रन्थकारः प्रथमं महाविद्यां विवक्षुस्तल्लक्षणमाह—**केवलान्वयिनि व्यापके प्रवर्तमानो हेतुरित्यादि ।** हेतुर्महाविद्या उच्यते । किं कुर्वाणः । प्रवर्तमानः । कस्मिन् । केवलान्वयिनि व्यापके । महाविद्यासाध्ये इत्यर्थः । किं कुर्वन् । साधयन् । किं कर्म । अन्वयव्यतिरेकिसाध्यविशेषम् । अन्वयश्च व्यतिरेकश्चान्वयव्यतिरेकौ । तौ विद्येते यस्य सोऽन्वयव्यतिरेकी, अनित्यः शब्दः कृतकत्वादित्यादेर्मूलानुमानस्य हेतुः । तस्य साध्यविशेषमनित्यत्वादि । तच्च किंविशं, वाद्यभिमतम् । कस्मात्साधयन् । **पक्षे व्यापकेति ।** पक्षे शब्दादौ घटात्मादौ वा महाविद्यासंबन्धिनि । व्यापकं साध्यं महाविद्यायाः । तस्य प्रतीतिः परिज्ञानं, तस्या अपर्यवसानमनुपपत्तिः, तद्बलात् । इदमत्र हृदयम्—अयं शब्दः स्वस्वेतरवृत्तित्वानधिकरणानित्यनिष्ठधर्मवान् इत्यत्रैवंविधं महाविद्यासाध्यं शब्दे तदैव स्याद्यदि शब्दस्यानित्यत्वं भवेत्, नान्यथा । तस्माच्छब्दस्यानित्यत्वं स्वीकर्तव्यमित्येवमनुपपत्तिबलात् वादिनोऽभिमतमनित्यत्वादिरूपं साध्यं साधयन् हेतुर्महाविद्योच्यते इति संटङ्कः । महाविद्याहेतोर्महाविद्यात्वं किमुच्यते इत्याकाङ्क्षा[५]यामाह—**तस्य च महाविद्यात्वमिति ।** तस्य महाविद्याहेतोर्महाविद्यात्वमसिद्धत्वविरुद्धत्वादिसकलदोषविरहः । असिद्धत्वादिदोषविरहे हेतूनाह—**प्रमेयत्वादीनामिति ।** मेयत्वादयो महाविद्याहेतवो हि निश्चितं पक्षे वर्तन्ते इति तेषां पक्षधर्मत्वासिद्धेरसंभव एव । एतावता महाविद्याहेतोः पक्षधर्मत्वासिद्धत्वमसिद्धस्याद्यो भेदो निराकारि । अथासिद्धद्वितीयभेदो व्याप्यत्वासिद्धत्वं, तदुत्थापनाय हेतुमाह—**केवलान्वयिनीति ।** केवलान्वयिनि महाविद्याहेतौ साध्यं महाविद्यासाध्यं, तस्य योऽभावस्तस्याप्रसिद्धौ । कोऽर्थः । महाविद्यासाध्यस्य केवलान्वयित्वेन क्वाप्यभावो नास्ति । ततः साध्याभावाप्रसिद्धौ सत्याम् । **साध्याभावाधिकरणेति ।** साध्यं महाविद्यासाध्यं, तस्य योऽभावः, तस्याधिकरणं यो विपक्षः, तद्रूपव्यावर्त्यस्यासंभवेन यस्य कस्यापि दीयमानस्योपाधेरवश्यभावी यः पक्षेतरत्वदोषः, तद्ग्रस्तत्वेन । अयमाशयः—‘ साधनाव्यापकः साध्यव्यापक उपाधिः ’ इत्युपाधिलक्षणम् । स चोपाधिः सपक्षे दीयते, तथा पक्षे विपक्षे चावर्तमानो विलोक्यते, यथा—विमता हिंसा अधर्मसाधनं, हिंसात्वात् , म्लेच्छहिंसावदित्यत्र म्लेच्छहिंसायां निषिद्धत्वमुपाधिः । अयं च साधना-

---

१ ‘वश्यप’ इति ज पुस्तकपाठः । २ ‘तरत्वादिदो’ इति ज पुस्तकपाठ । ३ ‘ साध्याभाववद्वृत्तित्व ’ इति पदं ज पुस्तके नास्ति । ४ ‘त्वसत्प्रतिपक्षत्वबा’ इति ज पुस्तके ५ ‘त्याशङ्कायामाह’ इति च पुस्तकपाठः ।

व्यापकः साध्यव्यापकश्चास्ति । तथा पक्षे विनतहिंसारूपे विपक्षे देवपूजादौ च स उपाधिर्न वर्तते । पक्षविपक्षयोर्विधेयत्वेन निषिद्धत्वाभावात् । एतावता चोपाधेः पक्षविपक्षौ व्यावर्त्यौ भवतः । यत्र चोपाधेः पक्ष एव व्यावर्त्यः स्यान्न तु विपक्षः, तत्रोपाधेः पक्षेतरत्वं दोषः । यतः पक्षेतरस्योपाधित्वे अग्निमानयं पर्वतो धूमवत्त्वादित्यत्रापि पर्वतेतरत्वमुपाधिः स्यात् । तथा च सर्वानुमानोच्छेदः प्रसज्येत । तस्मादत्र महाविद्यानुमाने विपक्षस्यैवाभावात् विपक्षरूपव्यावर्त्यासंभवेन यः कश्चनोपाधिरुत्पादयिष्यते स पक्षेतरत्वदोषग्रस्तो भविष्यतीति महाविद्यानुमानोपाधेरुपाधित्वानुपपत्तौ तस्यां किमित्याह—**व्याप्यत्वासिद्धेरपि निरस्तत्वादिति** । इदमत्र तत्त्वम्—औपाधिकव्याप्तिको व्याप्यत्वासिद्धः । स चासिद्धभेद एव । अत्र चोपाधेरभावाद्व्याप्यत्वासिद्धेरप्यभाव एवेति महाविद्याया असिद्धता निरस्ता । अथ विरुद्धत्वादिदोषनिरासाय हेतुमाह—**केवलान्वयीत्यादि** । केवलान्वयिनो महाविद्यानुमानस्य यत्साध्यं तदभावस्य यदप्रसिद्धत्वम् । अयं भावः—साध्याभावो हि विपक्षे भवति । अत्र च केवलान्वयित्वेन विपक्षाभावात्साध्याभावाप्रसिद्धिः । तेन हेतुना किमित्याह—**साध्याभाववन्मात्रवृत्तित्वेति** । अत्र मात्रशब्दोऽपरव्यवच्छेदी । ततः साध्याभाववति विपक्षे एव यो वर्तते न तु सपक्षे, एतावता विरुद्धः । 'पक्षविपक्षमात्रवृत्तिर्विरुद्धः' इति तल्लक्षणात् । **साध्याभाववद्वृत्तित्वेति** । साध्याभाववति विपक्षे वर्तते । अत्र मात्रशब्दाभावात्सपक्षेऽपि वर्तते । तथा चानैकान्तिकः, 'पक्षत्रयवृत्तिरनैकान्तिकः' इति तल्लक्षणात् । **साध्याभावसाधकसमानबलेति** । साध्याभावसाधकः सन् पूर्वहेतोः समानबलः । एतावता सत्प्रतिपक्षापरपर्यायः प्रकरणसमः, 'तुल्यबलहेतुसाधितसाध्यव्यतिरेकः प्रकरणसमः' इति तल्लक्षणात् । **साध्याभावसाधकाधिकबलेति** । एतावतानुमानबाधितकालात्ययापदिष्टः । यत्र पूर्वस्मादनुमानादुत्तरमनुमानं समानबलं स्यात् तत्र प्रकरणसमत्वम्, यत्र च पूर्वानुमानात्परस्यानुमानस्याधिकबलं स्यात्तत्रानुमानबाधितकालात्ययापदिष्टत्वम्, इति प्रकरणसमानुमानबाधितकालात्ययापदिष्टयोर्भेदः । **प्रतिपक्षबाधानामिति** । प्रतिपक्षः प्रकरणसमः । बाधः कालात्ययापदिष्टः । एतावता असिद्धत्वादिहेत्वाभासचतुष्कं महाविद्यायां निरस्तं । ननु तथापि तर्कदोषविरहः कथं, तर्कविरहादीनामपि दूषणत्वादित्याशङ्क्याह—**विपक्षाभावेनेति** । अत्र हि विपक्षाभावेन हेतोर्या विपक्षवृत्तित्वाशङ्का तस्या अप्यभाव एव, तेन कारणेन । **तन्निवृत्त्यर्थमिति** । विपक्षवृत्तित्वाशङ्कानिवृत्त्यर्थम् । **तर्काकाङ्क्षाभावेनेति** । तर्काकाङ्क्षाया योऽभावस्तेन । **तर्कविरहेत्यादि** । अयमाशयः—अन्वयवत्त्वं हेतुर्भवतु, महाविद्यानुमानोक्तं साध्यं मा भूत्, विपक्षे किं बाधकम् । एवंविधशङ्कायां तर्को विधीयते यथा—अग्निमानयं पर्वतो धूमवत्त्वात् महानसवदित्यत्र धूमवत्त्वं भवतु, वह्निमत्त्वं मा भूत्, विपक्षे किं बाधकमित्याशङ्कायां विपक्षबाधकस्तर्कः प्रयोज्यः । यथाहि—यद्यनग्निः स्यात्तर्हि निर्धूमः प्रसज्येत, यथा जलाशयादिः, इति विपक्षबाधकतर्केण धूमवद्धेतौ विपक्षवृत्तित्वाशङ्काया निरासः । यत्र च विपक्षबाधकस्य तर्कस्याभावः, तत्र तर्कविरहदूषणं स्यात् । तदत्र न । विपक्षस्यैवाभावादित्यर्थः ।

सा चेयं महाविद्या बहुप्रकारा—काचिदन्वयव्यतिरेकिणः पक्षं पक्षीकृत्य प्रवर्तते, काचित्सपक्षं, काचिद्विपक्षं, काचित्साध्यं, काचित्साध्याभावमित्यादि ।

(भुवन०)—अथ प्रकारतो महाविद्यायाः स्वरूपं निरूपयन्नाह—सा चेयं महा-

विद्या बहुप्रकारेति। काचिदन्वयव्यतिरेकिण इति। अनित्यः शब्दः कृतकत्वादित्यादेर्मुख्यानुमानस्यान्वयव्यतिरेकिणः पक्षं शब्दादिकं पक्षीकृत्य प्रवर्तते इत्यर्थः। साध्याभावमित्यादि। साध्यं विवक्षितमनित्यत्वादि, तस्याभावः साध्याभावः। अनित्यत्वादिविपरीतं नित्यत्वादिसाध्यमित्यर्थः। अत्र चादिशब्देन पक्षमात्रनिष्ठं धर्मं, सपक्षमात्रनिष्ठं धर्मं, विपक्षमात्रनिष्ठं च धर्मं पक्षीकृत्य प्रवर्तमाना महाविद्या गृह्यन्ते।

१ तत्राद्या यथा—शब्दोऽनित्यः कृतकत्वादित्यत्रान्वयव्यतिरेकिणि अयं शब्दः स्वस्वेतरवृत्तित्वानधिकरणानित्यनिष्ठाधिकरणं मेयत्वाद्धटवदिति।

१ (भुवन०)—तत्र 'पक्षापक्षगतादन्यत्साध्यवद्वृत्तिपक्षगम्' इति कुलार्कपण्डितनिर्मितमहाविद्याग्रन्थस्थं कारिकार्धमुद्दिश्य पक्षं पक्षीकृत्य या महाविद्या प्रवर्तते प्रथमं तामाह—**अयं शब्दः स्वस्वेतरवृत्तित्वेत्यादि**। स्वशब्देन पक्षीकृतः शब्दः परामृश्यते, स्वेतरशब्देन च पक्षीकृतशब्दादन्ये सर्वेऽपि पदार्थाः। स्वश्च स्वेतरं च स्वस्वेतरे। तेषु वृत्तिर्वर्तनं येषां धर्माणामभिधेयत्वप्रमेयत्वादीनां, ते स्वस्वेतरवृत्तयः। तेषां भावः स्वस्वेतरवृत्तित्वम्। तेन अनाक्रान्तस्तेनानाश्रितः। अनित्ये निष्ठा अवस्थानं यस्य सोऽनित्यनिष्ठः। स्वस्वेतरवृत्तित्वानाक्रान्तश्चासौ अनित्यनिष्ठश्च तस्य धर्मस्याधिकरणमाश्रय इति विग्रहः। शब्दोऽधिकरणमित्युक्ते शब्दत्वनित्यत्वाद्यधिकरणत्वसिद्धया अर्थान्तरत्वं स्यात्, तन्निवृत्त्यर्थमनित्यनिष्ठेत्युक्तम्। शब्दोऽनित्यनिष्ठाधिकरणमित्युक्ते च मेयत्वादिना अर्थान्तरता स्यात्। अत उक्तं स्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठाधिकरणमिति। एवमप्युक्ते चाप्रसिद्धविशेषणता। पक्षमात्रनिष्ठानित्यत्वसिद्धेः पूर्वमेवंभूतार्थस्य पक्षादन्यत्र घटादौ दृष्टान्तीभूतेऽसंभवेनाप्रसिद्धिः, अत उक्तं स्वेति। पक्षव्यतिरिक्तेषु पक्षतदितरवृत्तित्वरहितो धर्मः पक्षान्योन्याभावः सर्वत्रास्तीति नाप्रसिद्धविशेषणता। शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्येतावत्येवोच्यमाने व्याघातः। यस्य कस्यचिदपि शब्दधर्मस्य शब्दतदितरवृत्तित्वानाक्रान्तत्वस्यासंभवात्। यस्य कस्यचिदपि शब्दस्य शब्दत्वाश्रयत्वेन शब्दत्वात्। शब्दान्तरापेक्षया च शब्देतरत्वात्। अत उक्तं **अयमिति**। तथा च न व्याघातः। एतच्छब्दमात्रवृत्तेर्यस्य कस्यचिदपि एतच्छब्दत्वादेर्धर्मस्यैतस्मिन्नेव शब्दे पक्षीकृते वर्तनादन्यत्र चावर्तनादिति। तस्माच्छब्दविशेषस्य अनित्यत्वं प्रसाध्य सर्वशब्दानामपि तद्दृष्टान्तावष्टम्भेन तत्साधनीयमिति। स्वस्वेतरवृत्तित्वानाक्रान्ताऽनित्यनिष्ठश्च धर्म एतच्छब्दत्वादिः पक्षेऽनित्यत्वं विना न संभवत्येव, तेन शब्दानित्यत्वसिद्धिः। सपक्षे च सर्वत्र पक्षान्योन्याभावादिर्धर्मो ज्ञेयः॥

यत्पुनरत्र कैश्चिदुक्तं स्वस्वेतरवृत्तित्वानाक्रान्तत्वं नाम स्ववृत्तित्वविशिष्टस्वेतरवृत्तित्वात्यन्ताभावः। विशिष्टं च न विशेषणविशेष्याभ्यामन्यत्किञ्चित्। विशिष्टाभावोऽपि विशेषणाभावविशेष्याभावोभयाभावत्रयेभ्यो न व्यतिरिक्तः कश्चित्। तेन स्ववृत्तित्वविशिष्टस्वेतरवृत्तित्वाभावःस्ववृत्तित्वाभावो वा स्यात्, स्वेतरवृत्तित्वाभावो वा, उभयोरभावद्वयं वा। आद्ये स्ववृत्तित्वानाक्रान्तस्वेतरवृत्त्यनित्यनिष्ठधर्मवान्पक्षः इति प्रतिज्ञार्थः स्यात्। तथा च व्याघातः। न हि पक्षवृत्तित्वरहितः पक्षे वर्तते इति संभवति। द्वितीये च स्वे-

तरवृत्तित्वानाक्रान्तस्ववृत्त्यनित्यनिष्ठधर्मवान्पक्ष इतिप्रतिज्ञार्थः स्यात्। तथा चाप्रसिद्धविशेषणत्वम्। न हि पक्षेतरवृत्तित्वरहितः पक्षवृत्तिरनित्यनिष्ठो धर्मः पक्षनिष्ठानित्यत्वसिद्धेः पूर्वं शक्योऽधिगन्तुम्। तृतीये च स्ववृत्तित्वानाक्रान्तस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठधर्मवान्पक्ष इति प्रतिज्ञार्थः स्यात्। तथा च पूर्वोपपादितव्याघाताप्रसिद्धविशेषणत्वे दुर्वारे। एवं महाविद्यान्तरेष्वपि व्याघाताप्रसिद्धविशेषणत्वादयो द्रष्टव्या इति।

श्रीमदानन्दपूर्णविरचिता

महाविद्याविडम्बनटीका।

(आनं०)— × × *नन्वस्तु दूषणं सर्वत्रोहनीयमित्याह—एवमिति।

(भुवन०)—विडम्बनकाण्डान्तरैराविर्भावितं दूषणं प्रस्तावयति—यत्पुनरिति। स्वस्वेतरवृत्तित्वानाक्रान्तत्वं नामेति। यः कश्चनानित्यवर्ती धर्मः शब्दे साधयितुमभिप्रेतस्तस्य स्वस्वेतरवृत्तित्वानाक्रान्तत्वं विद्यते। तत्र स्ववृत्तित्वविशिष्टं यत्स्वेतरवृत्तित्वं तदत्यन्ताभावत्वम्। विशिष्टं च न विशेषणविशेष्याभ्यामन्यदिति। अत्र स्ववृत्तित्वविशिष्टं स्वेतरवृत्तित्वमुक्तम्। तत्र विशिष्टमिति भावप्रधाननिर्देशस्य विशिष्टत्वं ज्ञेयम्। तच्च विशेषणविशेष्यरूपमेव। न ततोऽन्यदित्यर्थः। विशिष्टाभावोऽपीति। विशिष्टस्याभावोऽपि विशेषणाभावो वा, विशेष्याभावो वा, उभयोर्विशेषणविशेष्ययोरभावद्वयं वा, न तद्व्यतिरिक्तः कश्चित्। एतावता विशिष्टाभावस्य सामान्येन विकल्पत्रयं कृतम्।

अथ स्ववृत्तित्वविशिष्टस्वेतरवृत्तित्वाभावस्य विकल्पत्रयं दूषयति—तेन स्ववृत्तीत्यादि। उभयोरभावद्वयं वेति। स्ववृत्तित्वाभावः स्वेतरवृत्तित्वाभावश्चेत्यभावद्वयम्। आद्यकल्पे [illegible]—आद्य इति। व्याघातेनाप्रसिद्धविशेषणत्वं दूषयति—तथा चेति। व्याघातमेवोपपादयति—न हीति। न हि शब्दादिपक्षवृत्तित्वरहितः [illegible] धर्मः [illegible] इति भावः। तेन स्ववृत्तित्वरहितत्वस्य [illegible]। [illegible] द्वितीयः [illegible]—द्वितीये चेति। [illegible] अनित्यनिष्ठो यो धर्मस्तद्वान् [illegible]—तथा चेति। [illegible] इति। न हि [illegible] [illegible]। [illegible]

1 [illegible]। 2 [illegible]।
* [illegible]।

तृतीये चेति । तमेव दूपयति–तथा चेति । पक्षवृत्तित्वरहितः पक्षे वर्तते इति व्याघातः । पक्षेतरवृत्तित्वरहितः पक्षवृत्त्यनित्यनिष्ठो धर्मोऽप्रसिद्ध इत्यर्थः । उक्तं दूषणमन्यत्रापि ज्ञेयमित्यतिदिशति–एवमिति ।

तदयुक्तम् । यथा पक्षवृत्तिधर्मेषु पक्षवृत्तित्वं धर्मः, यथा च पक्षेतरवृत्तिधर्मेषु पक्षेतरवृत्तित्वं धर्मः, एवं ये पक्षे तदितरस्मिंश्च वर्तन्ते धर्माः तेषु पक्षतदिरवृत्तित्वं नाम धर्मः । तदत्यन्ताभावश्च स्वस्वेतरवृत्तित्वानाक्रान्तत्वम् । तद्वांश्च स्वस्वेतरवृत्तित्वानाक्रान्तः । स चासावनित्यनिष्ठश्च । तेन स्वस्वेतरवृत्तित्वात्यन्ताभाववदनित्यनिष्ठधर्मवान्पक्ष इति प्रतिज्ञार्थः स्यात् । तथा च न व्याघातः । पक्षमात्रवृत्त्यनित्यनिष्ठधर्मसिद्ध्यापि प्रतिज्ञावाक्यार्थस्योपपन्नत्वादिति । न चाप्रसिद्धविशेषणत्वम् । पक्षमात्रनिष्ठधर्मात्यन्ताभावपक्षान्योन्याभावयोः पक्षव्यतिरिक्तनित्यानित्यनिष्ठयोरुक्तरूपयोरुभयवादिसिद्धत्वादिति । एवं महाविद्यान्तरेष्वपि व्याघताप्रसिद्धविशेषणत्वे परिहरणीये ।

(आनं०)—समाधत्ते–तदिति । स्ववृत्तित्वेन विशिष्टं स्वेतरवृत्तित्वं, तदत्यन्ताभावः स्वस्वेतरवृत्तित्वानाक्रान्तत्वमिति न विवक्षितं, किन्तु स्ववृत्त्या विशिष्टा स्वेतरवृत्तिः, तदभावः स्वस्वेतरवृत्तित्वं, तदत्यन्ताभावस्तथा विवक्षित इति सदृष्टान्तमाह–तथेति । प्रतिज्ञापर्यवसानमाह–तेनेति । एवमपि व्याघाततादवस्थ्यं विशिष्टवृत्तिनिष्ठधर्मनिषेधस्य विशेषणीभूतस्ववृत्तिनिषेधेन वाच्यत्वादित्य आह–तथा चेति । विशेष्यभूतस्वेतरवृत्त्यभावेनापि विशिष्टवृत्तिनिष्ठधर्मविशेषोपपत्तेरिति हेतुमाह–पक्षमात्रेति । तथा च पक्षस्यानित्यत्वसिद्धिः, अपरथा पक्षमात्रवृत्तेरनित्यनिष्ठधर्मत्वासिद्धेरिति भावः । पक्षस्यानित्यत्वसिद्धेः प्रागेवंभूतधर्माप्रसिद्ध्या अप्रसिद्धविशेषणत्वमत्राह–न चेति ।

(भुवन०)—उक्तदूषणपरिहारमाह–तदयुक्तमिति । स्ववृत्तित्वेन विशिष्टं यत् स्वेतरवृत्तित्वं तदत्यन्ताभावः स्वस्वेतरवृत्तित्वानाक्रान्तत्वमिति न विवक्षितं, किन्तु स्ववृत्त्या विशिष्टा या स्वेतरवृत्तिः तदत्यन्ताभावस्तथा विवक्षित इति । यथेत्यादि दृष्टान्तोपन्यासपूर्वकं दार्ष्टान्तिकमाह–एवं ये पक्षे तदितरस्मिंश्चेति । अयमभिप्रायः–केवलं स्ववृत्तित्वानाक्रान्तत्वं केवलं स्वेतरवृत्तित्वानाक्रान्तत्वं च यस्यानित्यवृत्तेर्धर्मस्य स्यात् स शब्दे न निषिध्यते, किन्तूभयवृत्तिर्निषिध्यते । स च सत्त्वप्रमेयत्वादिः । प्रतिज्ञापर्यवसानमाह–तेन स्वस्वेतरवृत्तित्वात्यन्ताभावेत्यादि । स्वस्वेतरयुगले वृत्तिर्येषां धर्माणां सत्त्वप्रमेयत्वादीनां तेषु स्वस्वेतरवृत्तित्वं नाम धर्मः, तस्य योऽत्यन्ताभावः, तद्वान् यः कश्चनानित्यनिष्ठो धर्मः श्रावणत्वकृतकत्वादिः, तद्वान्पक्ष इति प्रतिज्ञार्थः स्यादित्यर्थः । तथा च न व्याघातः । अत्र हेतुमाह–पक्षमात्रेति । पक्षमात्रवृत्तिर्योऽनित्यनिष्ठो धर्मस्तत्साधनेनापि प्रतिज्ञावाक्यार्थस्योपपन्नत्वादित्यर्थः । अप्रसिद्धविशेषणत्वमप्यत्र पक्षे न स्यादित्याह–न चेति । अत्र हेतुं ब्रूते–पक्षमात्रनिष्ठधर्मात्यन्ताभावेति । पक्षमात्रनिष्ठा ये धर्माः शब्दत्वश्रावणत्वादयः, तेषामत्यन्ताभावश्च

१ यथा पक्षे इति ग पुस्तकपाठः । २ °रुक्तरूपोपपन्नयोरुभ° इति ज पुस्तक पाठः ।

पक्षान्योन्याभावश्च । तयोः किंविशिष्टयोः । पक्षव्यतिरिक्तनित्यानित्यनिष्ठयोः । पक्षः शब्दः, तद्व्यतिरिक्ता ये नित्या आत्मादयोऽनित्याश्च घटादयः, तन्निष्ठयोः तद्वर्तिनोः । पुनः किंरूपयोः । उक्तरूपयोः स्वस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठयोः । वादिप्रतिवादिनोरुभयोरपि सिद्धत्वादित्यर्थः ।

ये तु सामान्यतः शब्दः शब्दतदितरवृत्तित्वानाक्रान्तानित्यनिष्ठाधिकरणमिति प्रतिजानते, तेषां स्पष्टो व्याघातः । यस्य कस्यचिदपि शब्दधर्मस्य शब्दतदितरवृत्तित्वेन शब्दतदितरवृत्तित्वानाक्रान्तत्वस्यासंभवात् । यस्य कस्यचिदपि शब्दस्य शब्दत्वाश्रयत्वेन शब्दत्वात्, शब्दान्तरापेक्षया च शब्देतरत्वादिति ।

(आनं०)—अयमिति पक्षविशेषणं हित्वा शब्दमात्रं धर्मीकृत्य प्रयुज्यतां लाघवादित्यत आह—ये त्विति । आकाशविशेषगुणत्वादेः शब्दमात्रवृत्तेः शब्दतदितरवृत्तित्वाभावात्कथं व्याघातस्तत्राह—यस्य कस्यचिदिति । शब्दत्वाधिकरणप्रतियोगिकेतरेतराभावाधिकरणनिष्ठत्वाभावात् कथं शब्देतरवृत्तित्वमत्राह—यस्य कस्यचिदपि शब्दस्येति ।

(भुवन०)—ननु पक्षमात्रनिष्ठधर्मात्यन्ताभावपक्षान्योन्याभाववत्तयोः स्थाने यथानुक्तं पक्षमात्रनिष्ठधर्मान्योन्याभावपक्षात्यन्ताभावयोरपि ग्रहणे को दोषः । उच्यते । पक्षमात्रनिष्ठधर्मान्योन्याभावस्य वैशेषिकादीनां मते धर्मधर्मिणोर्भिन्नत्वेन शब्देऽपि वर्तमानत्वात् स्वस्वेतरवृत्तित्वेन तद्वृत्तित्वानधिकरणत्वानुपपत्तिः । पक्षात्यन्ताभावस्य चाकाशाऽवृत्तित्वेन दृष्टान्तत्वानुपपत्तेः केवलान्वयित्वव्याघातश्च स्यादिति न तयोर्ग्रहणम् । एवमग्रेऽपि सर्वत्र महाविद्यानुमानादौ पक्षमात्रनिष्ठधर्मात्यन्ताभावपक्षान्योन्याभावयोर्ग्रहणे कारणं ज्ञेयम् ।

तेषां स्पष्टो व्याघात इति । अयमर्थः । अत्रायमितिपदं विना सामान्येन शब्द इत्युच्यमानेऽनित्यवृत्तित्वेन सिषाधयिषितस्य शब्दत्वश्रावणत्वादेः सर्वशब्दधर्मस्य यस्मिन्कस्मिंश्चिदपि घटेत्यादिरूपे पक्षीकृतशब्दे पक्षीकृतशब्दादितरस्मिन् पटलकुड्यादिरूपे शब्दान्तरे च वर्तमानत्वेन शब्दतदितरवृत्तित्वेन तदनाक्रान्तत्वं नोपपद्यते । अत्र चानित्यवृत्तित्वेन सिषाधयिषितः शब्दत्वादिः सर्वशब्दधर्मः शब्दतदितरवृत्तित्वानाक्रान्तो विवक्ष्यते । अतः स्पष्ट एव व्याघातः । अयमित्युच्यमाने तु एतच्छब्दत्वादिरेव धर्मः अनित्यवृत्तित्वेन विवक्षितः सिषाधयिषितः । स चैतच्छब्द एव वर्तते न शब्दान्तरेऽपि न तत्र व्याघात इति । व्याघातमेव 'यस्य कस्यचिदपि' इत्यादिना स्पष्टयति—यस्य कस्यचिदपीति । [illegible] ।

तस्मादेकैकमेव शब्दादिकं धर्मिणं निष्कृष्य पक्षीकृत्य सर्वमहाविद्याप्रयोगो द्रष्टव्यः । यथा अयं शब्दः शब्दतदितरवृत्तित्वानाक्रान्तानित्यनिष्ठाधिकरणमिति सामान्यतः प्रयोक्तव्या प्रतिज्ञा ।

(आनं०)—शब्दविशेष्यानित्यत्वं प्रसाध्य दृष्टान्तेन [illegible]

१ 'स्वधर्मत्वं' इति क पुस्तके नास्ति । २ '[illegible]' इति ख पुस्तकपाठः । ३ '[illegible]' इति ख पुस्तकपाठः ।

२ महाविद्या०

प्रयोगः सर्वशब्दानित्यत्वविषयः इत्यत आह—यद्वेति । शब्दशब्देतरेति । शब्दशब्देन शब्दत्वाधिकरणस्य तदितरशब्देन शब्दत्वानधिकरणस्य विवक्षितत्वान्न प्राचीनदोषानुषङ्ग इति भावः ।

(भुवन०)—तस्मादेकैकमिति । अयं विवक्षितो घटपटादिशब्द इत्येवं विभज्यैकैकं शब्दं पृथक् पक्षीकृत्य विवक्षितानित्यत्वसाधनेन तद्दृष्टान्तावष्टम्भेन सर्वशब्दानामनित्यत्वं प्रसाध्यमिति भावः। सर्वशब्दानामनित्यत्वप्रसाधनाय प्राह— यद्वा शब्दः शब्दशब्दत्वेति । शब्दः शब्दत्वाधिकरणं सर्वशब्दः । शब्दत्वरहितं[1] शब्दत्वानधिकरणं सर्वं विश्वं, तत्र यत् निष्ठत्वं तेन अनाक्रान्तो यः कश्चनानित्यनिष्ठो धर्मस्तथाधिकरणं शब्द इत्यर्थः । अत्र शब्दशब्देन शब्दत्वाधिकरणस्य, शब्दत्वरहितशब्देन च शब्दत्वानधिकरणस्य विवक्षितत्वान्न प्राचीनदोषानुषङ्ग इत्यभिप्रायः ।

ये तु अयं शब्दः स्वस्वेतरवृत्तिव्यतिरिक्तानित्यनिष्ठधर्माधिकरणमिति[2] प्रतिजानते, तेषां सिद्धसाधनं स्पष्टम् । स्वस्वेतरवृत्त्यभिधेयत्वादिव्यतिरिक्तस्वस्वेतरवृत्त्यनित्यनिष्ठप्रमेयत्वादिधर्माणां पक्षनिष्ठत्वेन वादिप्रतिवादिभ्यामङ्गीकृतत्वादिति । तस्मात्सर्वत्र तद्व्यतिरिक्तादिपदस्थाने तत्त्वानाक्रान्तत्वादिपदं प्रयोक्तव्यमिति ।

(आनं०)—एकदेशीयप्रयोगमनुवदति—ये त्विति । स्वस्मिन्स्वेतरेषु च वृत्तिर्यस्य स स्वस्वेतरवृत्तिः, तस्माद्व्यतिरिक्तोऽनित्यनिष्ठो यो धर्मस्तदाश्रय इत्यर्थः । कृत्यं पूर्ववत् । दूषयति—तेषामिति । तदुपपादयति—स्वस्वेतरेति ।

(भुवन०)—एकदेशीयप्रयोगमनुवदति—ये तु अयं शब्द इति । स्वस्मिन् स्वेतरेषु च वृत्तिर्यस्य स स्वस्वेतरवृत्तिरभिधेयत्वादिः, तद्व्यतिरिक्तोऽनित्यनिष्ठो धर्मः सत्त्वप्रमेयत्वादिः तदाश्रय इत्यर्थः । अत्र तत्त्वानाक्रान्तपदस्थाने तद्व्यतिरिक्तेति पदं प्रयुक्तमित्येतदेव वैचित्र्यम् । शेषं तु पूर्ववदेव ज्ञेयम् । अनूद्य दूषयति—तेषामित्यादि । सिद्धसाधनतामेवाह—स्वस्वेतरेति । स्वस्वेतरवृत्तिरभिधेयत्वादिधर्मः, तस्माद्व्यतिरिक्ता ये स्वस्वेतरवृत्तय एवानित्यनिष्ठाः प्रमेयत्वादयो धर्मास्तेषां पक्षनिष्ठत्वेनोभयोरपि सिद्धत्वात् स्पष्टैव सिद्धसाध्यतेत्यर्थः । अत्र च विवादपदापन्नः पक्षमात्रनिष्ठत्वे सत्यनित्यनिष्ठ एव धर्मो न तु सत्त्वप्रमेयत्वादिः, तस्य घटाद्यनित्यनिष्ठत्वेनानित्यनिष्ठत्वात्पक्षमात्रनिष्ठत्वानुपपत्तेः । तस्मादनिष्टार्थापत्त्या व्यतिरिक्तेति पदं न प्रयोज्यम् । तत्त्वानाक्रान्तेति । शब्दतदितरवृत्तित्वानाक्रान्त इत्येवं पदं प्रयोज्यम् ।

अयं च प्रमेयत्वादिर्हेतुः[3] स्वस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठधर्मवत्त्वं व्यापकं पक्षे गमयन्[4]नित्यत्वमन्तर्भाव्य गमयति । न हि पक्षेऽनित्यत्वमनधिगम्य पक्षमात्रनिष्ठधर्मस्यानित्यनिष्ठत्वं शक्याधिगमम् । नापि पक्षे पक्षमात्र-

---

१ महाविद्याविडम्बनग्रन्थस्यादर्शपुस्तकेषु तथा भुवनसुन्दरविरचितमहाविद्याविडम्बनवृत्तौ 'शब्दशब्दत्वरहित' इति पाठो दृश्यते । २ 'निष्ठाधिक' इति ज पुस्तकपाठः । ३ 'त्वादिहे' इति ग पुस्तकपाठः । ४ 'पक्षे साधय' इति ज पुस्तकपाठः ।

निष्ठानित्यनिष्ठधर्मवत्त्वमनधिगम्य पक्षतदितरवृत्तित्वानाक्रान्तानित्यनिष्ठधर्मवत्त्वं शक्याधिगमम् । पक्षव्यतिरिक्तमात्रवृत्तिधर्मस्य पक्षे व्याघातेनोपसंहर्तुमशक्यत्वात् । तदिदं व्यापकप्रतीतेरनित्यत्वादिकमनालम्ब्यानुपपत्तिरूपमपर्यवसानमाहुः ।

(आनं०)—प्रथमप्रयोगात्पक्षमात्रनिष्ठधर्मसिद्धावपि कथमनित्यत्वसिद्धिरित्यत आह—अयं चेति । स्वस्वेतरवृत्तित्वानाक्रान्तानित्यनिष्ठत्ववृत्तिरहितो वा स्वमात्रवृत्त्यनित्यनिष्ठो वा । आद्यो व्याहत इति द्वितीयः सिध्येत् । तस्यानित्यत्वं विना कानुपपत्तिरित्यत आह—नहीति । पक्षमात्रनिष्ठधर्मोऽत्यन्ताभावस्योक्तत्वेऽपि न तेन साध्यपर्यवसानं शक्यशङ्कमित्याह—नापीति । हेतुमाह—पक्षेति । प्रमेयत्वादिक पक्षे स्वव्यापकं साधयंस्तदपर्यवसानेन बाधमिमतं साधयतीति महाविद्यावादिनः सङ्गिरन्ते । त्वया पुनर्व्यापकप्रतीतेरनित्यत्वादिकमनालम्ब्य अनुत्पत्तिरन्यैवोक्तेत्यत आह— तदिदमिति ।

(भुवन०)—प्रथमप्रयोगात्पक्षमात्रनिष्ठधर्मसिद्धावपि कथं नित्यत्वसिद्धिरित्यत आह—अयं चेति । स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठ स्ववृत्तित्वरहितो(वा)स्वमात्रवृत्त्यनित्यनिष्ठो वा । प्रथमो विकल्पः पक्षे व्याहत इति द्वितीयः सिध्येत् । अनित्यत्वं विना तस्य कानुपपत्तिरित्यत आह—न हीति । पक्षे शब्देऽनित्यत्वमज्ञात्वा पक्षमात्रनिष्ठस्य शब्दत्वादेर्नानित्यनिष्ठत्वं ज्ञातुं शक्यमित्यर्थः । पूर्वमनित्यत्वं विनाऽनित्यनिष्ठत्वं नोपपद्यते इत्युक्तं, इदानीं पक्षमात्रवृत्तिधर्मस्यानित्यनिष्ठत्वं विना पक्षतदितरवृत्तित्वानाक्रान्तानित्यनिष्ठत्वमपि नोपपद्यत इत्याह— नापि पक्षे पक्षमात्रेति । इदं पक्षमात्रनिष्ठो धर्मः शब्दत्वादिरनित्यनिष्ठ इत्येवमज्ञात्वा पक्षतदितरवृत्तित्वानाक्रान्तानित्यनिष्ठधर्मवत्त्वं पक्षे नैव शक्यमधिगन्तुमित्यर्थः ।

ननु सपक्षमात्रवृत्तीनां घटत्वादिधर्माणां सपक्षमात्रवृत्तित्वेन [illegible]त्वात् [illegible] पपत्तानां संभवात् एव पक्षे साधयिष्यन्ते, किं पक्षमात्रनिष्ठानित्यनिष्ठधर्मत्वादिविकल्पेनेत्यत आह हेतुमाह—पक्षव्यतिरिक्तेति । केवलसपक्षवृत्तिधर्मस्य घटत्वाकाशत्वादेः । पक्षे शब्दे । उपसंहर्तुमिति । उपपादयितुमशक्यत्वादित्यभावः । तदिदमित्यादि । व्यापकप्रतीतेरनित्यत्वादेर्व्यापकस्य [illegible] प्रतीतेः अनित्यत्वादिकमनालम्ब्य अनित्यत्वं विना । अपर्यवसानमाहुरिति । अनित्यत्वं विना [illegible] विश्रान्तिर्न भवतीति भावः ॥ १ ॥

२ अयं शब्दः अनित्यत्वात्यन्ताभावप्रतियोगि[illegible]प्रमेयत्वादिति । अस्यां पक्षमात्रवृत्ति[illegible] दृष्टान्तः । अत्र यानित्यत्वात्यन्ताभावप्रतियोगी [illegible]त्यन्ताभावप्रतियोगित्वं नाम धर्मः । तदत्यन्ताभाववान् धर्मः पक्षे साध्यते । स च पक्षेऽनित्यत्वमनधिगम्य न शक्योऽधिगन्तुम् । शब्दस्यानित्यत्वानधिगमे [illegible] शब्द-

१ [illegible] इति स्यात् (?) । २ [illegible] इति क पुस्तके ।

र्माणामनित्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मत्वेन तदनाक्रान्तत्वानुपपत्तेः। पक्षेऽनित्यत्वाभ्युपगममात्रेण प्रकृतसाध्यार्थस्योपपन्नत्वेन न व्याघातः। पक्षवृत्तित्वाभावेन अनित्यत्वात्यन्ताभाववद्वृत्तिपक्षवृत्तित्वरहितयोः पक्षमात्रनिष्ठात्यन्ताभावपक्षान्योन्याभावयोः पक्षव्यतिरिक्तसकलवस्तुनिष्ठयोरुक्तरूपोपपन्नयोः प्रसिद्धत्वेन नाप्रसिद्धविशेषणतापि। एवं महाविद्यान्तरेष्वपि यथासंभवं पक्षमात्रनिष्ठात्यन्ताभावपक्षान्योन्याभावावुपादायाप्रसिद्धविशेषणत्वं निरसनीयम्।

२ (आनं०)—प्रयोगान्तरमाह–**अयमिति**। अनित्यत्वात्यन्ताभावो यस्य सोऽनित्यत्वात्यन्ताभाववान्, तत्र वृत्तिर्येषां तेऽनित्यत्वात्यन्ताभाववद्वृत्तयः, ते एवैतत्पक्षीकृतशब्दधर्माः अनित्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मास्तेषु तथात्वं धर्मः तदत्यन्ताभाववान्, तदनाक्रान्तः तत्याधिकरणमाश्रय इत्यर्थः। शब्दः उक्तसाध्यवानित्युक्तपक्षान्योन्याभावस्य पक्षवृत्तित्वाभावादनित्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मत्वानाक्रान्तत्वमस्ति, तदधिकरणं च शब्दान्तरमिति भागे सिद्धसाधनता, अत उक्तम्–**अयमिति**। अयं शब्दोऽधिकरणमित्युक्ते प्रमेयत्वादिना अर्थान्तरता, अत उक्तम्–**एतद्धर्मत्वानाक्रान्तेति**। तथोक्ते व्याघातः स्यादत उक्तम्–**अनित्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मत्वानाक्रान्तेति**। अनित्यत्वात्यन्ताभाववद्वृत्तित्वानाक्रान्ताधिकरणमित्युक्तौ नित्येषु साध्यासिद्धिः। नहि नित्यानामुक्तधर्माधिकरणत्वं, नित्यत्वस्यैवानित्यत्वात्यन्ताभावत्वादत उक्तम्–**एतद्धर्मानाक्रान्तेति**। अनित्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मत्वानाक्रान्त एतद्धर्मत्वरहितो वा अनित्यत्वात्यन्ताभाववद्वृत्तित्वरहितो वा। आद्यः पक्षे व्याहतो, द्वितीयस्त्वनित्यत्वमन्तर्भाव्य सिध्यति। पक्षस्यानित्यत्वाभ्युपगममात्रेण प्रतिज्ञार्थस्योपपत्तेरिति महाविद्यार्थः। संक्षेपतो व्याचष्टे–**अत्र चेति**। तथापि कथमनित्यत्वमत्राह–**स**[2] **एवेति**। एतदेव कुतोऽत्राह–**शब्दस्येति**। एतद्धर्मत्वानाक्रान्तस्यैतस्मिन्साधने व्याघातोऽत्राह–**पक्ष इति**। पक्षस्य नित्यत्वे पक्षनिष्ठस्यानित्यत्वात्यन्ताभाववद्वृत्तित्वाभावेन तद्विशिष्टैतद्धर्मत्वानाक्रान्तत्वमुपपन्नमित्यर्थः। शब्दस्यानित्यत्वसिद्धेः प्रागुक्तरूपधर्मासिद्धेरप्रसिद्धविशेषणतात्राह–**पक्षेति**। पक्षवृत्तित्वाभावे सत्यनित्यत्वात्यन्ताभाववद्वृत्त्येतद्वृत्तित्वं नास्ति। विशेष्यैतद्धर्मत्वाभावेऽपि विशिष्टाभावसाध्यसिद्धिरित्यर्थः। तथापि कथमप्रसिद्धविशेषणतापरिहारोऽत्राह–**पक्षवृत्तित्वरहितयोरिति**। शब्दो नित्यत्वव्यतिरिक्तैतद्धर्मत्वरहिताधिकरणमित्युक्ते पक्षीकृतशब्दमात्रनिष्ठधर्मात्यन्ताभावस्यानित्यत्वव्यतिरिक्तत्वादेतद्धर्मत्वराहित्याच शब्दान्तरतदधिकरणमिति भागे सिद्धसाधनतापरिहारायोक्तमयमिति।

२ (भुवन०)—अथ महाविद्यान्तरमाह—**अयं शब्दः अनित्यत्वात्यन्ताभावेत्यादि**। इयं च महाविद्या 'विच्छिद्य वाभाववदन्वितेन' इति कारिकापदं महाविद्यास्थितं समाश्रित्य पक्षपक्षीकरणेन प्रवृत्ता। अनित्यत्वस्य अत्यन्ताभावोऽनित्यत्वात्यन्ताभावो नित्यत्वं, तद्विद्यते यस्य सोऽनित्यत्वात्यन्ताभाववान् नित्यपदार्थः, तत्र वृत्तिर्येषां तेऽनित्यत्वात्यन्ताभाववद्वृत्तयः, त एवैतत्पक्षीकृतशब्द-

---

१ 'र्थस्योपपत्तेर्न व्या' इति ज पुस्तकपाठः। २ 'स एवेति' इत्येतत्प्रतीकं मूलमहाविद्याविडम्बनादर्शपुस्तकेषु न विद्यते।

धर्मो अनित्यत्वात्यन्ताभावप्रतियोगितावच्छेदकधर्माः, नेतु तथात्वं धर्मः, तदनन्तः तदत्यन्ताभाववान्, तस्या-
भिरवणमशक्य इत्यर्थः । अयं भावः—ये नित्यवृत्तिधर्मिनः शब्दस्य धर्मा [illegible] शब्दत्वं,
तदत्यन्ताभाववान् धर्मः शब्दे नास्ति । न च शब्दत्वत्वाश्रयत्वादिः तद्धर्मः नित्यत्वे [illegible]
नित्यवृत्तित्वेन तद्धर्मत्वानावाक्तो न भवेत् । तस्मात् [illegible] दिति । अपरितोष [illegible] बीजं किम
[illegible] शब्दः [illegible] प्रतिज्ञायां सर्वतद्धर्म [illegible]
[illegible] पक्षत्वे [illegible] परिच्छिन्नत्वान्योन्याभावस्य [illegible]
[illegible] तदनिरूपणं च [illegible]
मिति । इयं च [illegible] । [illegible]
[illegible] निरूपणमिच्छुक [illegible]
[illegible] अनित्यत्वात्यन्ताभावप्रतियोगित्वेन तद्धर्मत्वानावाक्तो नेति । [illegible]
निरूपणमिच्छुको न तु [illegible] साध्यप्रसिद्धिः । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] इति । [illegible]
[illegible]
[illegible]

तद्धर्मत्वानाक्रान्तत्वं विद्यते एव। शब्दे तयोरवर्तनात्। तथा च सति एवं विद्याभावयोः सर्वसपक्षे वर्तनादप्रसिद्धविशेषणत्वमपि परिहृतमित्यर्थः ॥ २ ॥

३ अयं शब्दः अनित्यत्वव्यतिरिक्तैतद्धर्मत्वरहिताधिकरणं मेयत्वादिति। अत्र चानित्यत्वव्यतिरिक्तैतद्धर्मेषु अनित्यत्वव्यतिरिक्तैतद्धर्मत्वं नाम धर्मः, तद्रहितश्च पक्षावृत्तिर्वा अनित्यत्वं वा। तत्र प्रथमः पक्षे नोपसंहर्तुं शक्यः। पक्षावृत्तिः पक्षे वर्त्तते इति व्याघातात्। तस्माद्द्वितीयमनित्यत्वं पक्षे सिध्यति ॥

३ (आनं०)—अयं शब्दः एतद्धर्मत्वरहिताधिकरणमित्युक्ते बाधोऽत उक्तम्—अनित्यत्वव्यतिरिक्तेति। अनित्यत्वव्यतिरिक्ताधिकरणमित्युक्ते मेयत्वादिनार्थान्तरता, अत उक्तम्—एतद्धर्मत्वरहितेति। अनित्यत्वस्यानित्यत्वव्यतिरिक्तत्वाभावादनित्यत्वव्यतिरिक्तत्वे सत्येतद्धर्मत्वरहितत्वमस्ति, तेन प्रमेयत्वहेतुरनित्यत्वं पक्षे गमयतीति भावः। अनुमानार्थमाह—अत्रेत्यादिना।

३ (भुवन०)—प्रयोगान्तरमाह—अयं शब्दः अनित्यत्वेत्यादि। इयं च 'पक्षोऽथ साध्यविनाकृतेन' इति कारिकापदमुद्दिश्य प्रवृत्ता। अनित्यत्वव्यतिरिक्ता ये एतद्धर्माः शब्दधर्माः तेष्वनित्यत्वव्यतिरिक्तैद्धर्मत्वं नाम धर्मः। तत्त्वेन रहितानां धर्माणामधिकरणमाधार इत्यर्थः। अत्र च कथमनित्यत्वसिद्धिरित्याह—तद्रहितश्चेति। अनित्यत्वव्यतिरिक्तैतद्धर्मत्वरहितश्च पक्षावृत्तिर्वाऽनित्यत्वं वा। तत्र प्रथमः पक्षावृत्तिर्घटत्वपटत्वाकाशत्वादिः पक्षे शब्दे व्याघातेन नोपसंहर्तुं शक्यः तस्मादनित्यत्वं शब्दे सिध्यतीति भावः ॥ ३ ॥

४ अयं शब्दः संप्रतिपन्नैतद्धर्मत्वानाक्रान्ताधिकरणं मेयत्वादिति। अत्र च संप्रतिपन्नैतद्धर्मेषु संप्रतिपन्नैतद्धर्मत्वं नाम धर्मः। तेनाक्रान्तश्चैतच्छब्दवृत्तित्वरहितो वा विप्रतिपन्नमनित्यत्वं वा। प्रथमो व्याहतत्वान्न पक्षे सिध्यति। तेन पक्षे विप्रतिपन्नानित्यत्वसिद्धिरिति ॥ ४ ॥

४ (आनं०)—अयं शब्दोऽधिकरणमित्युक्ते मेयत्वादिनार्थान्तरता, अत उक्तम्—एतद्धर्मत्वानाक्रान्तेति। एतद्धर्मत्वानाक्रान्ताधिकरणमित्युक्ते व्याघातपरिहाराय संप्रतिपन्नेति विशेषणम्। संप्रतिपन्नैतद्धर्मत्वानाक्रान्तश्च पक्षावृत्तिर्वा विप्रतिपन्नमनित्यत्वं वा। प्रथमो व्याहत इति द्वितीयमनित्यत्वं सिध्यतीत्यर्थः।

४ (भुवन०)—अथ 'पक्षेषु ये सन्ति विवादहीनाः, विहाय तानन्यतरः प्रसाध्यः ॥' इति कारिकार्थमाश्रित्य प्रवृत्तां महाविद्यामाह—अयं शब्दः संप्रतिपन्नेति। अत्र संप्रतिपन्नाः शब्दधर्माः शब्दत्वप्रमेयत्वादयः, तेषां भावः तत्त्वम्। तेनाक्रान्तानां धर्माणामाश्रयः इत्यर्थः। शब्दानित्यत्वसिद्धिमाह—तदनाक्रान्तश्चेत्यादिना। सुगममेवैतत् ॥ ४ ॥

५ अयं शब्दः अनित्यत्वात्यन्ताभावव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितात्यन्ताभावाधिकरणं मेयत्वादिति। अत्र चानित्यत्वात्यन्ताभावव्यतिरिक्ताश्च ते एतन्निष्ठात्यन्ताभावप्रतियोगिनश्चेति विग्रहः। तेषु चानित्य-

स्वात्यन्ताभावव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगिषु अनित्यत्वात्यन्ताभावव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगित्वं नाम धर्मः । तद्रहितश्च पक्षवृत्तिर्वा स्यात्, अनित्यत्वात्यन्ताभावो वा । आद्यस्यात्यन्ताभावः पक्षे व्याहतः, तेन अनित्यत्वात्यन्ताभावात्यन्ताभावः पक्षे सिध्यति । स चानित्यत्वमेवेत्यनित्यत्वं पक्षे सिध्यति ॥ ५ ॥

५ (आनं०) अयं शब्दः इत्यादि । अनित्यत्वस्यात्यन्ताभावोऽनित्यत्वात्यन्ताभावः तस्माद्व्यतिरिक्तश्च पक्षनिष्ठो योऽत्यन्ताभावः, तत्प्रतियोगित्वरहितश्च, अनित्यत्वात्यन्ताभावव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितो यो धर्मस्तदत्यन्ताभावाधिकरणमित्यर्थः । मेयत्वादिनार्थान्तरतां परिहर्तुमत्यन्ताभावाधिकरणमित्युक्तम् । तथापि गन्धवत्त्वादीनामत्यन्ताभावाधिकरणतया सिद्धसाधनता, अत उक्तम्—एतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितेति । एतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितात्यन्ताभावाधिकरणमित्युक्ते व्याघातपरिहारायोक्तम्—अनित्यत्वात्यन्ताभावव्यतिरिक्तेति । नैवं व्याघातः । अनित्यत्वात्यन्ताभावस्य अत्यन्ताभावाधिकरणतया साध्यसिद्धेरिति भावः । अनुमानार्थान्तरमाह—अत्र चेति ।

५ (भुवन०)—' असाध्यान्यविशुद्धान्यव्यावृत्तिर्वा प्रसाध्यते ' एतत्कारिकार्थमाश्रित्य पक्षं पक्षयित्वा या प्रवृत्ता तामाह—अयं शब्दः अनित्यत्वेति । यः एतन्निष्ठः शब्दनिष्ठोऽत्यन्ताभावः, तस्य ये प्रतियोगिनो विश्वपदार्थाः । ते किंविशिष्टाः । अनित्यत्वस्य अत्यन्ताभावोऽनित्यत्वात्यन्ताभावः नित्यत्वं, तस्माद्व्यतिरिक्ता भिन्ना इत्यर्थः । तेषां भावस्तत्त्वम् । तेन रहितोऽनित्यत्वात्यन्ताभावव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितो यो धर्मो नित्यत्वादिः, तदत्यन्ताभावाधिकरणमित्यर्थः । मेयत्वादिनाऽर्थान्तरतापरिहाराय अत्यन्ताभावाधिकरणमित्युक्तम् । तथापि घटत्वादीनामत्यन्ताभावाधिकरणतया सिद्धसाध्यता । तदुक्तमेतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितेति । एतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितात्यन्ताभावाधिकरणमित्युक्ते व्याघातः स्यात् । तदपोहार्थमनित्यत्वात्यन्ताभावव्यतिरिक्तेति । न चैवं व्याघातः । अनित्यत्वात्यन्ताभावस्य अत्यन्ताभावाधिकरणतया पक्षे शब्दे साध्यसिद्धेः । इति व्याहतिचिन्ता ॥ अयमाशयः—शब्दव्यतिरिक्तविश्वस्य अत्यन्ताभावःशब्देऽस्ति । अतस्तत्प्रतियोगित्वं विश्वस्यैवास्ति । तेन रहितं च [illegible] नित्यत्वमेव । तस्य अनित्यत्वात्यन्ताभावव्यतिरिक्तेतिपदेन [illegible] तदत्यन्ताभावाधिकरणं अनित्यत्वाधिकरणं शब्द इत्यर्थः । आद्यस्यात्यन्ताभावः पक्षे व्याहत इति । पक्षवृत्तिः शब्दत्वादिधर्मो यद्यनित्यत्वात्यन्ताभावव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितो वर्तते, तर्हि तस्यात्यन्ताभावे शब्दनिष्ठे साध्यमाने व्याघातः स्यात् । [illegible] शब्दे साध्यते इति भावः । शब्दमात्रवृत्तित्वशब्दत्वादीनामत्यन्ताभावः [illegible] धर्मो [illegible] ॥ ५ ॥

६ अयं शब्दः स्वेतरानित्यानित्यवृत्तित्वरहितानेकानित्यवृत्तित्वरहितानन-

१ अनित्यत्वात्यन्ताभावात्यन्ताभावः इत्यारभ्य ' आद्यः पक्षे व्याहतः ' इत्यन्तः [illegible] पुस्तके [illegible] ।
२ ' अनेकानित्यवृत्तित्वरहित ' इतीदं ग पुस्तके नास्ति ।

न्निष्ठाधिकरणं मेयत्वादिति । अनित्यवृत्तित्वे सति नित्यवृत्तयो ये धर्मास्तेष्व-नित्यनित्यवृत्तित्वं धर्मः । तद्रहितस्तदत्यन्ताभाववान् । अनेकेषु वर्त्तन्ते ये ध-र्मास्तेष्वनेकनित्यवृत्तित्वं धर्मः । तद्रहितस्तदत्यन्ताभाववान् । अनेतन्निष्ठः पक्षीकृतशब्दान्यनिष्ठः । अनित्यनित्यवृत्तित्वरहितश्चासावनेकनित्यवृत्तित्वर-हितश्च स चासावनेतन्निष्ठश्च । तदधिकरणं तदाश्रय इत्यर्थः ।

६ (आनं०)—स्वेतरानित्यनित्येत्यादि । पक्षीकृतशब्दादितरे येऽनित्याः नित्याश्च तेषु वृत्तिर्यस्य धर्मस्य तस्य स्वेतरानित्यनित्यवृत्तित्वं धर्मः, तदत्यन्ताभाववांश्च अनेकेषु नित्येषु वृत्तित्वर-हितश्च, अयमेतन्निष्ठः पक्षीकृतशब्दादन्यनिष्ठश्चेति स्वेतरानित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वर-हितानेतन्निष्ठस्तस्याधिकरणमित्यर्थः । अयं शब्दोऽधिकरणमित्युक्ते पक्षीकृतशब्दव्यतिरिक्तत्वात्यन्ता-भावेन पक्षमात्रनिष्ठेन अर्थान्तरता, अत उक्तम्—अनेतन्निष्ठेति । अनेतन्निष्ठाधिकरणमित्युक्ते मेयत्वा-दिनार्थान्तरता, अत उक्तम्—नित्यवृत्तित्वरहितेति । नित्यवृत्तित्वरहितानेतन्निष्ठाधिकरणमित्युक्ते आकाशव्यतिरिक्तनित्यान्यत्वेन शब्दनित्यत्वेऽप्युपपद्यमानेन आकाशव्यतिरिक्तनित्येषु वृत्तिहीनेन अर्थान्तरता, अत उक्तम्—अनेकनित्यवृत्तित्वरहितेति । पक्षीकृतशब्दनित्यत्वे तस्यानेकनित्यवृत्तित्वेन तद्रहितत्वानुपपत्तिः । अनेकनित्यवृत्तित्वरहितानेतन्निष्ठाधिकरणमित्युक्तौ नित्यत्वेन अर्थान्तरता, अत उक्तम्—अनेकनित्यवृत्तित्वरहितेति । स्वेतरेति पदं स्पष्टीकरणार्थम् । अनित्यनित्यवृत्तित्वर-हितानेकनिष्ठश्चानित्यमेव पक्षे पर्यवस्यतीति भावः । पक्षव्यतिरिक्ते सर्वत्र स्वान्यत्वाधिकरणप्र-तियोगिकः एकैकधर्मिकोऽन्योन्याभावोऽस्तीति व्याप्तिसिद्धिः । अनुमानविवरणग्रन्थो व्या-ख्यातार्थः ।

६ (भुवन०)—अथ 'अपक्षसाध्यवद्वृत्तिविपक्षान्वयवर्जितः । नानाविपक्षवृत्त्यन्यभिन्नधर्मो-ऽस्ति पक्षिते' इति कारिकामाश्रित्य या प्रवृत्ता तां दर्शयति—अयं शब्दः स्वेतरानित्यनित्यवृ-त्तित्वरहितेति । स्वस्मादितरे येऽनित्या नित्याश्च तेषु वृत्तिर्यस्य धर्मस्य तस्य स्वेतरानित्यनित्यवृ-त्तित्वं, तदत्यन्ताभाववांश्चासौ, अनेकेषु नित्येषु वृत्तित्वरहितश्चायम्, अनेतन्निष्ठः पक्षीकृतशब्दान्य-निष्ठश्चेति स्वेतरानित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहितानेतन्निष्ठः, तस्याधिकरणमित्यर्थः । न एषः अनेषः । अनेतस्मिन् पक्षीकृतशब्दादन्यस्मिन्निष्ठा यस्य सोऽनेतन्निष्ठः । नन्वेवंविधविशेषणविशि-ष्टोऽपि शब्दे सिषाधयिषितो धर्मो यद्यनेतन्निष्ठः, कथं तर्ह्येतस्मिन् शब्दे साध्यते, व्याघातप्रसंगात्, पटादौ घटत्वादिसाधनवत् इति चेत् । न । अर्थापरिज्ञानात् । अनेतन्निष्ठ इत्यस्य ह्ययमर्थः, शब्दे सिषाधयिषितोऽनित्यत्वादिको धर्मो घटे घटत्ववन्न केवले शब्दे एव वर्तते, किन्तु शब्दे शब्दादन्यत्र घटादौ च स वर्तते एव । तस्मात्तस्यानेतन्निष्ठत्वमुपपन्नमेवेति भावः ।

अनेकनित्यवृत्तित्वरहितानेतन्निष्ठाधिकरणमित्युक्ते पक्षीकृतशब्दव्यतिरि-क्तनित्यत्वात्यन्ताभावादिना अनेकनित्यवृत्तित्वरहितानेतन्निष्ठेन शब्दनित्यत्वे-ऽप्युपपद्यमानेनार्थान्तरता स्यात् । तन्निवृत्त्यर्थमनित्यनित्यवृत्तित्वरहितग्रहणम् ।

पक्षीकृतशब्दनित्यत्वे पक्षीकृतशब्दव्यतिरिक्तनित्यत्वात्यन्ताभावादीनामनित्यनित्यवृत्तित्वेन तद्रहितत्वानुपपत्तेः । अनित्यनित्यवृत्तित्वरहितानेतन्निष्ठाधिकरणमित्युक्ते नित्यानित्यवृत्तित्वरहितेन अनेतन्निष्ठेन नित्यत्वादिनार्थान्तरता स्यात् । तन्निवृत्त्यर्थमनेकनित्यवृत्तित्वरहितग्रहणम् । अनित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहिताधिकरणमित्युक्ते पक्षीकृतशब्दमात्रनिष्ठैः पक्षीकृतशब्दान्यत्वात्यन्ताभावादिभिरर्थान्तरता स्यात् । तन्निवृत्त्यर्थमनेतन्निष्ठग्रहणम् । पक्षीकृतशब्दनित्यत्वे तत्रानेतन्निष्ठो धर्मो भवन् अनेतदनित्यनिष्ठो वा, अनेतन्नित्यनिष्ठो वा । आद्ये नित्यानित्यवृत्तित्वरहितत्वव्याघातः । द्वितीये अनेकनित्यवृत्तित्वरहितत्वव्याघातः । तेन पक्षे नित्यत्वाभावरूपानित्यत्वसिद्धिरिति । स्वेतरानित्यवृत्तित्वरहितेत्यत्र स्वेतरग्रहणस्य प्रयोजनं न पश्यामः । कुलार्कपंडितैस्तु केनाभिप्रायेण स्वेतरपदं प्रयुक्तमिति चिन्त्यम् । अत्र चैकैकनित्यनिष्ठैकैकानित्यनिष्ठनित्यत्वानित्यत्वादीन्युपादाय साध्यप्रसिद्धेरप्रसिद्धविशेषणत्वं निरसनीयम् ॥ ६ ॥

(आनं०)—आद्य इति । अनित्यनिष्ठो धर्मः पक्षीकृतशब्दे भवन् । अस्य नित्यत्वेऽनित्यानित्यवृत्तिरिति तद्रहितत्वव्याघात इत्यर्थः ।

(भुवन०)—अथ पक्षानुपूर्व्या व्यावृत्तिचिन्तामुखेन अनुमानार्थं व्याख्यानयन्नाह—अनेकनित्यवृत्तित्वेत्यादि । पक्षीकृतशब्दव्यतिरिक्तेति । पक्षीकृतशब्दात् व्यतिरिक्ता ये आकाशादयः तेषु यन्नित्यत्वं तस्यात्यन्ताभावः तेन । अनेकनित्यवृत्तित्वरहितेनेति । नित्यत्वात्यन्ताभावस्य नित्येष्ववर्तनात् । अनेतन्निष्ठेनेति । पक्षीकृतशब्दव्यतिरिक्तनित्यत्वात्यन्ताभावस्य अनित्येष्वपि वर्तमानत्वेन केवले शब्द एव अवर्तनादनेतन्निष्ठत्वमिति भावः । शब्दनित्यत्वेऽप्युपपद्यमानेनेति । शब्दनित्यत्वेऽपि साध्येऽस्य धर्मस्योपपद्यमानत्वात् अर्थान्तरतेति साधयितुमनित्यत्वमुपक्रान्तम् । अनया च युक्त्या नित्यत्वमप्युपपद्यते । तस्मादर्थान्तरता । अनित्यनित्यवृत्तित्वेन तद्रहितत्वानुपपत्तेरिति । पक्षीकृतशब्दनित्यत्वे पक्षीकृतशब्दव्यतिरिक्तनित्यत्वात्यन्ताभावस्य अनित्येषु घटादिषु नित्ये शब्दे च वर्तमानत्वात् अनित्यानित्यवृत्तित्वरहितत्वं न स्यादित्यर्थः । अथानेकनित्यवृत्तित्वरहितेति पदं त्यक्त्वा व्यावृत्तिं करोति—अनित्यनित्येत्यादि । तथा च [illegible]नित्यवृत्तित्वरहितेन नित्यत्वादिना अर्थान्तरं स्यात्, ततोऽनेकनित्यवृत्तित्वरहितेतिग्रहणम् । अथ [illegible] विशेषणं परित्यज्य व्यावृत्तिं करोति—अनित्यनित्येत्यादि । पक्षीकृतशब्दमात्रनिष्ठैः पक्षीकृतशब्दान्यत्वात्यन्ताभावादिभिरिति । पक्षीकृतशब्दान्यद्घटादि, तत्र पक्षीकृतशब्दान्यत्वं [illegible], तस्यात्यन्ताभावः शब्दे एवास्ति । तेनोक्तं पक्षीकृतशब्दमात्रनिष्ठैरिति । [illegible]

१ 'दीनामनित्यवृत्ति' इति ग पुस्तकपाठः ।

२ महाविद्या०

नित्यत्वम् । एवं चोभयोरप्यविवादापन्नाः शब्दान्यत्वात्यन्ताभावादयोऽपि सिध्यन्तीत्यर्थान्तरता । अत्र शब्दस्य अनित्यत्वसिद्धिमाह—**पक्षीकृतशब्दनित्यत्वे तत्रानेतन्निष्ठो धर्मो भवन्नित्यादि** । पक्षीकृतशब्दस्य यदि नित्यत्वमङ्गीक्रियते तदाऽनेतदनित्यनिष्ठ इत्याद्ये विकल्पे नित्यानित्यवृत्तित्वरहितत्वव्याघातः । तस्य धर्मस्य नित्ये शब्देऽनित्ये च घटादौ वर्तनात् । **द्वितीयेऽनेकनित्यवृत्तित्वरहितत्वव्याघात इति** । अनेतन्नित्यनिष्ठ इति द्वितीये कल्पे तस्य धर्मस्य नित्ये गगनादौ नित्ये एव च शब्दे वर्तमानत्वेन अनेकनित्यवृत्तित्वात् तद्रहितत्वव्याघातः स्फुट एवेति । **तेन पक्षे नित्यत्वेति** । तेन कारणेन पक्षे शब्दे नित्यत्वाभावरूपस्य अनित्यत्वस्य सिद्धिः । एवंविधश्च धर्मः शब्दे विचारितः सन् अनित्यत्वं वा, विश्वप्रतियोगिको घटशब्दान्योन्याभावादिर्वा । पूर्वोक्तसर्वविशेषणैः सह तस्य संवादात् । तस्य च शब्दे नित्ये स्वीक्रियमाणेऽनित्ये घटे नित्ये च शब्दे वर्तनात् नित्यानित्यवृत्तित्वरहितत्वं न स्यात् । तस्माच्छब्दस्यानित्यत्वं स्वीकार्यमेवेति । **कुलार्कपण्डितैस्तु केनाभिप्रायेणेति** । सोऽभिप्रायः कुशलतरैश्चिन्त्यः । एतच्च **महाविद्याविवरणटिप्पने**ऽस्माभिरेव सप्रपञ्चं प्रपञ्चितमिति नात्र प्रपञ्च्यते । यद्वा स्वेतरेति पदं स्पष्टीकरणार्थमेवेति ज्ञेयम् । **अत्र चैकैकनित्यनिष्ठैकैकानित्यनिष्ठेत्यादि** । एकैकनित्याः आकाशपरमाण्वादयः, तन्निष्ठास्तन्नित्यत्वाकाशत्वपरमाणुत्वादयः । एकैकानित्या घटपटादयः, तन्निष्ठास्तदनित्यत्वघटपटत्वादयः । ते च युगलावृत्तित्वेन नित्यानित्यवृत्तित्वरहिताः नानानित्यावृत्तयश्च, तथा अनेतन्निष्ठाः शब्दादन्यत्र वर्तमानाश्च विद्यन्त एवेति तेषां सपक्षे प्रसिद्धत्वादप्रसिद्धविशेषणत्वमपि नास्तीति भावः । **नित्यत्वानित्यत्वादीन्युपादायेति** । अत्रादिपदेन तत्तन्नित्यमात्रनिष्ठतत्तदनित्यमात्रनिष्ठाकाशत्वघटत्वादिधर्मग्रहः ॥ ६ ॥

७ अयं शब्दः स्वेतरानित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहितानेकनिष्ठाधिकरणं मेयत्वादिति । अनेतन्निष्ठपदस्थाने अनेकनिष्ठपदमेव पूर्वमहाविद्यावैलक्षण्यम् । अनित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहितानेकनिष्ठाधिकरणमित्युक्ते नित्येषु व्यभिचारः । अनित्यनित्यवृत्तित्वरहितस्य अनित्यमात्रवृत्तेर्नित्येषु व्याहतत्वात् । नित्यमात्रवृत्तेरनित्येषु व्याहतत्वात् । नित्यमात्रवृत्तेश्च अनेकनिष्ठस्य अनेकनित्यवृत्तित्वग्रहणेन निरस्तत्वात् । एकैकनित्यवृत्तेश्चानेकनिष्ठग्रहणेन व्युदासात् । अतो नित्यानां विपक्षत्वव्युदासेन पक्षतुल्यत्वार्थं स्वेतरग्रहणम् । शेषं पूर्ववत् ॥ ७ ॥

७ (आनं०)—**अयं शब्दः स्वेतरानित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहितानेकनिष्ठाधिकरणमित्यत्रापि** नित्यत्वात्यन्ताभावरूपमनित्यत्वं पक्षे सिध्यतीति भावः । ध्वनिभागेषु सिद्धसाधनत्वनिवृत्त्यर्थमयमित्युक्तम् । पक्षमात्रनिष्ठेन अर्थान्तरत्वं वारयति—**अनेकनिष्ठेति** । नित्यत्वेनार्थान्तरत्वनिरासाय—**अनेकनित्यवृत्तित्वरहितेति** । पक्षव्यतिरिक्तनित्यत्वात्यन्ताभावेनार्थान्तरतां वारयति—**नित्यानित्यवृत्तित्वरहितेति** । पक्षीकृतशब्दनित्यत्वे तस्य नित्यानित्यवृत्तित्वेन

१ 'नित्यानित्यवृत्तित्वरहिते' ति प्रतीकं मूलमहाविद्यापुस्तके नोपलभ्यते ।

तद्रहितत्वानुपपत्तिः । नित्येषु साध्यसिद्ध्यर्थं स्वेतरेत्युक्तम् । शब्देतरनित्यानित्यवृत्तित्वरहितानेकनिष्ठो धर्मः एकैकस्मिन्नित्ये…शब्दैकैकनित्यान्यत्वात्यन्ताभावशब्दैकैकनित्यवृत्तिरनेकनिष्ठोऽस्तीति भावः । स्वेतरविशेषणकृत्यमुपपादयति—नित्यानित्यवृत्तित्वेत्यादिना ।

७ (भुवन०)—अथ पुनरप्येतदेवानुमानं अनेतन्निष्ठपदस्थाने अनेकनिष्ठपदग्रहणेनाह—अयं शब्दः स्वेतरानित्यनित्यवृत्तित्वेत्यादि । अत्रापि नित्यत्वात्यन्ताभावरूपमनित्यत्वं पक्षे सिध्यतीति भावः । अत्र चानित्यपदार्थेष्वनित्यत्वादिना साध्यसिद्धिर्द्रष्टव्या, न त्वेकैकानित्यनिष्ठघटत्वादिना । तस्यानेकनिष्ठत्वाभावात् । नित्यानां च पक्षतुल्यत्वार्थं स्वेतरपदसाफल्यं दर्शयति—अनित्यनित्यवृत्तित्वरहितेत्यादिना । अनित्यमात्रवृत्तेरिति । अनित्यत्वादेर्धर्मस्य नित्येषु व्याहतत्वात् । नित्यमात्रवृत्तेश्चेति । नित्यत्वादेर्धर्मस्य । एकैकनित्यवृत्तेश्चेति । आत्मत्वाकाशत्वादेर्धर्मस्येति । पक्षतुल्यत्वार्थमिति । पक्षः शब्दः तत्तुल्याः तत्समाः । सर्वेऽपि नित्या इत्यर्थः । अयं भावः । यथा शब्दं पक्षीकृत्य एवमेतदनुमानं प्रयुज्यते, तथा नित्यं गगनादिकमपि विपक्षं पक्षीकृत्य प्रयोक्तव्यम् । अत एव विपक्षपक्षीकरणप्रवृत्तासु महाविद्यासु एतदनुमानं दर्शयिष्यतीति ॥ ७ ॥

८ अयं शब्दः एतदाकाशवृत्तित्वरहितनित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणं मेयत्वादिति । एतस्मिन्नाकाशे च वर्तन्ते ये धर्मास्तेषु एतदाकाशवृत्तित्वं धर्मः । नित्यत्वव्यतिरिक्तनित्यत्वव्याप्येषु नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वं धर्मः । नित्यत्वाव्याप्यनित्यनिष्ठेषु च नित्यत्वाव्याप्यनित्यनिष्ठत्वं धर्मः । एतदाकाशवृत्तित्वरहितश्चासौ नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितश्च । स चासौ नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितश्च, तदाश्रय इत्यर्थः ।

८ (आनं०)—महाविद्यान्तरमाह—एतदाकाशेति । एतस्मिन्पक्षे आकाशे च वृत्तिरहित एतदाकाशवृत्तिरहितः, स चायं नित्यत्वव्यतिरिक्तत्वे सति नित्यत्वव्याप्यत्वरहितश्च, स चासौ नित्यत्वाव्याप्यत्वे सति नित्यनिष्ठत्वरहितश्च इत्येतदाकाशवृत्तित्वरहितनित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहितः, तस्याधिकरणमित्यर्थः । अयं शब्दोऽधिकरणमित्युक्ते मेयत्वादिनार्थान्तरतात आह—नित्यनिष्ठत्वरहितेति । नित्यनिष्ठत्वरहिताधिकरणमित्युक्ते व्याप्तिभङ्गः, नित्येषु साध्यासिद्धेरत आह—नित्यत्वाव्याप्येति । नित्यत्वं नित्यव्याप्येति वक्ष्यति । तेन नित्यत्वस्य नित्यनिष्ठत्वरहितत्वाभावेऽपि नित्यत्वाव्याप्यत्वे सति यन्नित्यनिष्ठत्वं तन्नास्तीति नित्यत्वमेव नित्येषूक्तरूपमस्तीति साध्यसिद्धिः । नित्यत्वाव्याप्यनित्यनिष्ठत्वाधिकरणमित्युक्तौ नित्यत्वेन अर्थान्तरता, अत आह—नित्यत्वाव्याप्यत्वरहितेति । नित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणमित्युक्ते पुनरपि नित्येषु साध्यासिद्धिः । नित्यत्वस्य नित्यत्वव्याप्यत्वान्नित्यत्वव्याप्यत्वरहितत्वे सतीति विशेषणाभावादत आह—नित्यत्वव्यतिरिक्तेति ।

१ 'नित्यानित्यवृत्तित्वे' इति मूलांशः मूले न दृश्यते । २ 'व्याप्येति' स्यात् (?)

नित्यत्वस्य नित्यत्वव्यतिरिक्तत्वे सति यन्नित्यत्वाव्याप्यत्वं तन्नास्तीति नित्येषु साध्यसिद्धिः। नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणमित्युक्तौ नित्यत्वेन अर्थान्तरता, तां वारयति—आकाशवृत्तित्वरहितेति। आकाशवृत्तित्वरहितेत्यादि साध्योक्तौ व्याप्तिभङ्गः। नित्येषु तदभावादत उक्तम्—एतदाकाशेति। शब्दस्य नित्यत्वसंदेहान्नित्यत्वस्यैतदाकाशवृत्तित्वं निश्चितं नास्तीति नित्येषु नित्यत्वमुक्तरूपमस्ति। अनित्येषु पुनरनित्यत्वमेवोक्तरूपमिति व्याप्तिसिद्धिः। पक्षस्य नित्यत्वे पक्षमात्रनिष्ठधर्मस्य नित्यत्वव्याप्तत्वान्नित्यत्वव्याप्तत्वरहितत्वव्याघातादनित्यत्वं पक्षे सिध्यतीति भावः। विवृणोति—एतस्मिन्नित्यादिना।

८ (भुवन०)—महाविद्यान्तरमाह—अयं शब्दः एतदाकाशवृत्तित्वरहितनित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणं मेयत्वात् घटवदिति। अतः परं च पक्षं पक्षीकृत्य प्रवृत्तानां महाविद्यानामर्थसंग्राहिकाः कारिका महाविद्यान्तरेभ्यो ज्ञातव्याः। एष चाकाशश्च एतदाकाशौ। तयोर्युगलत्वेन वृत्तिर्येषां धर्माणां ते एतदाकाशवृत्तयः, तेषु तद्वृत्तित्वं नाम धर्मः, तेन रहितः। नित्यत्वेन व्यतिरिक्ता नित्यत्वव्यतिरिक्ताः। नित्यत्वेन व्याप्यन्ते इति नित्यत्वव्याप्याः। नित्यत्वव्यतिरिक्ताश्च ते नित्यत्वव्याप्याश्च। तेषु नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वं धर्मः। तद्रहितश्च। नित्यत्वेन अव्याप्याः नित्यत्वाव्याप्याः। नित्येषु निष्ठा अवस्थानं येषां ते नित्यनिष्ठाः। नित्यत्वेनाव्याप्याश्च ते नित्यनिष्ठाश्च। तेषु नित्यत्वाव्याप्यनित्यनिष्ठत्वं नाम धर्मः। तद्रहितः। अत्र विशेषणत्रये पूर्वप्राच्यविशेषणद्वयस्य द्वन्द्वः। ततो द्विपदः कर्मधारयः। एतद्विशेषणत्रयविशेषिता ये शब्दत्वश्रावणत्वादयः तेषामाश्रयः पक्षीकृतः शब्द इत्यर्थः। अथैतस्यानुमानस्य व्याख्या। एतस्मिन् पक्षीकृतशब्दे आकाशे च या वृत्तिः तत्त्वेन रहिताः पक्षे शब्दत्वश्रावणत्वादयो व्योम्नि अवर्तनात् शब्दे वर्तनाच्च युगलावृत्तयो[1] विद्यन्ते एव। दृष्टान्ते च घटादौ स्वस्वनिष्ठा घटत्वादयः शब्दाकाशद्वयावर्तित्वात् युगलावर्तिन एव। नित्यानां च पक्षतुल्यत्वं वक्ष्यति। न तेन तेषु साध्यप्रसिद्धिर्विचार्या। अथ द्वितीयं विशेषणं व्याख्यायते। नित्यत्वेन व्याप्या आत्मत्वाकाशत्वपरमाणुत्वादयः।

'व्याप्यं गमकमादिष्टं व्यापकं गम्यमिष्यते।
व्यापकं तदतन्निष्टं व्याप्यं तन्निष्ठमेव हि॥'

इति वचनात्, यत्र यत्र आत्मत्वादयः, तत्र तत्र नित्यत्वम्। एवमात्मत्वादीनां नित्यत्वव्याप्यत्वोपपत्तेः। अत्र नित्यत्वं व्यापकम्, आत्मत्वादयो व्याप्याः, यथा अग्निर्व्यापको धूमश्च व्याप्यः। एवं नित्यत्वमपि यत्र यत्र नित्यत्वं, तत्र तत्र नित्यत्वात्यन्ताभाववद्वृत्तित्वरहितत्वमिति व्याप्त्या नित्यत्वव्याप्यमस्ति। परं नित्यत्वव्यतिरिक्तेति ग्रहणात् केवलनित्यनिष्ठधर्मेभ्यस्तत्पृथक्कृतम्। नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहिताश्च केवलानित्यनिष्ठा घटत्वपटत्वादयः, साधारणाश्च सत्त्वप्रमेयत्वादयो, नित्यत्वस्य पृथक्कृतत्वात् नित्यत्वं च। अथ तृतीयं विशेषणं व्याख्यायते। नित्यत्वाव्याप्यनित्यनिष्ठेति। नित्यनिष्ठा धर्मा द्विधा—नित्यत्वव्याप्या नित्यत्वाव्याप्याश्च। तत्र नित्य-

१ 'तयो वर्तन्ते एव' इति छ पुस्तकपाठः।

त्वव्याप्या आकाशत्वादयः। नित्यत्वाव्याप्याश्च सत्त्वादयः। तत्र आद्या द्वितीयविशेषणेन निषिद्धाः। सत्त्वादयश्चानेन विशेषणेन निषिद्धाः। तेषां नित्यत्वाव्याप्यनित्यनिष्ठत्वेन तद्रहितत्वानुपपत्तेः। नित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताश्च अनित्यमात्रनिष्ठा घटत्वादयो, नित्यमात्रनिष्ठा आकाशत्वादयश्च। तत्र आकाशत्वादयो द्वितीयविशेषणेन निरस्ता एव। उद्धरिताश्च घटत्वपटत्वादयो धर्मा घटादिदृष्टान्तोपयोगिनः। शब्दघटान्यतरत्वादयः पक्षीकृतशब्दोपयोगिनः। अत्र च द्वितीयतृतीयविशेषणद्वयविशिष्टं नित्यत्वमप्युद्धरितमस्ति[1]। परं शब्दनित्यत्वेऽङ्गीक्रियमाणे तस्य एतदाकाशवृत्तित्वरहितत्वं न स्यात्। शब्दे चानित्येऽङ्गीक्रियमाणे विशेषणत्रयविशिष्टं तदाकाशादौ दृष्टान्ते उपकारकृत् ज्ञेयम्। एवंविधाश्च धर्मा अत्र घटशब्दान्यतरत्वादयो नित्यत्वाव्याप्यनित्यनिष्ठत्वादयो रहिताः शब्दे तदैव घटन्ते, यदि शब्दस्यानित्यत्वमङ्गीक्रियेत। तस्माच्छब्दस्यानित्यत्वमङ्गीकार्यम्। व्यावृत्तिर्मन्यकृतैव कृतेति न क्रियते। अनुमानार्थमाविष्करोति—एतस्मिन्नित्यादिना। एतस्मिन्निति। पक्षीकृतशब्दे।

नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणमित्युक्ते नित्यत्वेनार्थान्तरता स्यात्। नित्यत्वस्य नित्यत्वव्याप्यत्वेऽपि नित्यत्वव्यतिरिक्तत्वे सति यन्नित्यत्वव्याप्यत्वं तद्रहितत्वात्। नित्यत्वस्य नित्यनिष्ठत्वेऽपि नित्यत्वव्याप्यत्वेन नित्यत्वाव्याप्यत्वे सति यन्नित्यनिष्ठत्वं तद्रहितत्वाच्च। न च व्याप्यव्यापकभावस्य भेदाधिष्ठानत्वात्कथं नित्यत्वस्य नित्यत्वव्याप्यत्वमिति युक्तम्। नित्यत्वस्य नित्यत्वभेदाभावेऽपि नित्यत्वात्यन्ताभाववद्वृत्तित्वरहितस्य नित्यत्वव्याप्यत्वस्योपपत्तेरिति। अतो नित्यत्वेनार्थान्तरतापरिहारार्थमेतदाकाशवृत्तित्वरहितग्रहणम्। पक्षीकृतशब्दस्य नित्यत्वे नित्यत्वस्यैतदाकाशवृत्तित्वेन तद्रहितत्वानुपपत्तेः।

(आनं०) विशेषणकृत्यमाह—नित्यत्वव्यतिरिक्तेति। नित्यत्वस्य नित्यत्वव्याप्यत्वराहित्येति विशेषणाभावान्नार्थान्तरतेत्यत आह—नित्यत्वस्येति। तदन्वयरूपाया व्याप्तेर्भिन्नाधिकरणत्वादेकस्मिन्नसम्भव इत्यत आह—न चेति। हेतुमाह—नित्यत्वस्येति। तदत्यन्ताभाववन्निष्ठात्यन्ताभावप्रतियोगित्वं तद्व्याप्यत्वम्। धूमस्यापि धूमवदत्यन्ताभाववन्निष्ठात्यन्ताभावप्रतियोगित्वेन तद्व्याप्यत्वमिति भावः। अनेन विशेषणेन कथमर्थान्तरतानिरासोऽत्राह—पक्षीकृतेति।

(भुवन०)—अथ प्रथमविशेषणं परित्यज्य व्यावृत्तिचिन्तां करोति—नित्यत्वव्यतिरिक्तेत्यादि। कथमर्थान्तरता स्यादित्याह—नित्यत्वस्य नित्यत्वव्याप्येत्यादि। यद्यपि नित्यत्वं नाम धर्मो नित्यत्वव्याप्यो भवति, तथापि नित्यत्वव्यतिरिक्तत्वे सति यन्नित्यत्वव्याप्यत्वं तद्रहितोऽनुपपन्न एव। नित्यत्वव्यतिरिक्तेतिविशेषणेन तस्य नित्यत्वव्याप्येभ्यः पृथक्कृतत्वात्। तद्वर्तने च पृथ-

१ अत्र च पुस्तके 'उद्धरिता' इति तथा छ, द, पुस्तकयोः 'उद्धरितं' इति पाठो दृश्यते। 'उद्धरितं' इति समीचीनः पाठः संभाव्यते।

रूपेण तस्यावर्जनात् । नित्यत्वस्य नित्यत्वव्यतिरिक्तेत्यादिविशेषणविशिष्टत्वमुपपाद्य नित्यत्वाव्याप्येत्यादिविशेषणविशिष्टत्वमाह—**नित्यनिष्ठत्वेऽपीत्यादि** । यद्यपि नित्यत्वस्य नित्यनिष्ठत्वरहितत्वं नास्ति, तथापि नित्यत्वाव्याप्यत्वे सति यत् नित्यनिष्ठत्वं, तद्रहितत्वमस्त्येव । केन हेतुना । नित्यत्वाव्याप्यत्वेन । नित्यत्वस्य नित्यत्वेन व्याप्यत्वादित्यर्थः । संबन्धरूपाया व्याप्तेर्भिन्नाधिकरणत्वात् ऐक्ये नित्यत्वस्य तेनैव नित्यत्वेन व्याप्यत्वासंभव इत्यत आह—**न च व्याप्यव्यापकभावस्येति** । अत्र हेतुमाह—**नित्यत्वस्य नित्यत्वभेदेत्यादि** । नित्यत्वात्यन्ताभाववत्सु अनित्येषु वृत्तिर्येषां धर्माणां ते तथा । तेषां भावो नित्यत्वात्यन्ताभाववद्वृत्तित्वम् । तेन रहितत्वस्य यत् नित्यत्वव्यापकत्वं तस्योपपत्तेः । नित्यत्वं व्यापकं, नित्यत्वात्यन्ताभाववद्वृत्तित्वरहितत्वं व्याप्यम् । तथा हि—यत्र यत्र नित्यत्वात्यन्ताभाववद्वृत्तित्वरहितत्वं तत्र तत्र नित्यत्वम् । यथा आत्माकाशादिषु । एवं धर्मिभेदाभावेऽपि शब्दभेदमात्रदर्शनप्रकारेण नित्यत्वस्य व्याप्यव्यापकभावोपपत्तिः ।

एतदाकाशवृत्तित्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणमित्युक्तौ पक्षीकृतशब्दमात्रनिष्ठेन पक्षीकृतशब्दान्यत्वात्यन्ताभावादिना अर्थान्तरता स्यात् । तस्य पक्षीकृतशब्दमात्रवृत्तित्वेन पक्षीकृतशब्दाकाशवृत्तित्वरहितत्वात् । पक्षीकृतशब्दनित्यत्वेऽपि तन्मात्रनिष्ठानां नित्यत्वव्याप्यत्वोपपत्त्या नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वाच्च । अतः पक्षीकृतशब्दमात्रनिष्ठैरर्थान्तरनिरासार्थं नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितग्रहणम् । पक्षीकृतशब्दनित्यत्वपक्षे तन्मात्रनिष्ठानां नित्यत्वव्यतिरिक्तत्वे सति नित्यत्वव्याप्यत्वेन तद्रहितत्वानुपपत्तेः ।

(आनन्द०) पक्षीकृतशब्दनित्यत्वे तन्मात्रनिष्ठस्य नित्यनिष्ठत्वरहितत्वाभावाच्च तेनार्थान्तरतां [illegible] आह—**पक्षीकृतशब्दनित्यत्वे सतीति** । [illegible] प्रकारमाह—**पक्षीति** ।

(भुवन०)—अत्र [illegible] परित्यज्य [illegible] करोति—**एतदाकाशवृत्ति[illegible]त्यादि** । **पक्षीकृतशब्दान्यत्वेत्यादि** । पक्षीकृतशब्दान्[illegible] अत्यन्तं [illegible] । [illegible]—**तस्य पक्षीकृतशब्दमात्रेत्यादि** । [illegible] पक्षीकृतशब्दाकाशवृत्तित्वरहितत्वमुपपन्नमेवेति । [illegible] विशेषणविशिष्टत्वं [illegible]—**पक्षीकृतशब्दनित्यत्वेऽपीत्यादि** । [illegible] सति [illegible] । [illegible] । [illegible] सत्येव [illegible] तत्र तत्र [illegible] । [illegible] सति [illegible] । [illegible]

नित्यत्वव्याप्यत्वरहितेतिविशेषणग्रहणम् । तथा च सति पक्षीकृतशब्दानित्यत्वपक्षे शब्दत्वश्रावणत्वशब्दान्यत्वात्यन्ताभावादीनां नित्यत्वव्याप्यत्वेन तद्रहितत्वानुपपत्तिः ।

एतदाकाशवृत्तित्वरहितनित्यत्वव्याप्यत्वरहितनित्यत्वाव्याप्यनित्यनिष्ठत्वरहिताधिकरणमित्युक्ते नित्यपदार्थेषु साध्याभावः । यदि नित्यपदार्थधर्मेषु नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वं नित्यनिष्ठत्वरहितत्वेन, तदा नित्यनिष्ठत्वनित्यनिष्ठत्वरहितत्वयोर्व्याघातः । अथ नित्यत्वाव्याप्यत्वरहितत्वेन, तदानित्यत्वव्याप्यत्वरहितत्वनित्यत्वाव्याप्यत्वरहितत्वयोर्व्याघातः । तस्मान्नित्यत्वव्याप्यत्वरहितो नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितश्च धर्मो नित्येषु न संभवत्येवेति व्याप्तिभङ्गः । तन्निवृत्त्यर्थं नित्यत्वव्यतिरिक्तग्रहणम् । एतदाकाशवृत्तित्वरहितनित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहिताधिकरणमित्युक्ते गगनान्यत्वेनोक्तरूपोपपन्नेनार्थान्तरता स्यात् । तन्निवृत्त्यर्थं नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितग्रहणम् । गगनान्यत्वस्य नित्यनिष्ठत्वात् नित्यत्वाव्याप्यत्वाच्च तद्रहितत्वानुपपत्तेः ।

(आनं०) विशेष्याभावाद्वा विशेषणाभावाद्वा विशिष्टाभावो वाच्यः । तथा च नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वं किं नित्यनिष्ठत्वाभावेन नित्यत्वाव्याप्यत्वाभावेन वेति विकल्प्य दूषयति—यदीत्यादिना । फलितमुपसंहरति—तस्मादिति । नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितग्रहणेन गगनान्यत्वनिरासः कुतोऽत्राह—गगनान्यत्वस्येति । नित्यानित्यसकलवस्तुषु गगनातिरिक्तेषु गगनान्यत्वस्य सत्वान्नित्यनिष्ठत्वान्नित्यत्वाव्याप्यत्वाच्च नित्यत्वव्याप्यत्वे सति नित्यनिष्ठत्वरहितत्वं नास्तीत्यर्थः ।

(भुवन०)—अथ द्वितीयविशेषणगत्यं नित्यत्वव्यतिरिक्तेतिपदं मुक्त्वा व्यावृत्तिं चिन्तयति—एतदाकाशवृत्तित्वरहितेत्यादि । नित्यपदार्थेषु साध्याभाव इति । दृष्टान्तीकृतेषु नित्यपदार्थेषु साध्यत्वानुपपत्तिः । विशेष्याभावाद्वा विशेषणाभावाद्वा विशिष्टाभावो वाच्यः । तथा च नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वं किं नित्यनिष्ठत्वाभावेन वा, नित्यव्याप्यत्वाभावेन वा, इति विकल्पाभ्यां तृतीयविशेषणविचारणया नित्यपदार्थेषु साध्यानुपपत्तिमेव दर्शयति—यदि नित्यपदार्थेत्यादि । अत्र तृतीयविशेषणविशिष्टा द्वये धर्माः स्युः । एके केवलानित्यनिष्ठा घटत्वादयः । अपरे केवलनित्यनिष्ठा आकाशत्वपरमाणुत्वादयः । ते च द्वयेऽपि विकल्पद्वयेन नित्येषु निवर्तयितव्याः । तत्र प्रथमविकल्पेन केवलानित्यनिष्ठान् घटत्वादींन्निवर्तयति—यदीत्यादिना । यदि नित्यनिष्ठधर्मेषु नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वं विद्यते, केन प्रकारेणेत्याह—नित्यनिष्ठत्वरहितत्वेनेति । नित्यवृत्तित्वरहितत्वेन । तदा नित्यनिष्ठत्वनित्यनिष्ठत्वरहितत्वयोर्व्याघात इति । नित्यवृत्तित्वनित्यवृत्तित्वरहितत्वयोर्व्याघातः । अयमर्थः—दृष्टान्तीकृतेषु आकाशादिनित्येषु वर्तमानस्य यस्य कस्यापि धर्मस्य नित्यनिष्ठत्वेन नित्यनिष्ठत्वरहितत्वं न स्यादेवेति स्पष्ट एव व्याघातः । ' विरुद्ध-

समुच्चयो व्याघातः' इति तल्लक्षणात्। अथ केवलनित्यनिष्ठानाकाशत्वादीन्निवर्तयति—**अथेत्यादिना**। अथ नित्यत्वाव्याप्यत्वरहितत्वेनेति विकल्पोऽङ्गीक्रियते, तदा द्वितीयविशेषणोक्तस्य नित्यत्वव्याप्यत्वरहितत्वस्य एतद्विशेषणायातनित्यत्वाव्याप्यत्वरहितत्वस्य च व्याघातः। नित्यत्वव्याप्यत्वरहितो हि नित्यत्वाव्याप्यः स्यात्, न तु नित्यत्वाव्याप्यत्वरहितः। नित्यत्वाव्याप्यत्वरहितोऽपि च नित्यत्वव्याप्यः स्यात्, न तु नित्यत्वव्याप्यत्वरहितः। तेन व्याघात एव। अयं भावः—नित्यत्वव्यतिरिक्तेति पदं विना नित्यपदार्थधर्मस्य यदि द्वितीयविशेषणविशिष्टत्वं स्यात्, तदा तृतीयविशेषणविशिष्टत्वं न स्यात्। यदि च तृतीयविशेषणविशिष्टत्वं, तदा न द्वितीयविशेषणविशिष्टत्वमिति। ततो द्वितीयतृतीयविशेषणविशिष्टो धर्मो नित्यत्वव्यतिरिक्तेतिपदं विना नित्येषु न संभवत्येव। तेन तेषु व्याप्तिभङ्गः। तन्निवृत्त्यर्थं नित्यत्वव्यतिरिक्तग्रहणम्। तथा च सति नित्यपदार्थेषु नित्यत्वमेव धर्मः। अथ तृतीयं विशेषणं त्यक्त्वा व्यावृत्तिं विधत्ते—**एतदाकाशवृत्तित्वरहितेत्यादि**। **गगनान्यत्वेनोक्तरूपोपपन्नेनार्थान्तरतेति**। गगनान्यत्वस्य हि गगनावृत्तित्वेनैतच्छब्दवृत्तित्वेन चैतदाकाशवृत्तित्वरहितत्वादनित्येष्वपि वर्तमानत्वेन नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितत्वाच्च एतद्विशेषणद्वयोपपन्नेन तेनार्थान्तरता स्यात्, तन्निरासार्थं तृतीयविशेषणग्रहणम्। अनेन विशेषणेन कथमर्थान्तरतानिरासः, अत्राह—**गगनान्यत्वस्येति**। गगनान्यत्वस्य गगनातिरिक्तेषु सकलनित्यानित्येषु विद्यमानत्वेन नित्यनिष्ठत्वात् नित्यत्वाव्याप्यत्वाच्च। **तद्रहितत्वेति**। नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वानुपपत्तेरिति भावः।

नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितं नित्यत्वं वा स्यान्नित्यत्वाव्याप्यं वा। तत्र नित्यत्वं तावत्पक्षे न सिध्यति। पक्षीकृतशब्दनित्यत्वपक्षे नित्यत्वस्यैतदाकाशवृत्तित्वेन एतदाकाशवृत्तित्वरहितत्वव्याघातात्। नित्यत्वाव्याप्यमपि नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितं यदि नित्यत्वाव्याप्यत्वरहितत्वेन, तदा नित्यत्वाव्याप्यं नित्यत्वाव्याप्यत्वरहितं चेति व्याघातादेव तथारूपस्य पक्षेऽनुपसंहारः। तेन नित्यत्वाव्याप्यस्य नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितत्वं नित्यनिष्ठत्वरहितत्वेन स्वीकर्तव्यम्। तेन नित्यनिष्ठत्वरहितः पक्षीकृतशब्दे धर्मोऽधिगम्यमानो नित्यत्वप्रतिक्षेपरूपमनित्यत्वमन्तर्भाव्य अधिगम्यते इति अनित्यत्वसिद्धिः।

(आनं०) तथापि कथं शब्दस्यानित्यत्वसिद्धिरत्राह—**नित्यत्वेति**। नित्यत्वव्यतिरिक्तत्वाभावान्नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितनित्यत्वमेवास्तु, अत आह—**अत्रेति**। द्वितीयेऽपि नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितं नित्यत्वाव्याप्यत्वाभावेन नित्यनिष्ठत्वाभावेन वेति विकल्प्याद्यमनुवदति—**नित्यत्वाव्याप्यमपीति**। अनुवदति—**तदेति**। द्वितीयः परिशिष्यत इत्याह—**तेनेति**। फलितमत्राह—**तेन नित्येति**।

(भुवन०)—एवमत्र कथं शब्दस्यानित्यत्वसिद्धिरत्र प्राह—**नित्यत्वव्यतिरिक्तेत्यादि**।

नित्यत्वव्यतिरिक्तेत्यादिविशेषणेन धर्मद्वयमायाति, नित्यत्वं वा नित्यत्वाव्याप्यं वा । तत्र नित्यत्वं तावत्त्रयमविशेषणेन एतदाकाशेत्यादिना विचार्यमाणं न जाघटीति व्याघातादिति दर्शयति— तत्र नित्यत्वं तावदित्यादिना । अथ नित्यत्वाव्याप्यमित्येवंरूपे द्वितीये धर्मान्तरविकल्पे पूर्ववन्नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितं नित्यत्वाव्याप्यत्वाभावेन वा नित्यनिष्ठत्वाभावेन वा इति धर्माभ्यां विचारयति—नित्यत्वाव्याप्यमपि नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितमित्यादि । द्वितीयविशेषणोद्धरितं[1] नित्यत्वाव्याप्यमिति द्वितीयं धर्मान्तरं नित्यत्वाव्याप्यनित्यनिष्ठत्वरहितं सत् यदि तृतीयविशेषणायातनित्यत्वाव्याप्यत्वरहितत्वेन, तदा नित्यत्वाव्याप्यं नित्यत्वाव्याप्यत्वरहितं चेति व्याघातः । व्याघातादेव च तथाभूतस्य धर्मस्य पक्षे शब्दरूपेऽनुपसंहारोऽनवतारः । अथ तृतीयविशेषणायातं नित्यनिष्ठत्वरहितं द्वितीयं धर्मान्तरं परिशिष्टमभ्युपगच्छन् शब्दस्यानित्यत्वं दर्शयति— तेन नित्यत्वाव्याप्यस्येत्यादिना । तेन नित्यनिष्ठत्वरहित इत्यादि । तेन नित्यनिष्ठत्वरहितः घटान्यतरत्वादिर्धर्मः पक्षीकृतशब्देऽधिगम्यमानः । नित्यत्वप्रतिक्षेपरूपमनित्यत्वमन्तर्भाव्येति । नित्यत्वतिरस्काररूपमनित्यत्वं पक्षे सिद्धं कृत्वा अधिगम्यते ज्ञायते इत्यर्थः । पूर्वोक्तविशेषणत्रयेण नित्यधर्माणां प्रतिक्षेपात् शब्दस्यानित्यत्वं विनैवंविधविशेषणविशिष्टाः शब्दघटान्यतरत्वादयः शब्दधर्मा नोपपद्यन्ते । तस्माच्छब्दस्यानित्यत्वमङ्गीकरणीयमेवेति । यद्वा अत्र शब्दत्वश्रावणत्वादयोऽपि पक्षे साध्यधर्मा ज्ञेयाः । ते च नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितास्तदैव, यदि शब्दस्यानित्यत्वं स्यादिति द्वितीयविशेषणेनापि परिशेषाच्छब्दस्यानित्यत्वमुपपाद्यमिति ।

ननु नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वरहितो नित्यत्वव्याप्यनित्यनिष्ठत्वरहितश्च धर्मो नित्येषु नित्यत्वमेव । तस्य च पक्षीकृतशब्दाकाशवृत्तित्वरहितत्वं शब्दानित्यत्वसिद्धेः पूर्वं दुरधिगममिति कथं नित्यानां सपक्षतेति चेत् । न । नित्यानां पक्षतुल्यत्वेनास्माभिः सपक्षत्वानङ्गीकारात् । अत एव चैनां महाविद्यां मूलानुमानविपक्षं गगनादिकं पक्षीकृत्य प्रवर्तमानासु गणयिष्यामः । तदा च मूलानुमानपक्षस्य पक्षतुल्यत्वं सपक्षस्य च सपक्षत्वमिति॥८॥

(आनं०)—नित्यपदार्थानां साध्यसमानधर्मत्वाभावेन सपक्षत्वासिद्धौ व्याप्तिभङ्ग इति चोदयति—नन्विति । शब्दानित्यत्वसिद्धेः पूर्वं नित्यत्वस्य एतदाकाशवृत्तित्वराहित्यसंदेहान्नित्यानां संदिग्धसाध्यसमानधर्मतया पक्षतुल्यत्वमिति परिहरति—नेति । न च पक्षतुल्ये व्यभिचारः । अयमभिरदृष्टातीन्द्रियसामान्यवन्निष्क्रियाश्रयः, कारणत्वात्, गुरुत्वाश्रयवदित्यादौ गगनादिषु व्यभिचारापत्तेरिति भावः । पक्षतुल्यत्वे लिङ्गमाह—अत एवेति । लिङ्गत्वा[2] ...... ।

(भुवन०)—नित्यवस्तूनां साध्यसमानधर्मत्वाभावेन सपक्षत्वासिद्धौ व्याप्तिभङ्ग इत्याक्षिपति—ननु नित्यत्वव्यतिरिक्तेत्यादि । नित्यत्वव्यतिरिक्तनित्यत्वव्याप्यत्वेत्यादिद्वितीयतृतीयविशेषणविशिष्टं नित्येषु दृष्टान्तीक्रियमाणेषु नित्यत्वमेव । तस्य च पक्षीकृतशब्दाकाशेत्यादि ।

---

१ व्वरितमिति स्यात् ? । २ 'लिङ्गत्वा' इत्यतः परमादर्शग्रन्थे १० पत्राणि दृग्गनीनीति विच्छिन्नं विद्यते ।

[illegible] च नित्यत्वस्य दृष्टान्तेऽपि यतोक्तविशेषणत्रयविशिष्टत्वं विलोक्यते । तत्र प्रथमविशेषणविशिष्टं नास्ति । [illegible] [illegible]विशेषणविशिष्टत्वं तदा अस्य स्यात्, यदि शब्दस्यानित्यत्वं सिद्धं स्यात् । [illegible] सिद्धं नास्ति । शब्देऽद्यापि तस्य साध्यमानत्वात् । असिद्धे चानित्यत्वे नित्यत्वे[illegible] [illegible] न स्यात् । पक्षीकृतशब्दे आकाशे च वर्तनात् । तस्माद्दृष्टान्तार्थं पृथक्कृतस्य नित्य[illegible] [illegible] [illegible] संदिग्धसाध्यसमानधर्मत्वेन [illegible] [illegible] [illegible] [illegible]—न नित्यानां पक्षतुल्यत्वेनेत्यादिना । [illegible] [illegible] एव दृष्टान्तीकार्याः, न नित्या आकाशादयः । तेषां संदिग्धसाध्यधर्म[illegible] [illegible] । न च [illegible] व्यभिचारः । 'न हि पक्षे पक्षतुल्ये वा व्यभिचारः' इति [illegible] । [illegible]—अत एवैतां महाविद्यामिति । शब्दोऽनित्यः कृतकत्वात् घटवत् इति [illegible] । [illegible] [illegible] [illegible], [illegible] । तदा चेत्यादि । तत्र [illegible] [illegible] [illegible] । मुख्यानुमानपक्षस्येति । [illegible] पक्षतुल्यत्वात् । [illegible] [illegible] । [illegible] [illegible] [illegible] । साधकत्वमिति । [illegible] [illegible] । [illegible] नित्यानां पक्षतुल्यत्वेन [illegible] [illegible] [illegible] । तेन च नित्यानां पक्षतुल्यत्वेन [illegible] [illegible] [illegible] [illegible] महाविद्या[illegible] ॥ ८ ॥

९. [illegible] [illegible] [illegible]निराकरणं [illegible] । [illegible] [illegible] धर्मः । [illegible] [illegible] [illegible] वा स्यात्, [illegible] वा । आद्यः पक्षे [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] धर्मः पक्षे [illegible] [illegible] ॥ ९ ॥

[illegible] [illegible] [illegible] [illegible]—अयं शब्दः [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]

नित्यनिष्ठत्वरहितो वेति । घटत्वपटत्वादिर्धर्मः, शब्दे नित्यत्वे चाङ्गीक्रियमाणे शब्दत्वश्रावणत्वादिः । आद्यः पक्षे व्याघातादित्यादि । न ह्येतदन्योन्याभावव्याप्यो नित्यधर्मो वा नित्येतरधर्मो वा तन्मात्रनिष्ठः एतस्मिन् शब्दे स्वान्योन्याभावरहिते साधयितुं शक्यते । असंभवात् । शब्दान्योन्याभावव्याप्यो हि धर्मः शब्दान्योन्याभाववत्येव धर्मिणि साधयितुं शक्यो नान्यत्रेत्यर्थः । द्वितीयविकल्पेन शब्दानित्यत्वसिद्धिमाह—तेन नित्यनिष्ठत्वरहितो धर्म इत्यादि । नित्यनिष्ठत्वरहितोऽपि धर्मो यथोक्तविशेषणोपपन्नो द्वेधा, पक्षनिष्ठः शब्दत्वादिः, सपक्षनिष्ठो घटत्वादिश्च । तत्र घटत्वादिरन्यमात्रधर्मत्वेन पक्षे व्याघातादेव साधयितुमशक्यः । शब्दत्वादिश्च नित्यनिष्ठत्वरहितत्वदेव स्यात्, यदि शब्दस्यानित्यत्वं स्यात् । तस्मादनित्यः शब्दः स्वीकर्तव्यः । तत्तत्पदार्थमात्रनिष्ठं घटत्वगगनत्वादिधर्ममात्रमादाय सर्वत्र नित्यानित्यपदार्थेषु साध्यप्रसिद्धिर्द्रष्टव्येत्यर्थः ॥ ९ ॥

१० अयं शब्दः शब्दत्वात्यन्ताभावाव्याप्यनित्यनिष्ठत्वरहिताधिकरणं मेयत्वादिति । अत्र च पक्षीकृतशब्दान्योन्याभावतुल्यः शब्दत्वात्यन्ताभावः । शेषं पूर्ववत् । एवं पक्षीकृतशब्दनिष्ठयत्किञ्चिद्धर्मविशेषात्यन्ताभावमुपादाय यावन्तः पक्षीकृतशब्दधर्मास्तावत्यो महाविद्या द्रष्टव्याः ॥ १० ॥

१० (भुवन०)—अयं शब्दः शब्दत्वात्यन्ताभावाव्याप्येत्यादि । शब्दत्वस्यात्यन्ताभावः शब्दत्वात्यन्ताभावः इति कार्यम् । यादृशः पाश्चात्यानुमाने शब्दान्योन्याभावः तादृशोऽत्र शब्दत्वात्यन्ताभवः । [1]शेषं पूर्ववत् । अत्र अयमितिपक्षविशेषणस्य कार्यं न दृश्यते । शब्दमात्रस्यापि शब्दत्वात्यन्ताभावरहितत्वेन शब्दैकदेशे सिद्धसाधनत्वाद्यभावात् । अतः केवलं स्पष्टीकरणार्थमयमितिविशेषणम् । यद्वा पक्षतुल्ये यत्र क्वापि शब्दे साध्यसिद्धेर्निषेधाय अयमितिपदम् । अत्रापि पूर्ववत् शब्दत्वात्यन्ताभावाव्याप्यनित्यनिष्ठत्वरहितो धर्मः शब्दत्वात्यन्ताभावव्याप्यो वा नित्यनिष्ठत्वरहितो वा । पूर्वः पक्षे व्याहत इति, द्वितीयः पक्षे सिध्यन्ननित्यत्वमन्तर्भाव्य सिध्यतीति शब्दानित्यत्वसिद्धिरित्यर्थः । एवं पक्षीकृतशब्दनिष्ठयत्किञ्चिदित्यादि । यथा अयं शब्दः शब्दत्वात्यन्ताभावाव्याप्येत्यादिमहाविद्या प्रयुक्ता, तथा पक्षीकृतशब्दनिष्ठा ये केचन धर्मविशेषाः श्रावणत्वाकाशविशेषगुणत्वशब्दव्यतिरिक्तान्यत्वादयः तेषां योऽत्यन्ताभावः तमादायान्या अपि महाविद्याः प्रयोक्तव्याः । तथाहि—अयं शब्दः आकाशविशेषगुणत्वात्यन्ताभावाव्याप्यनित्यनिष्ठत्वरहिताधिकरणं मेयत्वात् । एवमन्या अपि ज्ञेयाः ॥ १० ॥

११ यद्वा सामान्यतः अयं शब्दः एतन्निष्ठात्यन्ताभावाव्याप्यनित्यनिष्ठत्वरहिताधिकरणं मेयत्वादिति । एतन्निष्ठस्यात्यन्ताभावः एतन्निष्ठात्यन्ताभावः । शेषं सुगमम् ॥ ११ ॥

११ (भुवन०)—यद्वा सामान्यतः अयं शब्दः एतन्निष्ठात्यन्ताभावेत्यादि । एतस्मिन् पक्षीकृते शब्दे निष्ठा यस्य स एतन्निष्ठः । एतन्निष्ठस्य अत्यन्ताभावः एतन्निष्ठात्यन्ताभावः । तेन

1 शेषं सर्वं पूर्वं इति च पुस्तकपाठः ।

अव्याप्या ये नित्यनिष्ठाः । तेषां भावः तत्त्वम् । तेन रहितो धर्मः, तद्वान् शब्दः । शेषं पूर्ववदेव । पूर्वमहाविद्यायां हि यथानामग्राहं शब्दत्वादिधर्मविशेषो निर्दिष्टः, इह पुनरेतन्निष्ठपदेन सामान्येन यः कश्चन धर्म इति सामान्यत इत्युक्तम् । एवमग्रेऽपि शब्दत्वादिधर्मविशेषस्थाने सामान्येनैतन्निष्ठपदं ज्ञेयमिति ॥ ११ ॥

१२ अयं शब्दः एतदन्योन्याभावानित्यत्वान्यतराधिकरणं मेयत्वादिति । एतच्छब्दान्योन्याभावव्यतिरिक्तत्वे सति[1], अनित्यत्वव्यतिरिक्तं यत् तदत्यन्ताभावः । एतच्छब्दान्योन्याभावानित्यत्वान्यतरत्वमुभयानुगतम् । तेनैतच्छब्दान्योन्याभावानित्यत्वयोरन्यतरत्वमनुगतं निर्वक्तुमशक्यमिति खण्डनं निरस्तम् । एवमन्यत्राप्यन्यतरत्वं विवेचनीयम् ॥ १२ ॥

१२ (भुवन०)—**अयं शब्दः एतदन्योन्याभावेत्यादि** । एतस्य शब्दस्य अन्योन्याभावश्च अनित्यत्वं च एतदन्योन्याभावानित्यत्वे । तयोर्यदन्यतरत् तस्याधिकरणं शब्द इत्यर्थः । एतदन्योन्याभावानित्यत्वयोः अन्यतरो हि धर्म एतदन्योन्याभावो वा स्यात्, अनित्यत्वं वा स्यात् । आद्यः पक्षे व्याहत इति द्वितीयमनित्यत्वं शब्दे सिध्यतीति भावः । एतदन्योन्याभावानित्यत्वयोरन्यतरस्य धर्मस्य अन्योन्याभावरूपत्वे व्याघातः, अनित्यत्वरूपत्वे च व्याप्त्यसिद्धिः[2], नित्येषु तदभावात् । तेन एकानुगतत्वादन्यतरत्वमुभयानुगतं नोपपद्यते इति शास्त्रान्तरस्थमन्यतरत्वखण्डनमाशङ्क्य तद्व्यवच्छेदायाह—**एतच्छब्दान्योन्याभावव्यतिरिक्तत्वे सतीत्यादि** । एतच्छब्दस्यान्योन्याभावः एतच्छब्दान्योन्याभावः । तस्माद्व्यतिरिक्तत्वेऽन्यत्वे सति यत् अनित्यत्वव्यतिरिक्तत्वमनित्यत्वादन्यत्वमेतद्द्वयव्यतिरिक्तसर्वविश्वनिष्ठम्, तदत्यन्ताभावः एव एतच्छब्दान्योन्याभावानित्यत्वान्यतरत्वमुच्यते । तच्च किंविशिष्टम् । उभयानुगतम् । एतदन्योन्याभावानित्यत्वलक्षणं यदुभयं तत्रानुगतमनुप्राप्तम् । एतदन्योन्याभावानित्यत्वव्यतिरिक्तत्वात्यन्ताभावस्य एतद्द्वये एव वर्तमानत्वात् । तेन एतच्छब्दान्योन्याभावेत्यादिखण्डनं निरस्तम् । एवमन्यत्राप्यन्यतरत्वं विवेक्तव्यमित्यर्थः ॥ १२ ॥

१३ अयं शब्दः एतच्छब्दत्वात्यन्ताभावानित्यत्वान्यतराधिकरणं मेयत्वादिति । शब्दत्वात्यन्ताभावानित्यत्वान्यतरः शब्दत्वात्यन्ताभावो वा, अनित्यत्वं वा, आद्यः पक्षे व्याहतत्वान्न सिध्यतीत्यनित्यत्वसिद्धिः । एवं पक्षीकृतशब्दमात्रनिष्ठधर्मविशेषात्यन्ताभावमुपादाय यावन्तः पक्षीकृते शब्दे[3] धर्मास्तावत्यो महाविद्या द्रष्टव्याः ॥ १३ ॥

१३ (भुवन०)—**अयं शब्दः एतच्छब्दत्वात्यन्ताभावेत्यादि** । एतच्छब्दत्वस्य अत्यन्ताभाव इति तत्पुरुषः कार्यः । **एवं पक्षीकृतशब्दमात्रनिष्ठेत्यादि** । यथा अयं शब्दः एतच्छ्रावणत्वात्यन्ताभावानित्यत्वान्यतराधिकरणं प्रमेयत्वादित्यादि ॥ १३ ॥

---

१ अस्याग्रे ' अनित्यत्वव्यतिरिक्तत्वे सति ' इत्यधिकं ग पुस्तके विद्यते । २ 'व्याप्त्यासिद्धिः' इति ज पुस्तकपाठः । ३ 'शब्दे विशेषधर्माः' इति ज पुस्तकपाठः ।

१४ यद्वा सामान्यतः अयं शब्दः एतन्निष्ठात्यन्ताभावानित्यत्वान्यतराधिकरणं मेयत्वादिति ॥ १४ ॥

१४ (भुवन०)—यद्वा सामान्यतः इत्यादि । एतन्निष्ठः शब्दत्वश्रावणत्वादिधर्मविशेषः, तत्यात्यन्ताभावः एतन्निष्ठात्यन्ताभावः ॥ १४ ॥

१५ अयं शब्दः एतदन्योन्याभावात्यन्ताभावानित्यत्वात्यन्ताभावान्यतररहितः मेयत्वादिति । अत्र चैतदन्योन्याभावात्यन्ताभाववति पक्षे तद्रहितत्वं व्याहतमित्यनित्यत्वात्यन्ताभावरहितत्वं पक्षे सिध्यदनित्यत्वमन्तर्भाव्य सिध्यतीत्यनित्यत्वसिद्धिः ॥ १५ ॥

१५ (भुवन०) अयं शब्दः एतदन्योन्याभावेत्यादि । एतस्य शब्दस्यान्योन्याभाव एतदन्योन्याभावः । तस्य अत्यन्ताभावश्च अनित्यत्वात्यन्ताभावश्च नित्यत्वम् । तयोरन्यतरेण रहित इत्यर्थः । अयं शब्दः अनित्यत्वात्यन्ताभावरहित इत्युक्ते नित्येषु साध्यासिद्धिः । तन्निरासाय एतदन्योन्याभावात्यन्ताभावेत्युक्तम् । एवमपि नित्येषु साध्यासिद्धिरेव । तेषामेतदन्योन्याभावात्यन्ताभावरहितत्वेन अनित्यत्वात्यन्ताभावरहितत्वेन चैतद्द्वयरहितत्वासंभवात् । तेन तेषु साध्यसिद्ध्यर्थमन्यतरेति गृहीतम् । अत्रानित्यत्वसिद्धिमाह—अत्र चैतदन्योन्याभावात्यन्ताभावेत्यादिना । तद्रहितत्वमिति । एतदन्योन्याभावात्यन्ताभावरहितत्वमित्यर्थः ॥ १५ ॥

१६ अयं शब्दः शब्दत्वानित्यत्वात्यन्ताभावान्यतररहितः मेयत्वादिति ॥ एवं पक्षनिष्ठं यं कञ्चन धर्मविशेषमुपादाय[1] यावन्तः पक्षे धर्माः, तावत्यो महाविद्या द्रष्टव्याः ॥ १६ ॥

१६ (भुवन०)—अयं शब्दः शब्दत्वेत्यादि । अनित्यत्वस्य अत्यन्ताभावः अनित्यत्वात्यन्ताभावः नित्यत्वम् । शब्दत्वं चानित्यत्वात्यन्ताभावश्च । तयोरन्यतररहितः तयोरन्यतरात्यन्ताभावाश्रयः इत्यर्थः । यं कञ्चन धर्मविशेषमिति । वाचकत्ववर्णात्मकत्वाकाशविशेषगुणत्वश्रावणत्वैतद्विशिष्टसामान्यवत्त्वादिकमित्यर्थः ॥ १६ ॥

१७ यद्वा सामान्यतः अयं शब्दः एतन्निष्ठानित्यत्वात्यन्ताभावान्यतररहितः मेयत्वादिति ॥ एतन्निष्ठश्चानित्यत्वात्यन्ताभावश्चेति द्वन्द्वसमासः ॥ १७ ॥

१७ (भुवन०)—यद्वा सामान्यत इत्यादि । सुगमैव पूर्ववत् ॥ १७ ॥

१८ अयं शब्दः एतदन्योन्याभावव्यतिरिक्तानित्यनिष्ठत्वरहिताधिकरणं मेयत्वादिति ॥ एतदन्योन्याभावव्यतिरिक्तानित्यनिष्ठेषु एतदन्योन्याभावव्यतिरिक्तनित्यनिष्ठत्वं धर्मः । तद्रहितश्चैतदन्योन्याभावो वा स्यात्, नित्यनिष्ठत्वरहितो वा । आद्यः पक्षे व्याहतः । तेन नित्यनिष्ठत्वरहितः पक्षे सिध्यदनित्यत्वमन्तर्भाव्य सिध्यतीत्यनित्यत्वसिद्धिः ॥ १८ ॥

---

१ 'धर्मेऽयं' इति ज पुस्तकपाठः । २ [illegible] इति द पुस्तक पाठः ।

१८ (भुवन०)—अयं शब्दः एतदन्योन्याभावव्यतिरिक्तेत्यादि । एतदन्योन्याभावव्यतिरिक्ताश्च ते नित्यनिष्ठाश्च । तेषां भावः तत्त्वम् । तेन रहितो यो धर्मः, तस्याधिकरणं शब्द इत्यर्थः । नित्यनिष्ठा धर्मा आकाशत्वप्रमेयत्वास्तित्वादय एतदन्योन्याभावश्च, तेषु । एतदन्योन्याभावव्यतिरिक्तपदेन एतदन्योन्याभावो नित्यनिष्ठेभ्यो वहिष्कृतः । तस्य च पक्षे साधने व्याघातः स्यात् । अतो यथोक्तविशेषणोपपन्नः एतदन्योन्याभावो दृष्टान्तार्थं सर्वत्र ज्ञेयः । नित्यनिष्ठत्वरहितश्च धर्मः शब्दत्वादिः पक्षे ज्ञेयः । व्याख्यानं तु सुगममेव ॥ १८ ॥

१९ अयं शब्दः शब्दत्वात्यन्ताभावव्यतिरिक्तनित्यनिष्ठत्वरहिताधिकरणं मेयत्वादिति ॥ व्याख्यानं पूर्ववत् । एवं पक्षीकृतशब्दनिष्ठयत्किञ्चिद्धर्मविशेषात्यन्ताभावमुपादाय यावन्तः पक्षीकृतशब्दधर्माः, तावत्यो महाविद्या द्रष्टव्याः ॥१९॥

१९ (भुवन०)—अयं शब्दः शब्दत्वात्यन्ताभावेत्यादि । शब्दत्वस्यात्यन्ताभावः शब्दत्वात्यन्ताभावः इति तत्पुरुषसमासः कार्यः । शेषं [1]पूर्ववत् ॥ १९ ॥

२० यद्वा सामान्यतः अयं शब्दः एतन्निष्ठात्यन्ताभावव्यतिरिक्तनित्यनिष्ठत्वरहिताधिकरणं मेयत्वादिति ॥ एतन्निष्ठस्य अत्यन्ताभाव इति समासः॥२०॥

२० (भुवन०)—यद्वा सामान्यतः अयं शब्दः एतन्निष्ठात्यन्ताभावेत्यादि । एतन्निष्ठस्य शब्दत्वादेर्धर्मस्य अत्यन्ताभावः एतन्निष्ठात्यन्ताभाव इत्यत्रापि तत्पुरुषसमास एव कर्तव्यः ॥ २० ॥

२१ अयं शब्दः शब्दत्वव्यतिरिक्तैतद्धर्मत्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ शब्दत्वव्यतिरिक्तैतद्धर्मेषु शब्दत्वव्यतिरिक्तैतद्धर्मत्वं नाम धर्मः । तद्रहितश्चानेतद्धर्मो वा, शब्दत्वं वा । आद्यः पक्षे व्याहतः । तेन शब्दत्वमनित्यनिष्ठत्वविशेषितं पक्षे सिध्यतीति शब्दानित्यत्वसिद्धिः । एवं पक्षमात्रनिष्ठयत्किञ्चिद्धर्मविशेषव्यतिरिक्तत्वमुपादाय यावन्तः पक्षमात्रनिष्ठा धर्मास्तावत्यो महाविद्या द्रष्टव्याः ॥ २१ ॥

२१ (भुवन०)—अयं शब्दः शब्दत्वव्यतिरिक्तैतद्धर्मत्वरहितानित्यनिष्ठाधिकरणमिति । शब्दत्वात् व्यतिरिक्ताः भिन्नाः शब्दत्वव्यतिरिक्ताः । ते च ते एतद्धर्माश्च शब्दत्वव्यतिरिक्तैतद्धर्माः । तेषां भावः तत्त्वम् । तेन रहितश्चासौ अनित्यनिष्ठश्च । तदाश्रयः शब्द इति भावः । शब्दत्वव्यतिरिक्तैतद्धर्मत्वरहितोऽनित्यनिष्ठश्च धर्मः शब्दान्यनिष्ठः पक्षीकृतशब्दान्योन्याभावादिर्दृष्टान्तीभूतेषु सर्वपदार्थेषु पक्षव्यतिरिक्तेषु नित्यानित्येषु ज्ञातव्यः । अनित्ये घटपटादौ च घटत्वपटत्वादिकोऽपि धर्मो ज्ञेयः । आकाशत्वादिकस्तु धर्मोऽनित्यनिष्ठो न भवतीति नित्येषु न तेन साध्यसिद्धिः, किन्तु पक्षान्योन्याभावादिनैव । पक्षे च शब्दत्वव्यतिरिक्तैतद्धर्मत्वरहितो धर्मः शब्दत्वमेव । तच्च अनित्यनिष्ठं तदैव स्यात्, यदि शब्दोऽनित्यः स्यादित्यत्र शब्दानित्यत्वसिद्धिः । नित्यत्वेनार्थान्तरतापरिहारार्थमनित्यनिष्ठेतिपदम् । प्रमेयत्वादिव्यावृत्त्यर्थमेतद्धर्मत्वरहितेति ग्रहणम् । व्याघातपरिहाराय

---

१ 'पूर्ववत्' इति ढ पुस्तके पाठः ।

शब्दत्वव्यतिरिक्तेतिपदोपादानम् । तथा च पक्षे अनित्यनिष्ठेतिविशेषणविशिष्टशब्दत्वसिद्धया व्याघातपरिहारो बोद्धव्यः । एतदेवानुमानं शब्दव्यतिरिक्तेत्यादिना व्याख्यानयति—अनेतद्धर्म इति । अशब्दधर्म इत्यर्थः । अनित्यनिष्ठत्वविशेषितामिति । शब्दत्वस्य शब्दमात्रनिष्ठत्वादनित्यनिष्ठेति द्वितीयविशेषणविशिष्टत्वं शब्दस्यानित्यत्वे सत्येव स्यात्, नान्यथेत्यर्थः । एवं पक्षमात्रनिष्ठयत्किञ्चिद्धर्मविशेषव्यतिरिक्तामिति । अयं शब्दः श्रावणत्वव्यतिरिक्तैतद्धर्मत्वरहितानित्यनिष्ठाधिकरणं मेयत्वादित्यादिका महाविद्येत्यर्थः ॥ २१ ॥

२२ यद्वा सामान्यतः अयं शब्दः एतन्मात्रनिष्ठव्यतिरिक्तैतद्धर्मत्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ २२ ॥

२२ (भुवन०)—यद्वा सामान्यतः अयं शब्दः एतन्मात्रनिष्ठव्यतिरिक्तेत्यादि । एतन्मात्रनिष्ठाः पक्षीकृतशब्दमात्रनिष्ठाः एतच्छब्दत्वैतच्छ्रावणत्वादयः । पक्षीकृतशब्दे एव तेषां वर्तमानत्वात् । तद्व्यतिरिक्ता एतद्धर्मा अस्तित्वप्रमेयत्वादयः, तेषां पक्षीकृतशब्दमात्रादन्यत्रापि वर्तनात् । तत्त्वेन रहितो योऽनित्यनिष्ठस्तत्त्याधिकरणमित्यर्थः । विशेषणसाफल्यं पूर्ववदेव ज्ञातव्यम् ॥२२॥

२३ अयं शब्दः एतदन्यत्वव्यतिरिक्तैतदन्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ एतदन्यत्वव्यतिरिक्ता ये एतदन्यवृत्तयः तेषु एतदन्यत्वव्यतिरिक्तैतदन्यवृत्तित्वं धर्मः । तद्रहितश्चैतदन्यत्वं वा, एतदवृत्तिर्वा[1], एतन्मात्रवृत्तिर्वा । आद्यौ पक्षे व्याहतौ[2] । तेन पक्षमात्रनिष्ठो धर्मोऽनित्यनिष्ठत्वविशेषितः[3] पक्षे सिध्यतीत्यनित्यत्वसिद्धिः ॥ २३ ॥

२३ (भुवन०)—अयं शब्दः एतदन्यत्वव्यतिरिक्तैतदन्यवृत्तित्वरहितानित्यनिष्ठाधिकरणमिति । एतस्मात्पक्षीकृतशब्दात् यत् अन्यत्वं भिन्नत्वं, तद्व्यतिरिक्ताः एतद्भिन्नाः । एतस्मात्पक्षीकृतशब्दादन्ये घटपटात्मादयः, तत्र वृत्तिर्येषां ते एतदन्यवृत्तयः । एतदन्यत्वव्यतिरिक्ताश्च ते एतदन्यवृत्तयश्च एतदन्यत्वव्यतिरिक्तैतदन्यवृत्तयः । तेषां भावः तत्त्वम् । तेन रहितो योऽनित्यनिष्ठो धर्मः तत्त्याधिकरणं शब्द इत्यर्थः । एतदन्यत्वं वेति । एतदन्योन्याभावो वा । एतदवृत्तिर्वेति । घटत्वपटत्वात्मत्वादिर्वा । एतन्मात्रवृत्तिर्वेति । शब्दत्वश्रावणत्वादिर्वा । आद्याविति । आद्यौ धर्मौ पक्षे व्याघातादेव साधयितुमशक्यौ । तृतीयश्चानित्यनिष्ठत्वेव स्यात्, यदि शब्दोऽनित्यः स्यादिति शब्दानित्यत्वसिद्धिः । अत्रानुमाने सर्वत्रापि दृष्टान्ते एतदन्यत्वं धर्मोऽधिगन्तव्यः । तद्भिन्नानां सर्वेषामप्येतदन्यवृत्तित्वरहितपदेन निषिद्धत्वात्, एतदन्यत्वव्यतिरिक्तेति पदेन एतदन्यत्वस्यैव ग्रहणात् । स चानित्ये घटपटादौ वर्तमानत्वादनित्यनिष्ठ एवेति सर्वं समञ्जसमेवेति ॥ २३ ॥

२४ अयं शब्दः शब्दत्वात्यन्ताभावव्यतिरिक्तैतदन्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ अत्र चैतदन्योन्याभावपदस्थाने शब्दत्वात्यन्ता-

---

१ 'वा अवृत्ति' इति ज पुस्तकपाठः । २ 'व्याहतौ व्याघातात् । तेन' इति ज पुस्तकपाठः । ३ 'अनित्यत्वविशे' इति ग पुस्तकपाठः ।

भावपदमेव पूर्वमहाविद्यावैलक्षण्यम् । शेषं पूर्ववत् । एवं पक्षमात्रनिष्ठयत्कि-ञ्चिद्धर्मविशेषात्यन्ताभावमुपादाय यावन्तः पक्षे धर्मास्तावत्यो महावि[illegible] द्रष्टव्याः ॥ २४ ॥

२४ (भुवन०)—अयं शब्दः शब्दत्वात्यन्ताभावेत्यादि । शब्दत्वस्य [illegible] व्दत्वात्यन्ताभावः । अत्र चैवंविधविशेषणविशिष्टो धर्मः शब्दत्वात्यन्ताभावो आद्यः पक्षे व्याहतत्वाद्दृष्टान्तोपयोगी । द्वितीयस्तु प[illegible]पयोगी । [illegible] अन्यत्वपदस्थाने इत्यर्थः । अन्यत्वान्योन्याभावयोर्हि [illegible] नार्थान्तर[illegible]

२५ यद्वा सामान्यतः अयं शब्दः [illegible] न्ता[illegible] दन्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं [illegible] २५ ॥

२५ (भुवन०)—यद्वा सामान्यतः [illegible] एतन्मात्रनिष्ठः शब्दत्वादिः, तस्य अत्यन्ताभावः ए[illegible] एतन्निष्ठात्यन्ताभावो वा शब्दत्वादिरेव वा । शेषं पूर्वव[illegible]

२६ अयं शब्दः [illegible] त[illegible] त्व [illegible] अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे स[illegible] व [illegible] योगि[illegible] क्षवृ[illegible] ष्ठत्वे सति अनित्यत्वात्यन्ताभाववन्निष्ठा[illegible] त्यत्वात्यन्ताभाववन्निष्ठत्वं धर्मः । [illegible] त्व[illegible] वृत्तित्वरहितश्चासौ [illegible] तदधिकरणं तदाश्रय इत्यर्थः ।

२६ (भुवन०)—अयं शब्दः [illegible] त्यत्व [illegible] अनित्यत्ववन्तः अनित्यपदार्थाः । तेषु निष्ठा अवस्थानं [illegible] न्ताभावश्च । तस्य प्रतियोगिनः परमाणुत्वाकाशत्वादयः [illegible] वन्निष्ठात्यन्ताभावप्रतियोगिनश्च ते पक्षवृत्तयश्चेति [illegible] ऽङ्गीक्रियमाणे शब्दत्वश्रावणत्वनित्यत्वादयः । तेषां [illegible] निष्ठा नित्यानित्योभयनिष्ठाश्च धर्माः स्युः । तत्र ये [illegible] घटत्वादयो ये चोभयनिष्ठा अस्तित्वप्रमेय[illegible] सन्तो ये पक्षवृत्तयस्तत्त्वरहिता विद्यन्त[illegible] तथाप्यनित्यत्ववन्निष्ठात्यन्ताभावप्रति[illegible]

---

१ °तेषु धर्मेषु अनि° इति ग[illegible]

विद्यमानत्वेन अत्यन्ताभावप्रतियोगित्वस्यैव अभावात् । अथ द्वितीयविशेषणं व्याख्यायते—अनित्यत्ववन्तोऽनित्यपदार्थाः । तन्निष्ठाश्च अनित्यत्वात्यन्ताभाववन्तो नित्यपदार्थाः, तन्निष्ठाश्च । तत्त्वेन रहितो यो धर्मः स तथा । ततोऽनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहितश्चासौ अनित्यत्ववन्निष्ठात्यन्ताभाववन्निष्ठत्वरहितश्चेति कर्मधारयः । तस्याश्रयः शब्द इत्यर्थः । अत्र च द्वितीयविशेषणेन प्रथमविशेषणोपपन्नानामप्यस्तित्वप्रमेयत्वादीनां व्यवच्छेदः कृतः । एवंविधविशेषणद्वयोपपन्नश्च धर्मः पक्षे शब्दे शब्दत्वादिरेव । स च अनित्यत्ववदनित्यत्वात्यन्ताभाववद्युगलनिष्ठत्वरहितो विद्यते । स चाद्यविशेषणोपपन्नस्तदैव स्यात्, यदि शब्दस्यानित्यत्वमङ्गीक्रियेत । शब्दस्य च नित्यत्वे स धर्मोऽनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगी सन् पक्षवृत्तिरेव स्यात्, न तु तत्त्वरहितः । तस्माच्छब्दस्यानित्यत्वमङ्गीकार्यम् । दृष्टान्ते चैवंविधो धर्मः एकैकनित्यनिष्ठो गगनत्वादिरेकैकानित्यनिष्ठो घटत्वादिश्च ज्ञेयः ।

अनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहिताधिकरणमित्युक्ते नित्यत्वतद्वान्तरधर्मैरनित्यत्वात्यन्ताभाववन्मात्रवृत्तिभिरर्थान्तरता स्यात् । अनित्यत्ववन्मात्रवृत्तीनामिव अनित्यत्वात्यन्ताभाववन्मात्रवृत्तीनामप्यनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहितत्वात् । तन्निवृत्त्यर्थमनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहितग्रहणम् । पक्षीकृतशब्दनित्यत्वे नित्यत्वादीनामनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वेन तद्रहितत्वानुपपत्तेः । अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहिताधिकरणमित्युक्ते मेयत्वाभिधेयत्वादिभिरर्थान्तरता स्यात् । तेषां पक्षनिष्ठत्वेऽप्यनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति यत्पक्षवृत्तित्वं तद्रहितत्वेन पक्षीकृतशब्दनित्यत्ववादिनाप्यङ्गीकारात् । तन्निवृत्त्यर्थमनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहितग्रहणम् । मेयत्वादीनामनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वेन तद्रहितत्वानुपपत्तेः ।

(भुवन०)—अथैतदनुमानं व्याचष्टे—अनित्यत्ववन्निष्ठेत्यादि । अथ व्यावृत्तिचिन्ता । शब्दः अनित्यत्ववन्निष्ठेत्यादिसाध्यवानिति शब्दमात्रपक्षीकरणे एकस्य शब्दस्य यदनित्यत्वं तदनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति यत्पक्षवृत्तित्वं तद्रहितं, सर्वशब्दानां पक्षत्वेन तत्र वृत्तिर्दीनत्वात् । एवमनित्यत्ववन्निष्ठत्वे सति यदनित्यत्वात्यन्ताभाववन्निष्ठत्वं तद्रहितं च । तदाश्रय एकः शब्द इति भागे सिद्धसाधनता स्यात्, अत उक्तमयं शब्द इति । अथ प्रत्येकसाध्यविशेषणपरिहारेण व्यावृत्तिचिन्तामाह—अनित्यत्ववन्निष्ठानित्यत्वेत्यादि । नित्यत्वतद्वान्तरधर्मैरिति । शब्दस्यानित्यत्वे साध्ये नित्यत्वस्यार्थान्तरता स्यात् । कैः । नित्यत्वतद्वान्तरधर्मैः । नित्यत्वं च, तस्मात् नित्यत्वाद्व्यान्तरधर्माश्च शब्दत्वादयः, तैः । अनित्यत्वात्यन्ताभाववन्मात्रवृत्तिभिरिति । नित्यमात्रवृत्तिभिरित्यर्थः । कथमर्थान्तरता अत आह—अनित्यत्ववन्मात्रेत्यादि । अनित्यत्ववन्निष्ठत्वे सति यद् अनित्यत्वात्यन्ता-

भावपदमेव पूर्वमहाविद्यावैलक्षण्यम् । शेषं पूर्ववत् । एवं पक्षमात्रनिष्टयत्किञ्चिद्धर्मविशेषात्यन्ताभावमुपादाय यावन्तः पक्षे धर्मास्तावत्यो महाविद्या द्रष्टव्याः ॥ २४ ॥

२४ (भुवन०)—अयं शब्दः शब्दत्वात्यन्ताभावेत्यादि । शब्दत्वस्य अत्यन्ताभावः शब्दत्वात्यन्ताभावः । अत्र चैवंविधविशेषणविशिष्टो धर्मः शब्दत्वात्यन्ताभावो वा शब्दत्वादिर्वा । आद्यः पक्षे व्याहतत्वाद्दृष्टान्तोपयोगी । द्वितीयस्तु पक्षोपयोगी । अन्योन्याभावपदस्थाने इति । अन्यत्वपदस्थाने इत्यर्थः । अन्यत्वान्योन्याभावयोर्हि पर्यायान्तरतैव नार्थान्तरतेति भावः ॥ २४ ॥

२५ यद्वा सामान्यतः अयं शब्दः एतन्मात्रनिष्ठात्यन्ताभावव्यतिरिक्तैदन्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ २५ ॥

२५ (भुवन०)—यद्वा सामान्यतः अयं शब्दः एतन्मात्रनिष्ठात्यन्ताभावेत्यादि । एतन्मात्रनिष्ठः शब्दत्वादिः, तस्य अत्यन्ताभावः एतन्मात्रनिष्ठात्यन्ताभावः । अत्राप्येवंविधो धर्म एतन्निष्ठात्यन्ताभावो वा शब्दत्वादिरेव वा । शेषं पूर्ववदेव ॥ २५ ॥

२६ अयं शब्दः अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहितानित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहिताधिकरणं मेयत्वादिति ॥ अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति ये पक्षवृत्तयो धर्माः, तेषु[1] अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वं धर्मः । ये चानित्यत्ववन्निष्ठत्वे सति अनित्यत्वात्यन्ताभाववन्निष्ठा धर्माः, तेषु अनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वं धर्मः । अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहितश्चासौ अनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहितश्च, तदधिकरणं तदाश्रय इत्यर्थः ।

२६ (भुवन०)—अयं शब्दः अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहितानित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहिताधिकरणमिति । अनित्यत्वं विद्यते येषु ते अनित्यत्ववन्तः अनित्यपदार्थाः । तेषु निष्ठा अवस्थानं यस्य सोऽनित्यत्ववन्निष्ठः । स चासौ अत्यन्ताभावश्च । तस्य प्रतियोगिनः परमाणुत्वाकाशत्वादयः । पक्षे वृत्तिर्येषां ते पक्षवृत्तयः । अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिनश्च ते पक्षवृत्तयश्चेति समासः । एवंविधाश्च धर्माः शब्दस्य नित्यत्वेऽङ्गीक्रियमाणे शब्दत्वश्रावणत्वनित्यत्वादयः । तेषां भावः तत्त्वम् । तेन रहिता नित्यनिष्ठा अनित्यनिष्ठा नित्यानित्योभयनिष्ठाश्च धर्माः स्युः । तत्र ये नित्यनिष्ठा आकाशत्वादयो ये चानित्यनिष्ठा घटत्वादयो ये चोभयनिष्ठा अस्तित्वप्रमेयत्वादयः, ते सर्वेऽप्यनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिनः सन्तो ये पक्षवृत्तयस्तत्त्वरहिता विद्यन्त एव । यद्यप्यस्तित्वप्रमेयत्वादयः पक्षवृत्तित्वरहिता न सन्ति, तथाप्यनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति ये पक्षवृत्तयस्तत्त्वरहिता एव । तेषां सर्वत्रापि

---

१ 'तेषु धर्मेषु अनि' इति ग पुस्तकपाठः ।

सिध्यति । तस्यानित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति पक्षवृत्तित्वेन तद्रहितत्वानुपपत्तेः । अतोऽनित्यत्ववन्मात्रवृत्तिधर्मः पक्षे सिध्यन् अनित्यत्वमन्तर्भाव्य सिध्यतीत्यनित्यत्वसिद्धिः ॥ २६ ॥

(भुवन०)—अत्रानित्यत्वसिद्धिं दर्शयितुमाह—अनित्यत्ववन्निष्ठेत्यादि । अनित्यत्वात्यन्ताभाववन्मात्रवृत्तिर्वेति । नित्यमात्रवृत्तिर्नित्यत्वादिर्धर्म इत्यर्थः । अनित्यत्ववन्मात्रवृत्तिर्वेति । अनित्यमात्रवृत्तिः अनित्यत्वादिरित्यर्थः । शब्दे आद्यधर्मसाधने आद्यविशेषणेन सह विरोधः स्यादित्याह—आद्यःपक्षे न सिध्यतीत्यादि । पारिशेष्याद्द्वितीयधर्मं शब्दे साधयति—अतोऽनित्यत्ववन्मात्रेत्यादि । [1]अनित्यत्वशब्दत्वश्रावणत्वादिरनित्यत्ववन्मात्रवृत्तिः तदा स्यात्, यदि शब्दोऽनित्यः स्यादित्यनित्यत्वमन्तर्गतं कृत्वा स धर्मः शब्दे सिध्यति । स चानित्यमात्रवृत्तिर्यद्यपि पक्षे वर्तमानत्वेन पक्षवृत्तित्वरहितो नास्ति, तथाप्यनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति यः पक्षवृत्तिः तत्त्वरहित एवास्तीति व्याख्या ॥ २६ ॥

२७ अयं शब्दः एतच्छब्दनित्यविषयत्वरहितज्ञानविषयः मेयत्वादिति ॥ येषु येषु ज्ञानेषु एतच्छब्दविषयत्वनित्यविषयत्वे स्तः, तेषु तेषु एतच्छब्दनित्यविषयत्वं धर्मः । तद्रहितं ज्ञानमेतच्छब्दाविषयं वा, नित्याविषयं वा । आद्यं पक्षीकृतशब्दविषयं न सिध्यति । व्याघातात् । द्वितीयं च पक्षशब्दविषयं सिध्यदनित्यत्वमन्तर्भाव्य सिध्यति । पक्षीकृतशब्दनित्यत्वे यस्य कस्यचिदपि तद्विषयज्ञानस्य एतच्छब्दविषयत्वे सति नित्यविषयत्वेन तद्रहितत्वानुपपत्तेः ॥ २७ ॥

२७ (भुवन०)—अथ प्रकारान्तरेण महाविद्यान्तरमाह—अयं शब्दः एतच्छब्दनित्यविषयत्वरहितज्ञानविषय इति । एतच्छब्दश्च नित्यश्च एतच्छब्दनित्यौ । तौ विषयौ गोचरौ यस्य ज्ञानस्य तदेतच्छब्दनित्यविषयम् । तस्य भावः तत्त्वम् । तेन रहितं यत् ज्ञानं तस्य विषयः शब्द इत्यर्थः । येषु येषु ज्ञानेष्वित्यादि । येषु येषु शब्दाकाशादिज्ञानेषु । विशेषणाभावाद्वा विशेष्याभावाद्वा विशिष्टाभाव इति न्यायेन एतच्छब्दनित्यविषयत्वरहितज्ञानं हि एतच्छब्दाविषयं वा नित्याविषयं वा । तत्राद्यस्य एतच्छब्दविषयत्वे व्याघातमाह—आद्यं पक्षीकृतशब्देति । यदेवैतच्छब्दाविषयं तदेवैतच्छब्दविषयमिति व्याघात इत्यर्थः । द्वितीयमिति । नित्याविषयम् । तच्च शब्दविषयं सिध्यच्छब्दस्यानित्यत्वं साधयेदिति भावः । अनित्यत्वसाधने हेतुमाह—पक्षीकृतशब्दनित्यत्वे यस्य कस्यचिदपीत्यादि । यद्येतच्छब्दो नित्योऽङ्गीक्रियेत, तदा यत्किञ्चिदेतच्छब्दविषयज्ञानस्य नित्यविषयत्वमेव स्यात्, न तु तदविषयत्वमित्यर्थः । तद्रहितत्वानुपपत्तेरिति । नित्यविषयत्वरहितत्वानुपपत्तेरित्यर्थः । अत्र सर्वत्र पक्षे एतच्छब्दाविषयज्ञानविषयत्वं धर्मो मन्तव्यः ॥२७॥

---

१ 'अनित्यशब्दत्व' इति छ द पुस्तक पाठः ।

भाववन्निष्ठत्वं तत् अनित्यमात्रवृत्तीनामिव नित्यमात्रवृत्तीनामपि नास्तीत्यर्थः । तन्निवृत्त्यर्थं प्रथमविशेषणम् । कथमनेन विशेषणेन तन्निरासोऽत्राह–पक्षीकृतशब्देत्यादि । तद्रहितत्वानुपपत्तेरिति । अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिपक्षवृत्तित्वरहितत्वानुपपत्तेरित्यर्थः । अथ द्वितीयविशेषणं मुक्त्वा व्यावृत्तिचिन्तां करोति–अनित्यत्ववन्निष्ठात्यन्ताभावेत्यादि । अर्थान्तरतामेवाविष्करोति––तेषामित्यादिना । मेयत्वादीनामनित्येष्वपि भावादनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वहीनत्वात् अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वविशिष्टपक्षवृत्तित्वाभाव उभयसंमत इत्यर्थः । तन्निरासाय द्वितीयविशेषणोपादानम् । कथमनेन तन्निरासोऽत्राह–मेयत्वादीनामित्यादि । मेयत्वादीनां नित्यानित्यवृत्तित्वेन । तद्रहितत्वानुपपत्तेरिति । नित्यानित्यवृत्तित्वरहितत्वानुपपत्तेरिति भावः ।

अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहिताधिकरणमित्युक्ते नित्यपदार्थेषु साध्याभावः । नित्यपदार्थमात्रवृत्तीनां धर्माणामनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वेन तद्रहितत्वानुपपत्तेः । अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वरहितनित्यनिष्ठधर्माणां चानित्यत्वात्यन्ताभाववन्निष्ठत्वेन तद्रहितत्वानुपपत्तेः । अतो नित्येषु साध्यसद्भावसिध्यर्थं पक्षवृत्तित्वरहितग्रहणम् । यद्यप्येकैकनित्यवृत्तयो धर्मा अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वेन न तद्रहिताः, तथाप्यनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वे सति यत्पक्षवृत्तित्वं तद्रहिता भवन्त्येवेति नित्येषु साध्यानुगमसिद्धिः[1] ।

(भुवन०)––अथ पक्षवृत्तित्वेतिपदं त्यक्त्वा व्यावृत्तिं विवक्ते–अनित्यत्ववन्निष्ठात्यन्ताभावेत्यादि । तथाच नित्यमात्रवृत्तीनां धर्माणां द्वितीयविशेषणोपपन्नानामपि प्रथमविशेषणोपपन्नत्वस्यानुपपत्तिः । अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वरहितेति विशेषणोपपन्नानां च सत्त्वादीनां नित्यनिष्ठानां धर्माणां नित्यानित्ययुगलवृत्तित्वेन नित्यानित्ययुगलवृत्तित्वरहितत्वानुपपत्तिश्च । तेन नित्येषु न साध्यसिद्धिः । तदर्थं पक्षवृत्तित्वेति पदोपादानम् । तद्ग्रहणेऽपि च नित्यत्वतदवान्तरधर्माणामनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वात् न नित्येषु साध्यानुगम इत्यत आह–यद्यप्येकैकनित्यवृत्तयो धर्मा इति । एकैकनित्यवृत्तयो धर्मा आकाशत्वपरमाणुत्वादयः । ते चानित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगिनः, एवं सति न तद्रहिताः । तथापि संपूर्णविशेषणेन विचार्यमाणाः संपूर्णविशेषणोपपन्ना अपि भवन्त्येवेति नित्येषु साध्यसिद्धिः ।

एवं पक्षीकृतशब्दातिरिक्तानित्येष्वपि एकैकानित्यनिष्ठधर्मैः साध्यानुगमो द्रष्टव्यः । अनित्यत्ववन्निष्ठानित्यत्वात्यन्ताभाववन्निष्ठत्वरहितः अनित्यत्वात्यन्ताभाववन्मात्रवृत्तिर्वा स्यात् अनित्यत्ववन्मात्रवृत्तिर्वा । आद्यः पक्षे न

---

१ 'चानित्यत्ववन्निष्ठानित्यत्वा' इति ज पुस्तकपाठः । २ 'सिद्धेः ।' इति ज पुस्तकपाठः ।

रिहारार्थमत्यन्ताभावग्रहणम् । अभिमतसाध्यसिद्धिं निरूपयितुमाह—एतन्निष्ठानित्यत्वेत्यादि । एवंविधश्चात्यन्ताभावो द्वेधा स्यात्, एतन्निष्ठत्वरहितोऽत्यन्ताभावो वा नित्यत्वात्यन्ताभावो वेति । तत्राद्यस्य पक्षे व्याघातमाह—आद्यः पक्षे व्याहत इति । आद्यः एतन्निष्ठत्वरहितोऽत्यन्ताभावः, पक्षे शब्दे, व्याघातेन बाधितः । अयमाशयः—पक्षीकृतशब्दधर्मा ये शब्दत्वश्रावणत्वादयः तेषामत्यन्ताभावः शब्दनिष्ठो नास्ति । यतः शब्दत्वादय एव शब्दधर्माः शब्दनिष्ठाः, न तु तदत्यन्ताभावः । तस्य शब्दादन्यत्रैव वर्तनात् । ततस्तस्मिन् शब्दे साध्यमाने स्फुट एव व्याघातः । तस्मादेतन्निष्ठत्वरहितात्यन्ताभावः सर्वत्र सपक्षे ज्ञेयः । द्वितीयस्य शब्दे सिद्धिमाह—द्वितीय इत्यादि । द्वितीयोऽनित्यत्वात्यन्ताभावात्यन्ताभावः । एतावता नित्यत्वात्यन्ताभावः शब्दे साध्यते । स च अनित्यत्वमेवेतिभावः । अत्र हेतुमाह—अनित्यत्वात्यन्ताभावेत्यादि । अनित्यत्वात्यन्ताभावो नित्यत्वम् । तस्यात्यन्ताभावस्य अनित्यत्वानतिरेकादनित्यत्वरूपत्वादित्यर्थः । हेत्वन्तरमाह—तत्तुल्ययोगक्षेमत्वाद्वेति । तेन तुल्यौ यौ योगक्षेमौ, तद्भावः तत्त्वं, तस्मात् । अत्रायं भावः । यथा अनित्यत्वस्यात्यन्तिकनिषेधो नित्यत्वं, तथा तदात्यन्तिकनिषेधः पुनरनित्यत्वमेव । "परस्परविरोधे हि न प्रकारान्तरस्थितिः" इतिन्यायादित्यर्थः ॥ २८ ॥

२९ अयं शब्दः अनाद्येतदभावत्वरहिताभावप्रतियोगी मेयत्वादिति ॥

अनाद्येतदभावेषु अनाद्येतदभावत्वं धर्मः । तद्रहितश्चाभावः एतदभावत्वरहितो वा, आदिमानेतदभावो वा । आद्यं प्रत्येतस्मिन्प्रतियोगित्वं न सिध्यति । व्याघातात् । द्वितीयस्तु प्रध्वंस एवेत्यनित्यत्वसिद्धिः ॥ २९ ॥

२९ (भुवन०)—अथाभिनवप्रकारान्तरेण पुनर्महाविद्यान्तरमाह—अयं शब्दः अनाद्येतदभावत्वेत्यादि । एतस्य पक्षशब्दस्य अभावा एतदभावाः । अनादयश्च ते एतदभावाश्च अनाद्येतदभावाः, प्रागभावान्योन्याभावात्यन्ताभावरूपाः । 'अनादिः सान्तः प्रागभावः,' 'तादात्म्यप्रतिषेधोऽन्योन्याभावः,' 'अनादिरनन्तः संसर्गाभावोऽत्यन्ताभावः' इति तेषां लक्षणात् । तेषां भावः तत्त्वम् । तेन रहितो योऽभावः पक्षरूपे सादिरभावः, स च प्रध्वंसाभाव एव । 'सादिरनन्तः प्रध्वंसाभावः' इति तल्लक्षणात् । तस्य प्रतियोगी तत्प्रतियोगी इत्यर्थः । अयं शब्दः प्रतियोगित्वेन [illegible] [illegible]

[illegible] ॥ २९ ॥

२८ अयं शब्दः एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणात्यन्ताभाववान् मेयत्वादिति ॥ ये पक्षीकृतशब्दधर्मा अनित्यत्वात्यन्ताभावप्रतियोगिकत्वरहिताः, तेषु एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वं धर्मः तदनधिकरणं तद्रहितः, एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणश्चासौ अत्यन्ताभावश्च तदधिकरणमित्यर्थः । एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणत्वानुक्तौ अनित्यत्वात्यन्ताभावप्रतियोगिकेन अनित्यत्वात्यन्ताभावान्योन्याभावेन पक्षीकृतशब्दनित्यत्वेऽप्युपपद्यमानेनार्थान्तरता स्यात् । तन्निवृत्त्यर्थमत्यन्ताभावग्रहणम् । एतन्निष्ठानित्यत्वात्यन्ताभावप्रतियोगिकत्वानधिकरणमत्यन्ताभावः एतन्निष्ठत्वरहितो वा स्यात्, अनित्यत्वात्यन्ताभावप्रतियोगिकोऽत्यन्ताभावो वा । आद्यः पक्षो व्याहतः । द्वितीयस्त्वनित्यत्वमेव । अनित्यत्वात्यन्ताभावात्यन्ताभावस्य अनित्यत्वानतिरेकात् तत्तुल्ययोगक्षेमत्वाद्वा इत्यनित्यत्वसिद्धिः ॥ २८ ॥

२८ (भुवन०)—अयं शब्दः एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणात्यन्ताभाववानिति । अनित्यत्वात्यन्ताभावो नित्यत्वमप्रतियोगी यस्य अत्यन्ताभावस्य असौ अनित्यत्वात्यन्ताभावाप्रतियोगिकः । एतस्मिन् पक्षितशब्दे निष्ठा यस्य स तथा । एतन्निष्ठश्चासौ अनित्यत्वात्यन्ताभावाप्रतियोगिकश्च एतन्निष्ठात्यन्ताभावाप्रतियोगिकः । तस्य भावः तत्त्वम् । तस्य अनधिकरणं योऽत्यन्ताभावः तद्वान् शब्द इति समासः । अनित्यत्वात्यन्ताभावाप्रतियोगिकपदेन नित्यत्वात्यन्ताभावं विना सर्वेऽपि घटत्वपटत्वशब्दत्वादिप्रतियोगिका अत्यन्ताभावा उपात्ताः । एतन्निष्ठविशेषणसहितेन च तेन पदेन शब्दत्वादिशब्दधर्मात्यन्ताभावाः पूर्वविशेषणायाताः पृथक्कृतत्वान्नित्यत्वात्यन्ताभावश्च निषिद्धाः । तत्त्वानधिकरणात्यन्ताभावपदेन च घटत्वपटत्वाद्यत्यन्ताभावाः एतन्निष्ठेतिविशेषणायाताः सर्वेऽपि निषिद्धाः । शब्दधर्मात्यन्ताभावनित्यत्वात्यन्ताभावौ च पुनरुपात्तौ । तत्र पक्षीकृतशब्दे एतच्छब्दधर्मात्यन्ताभावसाधने व्याघात इति नित्यत्वात्यन्ताभावः पक्षीकृतशब्दे साध्यते इति शब्दानित्यत्वसिद्धिः । अनुमानार्थं व्याचष्टे—ये पक्षीकृतशब्दधर्मा इत्यादि । पक्षीकृतशब्दधर्मा इह घटत्वाकाशत्वाद्यभावाः । तेषां सर्वेषामपि पक्षीकृतशब्दनिष्ठत्वात् । एतावता अनुमानस्थमेतन्निष्ठेतिपदं व्याख्यातम् । अनित्यत्वात्यन्ताभावेति । अनित्यत्वात्यन्ताभावो नित्यत्वं प्रतियोगी यस्य स तथा । तद्भावः तत्त्वम् । तेन रहिताः । पक्षीकृतशब्दधर्माः सन्तो येऽनित्यत्वात्यन्ताभावप्रतियोगिकत्वरहिता इत्यर्थः । एतावता अनित्यत्वात्यन्ताभावाप्रतियोगिकेति पदमनुमानस्थं व्याकृतम् । शेषं सुगमम् । अथ अत्यन्ताभावं विमुच्य व्यावृत्तिं करोति— एतन्निष्ठानित्यत्वात्यन्ताभावेत्यादि । अनित्यत्वात्यन्ताभावप्रतियोगिकेनेति । अनित्यत्वात्यन्ताभावो नित्यत्वं प्रतियोगी यस्य तेन । अनित्यत्वात्यन्ताभावो नित्यत्वं, तस्य अन्योन्याभावेन शब्दो नित्यत्वं न भवतीतिरूपेण शब्दनिष्ठेन सिषाधयिषितानित्यत्वविपर्ययेऽप्युपपद्यमानेन अर्थान्तरता स्यात्, तत्प-

रिहारार्थमत्यन्ताभावग्रहणम् । अभिमतसाध्यसिद्धिं निरूपयितुमाह—एतन्निष्ठानित्यत्वेत्यादि । एवंविधश्चात्यन्ताभावो द्वेधा स्यात्, एतन्निष्ठत्वरहितोऽत्यन्ताभावो वा नित्यत्वात्यन्ताभावो वेति । तत्राद्यस्य पक्षे व्याघातमाह—आद्यः पक्षे व्याहत इति । आद्यः एतन्निष्ठत्वरहितोऽत्यन्ताभावः, पक्षे शब्दे, व्याघातेन बाधितः । अयमाशयः—पक्षीकृतशब्दधर्मा ये शब्दत्वश्रावणत्वादयः तेषामत्यन्ताभावः शब्दनिष्ठो नास्ति । यतः शब्दत्वादय एव शब्दधर्माः शब्दनिष्ठाः, न तु तदत्यन्ताभावः । तस्य शब्दादन्यत्रैव वर्तनात् । ततस्तस्मिन् शब्दे साध्यमाने स्फुट एव व्याघातः । तस्मादेतन्निष्ठत्वरहितात्यन्ताभावः सर्वत्र सपक्षे ज्ञेयः । द्वितीयस्य शब्दे सिद्धिमाह—द्वितीय इत्यादि । द्वितीयोऽनित्यत्वात्यन्ताभावात्यन्ताभावः । एतावता नित्यत्वस्यात्यन्ताभावः शब्दे साध्यते । स च अनित्यत्वमेवेतिभावः । अत्र हेतुमाह—अनित्यत्वात्यन्ताभावेत्यादि । अनित्यत्वात्यन्ताभावो नित्यत्वम् । तस्यात्यन्ताभावस्य अनित्यत्वानतिरेकादनित्यत्वरूपत्वादित्यर्थः । हेत्वन्तरमाह—तत्तुल्ययोगक्षेमत्वाद्वेति । तेन तुल्यौ यौ योगक्षेमौ, तद्भावः तत्त्वं, तस्मात् । अत्रायं भावः । यथा अनित्यत्वस्यात्यन्तिकनिषेधो नित्यत्वं, तथा तदात्यन्तिकनिषेधः पुनरनित्यत्वमेव । "परस्परविरोधे हि न प्रकारान्तरस्थितिः" इतिन्यायादित्यर्थः ॥ २८ ॥

२९ अयं शब्दः अनाद्येतदभावत्वरहिताभावप्रतियोगी मेयत्वादिति ॥ अनाद्येतदभावेषु अनाद्येतदभावत्वं धर्मः । तद्रहितश्चाभावः एतदभावत्वरहितो वा, आदिमानेतदभावो वा । आद्यं प्रत्येतस्मिन्प्रतियोगित्वं न सिध्यति । व्याघातात् । द्वितीयस्तु प्रध्वंस एवेत्यनित्यत्वसिद्धिः ॥ २९ ॥

२९ (भुवन०)—अथाभिनवप्रकारान्तरेण पुनर्महाविद्यान्तरमाह—**अयं शब्दः अनाद्येतदभावत्वेत्यादि** । एतस्य पक्षशब्दस्य अभावाः एतदभावाः । अनादयश्च ते एतदभावाश्च अनाद्येतदभावाः, प्रागभावान्योन्याभावात्यन्ताभावरूपाः । 'अनादिः सान्तः प्रागभावः,' 'तादात्म्यनिषेधोऽन्योन्याभावः,' 'अनादिरनन्तः संसर्गाभावोऽत्यन्ताभावः' इति तेषां लक्षणात् । तेषां भावः तत्त्वम् । तेन रहितो योऽभावः पक्षसम्बन्धी सादिरभावः, स च प्रध्वंसाभाव एव । 'सादिरनन्तः प्रध्वंसाभावः' इति तल्लक्षणात् । तस्य प्रतियोगी शब्द इत्यर्थः । अयं शब्दः प्रतियोगीत्युक्ते श्रोत्रे शब्दसमवाय इति समवायप्रतियोगित्वेन शब्दे सिद्धसाध्यता स्यात् । अनाश्रयत्वे सति व्यावर्तकस्य प्रतियोगित्वात् । अत उक्तमभावप्रतियोगीति । एवं चान्योन्याभावप्रतियोगित्वेन सिद्धसाधनं स्यात्, अत उक्तमनादित्वरहितेति । अनादित्वरहिताभावप्रतियोगीत्युक्ते च व्याप्तिभङ्गः, नित्येषु तदभावात् । अत उक्तमनाद्येतदभावत्वरहितेति । इतिव्यावृत्तिचिन्ता । **एतदभावत्वरहितो वेति** । एतस्य पक्षशब्दस्य योऽभावः, तत्त्वरहितोऽभावो यदस्माकमनाद्यभावः । सोऽप्यनाद्येतदभावत्वरहितः । परमेतस्य शब्दः प्रतियोगी न स्यात्, तस्माद्व्याघातः । **आदिमानेतदभावो वेति** । आदिर्विद्यते यस्य स आदिमान् । प्रध्वंसाभाव इत्यर्थः । तस्य च प्रतियोगित्वं शब्दस्य अनित्यत्वे एव स्यात्, नान्यथेति अस्मादनित्यत्वसिद्धिरिति । अत्र शब्दान्तरस्तु कथंचनप्रतियोगित्वं शब्देतरसमत्ववस्तुतामप्यस्तीति तेषां समन्वयः ॥ २९ ॥

२८ अयं शब्दः एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणात्यन्ताभाववान् मेयत्वादिति ॥ ये पक्षीकृतशब्दधर्मा अनित्यत्वात्यन्ताभावप्रतियोगिकत्वरहिताः, तेषु एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वं धर्मः, तदनधिकरणं तद्रहितः, एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणश्चासौ अत्यन्ताभावश्च तदधिकरणमित्यर्थः । एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणवानित्युक्ते अनित्यत्वात्यन्ताभावप्रतियोगिकेन अनित्यत्वात्यन्ताभावान्योन्याभावेन पक्षीकृतशब्दनित्यत्वेऽप्युपपद्यमानेनार्थान्तरता स्यात् । तन्निवृत्त्यर्थमत्यन्ताभावग्रहणम् । एतन्निष्ठानित्यत्वात्यन्ताभावप्रतियोगिकत्वानधिकरणमत्यन्ताभावः एतन्निष्ठत्वरहितो वा स्यात्, अनित्यत्वात्यन्ताभावप्रतियोगिकोऽत्यन्ताभावो वा । आद्यः पक्षे व्याहतः । द्वितीयस्त्वनित्यत्वमेव । अनित्यत्वात्यन्ताभावात्यन्ताभावस्य अनित्यत्वानतिरेकात् तत्तुल्ययोगक्षेमत्वाद्वा इत्यनित्यत्वसिद्धिः ॥ २८ ॥

२८ (गुण०)—अयं शब्दः एतन्निष्ठानित्यत्वात्यन्ताभावाप्रतियोगिकत्वानधिकरणात्यन्ताभाववानिति । अनित्यत्वात्यन्ताभावो नित्यत्वमप्रतियोगी यस्य अत्यन्ताभावस्य असौ अनित्यत्वात्यन्ताभावाप्रतियोगिकः । एतस्मिन् पक्षितशब्दे निष्ठा यस्य स तथा । एतन्निष्ठश्चासौ अनित्यत्वात्यन्ताभावाप्रतियोगिकश्च एतन्निष्ठात्यन्ताभावाप्रतियोगिकः । तस्य भावः तत्त्वम् । तस्य अनधिकरणं योऽत्यन्ताभावः तद्वान् शब्द इति समासः । अनित्यत्वात्यन्ताभावाप्रतियोगिकपदेन नित्यत्वात्यन्ताभावं विना सर्वेऽपि घटत्वपटत्वशब्दत्वादिप्रतियोगिका अत्यन्ताभावा उपात्ताः । एतन्निष्ठविशेषणसहितेन च तेन पदेन शब्दत्वादिशब्दधर्मात्यन्ताभावाः पूर्वविशेषणायाताः पृथक्कृत्वान्नित्यत्वात्यन्ताभावश्च निषिद्धाः । तत्त्वानधिकरणात्यन्ताभावपदेन च घटत्वपटत्वाद्यत्यन्ताभावाः एतन्निष्ठेतिविशेषणायाताः सर्वेऽपि निषिद्धाः । शब्दधर्मात्यन्ताभावनित्यत्वात्यन्ताभावौ च पुनरप्युपात्तौ । तत्र पक्षीकृतशब्दे एतच्छब्दधर्मात्यन्ताभावसाधने व्याघात इति नित्यत्वात्यन्ताभावः पक्षीकृतशब्दे साध्यते इति शब्दानित्यत्वसिद्धिः । अनुमानार्थं व्याचष्टे—ये पक्षीकृतशब्दधर्मा इत्यादि । पक्षीकृतशब्दधर्मा इह घटत्वाकाशत्वाद्यभावाः । तेषां सर्वेषामपि पक्षीकृतशब्दनिष्ठत्वात् । एतावता अनुमानस्थमेतन्निष्ठेतिपदं व्याख्यातम् । अनित्यत्वात्यन्ताभावेति । अनित्यत्वात्यन्ताभावो नित्यत्वं प्रतियोगी यस्य स तथा । तद्भावः तत्त्वम् । तेन रहिताः । पक्षीकृतशब्दधर्माः सन्तो येऽनित्यत्वात्यन्ताभावप्रतियोगिकत्वरहिता इत्यर्थः । एतावता अनित्यत्वात्यन्ताभावाप्रतियोगिकेति पदमनुमानस्थं व्याकृतम् । शेषं सुगमम् । अथ अत्यन्ताभावं विमुच्य व्यावृत्तिं करोति— एतन्निष्ठानित्यत्वात्यन्ताभावेत्यादि । अनित्यत्वात्यन्ताभावप्रतियोगिकेनेति । अनित्यत्वात्यन्ताभावो नित्यत्वं प्रतियोगी यस्य तेन । अनित्यत्वात्यन्ताभावो नित्यत्वं, तस्य अन्योन्याभावेन शब्दो नित्यत्वं न भवतीतिरूपेण शब्दनिष्ठेन सिषाधयिषितानित्यत्वविपर्ययेऽप्युपपद्यमानेन अर्थान्तरता स्यात्, तत्प·

रिहारार्थमत्यन्ताभावग्रहणम् ।
स्वनिषेधात्यन्ताभावो द्वैधः स्यात्
तत्राद्यस्य पक्षे व्याघातमाह—
पक्षे शब्दे, व्याघातेन बाधितः ।
त्यन्ताभावः शब्दनिष्ठो नास्ति ।
भावः । तस्य शब्दादन्यत्रैव
तन्निष्ठत्वरहितात्यन्ताभावः
द्वितीयोऽनित्यत्वात्यन्ताभाव
अनित्यत्वमेवेतिभावः । अत्र हेतुमाह—
नित्यत्वम् । तत्यात्यन्ताभाव
तत्तुल्ययोगक्षेमत्वाद्वेति । तेन
अनित्यत्वस्यात्यन्तिकनिषेधो नित्यत्वं
हि न प्रकारान्तरास्थितिः " इति

२९ अयं शब्दः अनादि
अनाद्येतद्भावेषु अनाद्येतद्
वा, आदिमानेतद्भावो वा ।
व्याघातात् । द्वितीयस्तु प्रध्वंस

२९ (भुवन०)—यथानित्य
तद्भावत्वेत्यादि । एतस्य पक्षशब्दस्य
तद्भावाः, प्रागभावान्योन्याभावात्यन्त
षेधोऽन्योन्याभावः, ' ' अनादिरनन्तः
वत्त्वम् । तेन रहितो योऽभावः पक्षस्य
प्रध्वंसाभावः ' इति तल्लक्षणात् । तस्य
शब्दसमवाय इति समवायप्रतियोगित्वेन
कस्य प्रतियोगित्वात् । अत उक्तम्
स्यात्, अत उक्तमनादित्वरहितेति । अनादि
तद्भावात् । अत उक्तमनादित्वरहितेति ।
एतस्य पक्षशब्दस्य योऽभावः, तत्त्वरहितोऽ
हितः । परमेतस्य शब्दः प्रतियोगी न स्यात्,
आदिर्विद्यते यस्य स आदिमान् । प्रध्वंसाभाव
एव स्यात्, नान्यथेति शब्दानित्यत्वसिद्धिः,
समस्तवस्तूनामन्यतमेति शेषः समस्तु ॥ २९

ऽभाव
क्तोक्तं
न्य-
" २
रण-
मेव
तुर्थः
ाव-
वर्नो
त्या-
तमः
एव
रस्य
यनो
ह—
वे तत

ऽनित्यः

ऽमित्यादि ।
इति शेषः ।
ः समसः इति

मेयत्वादिति ।
...कृतशब्द-
। न चासौ अ-
गानित्यान्यत्वं

३० अयं शब्दः ध्वंसत्वरहितैतदभावत्वरहिताभावप्रतियोगी मेयत्वादिति ॥ इयं पूर्वा च महाविद्या यत्र यत्रानित्यत्वं साध्यते तत्रैव संचरति शेषास्तु सकलान्वयव्यतिरेकिसाध्यसंचारिण्य इति ॥ ३० ॥

३० (भुवन०)—अयं शब्दः ध्वंसत्वरहितैतदभावेत्यादि। ध्वंसो विनाशः। तत्त्वरहिता ये एतस्य शब्दस्याभावाः पूर्वोक्ता एव। तेषां भावस्तत्त्वं, तेन रहितो योऽभावः साध्यधर्मपदे प्रध्वंसाभाव एव, तस्य प्रतियोगी शब्द इत्यर्थः। अभावप्रतियोगीत्युक्ते शब्दस्यान्योन्याभावादिप्रतियोगित्वं सिद्धमेव इत्यत उक्तमेतदभावत्वरहितेति। तथा च व्याघातः स्यात्। ततस्तत्परिहाराय ध्वंसत्वरहितेति। ध्वंसत्वरहितैतदभावेषु ध्वंसत्वरहितैदभावत्वं धर्मः। तद्रहितश्चाभाव एतदभावत्वरहितो वा ध्वंसो वा। आद्यं प्रति शब्दस्य प्रतियोगित्वं व्याहतमिति एतदभावत्वरहिताभावप्रतियोगित्वं सर्वसपक्षोपयोगि, द्वितीयं प्रति शब्दस्य प्रतियोगित्वं सिध्यच्छब्दस्यानित्यत्वं साधयेदित्यर्थः। एतन्महाविद्याद्वयमनित्यत्वसाधकमेव न साध्यान्तरसाधकमिति महाविद्यान्तरेभ्योऽस्य वैलक्षण्यं प्रतिपादयति—इयमिति। इयमनन्तरोद्दिष्टैव महाविद्या, पूर्वा चायं शब्दोऽनाद्येतदभावेत्यादिका। शेषास्त्विति। शेषाः पक्षसपक्षादिकं पक्षीकृत्य प्रवृत्ता महाविद्याः। सकलानि अन्वयव्यतिरेकिणां यानि साध्यानि तत्संचारिण्यः। एतत्प्रकारश्च पुरापि आपातनिकायां किञ्चित्प्रपञ्चित इति न प्रपञ्च्यते।

ननु महाविद्याप्रकरणे किमिदं पक्षनिष्ठत्वं, किं वा सपक्षनिष्ठत्वं, किं वा विपक्षनिष्ठत्वं, किं वा उभयनिष्ठत्वमिति। उच्यते। अयं पक्षनिष्ठः, अयं सपक्षनिष्ठः, अयं विपक्षनिष्ठ इत्याद्यबाधितबुद्धिसाक्षिकः पक्षाश्रितत्वसपक्षाश्रितत्वविपक्षाश्रितत्वोभयाश्रितत्वरूपो धर्मविशेषः। ननु नायं भावः, अभावेऽपि वर्तमानत्वात्। नाप्यभावः, प्रतियोगि[1]विशेषानिरूपणात् इति चेत्। न। द्रव्यादिषड्लक्षणानां ये षडत्यन्ताभावास्तद्वत्त्वस्यै[2]वात्राभावत्वस्य प्रत्यक्षादिप्रमाणसिद्धत्वादिति। कः पुनरस्य प्रतियोगीति चेत्। न कश्चित्। स[3]विस्तरं चैतदन्यत्रोपपादयिष्यामः इति ॥

(भुवन०)—अथ प्रमेयत्वादीनां हेतूनां पक्षेण सह संयोगसमवायादिसंबन्धाभावात्पक्षधर्मत्वाद्यसिद्धिरिति नोदयति—नन्वित्यादि। उभयनिष्ठत्वमिति। पक्षसपक्षनिष्ठत्वमित्यर्थः। बुद्धिविशेषविषयत्वोपाधिको धर्मः पक्षनिष्ठत्वादिरित्याह—उच्यत इत्यादिना। अयं धर्मविशेषः किं भावः उत अभावः इति विकल्प्य नोदकः प्रथमं प्रत्याह—ननु नायमिति। अयं पक्षनिष्ठत्वादिको धर्मो न भावः। नित्यमाकाशं कृतकत्वाभावादित्यादौ पक्षनिष्ठत्वादेर्धर्मस्य कृतकत्वाभावहेतौ अभावरूपेऽपि वर्तमानत्वात्। न द्वितीयोऽपीत्याह—नाप्यभावः, प्रतियोगिविशेषानिरूपणा-

१ अस्याग्रे 'शेषं तु सुगममेव' इति अधिकं छ पुस्तके दृश्यते। २ 'योगिविषयानि' इति घ पुस्तकपाठः। ३ 'त्वस्य प्रत्य' इति घ पुस्तकपाठः। ४ 'सु। विस्तरतश्चैतद' इति घ पुस्तकपाठः।

दित्यादि । अयं पक्षनिष्ठत्वादिधर्मो नाप्यभावः नाप्यभावरूपः । अयं घटादेराकाशादेर्वाऽभाव इत्येवं प्रतियोगिविशेषस्य अभावसंबन्धिनोऽनिरूपणादित्यर्थः । द्वितीयं विकल्पमङ्गीकृत्य नोदकोक्तं परिहरति—न द्रव्यादिषड्लक्षणानामित्यादि । द्रव्यादयो ये षट्पदार्था द्रव्यगुणकर्मसामान्यविशेषसमवायाख्या वैशेषिकमतप्रसिद्धाः तेषां यानि षड्लक्षणानि १ "गुणाश्रयो द्रव्यम्, " २ "कर्मातिरिक्तो जातिमात्राश्रयो गुणः, " ३ "संयोगविभागाजन्यसंयोगविभागासमवायिकारणजातीयं कर्म," ४ "नित्यत्वे सत्येकत्वे सत्यनेकसमवेता जातिः सामान्यापरपर्याया," ५ "नित्येष्वेव द्रव्येष्वेव वर्तत एव ये ते अन्त्या विशेषाः," ६ "अयुतसिद्धानामाधार्याधारभूतानामिहप्रत्ययहेतुर्यः संबन्धः स समवायः, " इत्येवं रूपाणि । तेषां ये षडत्यन्ताभावास्तद्वत्त्वस्य तदधिकरणत्वस्य अभावत्वस्य प्रत्यक्षादिप्रमाणसिद्धत्वादभावो ऽयं पक्षनिष्ठत्वादिरूपो धर्म इत्यर्थः । तथा हि, एवंविधो धर्मो द्रव्यं न भवति, तल्लक्षणाभावात् । तथा गुणोऽपि न भवति । तल्लक्षणाभावात् । एवं कर्मसामान्यादिरूपोऽपि न भवति । तत्तल्लक्षणाभावादेव । तस्मादयं पक्षनिष्ठत्वादिधर्मोऽभावरूप एव सप्तमः पदार्थः केषांचिद्वैशेषिकाणां मते प्रसिद्धः । एवं च प्रमेयत्वास्तित्वादयोऽपि धर्माः अभावरूपाः एव ज्ञेयाः इत्यर्थः । प्रतियोग्यनिरूप्यस्य अभावत्वानुपपत्तेः प्रतियोगी वाच्य इति शङ्कते । कः पुनरस्य प्रतियोगीति । अस्य पक्षनिष्ठत्वादिधर्मस्याभावरूपस्येत्यर्थः । अभावस्य प्रतियोगिनिरूप्यत्वनियमो नेति परिहरति—न कश्चिदिति । प्रतियोगिज्ञानकार्यत्वादभावज्ञानस्य कथमनियमस्तत्राह—सविस्तरं चैतदन्यत्रेति । अत्यन्ताभावो निष्प्रतियोगिक इत्यन्यत्र वार्तिके वक्ष्याम इति तत एवैतज्ज्ञेयमित्यर्थः । इति पक्षं पक्षीकृत्य प्रवृत्ताखिलशब्दमहाविद्याः प्रादर्श्यन्त ॥ ३० ॥

अथ सपक्षं पक्षीकृत्य प्रवर्तमानमहाविद्याभेदाः यथा—शब्दोऽनित्यः इत्यत्र सपक्षो घटः इति स्थिते,

(भुवन०)—अथ सपक्षं पक्षीकृत्य महाविद्याभेदान् दिदर्शयिषुराह—अथ सपक्षमित्यादि । अथ सपक्षं पक्षीकृत्य प्रवर्तमानमहाविद्याभेदा यथा सन्ति तथोदाहरिष्यन्त इति शेषः । शब्दोऽनित्य इत्यत्रेति । शब्दोऽनित्यः कृतकत्वात् घटवदित्यत्र मूलानुमाने घटः सपक्षः इति स्थिते, घटं सपक्षं पक्षीकृत्य प्रयुज्यते इत्यर्थः । तत्र—

पक्षापक्षविपक्षान्यवर्गादेकैकमुद्धृतम् ।
भिन्नं साध्यवतस्तद्वदुद्धृतावधिभेदिनः ॥

इति कारिकामाश्रित्य या प्रवर्तते तामाह—

१ अयं घटः एतद्घटपक्षीकृतशब्दान्यान्यानित्यान्यः मेयत्वादिति । अत्र च वक्ष्यमाणासु महाविद्यासु चाकाशो दृष्टान्तः । एतद्घटपक्षीकृतशब्दयोर्ये अन्यत्वे तदुभयवत्त्वरहितः एतद्घटपक्षीकृतशब्दान्यान्यः । न चासौ अनित्यश्च । तदन्यत्वाधिकरणमित्यर्थः । एतद्घटपक्षीकृतशब्दान्यान्यानित्यान्यत्वं

चैतद्घटान्यत्वेन वा स्यात्, पक्षीकृतशब्दान्यत्वेन वा। आद्यो[1] व्याहतः। न ह्ययं घटः एतस्माद्घटादन्य इति संभवति। द्वितीये तु शब्दानित्यत्वसिद्धिः। यदि पक्षीकृतः शब्दो न अनित्यः, कथं तर्हि पक्षीकृत[2]ानित्यान्यत्वं घटे स्यादिति ॥ १ ॥

१ (भुवन०)—अयं घट एतद्घटपक्षीकृतशब्दान्यान्यानित्यान्यः, मेयत्वादिति। अत्र महाविद्यानुमानापेक्षया घटः पक्षः। यच्चानुमाने पक्षीकृतशब्द इत्युक्तं, तदनित्यः शब्द इत्यादि मुख्यानुमानापेक्षया। अथ व्याख्या। अयं घट इति विवक्षितः कश्चिद्घटः पक्षः। एतद्घटश्च पक्षीकृतशब्दश्चैतद्घटपक्षीकृतशब्दौ, ताभ्यामन्यत् एतद्घटपक्षीकृतशब्दान्यत्। तस्मादन्यश्चासौ अनित्यश्चेत्येतद्घटपक्षीकृतशब्दान्यान्यानित्यः तस्मादन्यो घट इत्यर्थः। अयं भावः। एतद्घटपक्षीकृतशब्दाभ्यां यदन्यत् विश्वं तदन्यः एतद्घटो वा पक्षीकृतः शब्दो वा। तत्रैतद्घटस्यैतद्घटादन्यत्वं व्याहतम्। तस्मादनित्यशब्दादन्य एतद्घटः सिध्यन् शब्दानित्यत्वं साधयेदित्यर्थः। घटः उक्तसाध्यः इत्युक्ते घटान्तरं घटान्तरादन्यदिति भागे सिद्धसाधनम्। अत उक्तमयं घट इति। अयं घटोऽनित्यान्य इत्युक्ते अनित्यात्पटादेरन्यत्वं सिद्धमत आह—घटपक्षीकृतशब्दान्यान्यानित्यान्य इति। तथोक्ते च घटान्तरान्यत्वमुक्तरूपं सिद्धमत उक्तमेतद्घटेति। एतद्घटपक्षीकृतशब्दान्यान्य इत्युक्ते पक्षीकृतशब्दान्यत्वेन शब्दस्य नित्यत्वेऽप्युपपद्यमानेनार्थान्तरता, तदुक्तमनित्येति। एतद्घटपक्षीकृतशब्दान्यान्याऽनित्यत्व घटस्यान्यत्वेन सर्वत्राकाशादौ व्याप्तिसिद्धिर्ज्ञेया। अत्र वक्ष्यमाणेत्यादि। अत्र सपक्षं पक्षीकृत्य प्रवर्त्तमानमहाविद्यासु पटाद्यनित्यसर्वसपक्षस्य पक्षतुल्यत्वेनाकाशादय एव दृष्टान्ता ज्ञेयाः। एतद्घटेत्यादि। एतद्घटपक्षीकृतशब्दयोः संबन्धिनी ये अन्यत्वे भिन्नत्वे। तदुभयेति। तयोरन्यत्वयोरुभयमित्यर्थः। यदि पक्षीकृतेत्यादि। यदि पक्षीकृतशब्दोऽनित्यो न स्यात्, तदा पक्षीकृतादनित्याच्छब्दाद्घटस्यान्यत्वं न स्यादित्यर्थः ॥ १ ॥

२ अयं घटः एतद्घटपक्षीकृतशब्दान्यान्यानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति। अत्र चैतद्घटपक्षीकृतशब्दान्यान्यः एतद्घटो वा, पक्षीकृतः शब्दो वा। न च घटनिष्ठस्यात्यन्ताभावो घटे संभवति। तेन यदि शब्दोऽनित्यः स्यात्, तर्हि शब्दनिष्ठस्यात्यन्ताभावमुपादाय प्रकृतसाध्य[3]पर्यवसानं स्यादिति शब्दानित्यत्वसिद्धिः ॥ २ ॥

२ (भुवन०)—अथ पूर्वमहाविद्यामेव अन्यान्यपदस्थाने निष्ठात्यन्ताभावाधिकरणपदक्षेपेण प्रकारान्तरेणाह—अयं घट एतद्घटेत्यादि। एतद्घटपक्षीकृतशब्दान्यान्यानित्ये एतद्घटे वा पक्षीकृतशब्दे वा निष्ठा यस्य घटत्वशब्दत्वादेर्धर्मस्य स एतद्घटपक्षीकृतशब्दान्यान्यानित्यनिष्ठः। तस्य यः अत्यन्ताभावस्तदधिकरणं घट इत्यर्थः। अत्र घटनिष्ठस्य घटत्वादेरत्यन्ताभावो घटे पक्षीकृते

१ 'आद्ये व्याघातः' इति घ पुस्तकपाठः। २ 'कृतशब्दान्यत्वं' इति घ पुस्तकपाठः। ३ 'प्रकृतप्रतिज्ञार्थपर्यं' इति घ पुस्तकपाठः।

साधयितुं न शक्यते । तस्माच्छब्दनिष्ठस्य शब्दत्वादेरत्यन्ताभावो घटे साध्यते । शब्दत्वादिधर्मस्य चानित्यनिष्ठत्वं तदैव स्यात्, यदि शब्दोऽनित्यःस्यादिति शब्दानित्यत्वसिद्धिः । एतद्घटपक्षीकृतशब्दान्यान्यानित्यनिष्ठस्य घटत्वादेरत्यन्ताभावः पक्षातिरिक्ते सर्वत्रास्तीति व्याप्तिसिद्धिरिति ॥२॥

३ अयं घटः एतद्घटपक्षीकृतशब्दान्यान्यानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ इहापि यदि पक्षीकृतः शब्दः अनित्यः स्यात्, तर्ह्येव[१] पक्षीकृतशब्दनिष्ठात्यन्ताभावप्रतियोगिनं घटनिष्ठधर्ममुपादाय प्रकृतप्रतिज्ञार्थपर्यवसानं स्यादिति शब्दानित्यत्वसिद्धिः ॥ ३ ॥

३ (भुवन०)—अथानन्तरमहाविद्यानेवात्यन्ताभावाधिकरणस्थाने ऽत्यन्ताभावप्रतियोग्यधिकरणग्रहणेन भङ्ग्यन्तरेण दर्शयति—अयं घट इत्यादि । एतद्घटपक्षीकृतशब्दान्यान्यानित्यनिष्ठश्चासौ अत्यन्ताभावश्च । तस्य प्रतियोगी घटत्वादिर्यो धर्मः तदाधारो घट इत्यर्थः । अत्रानित्यघटनिष्ठस्यात्यन्ताभावस्य प्रतियोगिनः सकलपदार्थधर्माः पटत्वाकाशत्वादयस्तेषामधिकरणं घट इति व्याघातः स्यात् । तस्मादनित्यशब्दनिष्ठो यः अत्यन्ताभावस्तस्य प्रतियोगिनो ये घटत्वादयस्तेषामधिकरणं घट इति भावः । अत्रापि अनित्यनिष्ठोऽत्यन्ताभावस्तदैव स्यात्, यदि शब्दस्यानित्यत्वमङ्गीक्रियते । तस्माच्छब्दानित्यत्वसिद्धिः । घटनिष्ठस्यात्यन्ताभावस्य प्रतियोगिनं गगनैकत्वादिकं धर्मं स्वत्वनिष्ठमुपादाय सर्वत्र गगनादौ व्याप्तिसिद्धिर्ज्ञेयेति । अत्र ग्रन्थकृदनित्यत्वसिद्धिमाह—इहापि यदीत्यादि ॥ ३ ॥

४ अयं घटः एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ अत्र चैतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभावौ विवक्षितौ । पूर्वमहाविद्यायां चैतद्घटैतच्छब्दान्योन्याभावाविति महान्भेदः । एवं वक्ष्यमाणमहाविद्ययोः प्राचीनमहाविद्याभ्यां भेदो द्रष्टव्यः । शेषं पूर्ववत् ॥ ४ ॥

४ (भुवन०)—आद्यमहाविद्यामेव भङ्ग्यन्तरेणाह—अयं घट एतद्घटनिष्ठात्यन्ताभावैतच्छब्देत्यादि । एतद्घटनिष्ठस्य घटत्वादेर्यस्य अत्यन्ताभावश्च एतच्छब्दनिष्ठस्य शब्दत्वादेरत्यन्ताभावश्च एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभावौ । तौ विद्येते यस्य स एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभाववान् । तस्य भावस्तत्त्वम् । तेन रहितश्चासावनित्यश्च तस्मादन्य इत्यर्थः । अयमाशयः । एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभाववदेतद्द्वयव्यतिरिक्तं विश्वम् । तत्त्वरहितोऽनित्य एतद्घटो वा, एतच्छब्दो वा । तत्राद्यान्यत्वं पक्षे व्याहतमिति सपक्षोपयोगि तज्ज्ञेयम् । द्वितीयान्यत्वं च सिध्यच्छब्दस्यानित्यत्वं गमयतीति भावः । आद्यमहाविद्यातोऽस्या भेदमाह—अत्र चैतद्घटनिष्ठेत्यादि । पूर्वमहाविद्यायामिति । आद्यमहाविद्यायामित्यर्थः । अन्योन्याभावाविति । अन्यान्यशब्दाभ्यामुपात्ताविति । एवं वक्ष्यमाणमहाविद्ययोरिति । पञ्चमीषष्ठयोः । प्राचीनमहाविद्याभ्यां द्वितीयतृतीयाभ्यामित्यर्थः ॥ ४ ॥

---

१ 'तर्हि प' इति घ पुस्तकपाठः ।

६ महाविद्या०

५ अयं घटः एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति ॥ अनित्यनिष्ठस्य अत्यन्ताभावः अनित्यनिष्ठात्यन्ताभावः ॥ ५ ॥

५ (भुवन०)—अथ पूर्ववदेव भङ्ग्यन्तरमाह—अयं घट एतद्घटनिष्ठेत्यादि । एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितश्चासौ अनित्यश्च स तथा । तन्निष्ठस्य शब्दत्वादेर्योऽत्यन्ताभावस्तदाश्रयो घट इत्यर्थः । उक्तात्यन्ताभाववत्त्वरहितावेतद्घटैतच्छब्दौ तयोरन्यतरानित्यः उभयप्रसिद्धो घटः । तन्निष्ठस्य घटत्वादेरत्यन्ताभावः पक्षादन्यत्र सर्वत्रास्तीति व्याप्तिसिद्धिः । घटे त्वनित्यशब्दनिष्ठस्य शब्दत्वादेरत्यन्ताभावः सिध्यन्ननित्यत्वं शब्दे साधयेदिति भावः । अत्र कर्मधारयं प्रतिषेद्धुमाह—अनित्यनिष्ठस्यात्यन्ताभाव इत्यादि ॥ ५ ॥

६ अयं घटः एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ अनित्यनिष्ठश्चासौ अत्यन्ताभावश्च ॥ ६ ॥

६ (भुवन०)—अथ पूर्वप्रकारान्तरेण महाविद्यान्तरमाह—अयं घट इत्यादि । यथोक्तात्यन्ताभाववत्त्वरहिताऽनित्यनिष्ठश्चासौ अत्यन्ताभावश्च, तस्य यः प्रतियोगी घटत्वादिस्तदधिकरणं घट इत्यर्थः । यथोक्ताऽनित्य एतद्घटो वा तच्छब्दो वा । तत्रैतद्घटनिष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगिनो ये विश्वनिष्ठा धर्माः पटत्वाकाशशब्दत्वादयस्तेपामधिकरणं घट इति व्याघातः । तस्मादेतच्छब्दरूपो योऽनित्यस्तन्निष्ठो योऽत्यन्ताभावः तत्प्रतियोगिनो ये घटत्वादयस्तदधिकरणं घट इत्यर्थः । व्याप्तिस्तु तत्तन्निष्ठात्मत्वाकाशत्वादिभिर्यथोक्तविशेषणोपपन्नैः पक्षादतिरिक्ते सर्वत्रापि ज्ञेया । तत्पुरुषसमासं व्यावर्त्तयति—अनित्यनिष्ठश्चासावत्यन्ताभावश्चेति ॥ ६ ॥

७ अयं घटः एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ एतद्घटान्यत्ववदेतच्छब्दनिष्ठात्यन्ताभावोऽप्येतच्छब्दव्यतिरिक्तसकलनिष्ठ एव । एतच्छब्दमात्रनिष्ठानां तदन्यत्रासंभवात् । तेन न कश्चित्क्षुद्रोपद्रवः । इयं चैतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभावावुपादाय प्रवृत्ता । प्रथमा चैतद्घटान्योन्याभावैतच्छब्दान्योन्याभावावुपादाय । चतुर्थी चैतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभावावुपादाय । तेन प्रथमचतुर्थमहाविद्याभ्यामेतस्या महान्भेदो द्रष्टव्यः ॥ ७ ॥

७ (भुवन०)—चतुर्थ्यादिमहाविद्यात्रयमेवैतद्घटनिष्ठात्यन्ताभावपदस्थाने एतद्घटान्योन्याभावपदग्रहणेन प्राह—अयं घटः एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यान्यः इति । एतद्घटान्योन्याभावश्च एतच्छब्दनिष्ठस्यात्यन्ताभावश्च, एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभावौ । तद्वत्त्वरहितो योऽनित्यस्तस्मादन्यो भिन्न इत्यर्थः । एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितौ एतद्घटैतच्छब्दौ । तयोरन्यतरैतद्घटान्यत्वं सर्वत्रास्तीति व्याप्तिसिद्धिः । घट-

स्यानित्यशब्दादन्यत्वं च सिध्यदनित्यत्वं शब्दे गमयेदिति भावः । एतद्घटान्यत्ववदिति । यथैतद्घटान्योन्याभावः एतद्घटादन्यत्र सर्वत्रास्ति, तथा एतच्छब्दनिष्ठानां शब्दत्वादिधर्माणां योऽत्यन्ताभावः सोऽप्येतच्छब्दव्यतिरिक्तसकलवस्तुनिष्ठः एवेत्यर्थः । तदन्यत्रेति । एतच्छब्दादन्यत्र । सर्वपदार्थेष्वसंभवात् । तेन हेतुनैतद्घटान्योन्याभाव एतद्घटादन्यत्र सर्वत्र नास्ति । शब्दनिष्ठधर्मात्यन्ताभावस्तु सर्वत्र नास्तीत्यादिः क्षुद्रोपद्रवः कश्चिन्नाशङ्क्यः । प्रथमचतुर्थमहाविद्याभ्यामस्या भेदमाह— इयं चैतदित्यादि ॥ ७ ॥

८ अयं घटः एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति ॥ ८ ॥

८ (भुवन०)—अयं घट एतद्घटान्योन्याभावैतदित्यादि । एतद्घटस्यान्योन्याभावश्च एतच्छब्दनिष्ठस्य धर्मस्यात्यन्ताभावश्च । तद्वदेतद्द्वयव्यतिरिक्तं विश्वं, तद्वत्त्वरहितौ अनित्यौ एतौ द्वावेव । तत्र घटे निष्ठा घटत्वादयः, शब्दे निष्ठाश्च शब्दत्वादयः । तत्र घटत्वात्यन्ताभाववान्घट इति व्याहतम् । तस्मादनित्यशब्दनिष्ठस्य शब्दत्वादेरत्यन्ताभाववान्घटः । तदा च शब्दस्यानित्यत्वसिद्धिः प्रकटैवेत्यर्थः ॥ ८ ॥

९ अयं घटः एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति । एतयोश्च प्राचीनाभ्यां पूर्ववन्महान्भेदः ॥ ९ ॥

९ (भुवन०)—अयं घटः एतद्घटान्योन्याभावेत्यादि । एतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभाववत्त्वरहितानित्यनिष्ठश्चासावत्यन्ताभावश्च, तस्य प्रतियोगिनो ये धर्मा घटत्वादयस्तद्धिकरणं घट इत्यर्थः । शेषं पूर्ववदेव । एतयोश्चेति । एतस्या अनन्तरोक्तमहाविद्यायाश्च प्राचीनाभ्यां षष्ठीसप्तमीभ्यां महान्भेदो ज्ञातव्यः । यतः एतद्घटनिष्ठात्यन्ताभावैतच्छब्दनिष्ठात्यन्ताभावौ पादाय ते महाविद्ये प्रवृत्ते । एते त्वेतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभावावुपादाय चेत्यर्थः ।

१० अयं घटः एतद्घटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ इयं चैतद्घटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभावावुपादाय प्रवृत्ता । सप्तमी त्वेतद्घटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभावावुपादाय । तेनैतयोर्महान्भेदः । एवं वक्ष्यमाणयोरपि प्राचीनाभ्यां महान्भेदः ॥ १० ॥

१० (भुवन०)—[illegible]—अयं घट इत्यादि । एतद्घटनिष्ठस्य अत्यन्ताभाव इति विग्रहः । [illegible]—इयं चेति । वक्ष्यमाणयोरिति । [illegible] । प्राचीनाभ्यामिति । [illegible] । शेषं पूर्ववत् ॥ १० ॥

११ अयं घटः एतद्घटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति ॥ ११ ॥

११ (भुवन०)—अयं घटः एतद्धटेत्यादि । एतद्धटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितो योऽनित्यः शब्दादिस्तन्निष्ठा ये शब्दत्वादयस्तेषामत्यन्ताभाववान्घट इत्यर्थः ।

१२ अयं घटः एतद्धटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ १२ ॥

१२ (भुवन०)—अयं घट इत्यादि । एतद्धटनिष्ठस्य घटत्वादेरत्यन्ताभावः एतद्धटनिष्ठात्यन्ताभावः । एतद्धटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितो योऽनित्यः शब्दादिस्तन्निष्ठो योऽत्यन्ताभावस्तस्य यः प्रतियोगी घटत्वादिस्तदधिकरणं घट इत्यर्थः ॥ १२ ॥

१३ अयं घटः एतद्धटान्यशब्दत्वात्यन्ताभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ इयं चैतद्धटान्योन्याभावपक्षतत्तुल्यमात्रनिष्ठशब्दत्वात्यन्ताभावावुपादाय प्रवृत्ता पक्षतत्तुल्यान्यतमे यत्र कुत्रापि शब्देऽनित्यत्वं गमयति । सप्तमी त्वेतद्धटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभावावुपादाय प्रवृत्ता निष्कृष्यैतस्मिन्शब्देऽनित्यत्वं गमयति । तेनैतयोर्महान्भेदः । एवमुत्तरयोरपि प्राचीनाभ्यां महान्भेदः ॥ १३ ॥

१३ (भुवन०)—पुनरपि सप्तम्यादिमहाविद्या एवाष्टादशयावत्किञ्चिद्भेदेनाह—अयं घट एतद्धटान्येत्यादि । शब्दत्वस्य अत्यन्ताभावः शब्दत्वात्यन्ताभावः । स विद्यते येषु ते शब्दत्वात्यन्ताभाववन्तः, शब्दव्यतिरिक्ताः सर्वे पदार्थाः । ततो विशेषणविशेष्यकर्मधारयः । एतद्धटान्ये च ते शब्दत्वात्यन्ताभाववन्तश्च, एतद्धटान्यशब्दत्वात्यन्ताभाववन्तः । तदभावस्तद्वत्त्वं । तेन रहितश्चासौ अनित्यश्चैतद्धटो वा शब्दो वा । तस्मादन्यो घट इत्यर्थः । तत्र घटो घटादन्यो न संभवति । तस्मादनित्यशब्दादन्यो घट इति भावः । सप्तमीमहाविद्यातोऽस्या भेदमाह—इयं चैतद्धटान्योन्याभावपक्षतत्तुल्यमात्रेति । पक्षो मूलानुमानापेक्षया पक्षीकृतो विवक्षितः कश्चिच्छब्दस्तत्तुल्याः । पक्षतुल्या जगन्निष्ठा अपरे शब्दास्तदुभयनिष्ठं यच्छब्दत्वं तदत्यन्ताभावमुपादाय इयं प्रवृत्ता सती पक्षतत्तुल्यानां मध्येऽन्यतरस्मिन्यत्र कुत्रापि शब्देऽनित्यत्वं साधयति । सप्तमी त्वेतच्छब्देति भणनात्सर्वशब्दमध्यादेकं शब्दं । निष्कृष्येति । पृथक् कृत्य । एतस्मिन्निति । विवक्षिते शब्देऽनित्यत्वं गमयतीति तेनैतयोर्महान्भेदो ज्ञातव्यः । एवमुत्तरयोरपीति । चतुर्दशीपञ्चदश्योर्महाविद्ययोः । प्राचीनाभ्यामिति । अष्टमीनवमीरूपाभ्यामित्यर्थः ॥ १३ ॥

१४ अयं घटः एतद्धटान्यशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति ॥ १४ ॥

१४ (भुवन०)—अयं घट एतद्धटान्येत्यादि । एतद्धटादन्ये ये शब्दत्वात्यन्ताभाववन्तो विश्वपदार्थाः तद्वत्त्वरहितानित्यो घटो वा, शब्दो वा । तन्निष्ठा धर्मा घटत्वादयो वा शब्दत्वादयो वा । तेषामत्यन्ताभाववान्घटः साध्यते । तत्र घटत्वात्यन्ताभाववान्घट इति साधने व्याघातः। तस्मा-

१ 'प्रवृत्ता यत्र' इति ज पुस्तकपाठः । २ 'भावप्रतियोग्यधिक' इति घ पुस्तकपाठः ।

च्छब्दत्वात्यन्ताभाववान्घटः प्रसिध्यति । शब्दत्वादि चानित्यनिष्ठं तदैव स्यात्, यदि शब्दोऽनित्यः स्यादिति शब्दानित्यत्वसिद्धिः ॥ १४ ॥

१५ अयं घटः एतद्घटान्यशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ एतद्घटान्यस्मिन् शब्दत्वात्यन्ताभाववति एतद्घटान्यशब्दत्वात्यन्ताभाववत्त्वं धर्मः । तद्रहितत्वमुपादायैतन्महाविद्यात्रयम् ॥ १५ ॥

१५ (सुवन०)—अयं घटः एतद्घटान्येति । एतद्घटान्ये ये शब्दत्वात्यन्ताभाववन्तोऽत्यन्ताभाववन्तो विश्वपदार्थास्तद्वत्त्वरहिताऽनित्यः साध्यपक्षे शब्द एव, तन्निष्ठो योऽत्यन्ताभावस्तत्प्रतियोगिनो ये घटत्वादयो धर्माः, तदधिकरणं घट इति भावार्थः । एतन्महाविद्यात्रयोपयोगिनं धर्मं दर्शयति—एतद्घटान्यस्मिन्नित्यादि ॥ १५ ॥

१६ अयं घटः एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ १६ ॥

१६ (सुवन०)—अयं घटः एतद्घटनिष्ठात्यन्ताभावेत्यादि । एतद्घटनिष्ठस्य अत्यन्ताभावस्य । तद्वत्त्वरहितो योऽनित्यो दृष्टान्तधर्मिपक्षे एतद्घट एव । साध्यधर्मिपक्षे तु शब्द एव । तस्मादन्यो घट इत्यर्थः ॥ १६ ॥

१७ अयं घटः एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति ॥ १७ ॥

१७ (सुवन०)—अयं घटः एतद्घटनिष्ठात्यन्ताभावेत्यादि । एतद्घटनिष्ठस्य घटत्वादेरत्यन्ताभावस्य शब्दत्वस्यात्यन्ताभावस्य । तौ विद्येते येषां ते तथा । तद्वत्त्वरहितानित्यौ एतौ द्वावेव । तन्निष्ठा ये धर्मास्तेषां योऽत्यन्ताभावस्तदधिकरणं घटः । अत्रानित्यशब्दनिष्ठशब्दत्वात्यन्ताभाववान्घट इति परमार्थः ॥ १७ ॥

१८ अयं घटः एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ एतद्घटनिष्ठस्य अत्यन्ताभावस्य शब्दत्वात्यन्ताभावस्य एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभावौ । तदुभयैरहितत्वं प्रकृतमहाविद्यात्रयोपयोगि ॥ १८ ॥

१८ (सुवन०)—अयं घटः इत्यादि । एतद्घटनिष्ठस्यात्यन्ताभावस्य शब्दत्वात्यन्ताभावस्य । तद्वत्त्वरहितानित्यनिष्ठश्चासौ अत्यन्ताभावश्च । तस्य प्रतियोगिनो ये घटत्वादयो धर्मास्तेदनाधिकरणं घट इत्याशयः । एतन्महाविद्यात्रयसंबन्धिनं धर्मान्तरं दर्शयति—एतद्घटनिष्ठस्यात्यन्ताभाव इत्यादि । पाश्चात्यमहाविद्यात्रयमेतद्घटान्योन्याभावमनुपादायैव प्रवृत्तम् । एतन्महाविद्यात्रयं त्वेतद्घटनिष्ठात्यन्ताभावमुपादायैवेति स्फुट एव भेदः ॥ १८ ॥

---

१ 'भावरहि' इति घ पुस्तकपाठः । २ 'भवन्त्यो' इति ङ पुस्तकपाठः ।

११ (भुवन०)—अयं घटः एतद्धटेत्यादि । एतद्धटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितो योऽनित्यः शब्दादिस्तन्निष्ठा ये शब्दत्वादयस्तेषामत्यन्ताभाववान्घट इत्यर्थः ।

१२ अयं घटः एतद्धटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ १२ ॥

१२ (भुवन०)—अयं घट इत्यादि । एतद्धटनिष्ठस्य घटत्वादेरत्यन्ताभावः एतद्धटनिष्ठात्यन्ताभावः । एतद्धटनिष्ठात्यन्ताभावैतच्छब्दान्योन्याभाववत्त्वरहितो योऽनित्यः शब्दादिस्तन्निष्ठो योऽत्यन्ताभावस्तस्य यः प्रतियोगी घटत्वादिस्तदधिकरणं घट इत्यर्थः ॥ १२ ॥

१३ अयं घटः एतद्धटान्यशब्दत्वात्यन्ताभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ इयं चैतद्धटान्योन्याभावपक्षतत्तुल्यमात्रनिष्ठशब्दत्वात्यन्ताभावावुपादाय प्रवृत्ता[1] पक्षतत्तुल्यान्यतमे यत्र कुत्रापि शब्देऽनित्यत्वं गमयति सप्तमी त्वेतद्धटान्योन्याभावैतच्छब्दनिष्ठात्यन्ताभावावुपादाय प्रवृत्ता निष्कृष्य तस्मिन्शब्देऽनित्यत्वं गमयति । तेनैतयोर्महान्भेदः । एवमुत्तरयोरपि प्राचीनाभ्यां महान्भेदः ॥ १३ ॥

१३ (भुवन०)—पुनरपि सप्तम्यादिमहाविद्या एवाष्टादशयावत्किञ्चिद्भेदेनाह—अयं घट एतद्धटान्येत्यादि । शब्दत्वस्य अत्यन्ताभावः शब्दत्वात्यन्ताभावः । स विद्यते येषु ते शब्दत्वात्यन्ताभाववन्तः, शब्दव्यतिरिक्ताः सर्वे पदार्थाः । ततो विशेषणविशेष्यकर्मधारयः । एतद्धटान्ये च ते शब्दत्वात्यन्ताभाववन्तश्च, एतद्धटान्यशब्दत्वात्यन्ताभाववन्तः । तद्भावस्तद्वत्त्वं । तेन रहितश्चासौ अनित्यश्चैतद्धटो वा शब्दो वा । तस्मादन्यो घट इत्यर्थः । तत्र घटो घटादन्यो न संभवति । तस्मादनित्यशब्दादन्यो घट इति भावः । सप्तमीमहाविद्यातोऽस्या भेदमाह—इयं चैतद्धटान्योन्याभावपक्षतत्तुल्यमात्रेति । पक्षो मूलानुमानापेक्षया पक्षीकृतो विवक्षितः कश्चिच्छब्दस्तत्तुल्याः । पक्षतुल्यजगन्निष्ठा अपरे शब्दास्तदुभयनिष्ठं यच्छब्दत्वं तदत्यन्ताभावमुपादाय इयं प्रवृत्ता सती पक्षतत्तुल्यानां मध्येऽन्यतरस्मिन्यत्र कुत्रापि शब्देऽनित्यत्वं साधयति । सप्तमी त्वेतच्छब्देति भणनात्सर्वशब्दमध्यादेकं शब्दं । निष्कृष्येति । पृथक् कृत्य । एतस्मिन्निति । विवक्षिते शब्देऽनित्यत्वं गमयतीति तेनैतयोर्महान्भेदो ज्ञातव्यः । एवमुत्तरयोरपीति । चतुर्दशीपञ्चदश्योर्महाविद्ययोः प्राचीनाभ्यामिति । अष्टमीनवमीरूपाभ्यामित्यर्थः ॥ १३ ॥

१४ अयं घटः एतद्धटान्यशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं[2] मेयत्वादिति ॥ १४ ॥

१४ (भुवन०)—अयं घट एतद्धटान्येत्यादि । एतद्धटादन्ये ये शब्दत्वात्यन्ताभाववन्तो विश्वपदार्थाः तद्वत्त्वरहितानित्यो घटो वा, शब्दो वा । तन्निष्ठा धर्मो घटत्वादयो वा शब्दत्वादयो वा । तेषामत्यन्ताभाववान्घटः साध्यते । तत्र घटत्वात्यन्ताभाववान्घट इति साधने व्याघातः । तस्मा-

---

१ 'प्रवृत्ता यत्र' इति ज पुस्तकपाठः । २ 'भावप्रतियोग्यधिक' इति च पुस्तकपाठः ।

च्छब्दत्वात्यन्ताभाववान्घटः प्रसिध्यति । शब्दत्वादि चानित्यनिष्ठं तदैव स्यात्, यदि शब्दोऽनित्यः स्यादिति शब्दानित्यत्वसिद्धिः ॥ १४ ॥

१५ अयं घटः एतद्घटान्यशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ एतद्घटान्यस्मिन् शब्दत्वात्यन्ताभाववति एतद्घटान्यशब्दत्वात्यन्ताभाववत्त्वं धर्मः । तद्रहितत्वमुपादायैतन्महाविद्यात्रयम् ॥ १५ ॥

१५ (भुवन०)—अयं घटः एतद्घटान्येति । एतद्घटान्ये ये शब्दत्वात्यन्ताभाववन्तोऽत्यन्ताभाववन्तो विश्वपदार्थास्तद्वत्त्वरहिताऽनित्यः साध्यपक्षे शब्द एव, तन्निष्ठो योऽत्यन्ताभावस्तत्प्रतियोगिनो ये घटत्वादयो धर्माः, तदधिकरणं घट इति भावार्थः । एतन्महाविद्यात्रयोपयोगिनं धर्मं दर्शयति—एतद्घटान्यस्मिन्नित्यादि ॥ १५ ॥

१६ अयं घटः एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभाववत्त्वरहितानित्यान्यः मेयत्वादिति ॥ १६ ॥

१६ (भुवन०)—अयं घटः एतद्घटनिष्ठात्यन्ताभावेत्यादि । एतद्घटनिष्ठस्य अत्यन्ताभावश्च । तद्वत्त्वरहितो योऽनित्यो दृष्टान्तधर्मिपक्षे एतद्घट एव । साध्यधर्मिपक्षे तु शब्द एव । तस्मादन्यो घट इत्यर्थः ॥ १६ ॥

१७ अयं घटः एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावाधिकरणं मेयत्वादिति ॥ १७ ॥

१७ (भुवन०)—अयं घटः एतद्घटनिष्ठात्यन्ताभावेत्यादि । एतद्घटनिष्ठस्य घटत्वादेरत्यन्ताभावश्च शब्दत्वस्यात्यन्ताभावश्च । तौ विद्येते येषां ते तथा । तद्वत्त्वरहितानित्यौ एतौ द्वावेव । तन्निष्ठा ये धर्मास्तेषां योऽत्यन्ताभावस्तदधिकरणं घटः । अत्रानित्यशब्दनिष्ठशब्दत्वात्यन्ताभाववान्घट इति परमार्थः ॥ १७ ॥

१८ अयं घटः एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभाववत्त्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ एतद्घटनिष्ठस्य अत्यन्ताभावश्च शब्दत्वात्यन्ताभावश्च एतद्घटनिष्ठात्यन्ताभावशब्दत्वात्यन्ताभावौ । तदुभयरहितत्वं प्रकृतमहाविद्यात्रयोपयोगि ॥ १८ ॥

१८ (भुवन०)—अयं घटः इत्यादि । एतद्घटनिष्ठस्यात्यन्ताभावस्य शब्दत्वात्यन्ताभावस्य । तद्वत्त्वरहितानित्यनिष्ठश्चासौ अत्यन्ताभावश्च । तस्य प्रतियोगिनो ये घटत्वादयो धर्मास्तेषामधिकरणं घट इत्याशयः । एतन्महाविद्यात्रयसंबन्धिनं धर्मं निर्दिशति—एतद्घटनिष्ठस्यात्यन्ताभाव इत्यादि । पाश्चात्यमहाविद्यात्रयमेतद्घटान्योन्याभावमुपादाय प्रवृत्तम् । एतन्महाविद्यात्रयं त्वेतद्घटनिष्ठात्यन्ताभावमुपादायेति स्फुट एव भेदः ॥ १८ ॥

---

१ 'भाववती' इति घ पुस्तकपाठः । २ 'स्पष्टतरो' इति ङ पुस्तकपाठः ।

१९ अयं घटः एतद्घटनित्यनिष्ठत्वरहितैतच्छब्दनिष्ठाधिकरणं मेयत्वादिति ॥ एतस्मिन्घटे नित्ये च ये वर्तन्ते तेषु एतद्घटनित्यनिष्ठत्वं धर्मः । तद्रहितश्चैतद्घटनिष्ठत्वरहितो वा, नित्यनिष्ठत्वरहितो वा। आद्यः पक्षे व्याहतः। नित्यनिष्ठत्वरहितस्तु पक्षीकृतशब्दनिष्ठस्तर्ह्येव स्याद्यदि पक्षीकृतः शब्दो नित्यो न भवेत् । पक्षीकृतशब्दनित्यत्वे तन्निष्ठस्य नित्यनिष्ठत्वेन तद्रहितत्वानुपपत्तेः । तेन नित्यनिष्ठत्वरहितः पक्षीकृतशब्दनिष्ठो घटे सिध्यन् पक्षीकृतशब्दानित्यत्वमन्तर्भाव्य सिध्यतीति । एतद्घटनित्यनिष्ठत्वरहिताधिकरणमित्युक्ते घटत्वादिना शब्दनित्यत्वेऽप्युपपद्यमानेन एतद्घटनिष्ठेन अर्थान्तरता स्यात् । तन्निवृत्त्यर्थमेतच्छब्दनिष्ठग्रहणम् । एतच्छब्दनिष्ठाधिकरणमित्युक्ते शब्दनित्यत्वेऽप्युपपद्यमानैर्मेयत्वादिभिरेतद्घटनिष्ठैरर्थान्तरता स्यात्। तन्निवृत्त्यर्थमेतद्घटनित्यनिष्ठत्वरहितग्रहणम् । नित्यनिष्ठत्वरहितैतच्छब्दनिष्ठाधिकरणमित्युक्ते नित्यपदार्थेषु साध्याभावः । तन्निवृत्त्यर्थमेतद्घटग्रहणम् । यद्यपि नित्यपदार्थेषु नित्यवृत्तित्वरहितो नास्ति, तथाप्येतद्घटनित्यनिष्ठत्वरहितः एतद्घटान्योन्याभावः एतच्छब्दनिष्ठोऽस्त्येवेति नित्यपदार्थेषु साध्यानुगमसिद्धिः ॥ १९ ॥

१९ (आनं०)— × × धिकरणमित्युक्ते व्याप्त्यसिद्धिर्नित्येषु तदसम्भवादत उक्तम्—नित्यनिष्ठत्वरहितेति । घटान्तरप्रवृत्तिरहितेन स्वमात्रनिष्ठधर्मेणार्थान्तरत्वं निवर्तयति—एतदिति। एतद्घटनित्यनिष्ठत्वरहित एतदवृत्तिर्वा नित्यवृत्तिरहितो वा । आद्यः पक्षे व्याहतः, द्वितीयस्तु शब्दनिष्ठो धर्मः पक्षे सिध्यन्ननित्यत्वं शब्दस्य भावयेदिति भावः । व्याकरोति—एतद्घट इति। विशेषणकृत्यमाह—घटत्वादिनेति ॥

१९ (भुवन०) अथाभिनवप्रकारेण महाविद्यान्तराणि प्राह—अयं घटः एतद्घटनित्यनिष्ठत्वेत्यादि । एतद्घटश्च नित्याश्च एतद्घटनित्याः । तेषु निष्ठा येषां ते एतद्घटनित्यनिष्ठास्तेषां भावस्तत्त्वं । तेन रहितश्चासावेतच्छब्दनिष्ठश्च तस्याधिकरणं घट इत्यर्थः। अत्र साध्यो धर्मो विश्वप्रतियोगिको घटशब्दान्योन्याभावः। दृष्टान्तधर्मस्तु पक्षान्योन्याभावः सर्वत्र द्रष्टव्यः। अथैतां महाविद्यां व्याचरीकरोति—एतस्मिन्नित्यादि । अथान्त्यविशेषणं विमुच्य व्यावृत्तिचिन्तां करोति—एतद्घटनित्यनिष्ठत्वरहितेत्यादि । घटत्वादिनेति । घटत्वादिना यथोक्तयुगलावृत्तित्वान्नित्येष्ववर्तमानेन घटे च वर्तमानेन शब्दस्य नित्यत्वेऽपि साध्ये उपपद्यमानेनार्थान्तरता स्यात् । तन्निवृत्त्यर्थमेतच्छब्दनिष्ठेति पदग्रहणम् । अथाद्यविशेषणं परित्यज्य व्यावृत्तिं चिन्तयति—एतच्छब्दनिष्ठेत्यादि ।

१ 'नित्यत्वे तन्निष्ठत्वे' इति ग पुस्तकपाठः । २ 'शब्दस्यानित्य' इति ज पुस्तकपाठः । ३ आनन्दपूर्णकृता टीका आदर्शपुस्तके त्वधनन्तरं पुनरपि आरभ्य लब्धा ।

एवमपि मेयत्वादिभिरेतच्छब्दघटानिष्ठैः शब्दानित्यत्वस्यार्थान्तरता तथाविधैवेति तन्निवृत्त्यर्थमेतद्घट-नित्यनिष्ठेत्यादिपदोपादानम् । यद्यपि नित्यपदार्थेषु नित्यवृत्तित्वेत्यादि । यद्यपि दृष्टान्तीक्रियमाणेषु नित्येषु पक्षान्योन्याभावादिर्यो धर्मो विचार्यते स नित्यवृत्तित्वरहितो न स्यात्, तथाप्येतद्घटनित्यस्यपुद्गलावृत्तित्वेनैतद्घटनित्यवृत्तित्वरहितो भवत्येव । स च पक्षीकृतघटादन्यत्र सर्वत्र वर्तमानत्वेनैतच्छब्दनिष्ठोऽस्त्येवेति तेन पक्षान्यत्वादिना धर्मेण नित्येषु साध्यानुगमो द्रष्टव्यः । घटान्तरवृत्तित्वरहितेन पक्षीकृतघटैतच्छब्दमात्रनिष्ठधर्मेण अर्थान्तरत्वनिरसनायेत्यादीति पदं द्रष्टव्यम् । एतद्घटनित्यनिष्ठत्वरहितः एतद्घटावृत्तिर्वा, नित्यवृत्तित्वरहितो वा । आद्यः पक्षे व्याहतः । द्वितीयस्तु पूर्वोक्तः शब्दनिष्ठो धर्मः पक्षे सिध्यन्ननित्यत्वं शब्दस्य साधयेदिति भावः ॥ १९ ॥

२० अयं घटः शब्देतरानित्यनित्यवृत्तित्वरहितैतच्छब्दनिष्ठाधिकरणं मेयत्वादिति ॥ पूर्वमहाविद्यायामेतद्घटग्रहणस्य यत्प्रयोजनं तदेवात्र शब्देतरानित्यग्रहणस्य । शेषं पूर्ववत् ॥ २० ॥

२० (आनं०)—शब्देतरेति । शब्दादितरस्मिन्ननित्ये नित्ये च ये [illegible] तेषु [illegible]-रवृत्तित्वं धर्मः, तद्रहितश्चासावेतच्छब्दनिष्ठश्च तस्याधिकरणमित्यर्थः । [illegible] मेयत्वादिनार्थान्तरमत आह—नित्येति । नित्यवृत्तित्वरहित [illegible] नित्येषु साध्यसिद्धिरत उक्तम्—अनित्यनित्यवृत्तित्वरहितेति । यद्यपि नित्यनित्येषु [illegible]-त्वं नास्ति, तथाप्यनित्यवृत्तित्वे सति नित्यवृत्तित्वं नास्त्येव । [illegible]-त्युक्ते घटत्वेन अर्थान्तरत्वमत आह—एतच्छब्दनिष्ठेति । [illegible]-धानित्युक्तेऽप्रसिद्धविशेषणत्वम् । न हि शब्दस्यानित्यत्वासिद्धेः [illegible] लिप्यतीत्यत उक्तम्—शब्देतरेति । शब्देतरानित्यनित्यवृत्तित्वरहितैत[illegible]-त्वमनित्येषु, नित्येषु च शब्देतरानित्यान्यत्वमिति व्याप्तिसिद्धिः । [illegible] तच्च नित्यमात्रवृत्तिर्वाऽनित्यमात्रवृत्तिर्वा । आद्यः पक्षे व्याहतः । द्वितीयस्तु शब्दनिष्ठः [illegible]-ध्यन्ननित्यत्वं शब्दस्य गमयतीत्यर्थः ।

२० (भुवन०)—अयं घटः शब्देतरानित्येत्यादि । [illegible] तराऽनित्या, शब्देतरानित्याश्च ते नित्याश्च [illegible] । [illegible] धर्मः । तद्रहितश्चासौ एतच्छब्दनिष्ठश्च । [illegible] । [illegible] विशे-षियोगिकघटशब्दान्योन्याभावादिः । स च यदि [illegible] शब्दे-तरानित्ये च घटे वर्तमानः शब्देतरानित्यानित्यवृत्तित्वरहितो न [illegible]-र्थम् । अत्र नित्यपदार्थेषु दृष्टान्तेषु [illegible] द्र-ष्टव्यः । अनित्यानित्यवृत्तित्वरहितैतच्छब्दनिष्ठ [illegible] -न्तौ सर्वेऽनित्यानित्यवृत्तित्वरहित [illegible] चा-प्रसिद्धेः । तदर्थं शब्देतरेत्युक्तम् । [illegible] [illegible] । [illegible]—पूर्वमहाविद्यायामेतद्घटेत्यादि ॥ २० ॥

२१ अयं घटः शब्देतरानित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति । ये शब्देतरानित्यनिष्ठाः शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगिनश्च तेषु शब्देतरानित्यनिष्ठत्वे सति शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं धर्मः । तद्रहितश्चासौ अनित्यनिष्ठात्यन्ताभावप्रतियोगी च, तदधिकरणं तदाश्रय इत्यर्थः। उभयत्र अनित्यनिष्ठश्चासौ अत्यन्ताभावश्चेति समासः । अनित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमित्युक्ते स्तम्भाद्यनित्यनिष्ठात्यन्ताभावप्रतियोगिभिर्घटत्वादिभिरेतद्घटनिष्ठैः प्रकृतशब्दनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता स्यात् । तन्निवृत्त्यर्थं शब्देतरानित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितग्रहणम् । शब्देतरानित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहिताधिकरणमित्युक्ते मेयत्वादिभिरेतद्घटनिष्ठैः प्रकृतशब्दनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता स्यात् । तन्निवृत्त्यर्थमनित्यनिष्ठात्यन्ताभावप्रतियोगिग्रहणम् ।

२१ (आनं०)—शब्देतरानित्यनिष्ठेति । शब्देतरानित्यनिष्ठश्चासावत्यन्ताभावश्च शब्देतरानित्यनिष्ठात्यन्ताभावः, तत्प्रतियोगित्वरहितः शब्देतरानित्यनिष्ठश्चासौ शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितश्च, स चायमनित्यनिष्ठात्यन्ताभावस्य प्रतियोगी, तस्याधिकरणमित्यर्थः । अधिकरणमित्युक्ते वाच्यत्वेनार्थान्तरं वारयति—अत्यन्ताभावप्रतियोगीति । अत्यन्ताभावप्रतियोग्यधिकरणमित्युक्ते नित्यनिष्ठात्यन्ताभावस्य प्रतियोगिकार्यत्वेन अर्थान्तरमत उक्तम्—अनित्यनिष्ठात्यन्ताभावेति । अनित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमित्युक्ते स्तम्भनिष्ठात्यन्ताभावप्रतियोगिघटत्वेन अर्थान्तरमत उक्तम्—नित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितेति । अनित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमित्युक्ते व्याघातोऽत उक्तम्—शब्देतरेति । शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमित्युक्ते व्याप्त्यसिद्धिः । नित्यमात्रनिष्ठानां शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वेन तद्रहितत्वाभावात्, अत उक्तम्—अनित्यनिष्ठेति । अनित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तन्नित्यमात्रनिष्ठं धर्मेषु नास्तीति साध्यसिद्धिः । नित्येष्वनित्येष्वपि स्तम्भत्वकुम्भादीनां स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वरहितत्वात्कार्यान्तरनिष्ठात्यन्ताभावप्रतियोगित्वात्साध्यसिद्धिः । अनित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमित्युक्तेऽपि प्रकारान्तरेण व्याप्तिभङ्गः । शब्दानित्यत्वसिद्धेः पूर्वं शब्दमात्रनिष्ठानामनित्यनिष्ठत्वासिद्धेः, शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितत्वासिद्धेश्च । तत उक्तं शब्देतरानित्यनिष्ठेति। शब्दमात्रधर्मस्य शब्देतरानित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तन्नास्तीति साध्यानुगमः । घटे च शब्देतरानित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितः

१ 'शब्दे तत्सिद्धनिष्ठा' इति घ पुस्तक पाठः ।

सिध्यन्ननित्यनिष्ठत्वरहितो न सिध्यति । तेन शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितः सिध्येत् । स चानित्यनिष्ठात्यन्ताभावप्रतियोगी सिध्यन्ननित्यत्वं शब्दस्य गमयति । शब्देतरानित्यमात्रनिष्ठस्य तन्मात्रनिष्ठात्यन्ताभावप्रतियोगित्वादिति भावः । व्याचष्टे—ये शब्देतरेति । कृत्यमाह—अनित्यनिष्ठेति ।

२१ (भुवन०)—अयं घटः शब्देतरानित्यनिष्ठेत्यादि । शब्दादितरे येऽनित्याः शब्देतरानित्याः, शब्देतरानित्येषु निष्ठा येषां ते शब्देतरानित्यनिष्ठाः । शब्दादितरे येऽनित्यास्तन्निष्ठश्चासौ अत्यन्ताभावश्च शब्देतरानित्यनिष्ठात्यन्ताभावः । तस्य प्रतियोगिनः शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगिनः । शब्देतरानित्यनिष्ठाश्च ते शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगिनश्च । एवंविधाश्च धर्मा एकैकानित्यनिष्ठाः परस्परं सर्वेऽपि घटत्वतत्सम्भत्वादयो ज्ञेयाः । तेषां भावस्तत्त्वं । तेन रहिताः । शब्दत्वाकाशत्वादयः परस्परत्वविवक्षारहिता घटत्वादयोऽपि च । अनित्यनिष्ठात्यन्ताभावेति । अनित्यनिष्ठश्चासौ अत्यन्ताभावश्च, तस्य प्रतियोगिनः अनित्यनिष्ठात्यन्ताभावप्रतियोगिनः । शब्देतरानित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितश्चासौ अनित्यनिष्ठात्यन्ताभावप्रतियोगी च तस्याश्रयो घट इति विग्रहः । अत्र प्रथमविशेषणविचारणायामाकाशत्वशब्दत्वघटत्वतत्सम्भत्वादयः उपपद्यन्ते । तत्राकाशत्वादयो यद्यपि शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहिता न सन्ति, तथापि शब्देतरानित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तद्रहिता एवेति । ये च शब्दत्वादयस्तेऽपि च यद्यपि शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहिता न सन्ति, तथापि शब्देतरानित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तद्रहिता एव । ये च घटत्वतत्सम्भत्वादयस्तेऽपि यद्यपि शब्देतरानित्यनिष्ठाः सन्ति, तथापि शब्देतरानित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तद्रहिता एव । [illegible] शब्देतरानित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तद्रहिता एवेति । द्वितीयविशेषणस्यार्थः । अनित्यशब्दनिष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगी पूर्वविशेषणविशिष्टश्च यः [illegible] घट इत्यर्थः । पूर्वविशेषणविशिष्टमपि घटत्वमनित्यनिष्ठात्यन्ताभावप्रतियोगि [illegible] यदि शब्दोऽनित्यः स्यात् । गगनादीनां नित्यत्वेनोपपत्तेरसत्त्वात् । शब्देतरानित्य[illegible]गित्वं च घटत्वादिधर्मस्य शब्देतरानित्यनिष्ठत्वे सति [illegible] तद्रहितत्वानुपपत्तेः, शब्दस्य [illegible] न शक्यते । [illegible] सर्वत्र [illegible] एव । [illegible] अनित्यनिष्ठात्यन्ताभावेत्यादि । [illegible]

[illegible]

[illegible] । [illegible] ।

शब्देतरानित्यानित्यत्वात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोगित्वाभिधाने सिद्धविशेषणमत्र । नित्यमात्रनिष्ठानां धर्माणां शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वेन तद्रहितत्वानुपपत्तेः । एवं शब्दमात्रनिष्ठानां शब्देतरनित्यमात्रनिष्ठानां च । एतद्व्यतिरिक्तशब्देतरानित्यमात्रनिष्ठा गुण्या इति न तन्मात्रनिष्ठेषु साध्यसिद्धिः । न चोक्तसिद्धविशेषणतानिष्ठार्थं शब्देतरानित्यनिष्ठत्वग्रहणात् । यद्यपि नित्यमात्रनिष्ठा धर्माः शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगिनः, तथापि शब्देतरानित्यनिष्ठत्वे सति तत्र शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं, तद्रहिता एवेति नित्यमात्रनिष्ठेषु साध्यसिद्धिः । एवं शब्दत्वादिष्वपि शब्देतरानित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितः शब्देतरानित्यनिष्ठत्वरहितो वा स्यात्, शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितो वा । आद्यः पक्षो व्याहतः । द्वितीयस्य तु अनित्यनिष्ठात्यन्ताभावप्रतियोगित्वं गत्यैव स्यात्, यद्यनित्यः शब्दः स्यात् । गगनादीनां नित्यत्वात् । शब्देतरानित्यमात्रवृत्तेश्च शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वानुपपत्तेश्च । तेन शब्दानित्यत्वसिद्धिः ॥ २१ ॥

(आनं०)—नित्यपदार्थेषु साध्यसिद्धिमुपपादयति—नित्यमात्रेति । शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगी नित्येषु नास्तीत्यर्थः । एवमिति । शब्दमात्रनिष्ठानां शब्देतरानित्यनिष्ठत्वं नास्ति, तथा शब्देऽनित्यमात्रे च निष्ठानामपि तन्नास्तीत्यर्थः । शब्देतरानित्यनिष्ठकार्याणामनित्यनिष्ठात्यन्ताभावप्रतियोगित्वं शब्दानित्यत्वसिद्धेः प्राग्दुरधिगममित्याह—एतद्व्यतिरिक्तेति । नित्यमात्रनिष्ठानामनित्यनिष्ठात्यन्ताभावप्रतियोगित्वाच्छब्देतरानित्यनिष्ठग्रहणेऽपि न साध्यसिद्धिरत्राह—यद्यपीति । कथं शब्दतदितरनित्येषु साध्यसिद्धिरत्राह—एवमिति । शब्दत्वादिषु शब्दमात्रधर्मेषु शब्देतरानित्यनिष्ठत्वाभावाच्छब्दे साध्यसिद्धिः । शब्देतरानित्यानां पक्षतुल्यत्वात्तत्र संदेहो न दोष इत्यर्थः । घटस्यैवंभूतधर्माधिकरणत्वेऽपि कथं शब्दानित्यत्वमत्राह—शब्देतरेति । शब्देतरानित्यनिष्ठत्वरहितोऽपि तन्नित्यत्वे सति तन्निष्ठात्यन्ताभावप्रतियोगित्वरहितो भवतीत्यर्थः । शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितसिद्धावपि कथं विवक्षितसिद्धिरत्राह—द्वितीयस्येति । आकाशादिनिष्ठात्यन्ताभावप्रतियोगित्वेन किं न स्यादत्राह—गगनादीनामिति । स्तम्भादिनिष्ठात्यन्ताभावप्रतियोगित्वेन तथात्वं स्यादत्राह—शब्देति । शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितस्य तद्वत्त्वं व्याहतमित्यर्थः । परिशेषसिद्धमाह—तेनेति ।

(भुवन०)—अयाचं शब्देतरानित्यनिष्ठेतिपदं मुक्त्वा व्यावृत्तिं करोति—शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वेत्यादि । इत्युक्ते अप्रसिद्धविशेषणत्वमाह—अप्रसिद्धविशेषणत्वमिति । अस्मिन्विशेषणद्वये विचार्यमाणे एवंविधधर्माणां सपक्षे अनुपपद्यमानत्वमित्यर्थः । कथमप्रसिद्धविशेषणत्वमित्याह—नित्यमात्रनिष्ठधर्माणामित्यादि । नित्यत्वाकाशत्वादयो धर्मा नित्यमात्रनिष्ठास्तेषामित्यर्थः । एवं शब्दमात्रनिष्ठानामिति । शब्दमात्रनिष्ठाः शब्दत्वश्रावणत्वादयो धर्मास्तेषाम् । शब्दनित्यमात्रनिष्ठानां चेति । शब्दनित्यमात्रनिष्ठा धर्माः शब्देतरानित्यान्यत्वादयः । तेषामपि च शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वेन तद्रहितत्वानुपपत्तेरिति पूर्वेण संबन्धः । तर्ह्येतद्घटव्यतिरिक्तशब्देतरानित्येषु दृष्टान्तीक्रियमाणेषु साध्यप्रसिद्धिः कथं भविष्यतीत्याशङ्क्याह—एतद्घटव्यतिरिक्तेत्यादि । एतद्घटः पक्षीकृतो घटः, शब्देतरेति पदेन वर्जितत्वान्मूलानुमानपक्षश्च शब्दः, तौ मुक्त्वा अपरे ये भावा अनित्याः पटादयस्ते सर्वेऽपि पक्षतुल्याः । यथा पक्षः सन्दिग्धसाध्यः, तथा तेऽपि सन्दिग्धसाध्या इत्यर्थः । इति न तन्मात्रनिष्ठेष्विति । एतद्घटशब्दव्यतिरिक्तानित्यमात्रेषु पूर्वोक्तविशेषणोपपन्नानां धर्माणामसंभवेन न साध्यप्रसिद्धिरन्वेषणीया । अतोऽप्रसिद्धविशेषणत्वव्यवच्छेदाय शब्देतरानित्यनिष्ठपदोपादानम् । यद्यपि शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितेति विशेषणेन केवलेन आकाशत्वादयो धर्मा नोपपद्यन्ते, तथापि शब्देतरानित्यनिष्ठपदे प्रक्षिप्ते एतद्विशेषणद्वययोगे उपपद्यन्त एव । तदेव चाह—यद्यपि नित्यमात्रनिष्ठा धर्मा इत्यादि । एवं च नित्यमात्रनिष्ठाकाशत्वादिना शब्दमात्रनिष्ठशब्दत्वादिना च साध्यप्रसिद्धौ सिद्धायामाकाशादयः शब्दश्चात्र दृष्टान्तीकार्याः । एवं च मूलानुमानपक्षं शब्दमेव पक्षीकृत्य प्रवृत्ता महाविद्याः परित्यज्य अन्यासु सर्वास्वपि शब्दोऽपि यथायोगं दृष्टान्तीकार्यः इति व्यञ्जयति—एवं शब्दत्वादिष्वपीति । एवं शब्दे दृष्टान्तीक्रियमाणे शब्दत्वादिना धर्मेण साध्यप्रसिद्धिर्द्रष्टव्येति भावार्थः । अनित्यनिष्ठशब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमित्युक्ते च वादिमतेन शब्दे अप्रसिद्धविशेषणत्वं स्यात् । वादिमतेन शब्दमात्रनिष्ठानामनित्यनिष्ठत्वेन शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वेन च तद्रहितत्वासिद्धेः । तदर्थं शब्देतरेति पदं ज्ञेयम् । तथा च शब्दमात्रनिष्ठधर्मस्य शब्देतरानित्यनिष्ठत्वे सति यच्छब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं तद्रहितत्वमेवेति तेन साध्यानुगमः शब्दे द्रष्टव्य इति । घटस्यैवंभूतधर्माधिकरणत्वेऽपि कथं शब्दानित्यत्वमित्यत्राह—शब्देतरानित्यनिष्ठेत्यादि । आद्यः पक्षे व्याहत इति । आद्यः शब्देतरानित्यनिष्ठत्वरहितो धर्मः पक्षे घटे यः शब्देतरत्वं नित्येषु न वर्तते सोऽनित्ये घटे कथं वर्तेत इति व्याघातेन बाधितः । सपक्षे चासौ प्रयोजकः । यतः स धर्मः आकाशत्वशब्दत्वादिभिः शब्देतरानित्यनिष्ठत्वरहितत्वेन शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितोऽस्ति । तथा अनित्यत्वाभावादिनिष्ठात्यन्ताभावप्रतियोगी चेति । द्वितीयस्य तु शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितत्वरूपधर्मस्य अनित्यनिष्ठात्यन्ताभावप्रतियोगित्वसमानाधिकरणानित्यनिष्ठत्वं नैव

१ 'रूपस्य धर्मं' इति च पुस्तकपाठः ।

स्यात्, यथानित्यः शब्दः स्यादिति । आकाशादिनिष्ठात्यन्ताभावप्रतियोगित्वेन द्वितीयस्यानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं किं न स्यादित्याह—गगनादीनां नित्यत्वादिति । गगनादयो हि नित्यत्वेनोभयोरपि वादिप्रतिवादिनोः संमताः । अतस्तन्निष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्वितीयधर्मस्यानित्यनिष्ठात्यन्ताभावप्रतियोगित्वं न स्यादित्यर्थः । तर्हि स्तम्भादिनिष्ठात्यन्ताभावप्रतियोगित्वेन अनित्यनिष्ठात्यन्ताभावप्रतियोगित्वं भविष्यतीत्याशङ्क्य ब्रूते—शब्देतरानित्यमात्रवृत्तेश्चेत्यादि । शब्दादितरे ये अनित्याः पदार्थास्तन्मात्रवृत्तेर्घटत्वादेर्धर्मस्य । शब्देतरानित्येति । शब्देतरानित्यनिष्ठश्चासौ अत्यन्ताभावश्च, तस्य यत्प्रतियोगित्वं तत्त्वानुपपत्तेः शब्देतरानित्यनिष्ठात्यन्ताभावप्रतियोगित्वरहितस्य तद्वत्त्वं व्याहतमित्यर्थः । परिशेषाच्छब्दानित्यत्वसिद्धिमभिधत्ते—तेनेत्यादि । तेन कारणेन द्वितीयधर्मस्य शब्दानित्यत्वं विना अनित्यनिष्ठात्यन्ताभावप्रतियोगित्वान्यथानुपपत्तेः शब्दस्यानित्यत्वमङ्गीकार्यमिति शब्दानित्यत्वसिद्धिरित्यर्थः ॥ २१ ॥

२२ अयं घटः एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणं मेयत्वादिति ॥ एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगिषु एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वं धर्मः । तद्रहितश्च एतद्घटमात्रनिष्ठात्यन्ताभावप्रतियोगी वा एतच्छब्दमात्रनिष्ठात्यन्ताभावप्रतियोगी वा । आद्यः पक्षे व्याहतः । द्वितीयस्य तु अनित्यनिष्ठात्यन्ताभावप्रतियोगित्वमेतच्छब्दानित्यत्वमनधिगम्य दुरधिगममित्येतच्छब्दानित्यत्वसिद्धिः ॥ २२ ॥

२२ (आनं०)—अयमिति । एतद्घटश्चैतच्छब्दश्चैतद्घटैतच्छब्दौ, ताभ्यां व्यतिरिक्तनिष्ठोऽत्यन्ताभावः, तस्य प्रतियोगित्वरहितः, स चायमनित्यनिष्ठात्यन्ताभावप्रतियोगी, तस्याधिकरणमित्यर्थः । मेयत्वादिव्यावृत्त्यर्थमनित्यनिष्ठात्यन्ताभावप्रतियोगीत्युक्तम् । स्तम्भाद्यनित्यनिष्ठात्यन्ताभावप्रतियोगिघटत्वव्यावृत्त्यर्थमेतद्घटव्यतिरिक्तैतन्निष्ठात्यन्ताभावप्रतियोगित्वरहितग्रहणम् । एतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणत्वमेतच्छब्दनित्यत्वसिद्धेः प्रागप्रसिद्धमित्यत उक्तम्—एतद्घटेति । घटव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितः एतद्घटादन्यनिष्ठः एतदनित्यघटनिष्ठात्यन्ताभावप्रतियोगी च, तदधिकरणत्वं घटादन्यत्र सर्वत्रास्तीति व्याप्त्यनुगमः । एतस्मिन्घटे एतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितो नित्यनिष्ठात्यन्ताभावप्रतियोगी सिध्यन्ननित्यत्वं शब्दस्य साधयेदित्याशयः ॥ २२ ॥

२२ (भुवन०)—अयं घटः एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोग्यधिकरणमिति । एतद्घटश्च एतच्छब्दश्च एतद्घटैतच्छब्दौ । ताभ्यां व्यतिरिक्तमेतद्द्वयरहितं सर्वं विश्वम् । तन्निष्ठश्चासौ अत्यन्ताभावश्च, तस्य प्रतियोगी एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगी । तद्भावस्तत्त्वं । तेन रहितो वियुतः अनित्यनिष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगी । एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितश्चासौ अनित्यनिष्ठात्यन्ताभाव-

प्रतियोगी च घटत्वरूपो यो धर्मस्तस्याधिकरणमाधारो घट इत्यक्षरार्थः । भावार्थस्त्वयम् । एतद्घटैत-च्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगिनौ हि द्वावेव धर्मौ स्याताम् । एतद्घटमात्रनिष्ठो घटत्वा-दिर्वा एतच्छब्दमात्रनिष्ठः शब्दत्वादिर्वा । एतद्घटैतच्छब्दद्वयादन्येषां सर्वपदार्थानां व्यतिरिक्तपदेन सङ्गृहीतत्वात् । तत्र साध्यधर्मपक्षे एतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगी शब्दत्वादि-रेक एवैतच्छब्दमात्रनिष्ठो विवक्ष्यते न त्वेतद्घटमात्रनिष्ठो घटत्वादिः । एतद्घटैतच्छब्दव्यतिरिक्तनि-ष्ठात्यन्ताभावप्रतियोगित्वेन रहितस्तु एतद्घटनिष्ठो घटत्वादिरेव । तत्प्रतियोगित्वरहिता यद्यपि स्तम्भत्वाकाशत्वादयोऽपि भवन्ति, तथापि ते पक्षिते घटे विरोधेन साधयितुं न शक्यन्ते । तस्मा-द्घटत्वादिरेव तत्र साध्यः । स चानित्यनिष्ठात्यन्ताभावप्रतियोगी सन्नेव स्यात्, यदि शब्दोऽनित्यः स्यात् । एतद्घटैतच्छब्दद्वयान्यसर्वपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वस्य साध्यविशेषणेन निषिद्धत्वात् । अवशिष्टस्य घटस्य शब्दस्यैव च सद्भावात्तत्र घटत्वं घटस्यानित्यनिष्ठात्यन्ताभावप्रतियोगीति स्याद्-तम् । तस्माच्छब्दरूपो यः अनित्यस्तन्निष्ठो यः अत्यन्ताभावस्तत्प्रतियोगि घटत्वं, तदाश्रयो घटः । तथा च शब्दानित्यत्वसिद्धिरिति । दृष्टान्तधर्मपक्षे त्वेतद्घटैतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगि घटत्वम् । तत्त्वरहितास्तु शब्दत्वाकाशत्वादयः । ते चैतद्घटरूपो योऽनित्यस्तन्निष्ठात्यन्ताभावप्रति-योगिन एव । तेषामधिकरणं दृष्टान्तीभूताः शब्दाकाशादय इत्यर्थः । [illegible] नित्यनि-ष्ठात्यन्ताभावप्रतियोगीत्युपात्तम् । स्तम्भादिनित्यनिष्ठात्यन्ताभावप्रतियोगित्वस्य [illegible]-व्यावृत्त्यर्थमेतच्छब्दव्यतिरिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितमप्युक्तम् । [illegible] घटः [illegible]-रिक्तनिष्ठात्यन्ताभावप्रतियोगित्वरहितानित्यनिष्ठात्यन्ताभावप्रतियोगिधर्मा [illegible] मानेऽप्रसिद्धविशेषणत्वम् । एवंविधस्य धर्मस्याप्रसिद्धस्य शब्दानित्यत्वसिद्धेः प्राक् दृष्टान्तेऽनुप-पन्नत्वादुक्तमेतद्घटेति । इति व्यावृत्तिचिन्ता ॥ अथैतदनुमानस्यार्थं व्याचष्टे—एतद्घटैतच्छ-ब्देत्यादि । शब्दानित्यत्वसिद्धिप्रदर्शनाय द्वेधा विकल्पयति—[illegible] प्रतियोगी चेत्यादि । पक्षीकृतघटमात्रनिष्ठोऽसौ [illegible], तस्य प्रतियोगी । [illegible] निष्ठान्धर्मान्विना [illegible] शब्दः । एतच्छब्दमात्रेत्यादि । [illegible] प्रतियोगी । एतच्छब्दमात्रनिष्ठान् शब्दत्वादिधर्मान् विना [illegible] धर्मोऽपि शब्दः । [illegible] पक्षे [illegible] दूषे—[illegible] इत्यादि । [illegible] शक्यते । घटस्य [illegible] । [illegible]—द्वितीयस्येत्यादि । द्वितीयस्य [illegible] अनित्यनिष्ठोऽसौ [illegible] तस्य प्रतियोगित्वे [illegible] एतच्छब्दानित्यत्वमनपेक्ष्येत्यादि । [illegible] प्रतियोगित्वं न स्यात् । [illegible] निषिद्धत्वात् । [illegible] [illegible]

महाविद्याप्रवर्तककारिकास्तु निपुणैर्ग्रन्थान्तरतो ज्ञातव्याः । एवमग्रेऽपि यत्र नोक्तास्तत्र स्वयमेवाभ्यूह्याः । इति सपक्षं पक्षीकृत्य प्रयुक्ता द्वाविंशतिर्महाविद्या दर्शिताः ॥ २२ ॥

अथ विपक्षं पक्षीकृत्य प्रवर्तमाना महाविद्याभेदाः । तद्यथा—शब्दोऽनित्यः इत्यत्र गगनादिर्विपक्ष इति स्थिते,

(आनं०)—विपक्ष इति स्थिते । गगनं पक्षीकृत्य प्रयुज्यत इति शेषः ।

(भुवन०)—अथ विपक्षं पक्षीकृत्य प्रवृत्ता महाविद्या दर्शयति—अथेत्यादि । महाविद्याभेदा दर्श्यन्ते इति शेषः । तद्यथेति तदुपन्यासार्थः । शब्दोऽनित्य इत्यत्रेति । शब्दोऽनित्यःकृतकत्वात् घटवत्, यन्नानित्यं न तत्कृतकं, यथा गगनम् इत्यत्र मूलानुमाने गगनादिर्विपक्षः इति स्थिते, गगनं पक्षीकृत्य प्रयुज्यते इत्यध्याहारः ।

१ गगनं एतच्छब्देतरानित्यनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ अत्र वक्ष्यमाणासु च घटो दृष्टान्तः । अनित्यनिष्ठाधिकरणमित्युक्ते मेयत्वादिभिरनित्यनिष्ठैरेतच्छब्दनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता स्यात्, तन्निवृत्त्यर्थमेतच्छब्देतरानित्यनित्यवृत्तित्वरहितग्रहणम् । एतच्छब्देतरानित्यनित्यवृत्तित्वरहिताधिकरणमित्युक्ते नित्यत्वतदवान्तरधर्मैर्गगननिष्ठैरेतच्छब्देऽप्युपपद्यमानैरर्थान्तरता स्यात् । तन्निवृत्त्यर्थमनित्यनिष्ठग्रहणम् । नित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्युक्ते व्याघातः । न हि नित्यनिष्ठत्वरहितो नित्ये गगने च वर्तते इति संभवति । तन्निवृत्त्यर्थमेतच्छब्देतरानित्यग्रहणम् । यद्यपि गगने नित्यवृत्तित्वरहितो धर्मो व्याहतः, तथापि एतच्छब्देतरानित्यनित्ये च ये वर्तन्ते तेषु यदेतच्छब्देतरानित्यनित्यवृत्तित्वं धर्मः, तद्रहितो धर्मो गगनेऽव्याहतः । एतच्छब्देतरनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्युक्तेऽपि व्याघातः । यस्य कस्यचिदपि गगनधर्मस्य एतच्छब्देतरनित्यगगननिष्ठत्वेन तद्रहितत्वानुपपत्तेः । तन्निवृत्त्यर्थमनित्यग्रहणम् । एतच्छब्देतरनित्यनिष्ठत्वरहितधर्मस्य गगने व्याहतत्वेऽपि एतच्छब्देतरानित्यनिष्ठत्वरहितधर्मस्य अव्याहतत्वात् । एतच्छब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठाधिकरणमित्युक्ते चाप्रसिद्धविशेषणत्वम् । न हि एतच्छब्दानित्यत्वसिद्धेः पूर्वं एतच्छब्देतरानित्यनिष्ठत्वरहितस्य अनित्यनिष्ठत्वं शक्यमधिगन्तुम् । तन्निवृत्त्यर्थं नित्यग्रहणम् ।

१ (आनं०) एतच्छब्देतरानित्ये नित्ये च ये वर्तन्ते तेष्वेतच्छब्देतरानित्यनित्यवृत्तित्वं धर्मः । तद्रहितश्चासावनित्यनिष्ठश्च तस्याधिकरणमित्यर्थः । अधिकरणमित्युक्ते शब्दाधिकरणत्वं सिद्धं चार-

---

१ 'वान्तरगंग' इति ग पुस्तकपाठः । २ 'गगने वर्तते' इति ज पुस्तकपाठः । ३ 'शक्याधिगमम् । तं' इति ज पुस्तकपाठः ।

यति—अनित्यनिष्ठेति । अनित्यनिष्ठाधिकरणमित्युक्ते मेयत्वादिना अर्थान्तरत्वं वारयितुमाह—नित्यवृत्तित्वरहितेति । नित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्युक्ते व्याघातोऽत उक्तम्—अनित्यनित्यवृत्तित्वरहितेति । अनित्यनित्यवृत्तित्वरहिताधिकरणमित्युक्तौ नित्यत्वेनार्थान्तरत्वमत आह—अनित्यनिष्ठेति । अनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्युक्ते व्याघातः स्यादित्युक्तं अनित्यनित्यवृत्तित्वरहितेति । अनित्यनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्युक्ते व्याघातः, यस्य कस्यचिदपि गगनधर्मस्यानित्यनित्यवृत्तित्वरहितस्य नित्यमात्रवृत्तेरनित्यनिष्ठत्वायोगादत उक्तम्—शब्देतरेति । न चैवं व्याघातः । शब्दानित्यत्वोपगमेन गगनशब्दमात्रवृत्तेर्गगनशब्दसंबन्धादेरुपगमे प्रतिज्ञातार्थ[1]पर्यवसानात् । शब्देतरानित्यनित्यवृत्तित्वरहितानित्यनिष्ठः तु अनित्येषु शब्देतरानित्यत्वमस्ति । नित्यानां पक्षतुल्यत्वेन सपक्षत्वाभाव इति व्याप्त्यनुगमो द्रष्टव्यः । विशेषणकृत्यमाह—अनित्यनिष्ठेति । नित्ये गगनेऽनित्यवृत्तित्वधर्मस्तथापि व्याहत एवेत्यत आह—यद्यपीति । गगनेऽव्याहत इति । अव्याहत इति च्छेदः ॥ १ ॥

१ (भुवन०)—तत्र प्रथमं

सपक्षसाध्यवद्वृत्तिविपक्षान्वयि यत्र तत् ।
साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते ॥

इति कारिकामाश्रित्य या प्रवृत्ता तामाह—गगनमेतच्छब्देतरानित्यनित्येत्यादि । व्याख्या । गगनं पक्षः । एतच्छब्दादितरे येऽनित्या एतच्छब्देतरानित्याः । ते च नित्याश्च एतच्छब्देतरानित्यनित्याः । तत्र वृत्तिर्येषां ते एतच्छब्देतरानित्यनित्यवृत्तयः, तेषां भावस्तत्त्वं । तेन रहितः । अनित्ये निष्ठा यस्य सोऽनित्यनिष्ठः । शब्देतरानित्यनित्यवृत्तित्वरहितश्चासौ अनित्यनिष्ठश्च, तस्याश्रयो गगनमित्यर्थः । एवंविधश्चात्र धर्मो गगनशब्दमात्रवृत्तिर्गगनशब्दसंबन्धादिर्वा विश्वप्रतियोगिकः शब्दाकाशान्योन्याभावादिर्वा । स च नित्ये गगन एव वर्तनाच्छब्देतरानित्ये च कस्मिंश्चिदप्यवर्तनाच्छब्देतरानित्यनित्यरूपयुगलवृत्तित्वरहित एव । स च धर्मोऽनित्यवृत्तिस्तदैव स्यात्, यदि शब्दोऽनित्यः स्यात् । तस्य च धर्मस्य गगने वर्तनेऽपि गगनस्य नित्यत्वेनोभयवादिसंमतत्वादनित्यवृत्तित्वं न स्यात् । तस्मादुक्ते पाक्षिकान्यायेनोभयोर्विवादापन्नत्वाच्छब्दस्यैवानित्यत्वमङ्गीकार्यम् । एवंविधश्चात्र धर्मो मेयत्वतत्त्ववाच्यत्वादिर्न घटते । तस्य नित्यानित्यरूपयुगलवृत्तित्वात् । नित्यत्वादिश्चानित्यवृत्तीति पदेन निरस्तः । अनित्यमात्रवृत्तिरनित्यत्वादिश्च पक्षिगगने नित्ये न सम्भवति । तस्मात्पूर्वोक्तो गगनशब्दसंबन्धादिरेव साध्यधर्मोऽत्र ज्ञेयः । अत्र च दृष्टान्तीकृतेषु घटादिषु अनित्येषु घटत्वादिः शब्देतरानित्यत्वादिर्वा धर्मो मन्तव्यः । नित्यानां शब्दस्य चात्र पक्षतुल्यत्वेन सपक्षत्वाभावो न दोषायेति । इत्थं च प्रतिपादयति—अत्र वक्ष्यमाणास्तु चेत्यादि । घट इत्युदाहरणं । तेन पटत्वान्मात्रादयश्चान्ये सर्वेऽप्यनित्या ग्राह्याः । अथाद्यं विशेषणं परित्यज्य व्यावृत्तिचिन्तां करोति—अनित्यनिष्ठेत्यादि । तदोक्ते च मेयत्वादिभिर्नित्यत्वरूपार्थान्तरता स्यात् । वक्ष्यमाणहेत्वर्थेनैतच्छब्देतरानित्येत्यादि । तथा

१ 'प्रतिज्ञातार्थपर' इति स्यात् (?) ।

च मेयत्वादीनां शब्देतरानित्यनित्यवृत्तित्वेन रहितत्वानुपपत्तेर्नार्थान्तरता । तद्वान्तरैरिति । नित्यत्वादवान्तरैर्गगनैकत्वादिभिरित्यर्थः । तथाप्येतच्छब्देतरेत्यादि । यद्यपि नित्यवृत्तित्वरहिता-नित्यनिष्ठाधिकरणमित्युक्ते व्याघातः स्यात्, तथापि सम्पूर्णप्रथमविशेषणविचारणायां युगलावृत्तित्वेनैवंविधो धर्मो गगने उपपद्यते एव । यस्य कस्यचिद्गगनधर्मस्येति । गगनगतैकत्वनित्यत्वव्यापकत्वादेर्गगनधर्मस्य नित्यनिष्ठत्वेन तद्रहितत्वानुपपत्तेर्व्याघात इत्यर्थः । अप्रसिद्धविशेषणत्वं भावयति-नहीत्यादि । अत्र दृष्टान्ते घटादौ एवंविधस्य धर्मस्याप्रसिद्धता । यद्यपि शब्दस्यानित्यत्वे एवंविधो धर्मः शब्दानित्यत्वादिः शब्दादितरे ये भावा अनित्यास्तन्निष्ठत्वरहितो विद्यते, अनित्यशब्दवृत्तित्वाधिकरणं च, तथापि शब्दानित्यत्वसिद्धेः पूर्वमन्यत्र घटपटादावेवंविधधर्मो नोपपद्यते । तेनाप्रसिद्धविशेषणत्वमित्यर्थः ।

एतच्छब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठाप्रसिद्धत्वेऽपि, एतच्छब्देतरानित्यनित्यनिष्ठत्वरहितानित्यनिष्ठस्य एतच्छब्देतरानित्यत्वादेः[2] सुप्रसिद्धत्वात् । एतच्छब्देतरानित्यनित्यवृत्तित्वरहितो धर्मः १ एतच्छब्देतरानित्यमात्रवृत्तिर्वा, २ नित्यमात्रवृत्तिर्वा, ३ एतच्छब्दैतच्छब्देतरानित्यमात्रवृत्तिर्वा, ४ एतच्छब्दमात्रवृत्तिर्वा, ५ एतच्छब्दगगनव्यतिरिक्तनित्यमात्रवृत्तिर्वा, ६ एतच्छब्दगगनमात्रवृत्तिर्वा । प्रथमतृतीयचतुर्थपञ्चमा गगने व्याहताः । द्वितीयस्तु अनित्यनिष्ठग्रहणेन दूरं निरस्तः । षष्ठस्य तु अनित्यनिष्ठत्वमेतच्छब्दानित्यत्वमन्तर्भाव्यैव सिध्यति । गगननित्यत्वस्योभयवादिसिद्धत्वादित्येतच्छब्दानित्यत्वसिद्धिः ॥ १ ॥

(आनं०)—शब्दानित्यत्वमन्तरेण व्यापकापर्यवसानं दर्शयितुमाह—**एतच्छब्देतरानित्यनित्यनिष्ठ[3]त्वरहितो धर्म इति ।**

(भुवन०)—अथ पक्षशब्दानित्यत्वमन्तरेण साध्यापर्यवसानं दर्शयितुं आद्यविशेषणविचारणोपपन्नं धर्मं षोढा विकल्पयति—**एतच्छब्देतरानित्यनित्यवृत्तित्वरहितो धर्म इत्यादि । १ एतच्छब्देतरानित्यमात्रवृत्तिर्वेति** । एवंविधो घटत्वपटत्वादिः । **२ नित्यमात्रवृत्तिर्वेति** । नित्यत्वादिः । **३ एतच्छब्दैतच्छब्देतरानित्यमात्रवृत्तिर्वेति** । एतस्मिन् शब्दे एतच्छब्देतरानित्यमात्रे च घटादौ वृत्तिर्यस्य स तथा । एवंविधश्च विश्वप्रतियोगिको घटैतच्छब्दान्योन्याभावादिः । **४ एतच्छब्दमात्रवृत्तिर्वेति** । एतच्छब्दत्वादिः । **५ एतच्छब्दगगनव्यतिरिक्तनित्यमात्रवृत्तिर्वेति** । एतस्मिन् शब्दे गगनव्यतिरिक्ते नित्यमात्रे च वृत्तिर्यस्य स तथा । एवंविधश्च धर्मो विश्वप्रतियोगिक आत्मैतच्छब्दान्योन्याभावादिः । **६ एतच्छब्दगगनमात्रवृत्तिर्वेति** । एतस्मिन् शब्दे गगनमात्रे च वृत्तिर्वर्तनं यस्यासौ तथा । एवंविधश्च धर्मो *गगनशब्दसंबन्धादिः* ॥ *प्रथमतृतीयचतुर्थपञ्चमानां गगने* विरुद्धत्वेन व्याघातमाचष्टे—**प्रथमतृतीयचतुर्थेत्यादि । द्वितीयस्त्विति । द्वितीयो** नित्यत्वादिर्यद्यपि

---

१ 'गगनैकत्वनि' इति छ द पुस्तकपाठः । २ 'देः पूर्वं छप्र' इति ज पुस्तकपाठः । ३ महाविद्याविडम्बनग्रन्थे तथा भुवनसुन्दरसूरिकृतटीकायां 'नित्यवृत्तित्वरहि' इति पाठो दृश्यते ।

गगने वर्तमानो नित्यमात्रवृत्तिर्भवति, तथाप्यनित्यनिष्ठत्वरूपद्वितीयविशेषणविशिष्टत्वं तस्य न स्यादिति स दूरं निरस्तः । पक्षस्याभ्युपगमेन परिशेषाच्छब्दानित्यत्वसिद्धिमाह—पक्षस्य तु अनित्यनिष्ठत्वं गगनस्य नित्यत्वाच्छब्दानित्यत्वं विना नोपपद्यते इति अनित्यः शब्दः स्वीकर्तव्यः ॥ १ ॥

२ गगनं शब्दत्वरहितानित्यनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ प्राचीना महाविद्या पक्षीकृतशब्दविशेषान्योन्याभावमुपादाय प्रवृत्ता पक्षीकृतशब्दविशेषेऽनित्यत्वं गमयति । इयं तु पक्षतत्तुल्यसाधारणशब्दत्वात्यन्ताभावमुपादाय प्रवृत्ता पक्षतत्तुल्यान्यतमस्मिन् शब्दे अनित्यत्वं गमयति इत्येतयोर्महान् भेदः ॥ २ ॥

२ (आनं०)—गगनमिति । शब्दत्वरहिते शब्दत्वात्यन्ताभाववत्यनित्ये नित्ये च ये वर्तन्ते तेषु शब्दत्वरहितानित्यनित्यवृत्तित्वं धर्मः । तद्रहितश्चासावनित्यनिष्ठश्च तस्याधिकरणमित्यर्थः । विशेषणकृत्यं साध्यपर्यवसानं च पूर्ववत् । प्राचीनमहाविद्यायामप्ययमेवार्थः साधितः इत्यत आह—प्राचीनेति । एतच्छब्देतरेतिविशेषणात्पक्षीकृतशब्दविशेषणान्योन्याभावमुपादायेत्यर्थः । इयमपि तथेति नेत्याह—इयं त्विति । पक्षः एतच्छब्दः । तत्तुल्याः अन्ये शब्दास्तेषां साधारणस्य शब्दत्वस्यात्यन्ताभावमित्यर्थः ॥ २ ॥

२ (भुवन०)—पूर्वमेव महाविद्यामेतच्छब्देतरेतिपदस्थाने शब्दत्वरहितेतिपदग्रहणेन भङ्ग्यन्तरेणोदाहरति—गगनं शब्दत्वरहितानित्यनित्येत्यादि । शब्दत्वेन रहिताः शब्दत्वात्यन्ताभाववन्तः । ते च तेऽनित्याश्च शब्दत्वरहितानित्याः । एतावता ये शब्दत्वसहितास्तेषां सर्वेषामप्यनित्येभ्यो निष्कर्षः कृतः । शेषं पूर्ववत् । प्राचीनमहाविद्यातोऽस्या भेदमावेदयति—प्राचीनेत्यादि । प्राचीना महाविद्या एतच्छब्देतरेति भणनाद्विवक्षितस्यैव कस्यचिच्छब्दस्य अन्योन्याभावमुपादाय प्रवृत्ता सती शब्दविशेषे एवानित्यत्वं साधयति । इयं तु शब्दत्वरहितेतिभणनात्पक्षः एतच्छब्दः, तत्तुल्या अन्ये शब्दास्तेषां साधारणस्य शब्दत्वस्यात्यन्ताभावमादाय प्रवृत्ता पक्षतत्तुल्यान्यतमस्मिन् शब्देऽनित्यत्वसाधिका । सर्वशब्दानित्यत्वगमिकेयमित्यर्थः । इत्यनयोर्भेदः ॥ २ ॥

३ गगनं एतच्छब्देतरानित्यगगनवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ पूर्वमहाविद्या नित्यमात्रमुपादायप्रवृत्ता, इयं तु पक्षीकृतनित्यविशेषमुपादायेति विशेषः । शेषं पूर्ववत् ॥ ३ ॥

३ (आनं०)—एतच्छब्देतरेति । एतच्छब्देतरानित्ये गगने च ये वर्तन्ते, तेष्वेतच्छब्देतरानित्यगगनवृत्तित्वं धर्मः । तद्रहितश्चासावनित्यनिष्ठश्च, तस्याश्रय इत्यर्थः । नित्यत्वकक्षान्तरवर्मव्यावृत्त्यर्थं अनित्यनिष्ठेत्युक्तम् । मेयत्वादिव्यावृत्त्यर्थं—गगनवृत्तित्वरहितेति । व्याघातपरिहारार्थं अनित्यगगनवृत्तित्वरहितेति । अनित्यगगनवृत्तित्वरहितो नित्यनिष्ठश्चानित्यमात्रवृत्तिरिति स्थिते गगने न संभवतीत्यत आह—शब्देतरेति । पक्षतुल्ये क्वापि साध्यपर्यवसानं वारयति—एतदिति । एतच्छब्देतरवृत्तित्वरहिताधिकरणमित्युक्ते व्याघातः । एतच्छब्देतरानित्यवृत्तित्वरहिताधिकरण-

मित्यपि नित्यत्वेनार्थान्तरमित्यादि स्वयमूह्यम् । एतच्छब्देतरानित्यगगनवृत्तित्वरहितो नित्यनिष्ठश्च धर्मो गगनान्यत्वं पक्षातिरिक्ते सर्वत्रास्तीति व्याप्त्यनुगमः । गगने त्वेतच्छब्देतरानित्यगगनवृत्तित्वरहितः एतच्छब्दगगनमात्रवृत्तिरनित्यनिष्ठः सिध्यन्ननित्यत्वमेतच्छब्दस्य गमयतीति भावः । प्रथममहाविद्यातोऽस्या भेदमाह—पूर्वेति ।

३ (भुवन०)—अथ

" अपक्षसाध्यवद्वृत्तिविपक्षे पक्षिते न यत् ।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम् ॥ "

इति कारिकामाश्रित्य या प्रवर्तते[1] तां ब्रूते—**गगनमेतच्छब्देतरानित्यगगनवृत्तित्वेत्यादि** । एतच्छब्देतरानित्याश्च गगनं च, तत्र वृत्तिर्येषां, तेषां भावस्तत्त्वं धर्मः, तद्रहितश्चासावनित्यनिष्ठश्च तस्याश्रयो गगनमित्यर्थः । नित्यत्वतद्व्यान्तरधर्मव्यावृत्त्यर्थमनित्यनिष्ठेत्युक्तम् । मेयत्वादिव्यावृत्त्यर्थमेतच्छब्देतरानित्यगगनवृत्तित्वरहितेत्युपात्तम् । गगनवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्युक्ते व्याघातः, तन्निवृत्त्यर्थमनित्येति । अनित्यगगनवृत्तित्वरहितोऽनित्यनिष्ठश्चानित्यमात्रवृत्तिरनित्यत्वादिर्गगने नित्ये न सम्भवतीत्युक्तं शब्देतरेति । पक्षतुल्ये यत्र क्वापि शब्दे साध्यपर्यवसानवारणाय एतदिति । इति व्यावृत्तिचिन्ता ॥ एतच्छब्देतरानित्यगगनवृत्तित्वरहितोऽनित्यनिष्ठश्च धर्मो गगनान्यत्वं पक्षातिरिक्ते सर्वत्रास्तीति व्याप्त्यनुगमः । गगने तु एतच्छब्देतरानित्यगगनवृत्तित्वरहितः एतच्छब्दगगनमात्रवृत्तिरेतच्छब्दगगनान्यतरत्वादिरनित्यनिष्ठः सिध्यन् अनित्यत्वमेतच्छब्दस्य साधयतीत्याशयः । प्रथममहाविद्यातोऽस्या भेदं प्रदर्शयति—**पूर्वमहाविद्या नित्यमात्रमित्यादि** । पूर्वमहाविद्यायां नित्येतिभणनात्सर्वे नित्यपदार्थाः स्वीकृताः । अत्र तु नित्यपदस्थाने पक्षीकृतं गगनमेव न्यस्तमित्यनयोर्विशेषः ॥ ३ ॥

४ गगनं शब्दत्वरहितानित्यगगनवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ॥ एतस्मिंश्च महाविद्याचतुष्टये गगनेतरनित्यानां प्रकृतशब्दादेश्च पक्षतुल्यत्वम् ॥ ४ ॥

४ (आनं०)—चतुर्थमहाविद्या द्वितीयमहाविद्यावद्व्याख्येया । अनित्यनित्यवृत्तित्वरहितानित्यनिष्ठः पक्षतत्तुल्यशब्देषु गगनातिरिक्तनित्यपदार्थे च नास्तीति व्याप्तिभङ्ग इत्यत आह—**एतस्मिन्निति** । तृतीयचतुर्थमहाविद्ययोर्गगनान्यत्वं गगनातिरिक्ते सर्वत्रास्तीति व्याप्तिसिद्धेरेतस्मिन्प्रकरणे[2]महाविद्याचतुष्टये प्रथमद्वितीयमहाविद्याद्वये वक्ष्यमाणमहाविद्याद्वये चेत्यर्थः ।

४ (भुवन०)—**गगनं शब्दत्वरहितानित्यगगनेत्यादि** । शब्दत्वरहिताः शब्दत्वात्यन्ताभाववन्तः । ते च तेऽनित्याश्च शब्दत्वरहितानित्याः । ते च गगनं च, तत्र वृत्तिर्येषां ते तथा । शेषं तृतीयमहाविद्यावद्व्याख्येयम् । एतच्छब्देतरानित्यनित्यवृत्तित्वरहितानित्यनिष्ठादिर्धर्मः शब्देषु गगनातिरिक्तनित्यपदार्थेषु च नास्तीति व्याप्तिभङ्ग इत्यत आह—**एतस्मिंश्चेति** । तृतीयचतुर्थमहाविद्ययोर्गगनान्यत्वं पटादौ शब्दे च सर्वत्रास्तीति व्याप्तिसिद्धेः, प्रथमद्वितीयमहाविद्याद्वये वक्ष्यमाणमहाविद्याद्वये चेत्यर्थः ॥ ४ ॥

---

१ 'प्रवर्तयति' इति द छ पुस्तकपाठः । २ 'प्रकृते' इति स्यात् (?)

५ गगनं एतच्छब्देतरानित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहितानेकनिष्ठाधिकरणं मेयत्वादिति ॥ एतच्छब्देतरानित्यनित्यवृत्तिरहितानेकनिष्ठाधिकरणमित्युक्ते नित्यत्वतदवान्तरैरनेकनिष्ठैरर्थान्तरता स्यात् । तन्निवृत्त्यर्थमनेकनित्यनिष्ठत्वरहितग्रहणम् । एतच्छब्देतरानित्यनिष्ठत्वरहितानेकनित्यनिष्ठत्वरहिताधिकरणमित्युक्ते गगनमात्रनिष्ठैरेकत्वादिभिरेतच्छब्दमात्रनित्यत्वेऽप्युपपद्यमानैरर्थान्तरता स्यात् । तन्निवृत्त्यर्थमनेकनिष्ठग्रहणम् । अनेकनित्यवृत्तित्वरहितानेकनिष्ठाधिकरणमित्युक्ते घटाकाशान्यतरत्वादिना अर्थान्तरता स्यात् । तन्निवृत्त्यर्थमेतच्छब्देतरानित्यनित्यवृत्तित्वरहितग्रहणम् ।

५ (आनं०)—गगनमिति । शब्देतरानित्यनित्यवृत्तित्वरहितश्चासावनेकनित्यवृत्तित्वरहितोऽनेकनिष्टश्च । तस्याधिकरणमित्यर्थः । गगनमात्रनिष्ठैकत्वादिव्यावृत्त्यर्थमनेकनिष्टग्रहणम् । नित्यत्वव्यावृत्त्यर्थमनेकनित्यवृत्तित्वरहितग्रहणम् । नित्यवृत्तित्वरहितानेकनिष्टाधिकरणमित्युक्ते व्याघातोऽत उक्तम्—अनेकनित्येति । अनेकनित्यवृत्तित्वरहितानेकनिष्टाधिकरणमित्युक्ते गगनसंयोगयोः संबन्धेनार्थान्तरत्वमत उक्तम्—नित्यवृत्तित्वरहितेति । व्याघातपरिहारार्थमेवैतच्छब्देतरानित्यग्रहणम् । अत्रैतच्छब्दगगनमात्रवृत्तिः सिध्यन्ननेकनित्यवृत्तित्वरहितः एतच्छब्दस्यानित्यत्वं गमयेदिति भावः ।

५ (भुवन०)—“ अपक्षसाध्यवद्वृत्तिविपक्षान्वयवर्जितः ।
नानाविपक्षवृत्त्यन्यभिन्नधर्मोऽस्ति पक्षिते ॥ ”

एतां कारिकामाश्रित्य विपक्षपक्षीकरणेन प्रवृत्तामाह—गगनमेतच्छब्देतरानित्यनित्यवृत्तित्वरहितानेकनित्यवृत्तित्वरहितानेकनिष्ठाधिकरणमिति । अनेके च ते नित्याश्च अनेकनित्याः तद्वृत्तित्वरहितः । एकस्मिन् गगनादौ निष्टा यस्य असावेकनिष्टः । न एकनिष्टोऽनेकनिष्टः । अनेकनित्यवृत्तित्वरहितश्चासावनेकनिष्टश्च स तथा । एतच्छब्देतरानित्यनित्यवृत्तित्वरहितश्चासावनेकनित्यवृत्तित्वरहितानेकनिष्टश्च तस्याधारो गगनमित्यर्थः । एवंविधश्च धर्मः पक्षे विश्वप्रतियोगिकः शब्दाकाशान्योन्याभावादिर्ज्ञेयः । स च गगन एव नित्ये वर्तनादेतच्छब्दादितरस्मिंश्च कस्मिंश्चिदप्यनित्ये अवर्तनात् एतच्छब्देतरानित्यनित्यवृत्तित्वरहितः एव । तथा शब्दाकाशयोर्द्वयोरपि वर्तनादनेकनिष्ठश्चाप्यस्त्येव । स चानेकनित्यवृत्तित्वरहितस्तदैव, यदि शब्दोऽनित्यः स्यादिति पारिशेष्याच्छब्दानित्यत्वसिद्धिरिति । अत्र च पूर्वोक्तविशेषणोपपन्नमेतच्छब्देतरानित्यत्वैतच्छब्देतरकार्यत्वादिकमुपादाय अनित्येषु साध्यप्रसिद्धिर्द्रष्टव्या । गगनेतरनित्यानां शब्दस्य च पक्षतुल्यत्वान्न तेषु साध्याभावः कलङ्कशङ्काकरः । एवमुत्तरमहाविद्यायामपि ज्ञेयम् । नित्यत्वतदवान्तरैरिति । नित्यत्वं च तदवान्तरधर्माश्च व्यापकत्वादयः तैः । मनःपरमाण्वादौ नित्यत्वसद्भावेऽपि व्यापकत्वादीनामभावादेवावान्तरत्वम् । गगनमात्रनिष्ठैरेकत्वादिभिरिति । गगनैकत्वादिभिरित्यर्थः । घटाकाशान्यतरत्वादिनेति । घटाकाशयोरन्यतरत्वं हि घटेऽनित्येऽपि च वर्तत एव, उभयानुगतधर्मत्वात् । यथा चैत्रमैत्रयोरन्यतरः इत्युक्ते चैत्रोऽपि वा लभ्यते मैत्रोऽपि वेति । तेनैकस्मिन्नेव नित्ये वर्तमानत्वेन अनेकनित्यवृत्तित्वरहितेन घटाकाशरूपेऽपि वर्तमानत्वेन चानेकनिष्ठेन नित्यत्वस्यार्थान्तरता । इत्यर्थः ।

च्छब्देतरानित्येत्यादि । तथा च घटाकाशान्यतरत्वादेरनित्ये घटे नित्ये चाकाशे वर्तमानत्वेनैतच्छब्देतरानित्यनित्यवृत्तित्वरहितत्वानुपपत्तेरित्यर्थः ।

एतच्छब्देतरानित्यनित्यवृत्तित्वरहितो धर्मः १ एतच्छब्देतरानित्यमात्रवृत्तिर्वा, २ नित्यमात्रवृत्तिर्वा, ३ एतच्छब्दैतच्छब्देतरानित्यमात्रवृत्तिर्वा, ४ एतच्छब्दमात्रवृत्तिर्वा, ५ एतच्छब्दगगनव्यतिरिक्तनित्यमात्रवृत्तिर्वा, ६ एतच्छब्दगगनमात्रवृत्तिर्वा । प्रथमतृतीयचतुर्थपञ्चमा गगने व्याहताः । द्वितीयोऽप्यनेकनित्यवृत्तिर्वा स्यात्, एकैकनित्यवृत्तिर्वा स्यात् । प्रथमोऽनेकनित्यवृत्तित्वरहितग्रहणेन निरस्तः । द्वितीयोऽनेकनिष्ठग्रहणेन निरस्तः । षष्ठस्तु एतच्छब्दानित्यत्वमन्तर्भाव्य सिध्यति । एतच्छब्दनित्यत्वे गगनैतच्छब्दनिष्ठस्य अनेकनित्यनिष्ठत्वेन तद्रहितत्वानुपपत्तेः ॥ ५ ॥

(आनं०)—एतच्छब्दस्यानित्यत्वमन्तरेण व्यापकापर्यवसानं दर्शयितुं संभावितप्रकारानाह—एतच्छब्देतरानित्यमात्रवृत्तिर्वेति ॥ ५ ॥

१ (आनं०)—शब्दत्वमिति। शब्दत्वव्यतिरिक्तत्वे सत्येतच्छब्दनिष्टरहितश्चासौ शब्दत्वव्यतिरिक्तत्वे सति अनित्यत्वात्यन्ताभावव्यतिरिक्तत्वरहितश्च, ततोऽन्यद्भिन्नमित्यर्थः। शब्दत्वमन्यदित्युक्ते यतः कुतश्चिदन्यत्वेनार्थान्तरमत उक्तम्—अनित्यत्वात्यन्ताभावव्यतिरिक्तत्वरहितेति। तथापि व्याप्तिभङ्गः, अनित्यत्वात्यन्ताभावे एतदभावादत उक्तम्—शब्दत्वव्यतिरिक्तेति। एवमपि न प्रकृतसाध्यसिद्धिः, अनित्यत्वात्यन्ताभावाद्यत्किञ्चिन्निष्टान्यत्वोपपत्तेरत उक्तम्—एतच्छब्दनिष्ठत्वरहितेति। तथापि व्याप्तिभङ्गः, नित्यत्वात्यन्ताभावे कथितरूपसाध्याभावादत उक्तम्—शब्दत्वव्यतिरिक्तैतच्छब्दनिष्ठत्वरहितेति। पक्षान्योन्याभावमादायैव साध्यानुगमः। अनेतन्निष्ठादनित्यत्वात्यन्ताभावादन्यत्वं सिध्यदेतस्मिन्ननित्यत्वं गमयेदिति भावः। व्याचष्टे—ये शब्दत्वेति।

१ (भुवन०)—इदानीं "कौचित्साध्याभावमित्यादि" इत्यत्रादिपदेन व्यञ्जितमहाविद्यान्तरप्रकारप्ररूपणाय प्राह—अथ पक्षनिष्ठं धर्ममित्यादि। पक्षः शब्दः, तन्निष्ठं शब्दत्वादिधर्ममित्यर्थः। महाविद्यामुदाहरति—यथा, शब्दत्वं शब्दत्वव्यतिरिक्तेत्यादि। शब्दत्वव्यतिरिक्ता ये एतच्छब्दनिष्ठाः श्रावणत्वादयः, तत्त्वरहितश्चासौ शब्दत्वव्यतिरिक्तत्वे सत्यनित्यत्वात्यन्ताभावो नित्यत्वं, तद्व्यतिरिक्ता ये घटत्वाकाशत्वादयः तत्त्वरहितश्च। तस्मादन्यद्भिन्नं शब्दत्वमित्यर्थः। शब्दत्वमन्यदित्युक्ते यतः कुतश्चिदन्यत्वेनार्थान्तरत्वम्। अत उक्तम्—अनित्यत्वात्यन्ताभावव्यतिरिक्तत्वरहितेति। तथापि नित्यत्वान्यत्वेनार्थान्तरता व्याप्तिभङ्गश्च, नित्यत्वे नित्यत्वान्यत्वाभावात्। अत उक्तम्—शब्दव्यतिरिक्तेति। एवमपि न प्रकृतसाध्यसिद्धिः, नित्यत्वाद्यत्किञ्चिन्निष्ठादन्यत्वोपपत्तेः। अत उक्तमेतच्छब्दनिष्ठत्वरहितेति। तथापि व्याप्तिभङ्गः, नित्यत्वे एव कथितरूपसाध्याभावात्। अत उक्तं शब्दत्वव्यतिरिक्तैतच्छब्दनिष्ठत्वरहितेति। पक्षान्योन्यभावमुपादाय साध्यानुगमो द्रष्टव्यः। पक्षे त्वेतच्छब्दनिष्ठत्वरहितानित्यत्वान्यत्वं सिद्ध्यत् एतच्छब्देऽनित्यत्वं गमयतीति भावः। अथैनां महाविद्यां व्याचष्टे—ये शब्दत्वव्यतिरिक्ता इत्यादि।

शब्दत्वव्यतिरिक्तैतन्निष्ठत्वरहितश्च शब्दत्वं वा स्यात्, एतच्छब्दनिष्ठत्वरहितो वा। आद्येऽन्यत्वं व्याहतम्। न हि शब्दत्वं शब्दत्वान्यदिति संभवति। तेन पक्षनिष्ठत्वरहितान्यत्वं सिध्यति। स च पक्षनिष्ठत्वरहितः, अनित्यत्वात्यन्ताभावव्यतिरिक्तो वा, अनित्यत्वात्यन्ताभावो वा। आद्यव्यावृत्त्यर्थं शब्दत्वव्यतिरिक्तानित्यत्वात्यन्ताभावव्यतिरिक्तत्वरहितग्रह-

---

१ एतद्वाक्यं भस्मिन्नेव महाविद्याविडम्बनग्रन्थे ९ पृष्टे ३२ पङ्क्तौ द्रष्टव्यम्। २ 'आद्यनिष्ट' इति ग पुस्तकपाठः।

णम् । शब्दत्वव्यतिरिक्तत्वे सति यदनित्यत्वात्यन्ताभावव्यतिरिक्तत्वं तद्रहितश्च शब्दत्वं वा स्यात्, अनित्यत्वात्यन्ताभावो वा । आद्यो[1]ऽन्यत्वं न सिध्यति । न हि शब्दत्वं शब्दत्वादन्यदिति संभवति । तेन शब्दनिष्ठत्वरहितानित्यत्वात्यन्ताभावान्यत्वं पक्षे सिध्यति इत्यनित्यत्वात्यन्ताभावविरहरूपानित्यत्वसिद्धिः शब्दे ॥ १ ॥

(आनं०)—तथापि कथं साध्यपर्यवसानमत्राह—स च पक्षनिष्ठत्वरहित इति । घटत्वव्यतिरिक्तत्वे सति शब्देतरानित्यनिष्ठत्वरहितश्चानित्यनिष्ठश्च, ततोऽन्यदित्यर्थः । घटत्वमन्यदित्युक्ते सुखादेरन्यदिति सिद्धसाधनमत उक्तम्—अनित्यनिष्ठान्यदिति । एवमपि घटत्वादिशब्देनार्थान्तरमत उक्तम्—शब्देतरानित्यनिष्ठत्वरहितेति ।[2]शब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठान्यदित्युक्तेऽप्रसिद्धविशेषणत्वं, शब्दानित्यत्वसिद्धेः प्रागेवं रूपसाध्यासिद्धेरत आह[3] × × ×

(भुवन०)—अथाद्यविशेषणविशिष्टं धर्मद्वयं स्यात् । तदेवाह—शब्दत्वं वा स्यात्, एतच्छब्दनिष्ठत्वरहितो वेति । आद्योऽन्यत्वमिति । शब्दत्वं च यथोक्तविशेषणविशिष्टमप्युपपद्यते, परं तत्पक्षे व्याहतम् । तस्यैव शब्दत्वस्य, तस्मादेव शब्दत्वादन्यत्वासम्भवात् । भिन्नयोरेव द्वयोरन्यत्वसम्भवात् । तेन द्वितीयान्यत्वं सिद्धयति । तथापि कथं प्रकृतसाध्यपर्यवसानमत्राह—स च पक्षनिष्ठत्वरहित इति । मूलानुमानापेक्षया पक्षोऽत्र शब्दो ग्राह्यः । पक्षनिष्ठत्वरहितमपि द्वेधा विकल्पयति—अनित्यत्वात्यन्ताभावेत्यादि । अनित्यत्वात्यन्ताभावो नित्यत्वम् । तद्व्यतिरिक्तो हि धर्मो नित्यत्वं विना घटत्वपटत्वगगनत्वादिकः सर्वोऽपि । द्वितीयविकल्पमाह—अनित्यत्वात्यन्ताभावो वेति । नित्यत्वं वेत्यर्थः । तत्राद्यस्य निरासाय द्वितीयविशेषणसाफल्यमाह—आद्यन्यात्वत्यर्थमित्यादि । तथा च द्वितीयविशेषणेन घटत्वाकाशत्वादिसर्वधर्माणां निषिद्धत्वेन अवशिष्टं धर्मद्वयमेव स्यात् । तदेव चाह—शब्दत्वमिति । शब्दत्वं वा अनित्यत्वात्यन्ताभावो नित्यत्वं वा । आद्यान्यत्वसिद्धौ असंभवं ब्रूते—न हि शब्दत्वमित्यादि । पक्षे द्वितीयान्यत्वसिद्धौ एतच्छब्दानित्यत्वसिद्धिमाह—तेन शब्दनिष्ठत्वेत्यादि । शब्दनिष्ठत्वरहितो योऽनित्यत्वात्यन्ताभावो नित्यत्वं, तस्मादन्यत्वं पक्षे शब्दत्वे सिध्यति । अयमाशयः—यद्यपि पक्षिते शब्दत्वे नित्यत्वान्यत्वे साध्यमाने सिद्धसाधनता स्यात्, तथापि शब्दनिष्ठत्वरहितं यन्नित्यत्वं तस्मादन्यत्वं शब्दत्वस्य तदैव स्यात्, यद्यनित्यः शब्दः स्यादित्येतच्छब्दानित्यत्वसिद्धिः । अत्र च शब्दत्वान्यत्वधर्ममुपादाय घटपटाकाशादौ तद्धर्मेषु घटत्वादिषु साध्यप्रसिद्धिर्द्रष्टव्या । एवं शब्देऽपि साध्यप्रसिद्धिर्ज्ञेया । यतो धर्मधर्मिणोर्वैशेषिकादिमते भिन्नत्वेन शब्दत्वान्यत्वधर्मः शब्देऽपि सिद्ध एवेति परमार्थः ॥ १ ॥

इति पक्षनिष्ठधर्मपक्षीकरणप्रवृत्ता महाविद्या न्यदर्शि ।

अथ सपक्षनिष्ठं धर्मं पक्षीकृत्य प्रवर्तमाना महाविद्याभेदा यथा—

---

१ 'आद्येऽन्यत्वं' इति ज पुस्तकपाठः । २ 'शब्दान्य' इति ग पुस्तकपाठः । ३ आदर्शे पुस्तके त्रुटितोऽयमंशः ।

१ घटत्वं घटत्वव्यतिरिक्तशब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठान्यत् मेयत्वात् घटवदित्यादयः ॥ १ ॥

१ (आनं०)—**घटत्वव्यतिरिक्तेति** । घटत्वव्यतिरिक्तशब्देतरानित्यनिष्ठत्वरहितश्च घटत्वं वा, शब्देतरानित्यवृत्तिरहितो वा । आद्यान्यत्वं व्याहतं, द्वितीयस्तु अनित्यनिष्ठत्वविशेषणः सिध्यन्ननित्यत्वं शब्दे गमयेदिति भावः । आदिपदेन घटरूपं स्वव्यतिरिक्तशब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठान्यत् मेयत्वाद्धटवदित्यादिसंग्रहः ।

(भुवन०)—अथ सपक्षनिष्ठं धर्मं पक्षीकृत्य प्रवर्तमानमहाविद्याभेदा यथा—**घटत्वं घटत्वव्यतिरिक्तेत्यादि** । शब्दादितरे च ते अनित्याश्च शब्देतरानित्याः । तेषु निष्ठाः पटत्वस्तम्भत्वादयः । घटत्वव्यतिरिक्ताश्च ते शब्देतरानित्यनिष्ठाश्च । तेषां भावः तत्त्वम् । तेन रहितः । अनित्ये पटादौ निष्ठा येषां ते तथा । घटत्वव्यतिरिक्तशब्देतरानित्यनिष्ठत्वरहितश्चासौ अनित्यनिष्ठश्च । ततोऽन्यत् घटत्वमित्यर्थः । घटत्वमन्यदित्युक्ते ज्ञानादेरन्यदिति सिद्धसाधनम् । अत उक्तं—**अनित्यनिष्ठान्यदिति** । एवमपि पटत्वान्यत्वादिना अर्थान्तरत्वम् । अत उपात्तं—**शब्देतरानित्यनिष्ठत्वरहितेति** । शब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठान्यदित्युक्ते च अप्रसिद्धविशेषणत्वम् । शब्दानित्यत्वसिद्धेः प्रागेवंरूपसाध्यासिद्धेः । अतो घटत्वव्यतिरिक्तेति पदग्रहणम् । इति व्यावृत्तिचिन्ता ॥ अत्राद्यविशेषणेन घटत्वव्यतिरिक्तेत्यस्य शब्देतरेत्यस्य च भणनाद्, घटत्वं शब्दत्वधर्मांश्च मुक्त्वा अन्ये अनित्यपदार्थधर्माः सर्वेऽपि निषिद्धाः, अनित्यनिष्ठेति द्वितीयविशेषणेन च नित्यधर्मा अपि । इति विशेषणद्वयेन घटत्वशब्दनिष्ठव्यतिरिक्तनित्यानित्यनिष्ठसर्वधर्मनिषेधे सति द्विधा धर्मा अवशिष्यन्ते घटत्वं वा शब्दमात्रनिष्ठाः शब्दत्वादयो वा । तत्र घटत्वं घटत्वादन्यदिति न संभवति । तस्माच्छब्दमात्रनिष्ठाच्छब्दत्वादेर्घटत्वमन्यदिति सिध्यति । शब्दत्वादेश्चानित्यनिष्ठेतिद्वितीयविशेषणविशिष्टत्वं तदैव स्यात्, यद्यनित्यः शब्दः स्यादितिशब्दानित्यत्वसिद्धिरिति । इह च पक्षघटत्वान्यत्वमादाय घटादौ सर्वत्र साध्यप्रसिद्धिरन्वेषणीया । घटवदित्यादयः इत्यत्रादिपदेन १ 'घटरूपं स्वव्यतिरिक्तशब्देतरानित्यनिष्ठत्वरहितानित्यान्यत् मेयत्वाद्धटवत्' २ 'घटगन्धो घटगन्धव्यतिरिक्तशब्देतरानित्यनिष्ठत्वरहितानित्यनिष्ठान्यत् ज्ञेयत्वाद्धटवत्' इत्यादिसङ्ग्रहः ॥ १ ॥

इति सपक्षनिष्ठधर्मपक्षीकरणप्रवृत्ता महाविद्या न्यरूपि ।

अथ विपक्षनिष्ठं धर्मं पक्षीकृत्य प्रवर्तमाना महाविद्याभेदा यथा—

१ आकाशगतमेकत्वं आकाशगतैकत्वव्यतिरिक्तनित्यनिष्ठत्वरहितैतच्छब्देतरानित्यनिष्ठत्वैरहितधर्मान्यत्[१], मेयत्वात् घटवदिति ॥ १ ॥

१ (आनं०)—आकाशगतैकत्वव्यतिरिक्ते सति नित्यनिष्ठत्वरहितश्चासावेतच्छब्देतरानित्यनिष्ठत्वरहितश्च धर्मस्तस्मादन्यदित्यर्थः । आकाशगतमेकत्वमन्यदित्युक्ते गगनान्यदिति सिद्धमत उक्तम्—धर्मान्यदिति । घटत्वव्यावृत्त्यर्थमनित्यनिष्ठत्वरहितग्रहणम् । सुखादिव्यावृत्त्यर्थं नित्यनिष्ठत्वरहितग्रहणम् । अत्र कश्चिदनित्यत्वासिद्धिनिवारणाय—एतच्छब्देतरेति । अप्रसिद्धविशेषणत्वपरिहारार्थं-

१ 'नित्यधर्मा' इति ज पुस्तकपाठः ।

नाकाशगतैकत्वव्यतिरिक्तेतिग्रहणम् । एकत्वस्य त्वान्यत्वायोगादेतच्छब्दमात्रनिष्ठाऽनित्यनिष्ठत्वरहितात् अन्यत्वमेतद्वनित्यं गमयेदिति भावः ।

(भुवन०)—इदानीं विपक्षनिष्ठं धर्मं पक्षीकृत्य प्रवर्तमानमहाविद्याभेदा यथा—आकाशगतमेकत्वमाकाशगतैकत्वव्यतिरिक्तानित्यनिष्ठत्वरहितैतच्छब्देतरानित्यनिष्ठत्वरहितधर्मान्यदिति । आकाशगतं यदेकत्वं एकत्वसंख्यावत्त्वं, तद्व्यतिरिक्तत्वे सति ये नित्यनिष्ठाः तत्त्वरहितश्चासौ, एतच्छब्दादितरे येऽनित्यास्तन्निष्ठत्वरहितश्च यो धर्मस्तस्मादन्यदित्यर्थः । आकाशगतमेकत्वमन्यदित्युक्ते गगनान्यत्वेन सिद्धसाधनमत उक्तं धर्मान्यदिति । तथा चोच्यमाने घटत्वान्यत्वेनैवार्थान्तरत्वम्, अतस्तद्व्यावृत्त्यर्थमेतच्छब्देतरानित्यनिष्ठत्वरहितेति पदमुपाददे । आत्मत्वाद्यन्यत्वव्यावृत्तये च नित्यनिष्ठत्वरहितेत्यङ्गीकरणम् । एतावत्येव च प्रणिगद्यमाने उभयप्रसिद्धदृष्टान्ताभावेनाप्रसिद्धविशेषणत्वं वोभूयते । अतस्तद्व्यवच्छेदार्थमाकाशगतैकत्वव्यतिरिक्तेति पदं निदधे । इति व्यावृत्तिचिन्ता ॥ अत्र प्रथमविशेषणेन आकाशगतैकत्वं विना सर्वेऽपि नित्यधर्मा निषिद्धाः । द्वितीयविशेषणेन च शब्दधर्मान् विना सर्वेऽप्यनित्यधर्मा निषिद्धाः । तत्राकाशगतैकत्वव्यतिरिक्तनित्यनिष्ठत्वरहितः आकाशगतैकत्वं वा, अनित्यनिष्ठो वा । तत्राद्यान्यत्वं पक्षे नोपसंहर्तुं शक्यम् । आकाशगतैकत्वमाकाशगतैकत्वादन्यदिति व्याघातात् । द्वितीयस्तु द्वेधा स्यात्, एतच्छब्देतरानित्यनिष्ठो वा, एतच्छब्दमात्रनिष्ठो वा । प्राच्यस्तु एतच्छब्देतरानित्यनिष्ठत्वरहितेतिद्वितीयविशेषणेन निरस्तः । एतच्छब्दमात्रनिष्ठात्तु नित्यनिष्ठत्वरहितेत्याद्यविशेषणांशाविशिष्टादेतच्छब्दत्वादेः पक्षस्यान्यत्वं तदैव स्यात्, यद्यनित्य एतच्छब्दः स्यादित्येतच्छब्दानित्यत्वसिद्धिरिति भावः । आकाशगतैकत्वस्य पक्षान्यत्वधर्मेण च सर्वत्र शब्दघटाकाशादौ तद्धर्मेषु च साध्यानुगमो द्रष्टव्यः ॥ १ ॥

इति विपक्षनिष्ठधर्मपक्षीकरणप्रवृत्तमहाविद्या प्रदर्शि । तत्प्रदर्शने चादिपदसूचिता अपि महाविद्या व्यक्तयन्तीति महाविद्याप्रयोगप्रकल्पना सनाथा ।

महाविद्यासमुद्रस्य खण्डनाखण्डलस्य च ।
मम नूतनमार्गेऽपि न च किञ्चिद्गोचरः ॥ ३ ॥

(आनं०)—महाविद्याया आत्मनश्च सर्वविषयत्वमन्येभ्योऽतिशयमाह—महाविद्यासमुद्रस्येति ॥ १ ॥

(भुवन०)—अथात्मनः सर्वविषयमन्येभ्योऽतिशयं स्वोत्कर्षमाविर्भावयति—महाविद्यासमुद्रस्येत्यादि । महाविद्योत्पादनसमुद्रस्य वादीन्द्रस्य नूतनमार्गे नवीनमहाविद्याप्रकारप्रदर्शनप्रवेशेऽपि न किञ्चिन्महाविद्याविडम्बनादिकमगोचरोऽविषय इति संटङ्कना । मम विशिष्टस्य । महाविद्यासमुद्रस्येति । [illegible] तस्य समुद्रस्य । यथा समुद्रे रत्नमत्स्यादिकं सर्वं लभ्यते तथा महाविद्याविडम्बनखण्डनादिकं महाविद्याखण्डनं सकलं मयि लभ्यते इत्यर्थः । एतावता महाविद्यामहिमाधिक्यं मनसि, तदूनं [illegible] न [illegible]-

१ 'मार्गेऽस्य न हि कश्चित्' इति ख पुस्तकपाठः । २ 'विषयः' इति ख पुस्तकपाठः ।

स्याशङ्क्याह—खण्डनेति । मम पुनः किंविशिष्टस्य । महाविद्याप्रयोगाणां यत् खण्डनं तत्र आखण्डलस्य शक्रस्य । यथा शक्रो वज्रेण दुर्द्धरभूधरप्रकरखण्डनपण्डितस्तथा अहमपि स्वशक्तिव्यक्तिप्रयुक्तयुक्तियुक्तिपङ्क्त्या महाविद्याप्रयोगखण्डनपण्डितिमप्रचण्ड एवेत्यर्थः । आद्यविशेषणेन सर्वमहाविद्याव्यवस्थापनविषये स्वस्य परमं कौशल्यमाविश्चक्रे । द्वितीयविशेषणेन तु तत्प्रयोगखण्डनापाण्डित्यमिति परमार्थः ॥ ३ ॥

महाविद्यादूषणे प्रवृत्तस्य तद्व्याख्यानमसंगतमिति चेत् । न । महाविद्यावादिना किं सभ्यविदितार्थप्रतिवादिदुरधिगममहाविद्याप्रयोगानन्तरं अज्ञानेन प्रतिवादिनं निगृह्यात्मनो विजयो भावनीयः, किं वा प्रतिवादिविदितार्थमहाविद्यादूषणाऽप्रतिभया प्रतिवादिनं निगृह्यात्मनो विजयो भावनीयः । नाद्यः यतः।

इति गूढमहाविद्याव्याख्या कौतूहलच्छलात् ।
दूरे निरस्तमस्माभिरज्ञानं प्रतिवादिनः ॥ ४ ॥

(आनं०)—" उन्मीलन्ति महाविद्यादोषकैरवकोरकाः । " इति प्रतिज्ञाविरोधं शङ्कते—महाविद्यादूषणेति । महाविद्यावादिना प्रतिवादिन्युद्भाव्यमानमज्ञाननिग्रहं खण्डयितुं महाविद्याव्याख्यानमसंगतमिति मत्वा परिहरति—नेति ।

(भुवन०)—अथ ' उन्मीलन्ति महाविद्यादोषकैरवकोरकाः ' इति प्रतिज्ञाविरोधं महाविद्याव्याख्यातुः शङ्कते—महाविद्यादूषणेति । महाविद्यावादिना प्रतिवादिन्युद्भाव्यमानमज्ञाननिग्रहं खण्डयितुं महाविद्याव्याख्यानं सङ्गतमिति मत्वा विकल्पद्वयेन परिहरति—महाविद्यावादिनेत्यादि। महाविद्यावादिना पूर्वपक्षवादिना वैशेषिकादिना किं सभ्यैर्विदितार्था ज्ञातार्थाः प्रतिवादिभिश्च दुरधिगमा दुर्ज्ञेया या महाविद्यास्तासां प्रयोगानन्तरमज्ञानेन महाविद्याया अपरिज्ञानेन प्रतिवादिनं निगृह्यात्मनो विजयो भाव्यः । द्वितीयविकल्पमाह—किं वेत्यादि । किं वा प्रतिवादिना विदितार्था ज्ञातार्था या महाविद्यास्तासां यद्दूषणं तदप्रतिभया प्रतिवादिन एव तदुत्पादनाशक्त्या प्रतिवादिनं निगृह्यात्मनो विजयो भाव्यः । तत्र प्रथमविकल्पमुत्थापयति—नाद्य इति ।

अत्र हेतुमभिधत्ते—यत इत्यादि । यतः कारणादित्येवं प्रकारेण गूढमहाविद्याव्याख्या कुर्वद्भिः अस्माभिः प्रतिवादिनो महाविद्याविषयमज्ञानं दूरं निरस्तमित्यर्थः ॥ ४ ॥

यद्वा सम्यक्साधनापरिस्फूर्तौ सौगतादीन् प्रति महाविद्याः प्रयोक्तव्याः, सम्यग्दूषणापरिस्फूर्तौ जात्यादिवत्, इति तद्व्याख्यानं नानुपयोगि । यदाहुः शिवादित्यमिश्राः—

" पक्षवृत्तिर्व्यवृत्तिस्त्वरहितस्त्वानुरञ्जनः ।
धर्मः साध्यवतः साध्यो मेयत्वान्यनिराकृते ॥ " इति ।

---

१ 'तत्त्वज्ञानमिति' इति ग पुस्तकपाठः । २ 'दुर्ज्ञेयानि' इति घ पुस्तकपाठः । ३ [illegible] इति घ पुस्तकपाठः । ४ [illegible] । ५ [illegible] इति घ पुस्तकपाठः ।

द्वितीयं तु पक्षं महाविद्यागोचरसुगमदूषणव्युत्पादनेन निराकरिष्यामः ॥

इति श्रीहरकिङ्करन्यायाचार्यपरमपण्डितभट्टवादीन्द्रविरचिते महाविद्या-
विडम्बने दूष्यविवेको नाम प्रथमः परिच्छेदः ॥ १ ॥

(आनं०)—अप्रतिभानिग्रहमात्मनः परिहर्तुं महाविद्या ज्ञातव्या । अतोऽपि तद्व्याख्यानमुपयुक्तमित्याह—यद्वेति । पक्षे साध्यवतो धर्मिणो धर्मः केवलान्वयी व्यापकः साध्यः । पक्षे च तद्भिन्ने तदन्यस्मिंश्च वृत्तित्वरहितेन अनुरञ्जितः स्वस्वेतरवृत्तित्वानाक्रान्त इत्यर्थः ।

इति महाविद्याविडम्बनव्याख्याने श्रीमदानन्दपूर्णविरचिते प्रथमः परिच्छेदः ।

(भुवन०)—अज्ञाननिग्रहमात्मनः परिहर्तुं महाविद्या ज्ञातव्या । अतोऽपि तद्व्याख्यानमुपयुक्तमित्याह—यद्वेति । यद्वा वादिनः सम्यक् साधनापरिस्फूर्तौ सम्यक् [illegible]साधनानुपपत्तौ महाविद्यापि प्रयोक्तव्या । अत्रार्थे दृष्टान्तमाचष्टे—सम्यग्दूषणेत्यादि । अयं भावः । यथा सम्यग् दूषणापरिस्फुरणे जात्यादिः, आदि शब्दाच्छलादिः प्रयुज्यते । अनित्यः शब्दः [illegible] घटवदित्यादावनुमाने सम्यक् हेत्वाभासादिदूषणाप्रतिभाने यदि अनित्यघटसाधर्म्यात् [illegible] अनित्यः शब्दः स्यात्तर्हि नित्याकाशसाधर्म्यात् अमूर्तत्वान्नित्योऽपि किं न स्यादिति [illegible] जातिः प्रतिवादिना यथा प्रयुज्यते, तद्वदौद्धादीन् प्रति महाविद्यापि प्रयोक्तव्येति [illegible] ।
अत्रार्थे शिवादित्यमिश्रोक्तमवतारयति—यदाहुरित्यादि ।

पक्षः प्रकृतः शब्दादिः । तद्भिन्नाः शब्देतरे नित्यानित्यपदार्थाः । [illegible] तद्वृत्तित्वं धर्मः, तेन यद्रहितत्वं तेनानुरञ्जितो मिश्रितः [illegible] इत्यर्थः । साध्यवतो धर्मिणोऽनित्यस्य धर्मो मेयत्वादिर्हेतुव्यापकः साध्यः [illegible] । पक्षे इति [illegible] । अनित्यनिष्ठसाध्य इति भावः । येन हेतुना साध्यः स्यात्—मेयत्वात् । [illegible] । मेयत्वादित्युपलक्षणम् । तेन सत्त्वज्ञेयत्ववाच्यत्वादयोऽपि हेतवो [illegible] । ननु किं [illegible] महाविद्या प्रयोक्तव्या, यद्वा प्रतिवादिनः प्रतिभाक्षये [illegible] । द्वितीयं द्विधाप्यङ्गीकरोति—प्रतिभाक्षये इति । [illegible] व्याख्येयम् । द्वितीये वादिनः प्रतिभाक्षये [illegible] । [illegible] स्थिता, अत्र ग्रन्थे " अयं शब्दः स्वेतर " इत्यादि [illegible] ।

द्वितीयं तु पक्षमित्यादि । [illegible] पक्षम् । महाविद्यागोचरसुगमदूषण[illegible] । [illegible] तत्परिच्छेदयोर्निराकरिष्याम इत्यर्थः ।

[illegible]

१ [illegible]

अथ द्वितीयः परिच्छेदः ।

अथ सर्वजगन्नाथं प्रणम्य करुणानिधिम् ।
केवलान्वयिभङ्गार्थमर्थये पार्वतीपतिम् ॥ १ ॥

द्वितीयपरिच्छेदः[1] ।

(भुवन०)—अथ द्वितीयपरिच्छेदव्याख्या प्रक्रम्यते । "आदावन्ते मध्ये च कल्पितमङ्गलानि शास्त्राणि प्रथन्ते" इति न्यायात् मध्यमङ्गलमाचरन्नाचष्टे—अथ सर्वजगन्नाथमित्यादि ॥ १ ॥

केवलान्वयिहेतुविशेषो महाविद्या[2] इत्युक्तम् । तन्न । केवलान्वयिहेतोरेव निर्वक्तुमशक्यत्वात् । तथाहि, किं केवलान्वयित्वाधारो हेतुः केवलान्वयी, किं वा केवलान्वयित्वाधारव्याप्यः । नाद्यः । परमाणुः प्रत्यक्षः द्रव्यत्वात् घटवदिति, आकाशं अभिधेयं नित्यत्वात् गोत्ववदित्यादीनामसंग्रहप्रसङ्गात् । नापि द्वितीयः । केवलान्वयित्वस्याद्याप्यनिरुक्तेः । किं सकलवस्तुनिष्ठत्वं केवलान्वयित्वं, उत अत्यन्ताभावप्रतियोगित्वविरहः । आद्ये[3] दूषणमाह—

"मानं हन्त न केवलान्वयवतो धर्मस्य सत्त्वे" इति ।

(भुवन०)—अथ महाविद्यालक्षणस्मारणपूर्वं तल्लक्षणखण्डनमेव प्रक्रमते—केवलान्वयीत्यादि । निर्वक्तुमिति । निश्चयेन वक्तुं निर्वक्तुम् । केवलान्वयिहेतोर्निरुक्तेरेव कर्तुमशक्यत्वादित्यर्थः । केवलान्वयिभङ्गाय द्वेधा विकल्पयति—केवलान्वयित्वाधारो हेतुरिति । केवलान्वयिहेतौ केवलान्वयित्वं नाम धर्मोऽस्ति, तस्याधारो हेतुः किं केवलान्वयी, किं वा केवलान्वयित्वाधारव्याप्यः ! केवलान्वयित्वाधारो महाविद्यादिसाध्यम् । यतो यथा केवलान्वयिहेतौ केवलान्वयित्वं धर्मस्तथा केवलान्वयिनि महाविद्यादिसाध्येऽपि केवलान्वयित्वं धर्मोऽस्त्येव । अतः केवलान्वयित्वाधारोऽत्र महाविद्यादिसाध्यमेव । तेन व्याप्यः प्रमेयत्वादिहेतुः, स वा केवलान्वयीत्यर्थः । तत्राद्यं विघटयति—नाद्य इति । परमाणुः प्रत्यक्ष इति । अत्र परमाणुरित्युपलक्षणादन्ये चर्मचक्षुषामदृश्या व्योमात्मादयोऽपि पक्षतुल्यत्वेन ग्राह्याः । यथा व्योम प्रत्यक्षं द्रव्यत्वाद्घटवदित्यादि, इति तेषां पक्षतुल्यत्वेन न तैर्व्यभिचाराशङ्कापि चिन्तनीया । अत्र च यद् द्रव्यं तत्प्रत्यक्षमिति व्याप्तिसद्भावेऽपि रूपरसादिगुणेषु द्रव्यत्वाभावेन सपक्षैकदेशवृत्तित्वाद् द्रव्यत्वस्य केवलान्वयित्वाधारत्वम् । यतः सकलवस्तुनिष्ठस्यैव धर्मस्य त्वया केवलान्वयित्वमभीप्सामासे । तच्च द्रव्यत्वस्य रूपादिसपक्षावृत्तित्वेन नास्ति ।

---

१ श्रीमदानन्दपूर्णविरचिता टीका प्रथमपरिच्छेदान्तैवोपलब्धा । द्वितीयतृतीयपरिच्छेदयोष्टीका नोपलब्धेति नात्र प्रकाशिता । २ °महाविद्या इत्युक्तः । नासौ युक्तः° इति घ पुस्तकपाठः । ३ °आद्ये पक्षे दूष° ञ पुस्तकपाठः ।

क्तो द्रव्यत्वादावुक्तरूपकेवलान्वयित्वस्यासंभव इत्यर्थः । एवमाकाशमभिधेयमित्यत्र नित्यत्वस्याकाशे सपक्षे वर्तनेऽपि घटपटादावनित्ये ह्यवर्तमानत्वेन नित्यत्वस्य सकलनिष्ठत्वलक्षणं केवलान्वयित्वं नास्तीत्येतयोर्हेत्वोः केवलान्वयिष्वसंग्रहः प्रसज्येत । अयमाशयः । यदि सर्ववस्तुनिष्ठत्वं केवलान्वयित्वं स्वीक्रियते, तदा अनयोर्द्रव्यत्वनित्यत्वरूपहेत्वोः सपक्षैकदेशवृत्तित्वेन केवलान्वयित्वेऽपि सर्ववस्तुनिष्ठत्वाभावेन केवलान्वयिहेतुष्वसंग्रहः स्यात्, केवलान्वयिहेतुषु च संग्रहीतावेतौ हेतू इति । महाविद्यादीनां साध्यानां केवलान्वयित्वाधारत्वात्तद्व्याप्यस्य मेयत्वादेर्हेतोः केवलान्वयित्वमिति यो द्वितीयो विकल्पस्तमपि प्रत्याचष्टे—**नापि द्वितीय इति । केवलान्वयित्वस्य अद्याप्यनिरुक्तेरिति ।** केवलान्वयित्वस्याद्यापि भवता निश्चितोक्तेरप्रतिपादनादित्यर्थः । अत एव केवलान्वयित्वं द्विधा विकल्पयन्नाह—**किं सकलवस्तुनिष्ठत्वमित्यादि । अत्यन्ताभावप्रतियोगित्वविरह इति ।** प्रमेयत्वादीनामत्यन्ताभावस्य यत्प्रतियोगित्वं तस्य विरहोऽभाव इति यावत् । प्रमेयत्वादीनां सर्वत्र वृत्तित्वेनात्यन्ताभावः क्वापि नास्तीति तद्रूपं वा केवलान्वयित्वम् । आद्यपक्षदूषणे प्राचीनाचार्यवचनमुदाहरति—

मानं हन्त न केवलान्वयवतो धर्मस्य सत्त्वेऽपि च
स्वालिन्हृतिरवर्तनेन सहिता व्याघातसंत्रासिता ।
साध्याभाववदाश्रितत्वविरहो धूमादिलब्धस्थिति-
र्व्याप्तिः सा नहि केवलान्वयवता धर्मेण संगच्छते ॥ इति ।

हन्तेत्यामन्त्रणे । हन्त भोः केवलान्वयवतो धर्मस्य सत्त्वे मानं नास्ति । 'मानाधीनामेयसिद्धिरि'ति वचनादत्र प्रकृतधर्मे मानाभावेन प्रकृतधर्मरूपमेयासिद्धिरित्यर्थः । शेषपद्यव्याख्यानं तु परिपाट्या ग्रन्थकारः स्वयमेव करिष्यतीति ।

तथाहि—न तावत्प्रमेयत्वादीनां सकलवस्तुनिष्ठत्वे प्रत्यक्षं मानम् । सकलवस्तुनिष्ठत्वगोचरस्य प्रत्यक्षस्य परं प्रत्यसिद्धेः । नाप्यनुमानम् । मेयत्वादयः[1] सकलवस्तुनिष्ठा इत्यादेरप्रसिद्धविशेषणत्वात् । सकलवस्तुनिष्ठत्वं प्रमेयत्वादिनिष्ठमित्यादेश्चाश्रयासिद्धेः । सकलवस्तूनि प्रमेयत्वाधार इत्यादेश्च दृष्टान्ताभावग्रस्तत्वात् । एतद्घटव्यतिरिक्तसकलवस्तूनि प्रमेयत्वाधारः प्रमेयत्वादित्यादेश्च[3] साध्याविशिष्टत्वात् । एतद्घटव्यतिरिक्तसकलवस्तूनि प्रमेयत्वाधारः अभिधेयत्वादित्यादेश्च केवलान्वयित्वेन केवलान्वयिनामप्येवं विप्रतिपन्नं प्रत्यनुपादेयत्वादिति ।

(भुवन०)—तत्र प्रत्यक्षं प्रमाणमनुमानं वेति विकल्प्य प्रथमं प्रत्याह—न तावदित्यादि । परं माहादिकं प्रति सकलवस्तुविषयप्रत्यक्षाभावात् । [illegible] । द्वितीयं दूषयति—नाप्यनुमानमित्यादि । प्रमेयत्वादयः सकलवस्तुनिष्ठा इति साध्यम्, तत्र सकलवस्तुनिष्ठत्वं प्रमे-

---

१ 'प्रमेय' इति ङ. ढ. पुस्तके पाठः । २ [illegible] इति ङ. ढ. पुस्तके पाठः । ३ [illegible] ति ङ ढ पुस्तके पाठः ।

यत्वादिनिष्ठमिति, किंवा सकलवस्तूनि प्रमेयत्वाधार इति, किं वैतद्घटव्यतिरिक्तसकलवस्तूनि प्रमेयत्वाधारः इति चतुर्धा विकल्प्य, प्रथमे दूषणमाख्याति—प्रमेयत्वादय इति। अप्रसिद्धविशेषणत्वादिति। एवंविधसाध्यस्य दृष्टान्ते क्वाप्यप्रसिद्धत्वेन अप्रसिद्धविशेषणो नाम पक्षदोषः स्यादित्यर्थः। सकलवस्तुनिष्ठत्वस्याप्रामाणिकत्वादाश्रयासिद्धिर्द्वितीये स्यादित्युदीरयति—सकलवस्तुनिष्ठत्वमिति। अयमत्र मथितार्थः। सकलवस्तुनिष्ठत्वमिति धर्मी, प्रमेयत्वादिनिष्ठमिति साध्यो धर्मः। अत्र च सकलवस्तुनिष्ठत्वरूपधर्मस्य धर्मिण एव सिद्धौ परमतेन प्रमाणाभावात्, यस्य कस्यापि हेतोरत्र प्रदीयमानस्याश्रयासिद्धत्वं स्यादेवेति। तृतीयः सर्वस्य पक्षतया दृष्टान्ताभावेन स्वसाध्यासाधकपक्षमात्रवृत्तिरूपानध्यवसितदोषाक्रान्त इति भाषते—सकलवस्तूनि प्रमेयत्वाधार इति। प्रमेयत्वस्याधारः प्रमेयत्वाधारः। सकलवस्तुशब्देन सर्वस्यापि पक्षमध्ये संगृहीतत्वेन अधिकवस्त्वन्तराभावादत्र स्फुटमेव दृष्टान्ताभावग्रस्तत्वम्। तथा च मेयत्वादिहेतोः स्वसाध्यासाधकत्वेन पक्षमात्रवृत्तित्वेन चानध्यवसितत्वमिति। तुर्ये विकल्पे मेयत्वं हेतुः अभिधेयत्वं वा। तत्र प्रथमं हेतुं निरस्यति। एतद्घटव्यतिरिक्तेत्यादि। अत्र च पूर्वोक्तदोषपरिजिहीर्षया सकलवस्तुमध्यादेतद्घटो दृष्टान्तार्थं पृथक्कृतः। साध्याविशिष्टत्वादिति। साध्यात्र विशिष्टः साध्याविशिष्टः। यथा साध्यं सकलवस्तूनां प्रमेयत्वाधारत्वादिकं विवादास्पदीभूतं, तथात्र मेयत्वादिति हेतुरपि साध्यरूपत्वेन विवादास्पदीभूत एव। तेन साध्याविशिष्टत्वं नामात्र हेतोर्दोषो भवत्येवेति। अथ द्वितीयं हेतुं निराचष्टे—एतद्घटव्यतिरिक्तेत्यादि। अत्र मेयत्वादिति हेतुस्थानेऽभिधेयत्वादिति हेतुरुक्तः। तथा च न साध्याविशिष्टत्वं, तस्मिन्नेव साध्ये तस्यैव हेतोस्तथात्वात्। अत्र च तथाऽभावात्। अतो दूषणान्तरमत्राह—अभिधेयत्वादित्यादि। केवलान्वयिहेतोः प्रामाण्यं विप्रतिपन्नं, प्रतिवादिनं प्रत्यनङ्गीकार्यत्वादित्यर्थः।

किञ्च एतद्घटव्यतिरिक्तसकलवस्तुशब्देन किं यावन्तो भवता प्रत्यक्षानुमानाभ्यामधिगतास्तावन्तो विवक्षिताः, किंवा यावन्तो भवता अन्यैश्च प्रत्यक्षानुमानाभ्यां ज्ञाताः ज्ञायन्ते ज्ञास्यन्ते च तावन्तः। नाद्यः। प्रत्यक्षानुमानाभ्यां यावन्तो भवताधिगतास्तावन्मात्रनिष्ठत्वसिद्धावपि सकलवस्तुनिष्ठत्वासिद्धेः। नापि द्वितीयः। भवदधिगतवस्तुव्यतिरिक्तवस्तूनां भवदनधिगतत्वेन हेतोरप्रमिताश्रयत्वादिति।

(भुवन०)—दूषणान्तरं भाषते—किं चेत्यादि। किं चेति दूषणान्तराभ्युच्चये। तावन्मात्रनिष्ठत्वसिद्धावपीति। प्रमेयत्वादीनामिति शेषः। अप्रमिताश्रयत्वादिति। अप्रमितोऽज्ञातः आश्रयोऽन्याधिगतवस्तुरूपो यस्य स तथा, तद्भावस्तत्त्वं तस्मात्। भवदधिगतवस्तुव्यतिरिक्तवस्तूनां परैर्ज्ञातत्वेऽपि भवदज्ञातत्वेन भवत्प्रयुक्तहेतोरपरिज्ञाताश्रयत्वं स्यादिति भावः।

अस्तु वा एतद्घटव्यतिरिक्तसकलवस्तुनिष्ठत्वं मेयत्वादीनामेतस्मादनुमानात्। सकलवस्तुनिष्ठत्वापरपर्यायं केवलान्वयित्वं तु कुतः प्रमेयत्वादीनां सिद्धम्।

(भुवन०)—ममाप्रमितत्वेऽप्यन्येषां प्रमातॄणां प्रमितत्वादाश्रयत्वोपपत्तेर्न हेतोराश्रयासिद्धत्वमिति परोक्तं चेतसि निधायाङ्गीकुर्वन्नप्याह—अस्तु वैतद्घटव्यतिरिक्तेत्यादि । एतस्मादनुमानादिति । एतद्घटव्यतिरिक्तसकलवस्तूनि प्रमेयत्वाधारः अभिधेयत्वादित्यतः । सकलवस्तुनिष्ठत्वेत्यादि । सकलवस्तुनिष्ठत्वाख्यं केवलान्वयित्वं तु कुतः प्रमाणात्प्रमेयत्वादीनां सिध्यति । अयमर्थः । एतद्घटव्यतिरिक्तसकलवस्तूनामेतदनुमानात्प्रमेयत्वमस्तु । तथापि केवलान्वयित्वं प्रमेयत्वादीनां न सिध्यति । एतद्घटस्य पक्षाद्बहिष्कृतत्वेन प्रमेयत्वादीनामेतद्घटनिष्ठत्वस्यैवासिद्धेः सकलवस्तुनिष्ठत्वरूपकेवलान्वयित्वासिद्धिरिति ।

अथ एतद्घटनिष्ठत्वं प्रमेयत्वादीनां प्रत्यक्षसिद्धम् । एतद्घटव्यतिरिक्तसकलवस्तुनिष्ठत्वं तु प्रकृतानुमानात् । तेन प्रमाणद्वय[1]पर्यालोचनया प्रमेयत्वादीनां सकलवस्तुनिष्ठत्वसिद्धिरिति ब्रूषे, तन्न । प्रमाणद्वयपर्यालोचनया प्रमेयत्वादीनां सकलवस्तुनिष्ठत्वसिद्धिरिति कोऽर्थः । किं प्रत्यक्षपर्यालोचनया सकलवस्तुनिष्ठत्वसिद्धिः, अनुमानपर्यालोचनया च सकलवस्तुनिष्ठत्वसिद्धिरित्यर्थः, किंवा मिलितप्रत्यक्षानुमानपर्यालोचनया सकलवस्तुनिष्ठत्वसिद्धिरित्यर्थः । किंवा प्रत्यक्षतः एतद्घटनिष्ठत्वसिद्धिः, प्रमेयत्वादीनामनुमानतश्चैतद्घटव्यतिरिक्तसकलवस्तुनिष्ठत्वसिद्धिः, तेन प्रत्यक्षानुमानावगतैतद्घटनिष्ठत्वे सति एतद्घटव्यतिरिक्तसलवस्तुनिष्ठत्वात्सकलवस्तुनिष्ठत्वं प्रमेयत्वादीनामनुमीयते इत्यर्थो विवक्षितः । नाद्यः । प्रत्यक्षस्यैतद्घटमात्रनिष्ठत्वग्राहकत्वात् । अनुमानस्य चैतद्घटव्यतिरिक्तसकलवस्तुमात्रनिष्ठत्वग्राहकत्वाच्चेति । नापि द्वितीयः । प्रत्यक्षानुमानयोर्मिलितयोः सकलवस्तुनिष्ठत्वप्रमाजनकत्वस्य निष्प्रमाणकत्वादिति । नापि तृतीयः । प्रमेयत्वादयः सकलवस्तुनिष्ठाः, एतद्घटनिष्ठत्वे सति एतद्घटव्यतिरिक्तसकलवस्तुनिष्ठत्वादित्यादेरप्रसिद्धविशेषणत्वात् । एतद्घटनिष्ठत्वे सति एतद्घटव्यतिरिक्तसकलवस्तुनिष्ठत्वमेव सकलवस्तुनिष्ठत्वम्, तच्च प्रकृतप्रमाणद्वयावसितमिति नाप्रसिद्धविशेषणतेति चेत् । न । प्रमेयत्वादयः सकलवस्तुनिष्ठाः सकलवस्तुनिष्ठत्वादित्यादेः साध्याविशिष्टत्वात् ।

(भुवन०)—प्रत्यक्षानुमानयोः प्रत्येकं सकलवस्तुनिष्ठत्वनावगाहकत्वाभावेऽपि सम्भूय तत्साधकत्वं भविष्यतीत्याशङ्कते—अथैतद्घटनिष्ठत्वमित्यादि । प्रत्यक्षानुमानाभ्यामित्यनया परोक्तं परिष्कृततरेणेति । परोक्तस्यार्थं स्वयमेवं विधाय दूषयति । प्रमाणद्वयेति । 'किं प्रत्यक्ष' इत्यादि 'सिद्धिरित्यर्थः' इति पर्यन्तः प्रथमो विकल्पः । एतेन प्रत्यक्षेणापि सकलवस्तुनिष्ठत्वसिद्धिः, अनु-

---

१ 'इत्यत्र स' इति ख पुस्तके पाठः ।

प्रतियोगित्वस्य व्यावृत्तिसिद्धिमात्रेण अस्यात्यन्ताभावप्रतियोगित्वं कुतश्चिद्व्यावृत्तमित्यादिरूपस्यानुमानस्योपपन्नत्वेन संजातत्वेन प्रमेयत्वादीनामत्यन्ताभावप्रतियोगित्वव्यावृत्तिरूपादर्थात्सिपाधयिषितादन्यो योऽर्थः स्वस्मात्स्वव्यावृत्तिलक्षणस्तदर्थान्तरं, तेन ग्रस्तत्वाच्च। चकारो हेत्वन्तरसूचनार्थः। अयमभिप्रायः। यथा मेयत्ववाच्यत्वादयः सर्ववृत्तित्वेन भवन्मते केवलान्वयिनो वर्तन्ते, तथा खरविषाणादेरप्रामाणिकस्यात्यन्ताभावोऽपि सकलवस्तुनिष्ठत्वेन केवलान्वयित्ववानेव भवति। केवलान्वयित्वेन विधुरस्त्वत्यन्ताभावो घटत्वादिप्रतियोगिको ज्ञेयः। तस्य घटे वर्तमानत्वेन सकलवस्तुनिष्ठत्वाभावात्। तेन केवलान्वयित्वविधुरात्यन्ताभावप्रतियोगित्वादेव केवलान्वयित्वविधुरात्यन्ताभावप्रतियोगित्वस्य व्यावृत्तिः सिध्यति, न प्रमेयत्वादेः। एतदुक्तं भवति। अत्यन्ताभावप्रतियोगित्वेऽत्यन्ताभावप्रतियोगित्वं स्ववृत्तिविरोधान्नास्तीति स्वस्मादेव स्वव्यावृत्तिमात्रसिद्धौ अर्थान्तरमिति। अथ पुनरत्रैव हेतुदोषं भाषते—**केवलान्वयिन इति। परं प्रतीति।** परं प्रतिवादिनं प्रतीत्यर्थः। अथानुमानान्तरमाशङ्कते—**अत्यन्ताभावेति।** प्रमेयत्वाद्व्यावृत्तम् प्रमेयत्वव्यावृत्तम्। अत्यन्ताभावप्रतियोगित्वं प्रमेयत्वे न वर्तते इत्यर्थः। अत्यन्ताभावप्रतियोगित्वव्यतिरिक्तत्वे सति ये प्रमेयत्वनिष्ठाः प्रमेयवृत्तित्वादयस्तत्त्वरहितत्वादिति हेतुः। संप्रतिपन्ना वादिप्रतिवादिभ्यां प्रतिपन्ना ये प्रमेयत्वानिष्ठा द्रव्यत्वघटत्वादयस्तद्वदित्यर्थः। अत्यन्ताभावप्रतियोगित्वं व्यावृत्तमित्युक्ते स्वतो व्यावृत्तत्वेनार्थान्तरत्वं स्यात्। अत उक्तं प्रमेयत्वव्यावृत्तमिति। अथ हेतुव्यावृत्त्यचिन्ता। प्रमेयत्वनिष्ठत्वरहितत्वादित्युक्ते प्रतिवादिनं भाट्टादिकं प्रत्यसिद्धिः स्यात्, तन्मतेऽत्यन्ताभावप्रतियोगित्वस्य प्रमेयत्वनिष्ठत्वात्। अत उक्तमत्यन्ताभावप्रतियोगित्वव्यतिरिक्तेति। एवमुक्ते च हेतुरुभयवादिसंमतो जातः। यतः प्रमेयत्वनिष्ठाः सत्त्वप्रमेयवृत्तित्वादयो यथा सन्ति, तथा प्रतिवादिनो मते ऽत्यन्ताभावप्रतियोगित्वमपि प्रमेयत्वनिष्ठं विद्यते। तच्चात्यन्ताभावप्रतियोगित्वव्यतिरिक्तेति पदेन वहिष्कृतम्। तथा चात्यन्ताभावप्रतियोगित्वव्यतिरिक्ता ये मेयत्वनिष्ठाः, तत्त्वरहितत्वमत्यन्ताभावप्रतियोगित्वस्य पक्षितस्यास्त्येवेत्यर्थः। तुल्यबलत्वेन साध्याभावसाधकः प्रकरणसमापरपर्यायः सत्प्रतिपक्षः, तेन कलङ्कितमेतदिति परिहरति—**नेति।** प्रमेयत्वे वर्तमानमित्यर्थः—**अत्यन्ताभावेति।** अत्यन्ताभावप्रतियोगित्वव्यतिरिक्ता ये प्रमेयत्वाद्व्यावृत्ताः प्रमेयत्वावर्तमानाः घटत्वपटत्वद्रव्यत्वादयः, तत्त्वरहितत्वादिति हेतुः। अत्रापि प्रमेयत्वव्यावृत्तत्वरहितत्वादित्युक्तेऽत्यन्ताभावप्रतियोगित्वस्य महाविद्यावादिनो मते प्रमेयत्वाद्व्यावृत्तत्वेन पूर्ववद्धेतोरसिद्धता स्यात्। तत्परिहारार्थमत्यन्ताभावप्रतियोगित्वव्यतिरिक्तेति पदमुररीचक्रे। संप्रतिपन्ना ये प्रमेयत्वनिष्ठाः सत्त्ववाच्यत्वादयो धर्मास्तद्वदिति दृष्टान्तः। अत्र संप्रतिपन्नप्रमेयत्वनिष्ठवदित्यादिनेत्यत्रादिपदेन प्रमेयत्वमत्यन्ताभावप्रतियोगित्वव्यतिरिक्तैतद्धर्मवानानाकान्ताधिकरणं वस्तुत्वाद्धटवदित्यादीनां संग्रहः। न केवलं सत्प्रतिपक्षत्वं, प्रमेयत्वनिष्ठत्वाभावश्चोपाधिरपीत्याह—**तद्विरहेणेति।** तच्छब्देन सत्प्रतिपक्षानुमाने यत्साध्यं प्रमेयत्वनिष्ठत्वलक्षणं तदपरामृश्यते। तस्य विरहोऽभावस्तद्विरहः। तेनात्यन्ताभावप्रतियोगित्वं प्रमेयत्वव्यावृत्तमित्यनुमानस्योपाधित्वं, प्रमेयत्वनिष्ठत्वाभावोऽत्रोपाधिरित्यर्थः। स चोपाधिर्यः प्रमेयत्वव्यावृत्तः। स प्रमेयत्वनिष्ठत्वरहित इति साध्यव्यापकः। तथा योऽत्यन्ताभावप्रतियोगित्वव्यतिरिक्तप्रमेयत्वनिष्ठत्वरहितः स प्रमे-

१ 'ष्ठेन प्रतिप' इति च पुस्तकपाठः।

यत्वनिष्ठत्वरहित इति साधनेन सहोपाधेर्व्याप्तिर्नास्ति । यतः पक्षीकृतेऽत्यन्ताभावप्रतियोगित्वेऽत्यन्ताभावप्रतियोगित्वव्यतिरिक्तमेयत्वनिष्ठत्वरहितत्वमस्ति, न च प्रमेयत्वनिष्ठत्वरहितत्वं, तस्याद्यापि विवादास्पदत्वात् । तेन साधनाव्यापकत्वाद्यनुपाधिः । तथात्र यत्प्रमेयत्वनिष्ठत्वरहितं नास्ति, तत्प्रमेयत्वाव्यावृत्तमपि नास्ति, यथा सत्त्ववाच्यत्वादि, इति सत्त्वादेर्विपक्षस्योपाधेर्व्यावर्त्यत्वेन पक्षेतरत्वाख्यमपि दूषणमुपाधेर्नाशङ्कनीयमिति प्रमेयत्वनिष्ठत्वविरहेणात्यन्ताभावप्रतियोगित्वं प्रमेयत्वव्यावृत्तमित्यनुमानस्य सोपाधित्वं स्यादेवेति तात्पर्यार्थः ।

न च केवलान्वयित्वसिद्ध्यै महाविद्यापि प्रमेयत्वादीनां प्रभवति । वक्ष्यमाणसकलदोषैर्व्याकुलत्वादिति । एवमुदयनादीनां मतमवलम्ब्य घटादिनिष्ठमत्यन्ताभावप्रतियोगित्वमङ्गीकृत्य अत्यन्ताभावप्रतियोगित्वं कुतश्चिद्व्यावृत्तमित्यादिप्रयोगो निरस्तः ।

(भुवन०)—अथ प्रमेयत्वादयः संप्रतिपन्नैतद्धर्मत्वरहिताधिकरणं वस्तु [illegible] महाविद्यया प्रमेयत्वादीनां केवलान्वयित्वं विप्रतिपन्नं [illegible] भवति—न च केवले-त्यादि । प्रमेयत्वादीनां केवलान्वयित्वसिद्धयै महाविद्यापि न च प्रभवतीति पदान्वयः । वक्ष्यमाणाः सकलदोषाः सोपाधित्वासिद्धत्वादयस्तैर्व्याकुलत्वादिति—उदयनादीनामिति । उदयनादिपूर्वाचार्याणाम् ।

वयं तु ब्रूमः—अत्यन्ताभावप्रतियोगित्वमेव नास्ति । कुतः [illegible] । अप्रामाणिकप्रतियोगिको ह्यभावोऽत्यन्ताभावः, तत्प्रतियोगित्वं चाप्रामाणिकत्वमेव । न चाप्रामाणिकनिष्ठमत्यन्ताभावप्रतियोगित्वं नाम धर्मः [illegible] शक्यम् । प्रमाणविरहादिप्रसक्तत्वात् ।

(भुवन०)—अत्यन्ताभावप्रतियोगित्वमेवेति । [illegible] धर्मः [illegible] तर्हि [illegible] धर्मित्वं घटते । धर्मोऽपरे हि धर्मी [illegible] । [illegible]—अप्रामाणिकेति । [illegible]—[illegible]प्रतियोगित्वमिति । [illegible]—न चाप्रामाणिकनिष्ठमिति । [illegible] । [illegible] ।

[illegible]

[illegible]

प्रतियोगित्वस्य व्यावृत्तिसिद्धिमात्रेण अस्यात्यन्ताभावप्रतियोगित्वं कुतश्चिद्व्यावृत्तमित्यादिरूपस्या-नुमानस्योपपन्नत्वेन संजातत्वेन प्रमेयत्वादीनामत्यन्ताभावप्रतियोगित्वव्यावृत्तिरूपादर्थात्सिषाधयिषि-तादन्यो योऽर्थः स्वस्मात्स्वव्यावृत्तिलक्षणस्तदर्थान्तरं, तेन ग्रस्तत्वाच्च । चकारो हेत्वन्तरसूचनार्थः । अयमभिप्रायः । यथा मेयत्ववाच्यत्वादयः सर्ववृत्तित्वेन भवन्मते केवलान्वयिनो वर्तन्ते, तथा खरविषाणादेरप्रामाणिकस्यात्यन्ताभावोऽपि सकलवस्तुनिष्ठत्वेन केवलान्वयित्ववानेव भवति । के-वलान्वयित्वेन विधुरस्त्वत्यन्ताभावो घटत्वादिप्रतियोगिको ज्ञेयः । तस्य घटे वर्तमानत्वेन सकलवस्तु-निष्ठत्वाभावात् । तेन केवलान्वयित्वविधुरात्यन्ताभावप्रतियोगित्वादेव केवलान्वयित्वविधुरात्यन्ता-भावप्रतियोगित्वस्य व्यावृत्तिः सिध्यति, न प्रमेयत्वादेः । एतदुक्तं भवति । अत्यन्ताभावप्रतियोगित्वे-ऽत्यन्ताभावप्रतियोगित्वं स्ववृत्तिविरोधान्नास्तीति स्वस्मादेव स्वव्यावृत्तिमात्रसिद्धौ अर्थान्तरमिति । अथ पुनरत्रैव हेतुदोषं भाषते—**केवलान्वयिन इति । परं प्रतीति ।** परं प्रतिवादिनं प्रतीत्यर्थः । अथा-नुमानान्तरमाशङ्कते—**अत्यन्ताभावेति ।** प्रमेयत्वाद्व्यावृत्तम् प्रमेयत्वव्यावृत्तम् । अत्यन्ताभावप्रति-योगित्वं प्रमेयत्वे न वर्तते इत्यर्थः । अत्यन्ताभावप्रतियोगित्वव्यतिरिक्तत्वे सति ये प्रमेयत्वनिष्ठाः प्रमेयवृत्तित्वादयस्तत्त्वरहितत्वादिति हेतुः । संप्रतिपन्ना वादिप्रतिवादिभ्यां प्रतिपन्ना ये प्रमेयत्वा-निष्ठा द्रव्यत्वघटत्वादयस्तद्वदित्यर्थः । अत्यन्ताभावप्रतियोगित्वं व्यावृत्तमित्युक्ते स्वतो व्यावृत्तत्वे-नार्थान्तरत्वं स्यात् । अत उक्तं प्रमेयत्वव्यावृत्तमिति । अथ हेतुव्यावृत्त्यचिन्ता । प्रमेयत्वनिष्ठत्वर-हितत्वादित्युक्ते प्रतिवादिनं भाट्टादिकं प्रत्यसिद्धिः स्यात्, तन्मतेऽत्यन्ताभावप्रतियोगित्वस्य प्रमेयत्व-निष्ठत्वात् । अत उक्तमत्यन्ताभावप्रतियोगित्वव्यतिरिक्तेति । एवमुक्ते च हेतुरुभयवादिसंमतो जातः । यतः प्रमेयत्वनिष्ठाः सत्त्वप्रमेयवृत्तित्वादयो यथा सन्ति, तथा प्रतिवादिनो मते ऽत्यन्ताभावप्रतियो-गित्वमपि प्रमेयत्वनिष्ठं विद्यते । तच्चात्यन्ताभावप्रतियोगित्वव्यतिरिक्तेति पदेन बहिष्कृतम् । तथा चात्यन्ताभावप्रतियोगित्वव्यतिरिक्ता ये मेयत्वनिष्ठाः, तत्त्वरहितत्वमत्यन्ताभावप्रतियोगित्वस्य पक्षि-तस्यास्त्येवेत्यर्थः । तुल्यबलत्वेन साध्याभावसाधकः प्रकरणसमापरपर्यायः सत्प्रतिपक्षः, तेन कलङ्कितमे-तदिति परिहरति—**नेति ।** प्रमेयत्वे वर्तमानमित्यर्थः—**अत्यन्ताभावेति ।** अत्यन्ताभावप्रतियोगि-त्वव्यतिरिक्ता ये प्रमेयत्वाद्व्यावृत्ताः प्रमेयत्वावर्तमानाः घटत्वपटत्वद्रव्यत्वादयः, तत्त्वरहितत्वादिति हेतुः । अत्रापि प्रमेयत्वव्यावृत्तत्वरहितत्वादित्युक्तेऽत्यन्ताभावप्रतियोगित्वस्य महाविद्यावादिनो मते प्रमेयत्वाद्व्यावृत्तत्वेन पूर्ववद्धेतोरसिद्धता स्यात् । तत्परिहारार्थमत्यन्ताभावप्रतियोगित्वव्यतिरिक्तेति पदमुररीचक्रे । संप्रतिपन्ना ये प्रमेयत्वनिष्ठाः सत्त्ववाच्यत्वादयो धर्मास्तद्वदिति दृष्टान्तः । अत्र संप्र-तिपन्नप्रमेयत्वनिष्ठवदित्यादिनेत्यत्रादिपदेन प्रमेयत्वमत्यन्ताभावप्रतियोगित्वव्यतिरिक्तैतद्धर्मत्वाना-क्रान्ताधिकरणं वस्तुत्वाद्घटवदित्यादीनां संग्रहः । न केवलं सत्प्रतिपक्षत्वं, प्रमेयत्वनिष्ठत्वाभाव-श्चोपाधिरपीत्याह—**तद्विरहेणेति ।** तच्छब्देन[1] सत्प्रतिपक्षानुमाने यत्साध्यं प्रमेयत्वनिष्ठत्वलक्षणं तत्प-रामृश्यते । तस्य विरहोऽभावस्तद्विरहः । तेनात्यन्ताभावप्रतियोगित्वं प्रमेयत्वव्यावृत्तमित्यनुमानस्यो-पाधित्वं, प्रमेयत्वनिष्ठत्वाभावोऽत्रोपाधिरित्यर्थः । स चोपाधिर्यः प्रमेयत्वव्यावृत्तः । स प्रमेयत्वनिष्ठत्वर-हित इति साध्यव्यापकः । तथा योऽत्यन्ताभावप्रतियोगित्वव्यतिरिक्तप्रमेयत्वनिष्ठत्वरहितः स प्रमे-

१ °ब्देन प्रतिप° इति च पुस्तकपाठः ।

दिति । नापि प्रागभावप्रध्वंसाभावान्योन्याभावव्यतिरिक्तसंसृज्यमानघटाभावाभावेन अस्मिन् भूतले घट एतद्भूतलघटसंसर्गो वा आपाद्यते इति युक्तम् । प्रागभावप्रध्वंसाभावव्यतिरिक्तसंसृज्यमानघटाभावस्य अस्मन्मते निष्प्रमाणकत्वेन तदभावस्य गगनादौ घटैतद्भूतलघटसंसर्गव्याप्यत्वभङ्गादिति। नाप्येतद्घटैतद्भूतलाश्रयाश्रयिभावो युष्माकमस्माकं वा प्रसिद्ध इति ।

(मुक्त०)—किं च प्रागभावप्रध्वंसाभावान्योन्याभावरूपाभावत्रयाभावेन आपादकेन घटः आपाद्यते, किं वा तत्त्रयातिरिक्तसंसृज्यमानाभावाभावेनेति द्विधा विकल्प्य आद्ये कल्पे आपाद्यापादकयोर्व्याप्तिविरहात्तर्कस्य प्रशिथिलमूलतेत्याह—किं च घटाभावाभावः इत्यादि । घटप्रागभावेत्यादि । घटे हि घटप्रागभावाद्यभावत्रयाभावसम्भवेन आत्माश्रयतापाताद्घटे घटाभावेन च यत्र घटाभावाभावस्तत्र घट इति व्याप्तिभङ्गात् । इदमत्र तत्त्वम् । अत्र घटाभावाभावः आपादकः, घटश्चापाद्यः । ततो घटे घटप्रागभावप्रध्वंसाभावान्योन्याभावाभावोऽस्ति, न तु घटः इति आपाद्यापादकयोर्व्याप्तिभङ्ग इति । द्वितीयं प्रत्याह—नापीति । संसृज्यमानो भूतलेन सम्बध्यमानो यो घटस्तस्याभावः । प्रागभावादिव्यतिरिक्तश्चासौ संसृज्यमानघटाभावश्च । एवंविधस्याभावत्रयव्यतिरिक्तो घटस्याभावोऽत्यन्ताभाव एव । तस्याभावेनापाद्यते किं तदित्याह—अस्मिन्भूतले घटो वा एतद्भूतलघटसंसर्गो वा । नापि युक्तमिति सम्बन्धः । कुत इत्याह—प्रागभावेत्यादि । प्रागभावादिव्यतिरिक्तस्य संसृज्यमानघटाभावस्य घटात्यन्ताभावस्य अस्मन्मते निष्प्रमाणकत्वेन तदभावस्य संसृज्यमानघटाभावाभावस्य गगनादौ घटसंसर्गसद्भावेन घटस्यैतद्भूतलघटसंसर्गस्य च ताभ्यां यद्व्याप्यत्वं तस्य भङ्गात् । अयं भावः । गगने यदा केनापि घटो मन्त्रशक्त्या स्तम्भितस्तदा गगने घटात्यन्ताभावाभावस्य सद्भावेऽपि, घटैतद्भूतलघटसंसर्गाभावाद्यत्र यत्र व्याप्यस्य घटात्यन्ताभावाभावस्य सद्भावः, तत्र तत्रैतद्भूतलस्थितघटैतद्भूतलघटसंसर्गयोर्व्यापकयोरभावेन घटैतद्भूतलघटसंसर्गाभ्यां घटात्यन्ताभावाभावस्य व्याप्यत्वभङ्गः स्यादेवेति । एतद्घटैतद्भूतलाश्रयाश्रयिभावस्य अप्रामाणिकत्वं नास्मत्सिद्धान्तमात्रसिद्धं, किन्तु भवतोऽपि संमतमित्याह—नाप्येतद्घटैतद्भूतलेत्यादि । इदमत्रैदम्पर्यम् । यस्य घटस्यान्यदेशस्थस्य एतद्भूतलेन सह संसर्गो न जातो, नापि भविष्यति, तस्य घटस्यैतद्भूतलेन सह संसर्गो निषिध्यते । स च युष्माकमस्माकं वा अप्रामाणिकत्वेन असिद्ध एव । प्रसिद्धत्वे निषेधासिद्धेरिति ।

अथ एतद्घटैतद्भूतलाश्रयाश्रयिभावस्य अप्रामाणिकत्वात्तदभावोऽपि प्रामाणिको न स्यात् । न हि अप्रामाणिकोऽभावः प्रामाणिको नामेत्यभिधत्से । तन्न । किमत्र अप्रामाणिकाभावत्वेन एतद्घटैतद्भूतलाश्रयाश्रयिभावाभावस्य अप्रामाणिकत्वमनुमीयते, किं वा अप्रामाणिकाभावत्वेन अप्रामाणिकत्वमापाद्यते । नाद्यः । अप्रामाणिकाभावस्य प्रमितत्वे विरोधात् । अप्रमितत्वे चाश्रयासिद्धेः । अप्रामाणिकाभावप्रतीतिमनङ्गीकुर्वतो भवतो हेत्वप्रमितेश्चेति । नापि

(भुवन०)—अथानादिः सान्तः प्रागभावः, सादिरनन्तः प्रध्वंसाभावः, तादात्म्यनिषेधोऽन्योन्याभावः, अनादिरनन्तः संसर्गाभावोऽत्यन्ताभावः, इति चतुर्धाऽभावः। तत्रात्यन्ताभावे प्रमाणमनुभव एवेत्यारेकते—**अथान्योन्यप्राक्प्रध्वंसेत्यादि**। घटस्य यः इह भूतलेऽत्यन्तमभावः, सोऽन्योन्याभावप्रागभावप्रध्वंसाभावत्रयाव्यतिरिक्तो भिन्नः। पुनः किंविशिष्टः—**संसृज्यमानप्रतियोगिनिरूप्य इति**। भूतलादिना संसृज्यमानः संश्लिष्यमाणो यो घटादिः प्रतियोगी तेन निरूप्योऽत्यन्ताभावः। **तत्प्रतियोगित्वं चेति**। तस्य अत्यन्ताभावस्य प्रतियोगित्वं तत्प्रतियोगित्वं, तदेव चात्यन्ताभावप्रतियोगित्वम्। **कुम्भादिनिष्ठमनुभवसिद्धमिति**। प्रत्यक्षप्रमाणसिद्धमित्यर्थः। अनुभवस्यान्यथैवोपपत्त्या परोक्तं तिरस्करोति—**तन्नेति**। आश्रयाश्रयिभावेति। आश्रयो भूतलम्, आश्रयी घटः, तयोर्भाव आश्रयाश्रयिभावः। एतद्घटैतद्भूतलयोर्यत्राश्रयाश्रयिभावः सम्बन्धस्तदत्यन्ताभावस्यैवानुभवसिद्धत्वात्। अयं भावः। इह भूतले एतद्घटो नास्तीत्ययं घटस्यात्यन्ताभावो न भवति, किं त्वयमाश्रयाश्रयिभावस्यैवात्यन्ताभावः। यतोऽत्रायं घटो न निषिध्यते, अपि तु एतद्घटैतद्भूतलयोः संसर्गो निषिध्यते। स चाप्रामाणिक एव। तस्य तत्रासत्त्वेन काल्पनिकत्वात्। तस्य तत्रासत्त्वं च यस्य घटस्यैतद्भूतलेन आश्रयाश्रयिभावो न जातो, नापि भविष्यति, तस्य घटस्यैतद्भूतलेनाश्रयाश्रयिभावस्य निष्प्रमाणकस्य विवक्षितत्वात्। अतोऽप्रामाणिकैतद्घटैतद्भूतलाश्रयाश्रयिभावात्यन्ताभावस्यैव प्रत्यक्षसिद्धत्वान्न घटस्यात्यन्ताभावोऽयमिति।

अथ यदीह भूतले घटाभावाभावः, तर्हि घटः स्यादिति ब्रूषे। तन्न। किमत्र एतद्घटैतद्भूतलसंसर्गः आपाद्यते किंवा घटः। आद्ये आपाद्यासिद्धिः। द्वितीये तु इष्टापादनम्। क्वचिद् घटस्याप्यङ्गीकारात्।

(भुवन०)—अथ घटाभावेऽपोद्यमाने हि घटभाव एवावशिष्यते इति शङ्कते—**अथ यदीहेत्यादि**। घटस्य अभावो घटाभावः, तस्याप्यभावो घटाभावाभावो, घट इत्यर्थः। "द्वौ नञौ समाख्यातौ पूर्वोक्तमेवार्थं गमयतः" इति न्यायात्। विकल्पद्वयेन एतत्परिहरति—**तन्नेति**। अत्रेति भूतले। **आद्य इति**। आद्ये विकल्पे आपाद्यस्य एतद्घटैतद्भूतलसंसर्गस्यासिद्धिः। यतोऽत्र भूतले यदि घटाभावाभावः स्यात्, तर्ह्येतद्घटैतद्भूतलसंसर्गः स्यादित्यत्रैतद्घटैतद्भूतलसंसर्गः आपाद्यः। स चासिद्ध एव। अनिष्टप्रसञ्जनार्थमेवोक्तत्वेन तत्र तस्य काल्पनिकत्वादिति। यदीह भूतले घटाभावाभावः, तर्ह्येतद्घटैतद्भूतलसंसर्गः स्यादित्यत्र तर्के आपाद्यासिद्धिर्नाम तर्कदूषणं स्यादिति न प्रथमो विकल्पोऽङ्गीकारार्हः इति भावार्थः—**द्वितीये त्विष्टापादनमिति**। घटाभावाभावे सति क्वापि भूतलादौ घटस्याप्यङ्गीकारात्।

किञ्च घटाभावाभावः किं घटप्रागभावस्याभावः, किंवा घटप्रध्वंसस्याभावः, किंवा घटान्योन्याभावस्याभावः। त्रयमपि न। घटप्रागभावप्रध्वंसान्योन्याभावाभाववति घटे घटस्याविद्यमानत्वेन आपाद्यापादकयोर्व्याप्त्यसिद्ध्या[1]भङ्गा-

१ 'योर्व्याप्त्यभावात्। ना' इति घ पुस्तक पाठः।

दिति। नापि प्रागभावप्रध्वंसाभावान्योन्याभावव्यतिरिक्तसंसृज्यमानघटाभावाभावेन अस्मिन् भूतले घट एतद्भूतलघटसंसर्गो वा आपाद्यते इति युक्तम्। प्रागभावप्रध्वंसाभावव्यतिरिक्तसंसृज्यमानघटाभावस्य अस्मन्मते निष्प्रमाणकत्वेन तदभावस्य गगनादौ घटैतद्भूतलघटसंसर्गव्याप्यत्वभङ्गादिति। नाप्येतद्घटैतद्भूतलाश्रयाश्रयिभावो युष्माकमस्माकं वा प्रसिद्ध इति।

(भुवन०)—किं च प्रागभावप्रध्वंसाभावान्योन्याभावरूपाभावत्रयाभावेन आपादकेन घटः आपाद्यते, किं वा तत्रयातिरिक्तसंसृज्यमानाभावाभावेनेति द्विधा विकल्प्य आद्ये कल्पे आपाद्यापादकयोर्व्याप्तिविरहात्तर्कस्य प्रशिथिलमूलतेत्याह—किं च घटाभावाभावः इत्यादि। घटप्रागभावेत्यादि। घटं हि घटप्रागभावाद्यभावत्रयाभावत्वसम्भवेन आत्माश्रयतापाताद्घटे घटाभावेन च यत्र घटाभावाभावस्तत्र घट इति व्याप्तिभङ्गात्। इदमत्र तत्त्वम्। अत्र घटाभावाभावः आपादकः, घटश्चापाद्यः। ततो घटे घटप्रागभावप्रध्वंसाभावान्योन्याभावाभावोऽस्ति, न तु घटः इति आपाद्यापादकयोर्व्याप्तिभङ्ग इति। द्वितीयं प्रत्याह—नापीति। संसृज्यमानो भूतलेन सम्बद्ध्यमानो यो घटस्तस्याभावः। प्रागभावादिव्यतिरिक्तश्चासौ संसृज्यमानघटाभावश्च। एवंविधश्चाभावत्रयव्यतिरिक्तो घटस्याभावोऽत्यन्ताभाव एव। तस्याभावेनापाद्यते किं तदित्याह—अस्मिन्भूतले घटो वा एतद्भूतलघटसंसर्गो वा। नापि युक्तमिति सम्बन्धः। कुत इत्याह—प्रागभावेत्यादि। प्रागभावादिव्यतिरिक्तस्य संसृज्यमानघटाभावस्य घटात्यन्ताभावस्य अस्मन्मते निष्प्रमाणकत्वेन तदभावस्य संसृज्यमानघटाभावाभावस्य गगनादौ घटसंसर्गासद्भावेन घटश्चैतद्भूतलघटसंसर्गश्च ताभ्यां यद्व्याप्यत्वं तस्य भङ्गात्। अयं भावः। गगने यदा केनापि घटो मन्त्रशक्त्या स्तम्भितस्तदा गगने घटात्यन्ताभावाभावस्य सद्भावेऽपि, घटैतद्भूतलघटसंसर्गाभावाद्यत्र यत्र व्याप्यस्य घटात्यन्ताभावाभावस्य सद्भावः, तत्र तत्रैतद्भूतलस्थितघटैतद्भूतलघटसंसर्गयोर्व्यापकयोरभावेन घटैतद्भूतलघटसंसर्गाभ्यां घटात्यन्ताभावाभावस्य व्याप्यत्वभङ्गः स्यादेवेति। एतद्घटैतद्भूतलाश्रयाश्रयिभावस्य अप्रामाणिकत्वं नास्मत्सिद्धान्तमात्रसिद्धं, किन्तु भवतोऽपि संमतमेवेत्याह—नाप्येतद्घटैतद्भूतलेत्यादि। इदमत्रैदम्पर्यम्। यस्य घटस्यान्यदेशस्थस्य एतद्भूतलेन सह संसर्गो न जातो, नापि भविष्यति, तस्य घटस्यैतद्भूतलेन सह संसर्गो निषिध्यते। स च युष्माकमस्माकं वा अप्रामाणिकत्वेन अप्रसिद्ध एव। प्रसिद्धत्वे निषेधासिद्धेरिति।

अथ एतद्घटैतद्भूतलाश्रयाश्रयिभावस्य अप्रामाणिकत्वात्तदभावोऽपि प्रामाणिको न स्यात्। न हि अप्रामाणिकोऽभावः प्रामाणिको नामेत्यभिधत्से। तन्न। किमत्र अप्रामाणिकाभावत्वेन एतद्घटैतद्भूतलाश्रयाश्रयिभावाभावस्य अप्रामाणिकत्वमनुमीयते, किंवा अप्रामाणिकाभावत्वेन अप्रामाणिकत्वमापाद्यते। नाद्यः। अप्रामाणिकाभावस्य प्रमितत्वे विरोधात्। अप्रमितत्वे चाश्रयासिद्धेः। अप्रामाणिकाभावप्रतीतिमङ्गीकुर्वतो भवतो हेत्वप्रमितेश्चेति। नापि

द्वितीयः । अप्रामाणिकाभावत्वाप्रामाणिकत्वयोः क्वचिदपि व्याप्त्यसिद्धेर्मूलशैथिल्यादिति । पूर्ववदापाद्यापादकयोरप्रसिद्धेश्च ।

(भुवन०)—अथ आश्रयाश्रयिभावस्याप्रामाणिकत्वात्तदभावस्याप्यप्रामाणिकत्वमिति शङ्कते— **अथैतद्धटैतद्भूतलेत्यादि । तदभावोऽपीति ।** एतद्धटैतद्भूतलाश्रयाश्रयिभावाभावोऽपीत्यर्थः । अत्र युक्तिमाह—**नहीत्यादि ।** अप्रामाणिकस्य आश्रयिभावादेरभावोऽप्रामाणिकाभावः । अभावनिरूपकत्वात्प्रतियोगिनः, तदभावोऽपि तत्समान एव न्याय्य इत्यर्थः । विकल्पासहत्वेन परोदितं दूषयति—**तन्नेति । अप्रामाणिकाभावत्वेनेति ।** अप्रामाणिकस्याभावोऽप्रामाणिकाभावः, तस्य भावस्तत्त्वं, तेन । **अप्रमाणिकत्वमनुमीयते इति ।** एतद्धटैतद्भूतलाश्रयाश्रयिभावाभावोऽप्रामाणिकः अप्रामाणिकाभावत्वात् खरविषाणाभाववदित्यनुमानं क्रियते । **किं वाप्रामाणिकेति ।** अप्रामाणिकस्याभावत्वेनाप्रामाणिकत्वमापाद्यते । यः एवापाद्यते स एव तर्कः, 'आपाद्याभिन्नत्वात्तर्कस्ये'ति वचनादनिष्टापादनरूपस्तर्को वापाद्यत इति । एतावता इदमनुमानमापाद्यरूपस्तर्को वेति विकल्पौ इत्यर्थः। आद्ये विकल्पेऽप्रामाणिकाभावः प्रमितो न वेति द्वेधा विकल्प्य, क्रमेण दूषणोद्घोषणां विधत्ते— **अप्रामाणिकाभावस्येति ।** अप्रामाणिकस्य अभाव इति समासः । **विरोधादिति ।** यदि अप्रामाणिकाभावस्तर्हि कथं प्रमितः, अप्रामाणिकस्य प्रमाणाग्राह्यत्वेन तदभावस्यापि तथात्वादित्यभिप्रायेण विरोध इत्यर्थः । **अप्रमितत्वे इति ।** अप्रामाणिकस्य आश्रयाश्रयिभावस्याभावः पक्षीकृतो यद्यप्रमितः प्रमाणेन न गृहीतः, तर्हि तस्मिन्नप्रमिते खरविषाणे इव प्रवर्तमानोऽप्रामाणिकाभावत्वादिति हेतुराश्रयासिद्धः स्यादित्यभिप्रायः । अथाप्रामाणिकाभावत्वादित्ययं हेतुरसिद्ध इत्याह— **अप्रामाणिकाभावप्रतीतिमिति । हेत्वप्रमितेश्चेति ।** अप्रामाणिकाभावत्वादिहेतोर्भवन्मतेऽप्रामाणिकत्वादप्रसिद्धत्वेनासिद्धत्वमित्यर्थः । अथ द्वितीयं विकल्पमुत्थापयति । **नापि द्वितीय इति ।** अप्रामाणिकत्वमापाद्यते इत्येवंरूपो द्वितीयोऽपि न । **अप्रामाणिकाभावेति ।** अप्रामाणिकाभावत्वं व्याप्यम् । अप्रामाणिकत्वं व्यापकम् । तयोश्च यत्र अप्रामाणिकाभावत्वं तत्र अप्रामाणिकत्वमिति व्याप्त्यसिद्धेर्व्याप्त्यनुपपत्तेः । यतो विवक्षितभूतलेऽप्रामाणिकाश्रयाश्रयिभावाभावोऽप्रामाणिको न भवत्यस्माकं मते । तस्य चाक्षुषत्वेन प्रामाणिकत्वात् । **मूलशैथिल्यादिति ।** तर्कस्य हि मूलं व्याप्तिः, तस्याश्चात्रासिद्धेः प्रशिथिलमूलतापरपर्यायो मूलशैथिल्याख्यस्तर्कदोषः स्यादेवेत्यर्थः । तथा अप्रामाणिकाभावप्रतीतिमनङ्गीकुर्वतो भवतः आपादकादेरसिद्धिरपि तर्कदोषः स्यादित्याह— **पूर्ववदापाद्यापादकयोरप्रसिद्धेश्चेति ।** व्याप्योऽप्रामाणिकाभाव आपादकः, व्यापकमप्रामाणिकत्वमापाद्यं तयोरप्रसिद्धेरिति । आपादकादिकं हि प्रसिद्धं वाच्यम् । तच्च भवन्मतेऽप्रामाणिकत्वेनाप्रसिद्धमिति युक्तं तदप्रसिद्ध्याख्यानमित्यर्थः ।

ननु असति तस्मिन् कस्याभावः इति चेत् । यस्मिन् असतीति त्वयोच्यते तस्यैव ।

(भुवन०)—अथ 'यदस्ति तन्मेयमि'ति नियमादप्रामाणिकत्वेन प्रतियोगिनः एतद्धटैतद्भूतलाश्रयाश्रयिभावादेरसत्त्वात् अभावो न स्यान्निरूपकाभावादित्याशङ्कते—**नन्वित्यादि ।**

तस्मिन्नाश्रयाश्रयिभावादौ प्रतियोगिनि असति असद्भूते कस्याभावः स्यादित्यर्थः। पराशङ्कां मत्वा सिद्धान्ती प्रतिविधत्ते—यस्मिन्नसतीति। नन्वसति तस्मिन्नित्यत्र असतीति यस्मिन्विषये त्वयोच्यते, तस्यैवायमभावः। एतावता असत एवायमभाव इत्यर्थः।

अथ अभावविरहरूपत्वं प्रतियोगित्वम्, तच्चाप्रामाणिकस्य न घटते इत्युच्यते। तन्न। अभावतद्धर्मादिव्यतिरिक्तस्य अप्रामाणिकाभाव इत्येतत्प्रतीतिगोचरस्य अप्रामाणिकाभावप्रतियोगित्वेन अप्रामाणिकाभाववादिभिः पूर्वाचार्यैरङ्गीकारात्। वयं तु निष्प्रतियोगिकमेवात्यन्ताभावं ब्रूमः। प्रतियोगित्वं हि धर्मविशेषः, न चासावप्रामाणिके संभवति।

(भुवन०)—अथ प्रतियोगित्वलक्षणप्रणयनपूर्वकमप्रामाणिकस्य प्रतियोगित्वाभावमाशङ्कते—अथाभावविरहरूपत्वमिति। अभावस्य असद्रूपस्य यो विरहोऽभावस्तद्रूपत्वं प्रतियोगित्वम्। भावरूपत्वं प्रतियोगित्वमिति भावः। तच्चेति। तच्चैवंविधं प्रतियोगित्वमप्रामाणिकस्य असत्त्वेन न घटत इत्यर्थः। अभावानाश्रयत्वेऽभावादन्यत्वे च सति अभावप्रतीतिविषयत्वं प्रतियोगित्वमिति परिहरति—तन्नेति। अभावतद्धर्मादीति। [illegible], अभावतद्धर्माः। आदिपदेन प्रमातृसंग्रहः। [illegible]। अप्रामाणिकेति। अप्रामाणिकस्य प्रमाणागोचरस्य वस्तुनोऽयमभावः इत्येवं[illegible] प्रतियोगित्वेन [illegible]पूर्वाचार्यैरङ्गीकारादित्यर्थः। अथ [illegible]—वयमिति। अत्यन्ताभावस्य कोऽपि प्रतियोगी नास्तीति वयं ब्रूम इत्यर्थः। [illegible]—प्रतियोगित्वं हीत्यादि।

ननु यदि न अप्रामाणिके अभावप्रतियोगित्वं, कथं तर्ह्यप्रामाणिकोऽभावः इति। अप्रामाणिकाभावस्वरूपधर्माश्रयत्वादित्यवेहि।

(भुवन०)—[illegible] इति [illegible] —ननु यदीत्यादि। [illegible] इत्यर्थः। [illegible]—[illegible]। [illegible]।

अथ [illegible] प्रति[illegible] योगि[illegible]। [illegible]। [illegible]। [illegible]।

१ [illegible]

योग्यता नास्ति। तेन योग्यतासहितानुपलब्धेरसम्भवादप्रामाणिकाभावप्रमितेरनुपपत्तिरिति मन्यसे, तन्न। चाक्षुषयोरप्रामाणिकाश्रयाश्रयिभावाभावस्य चाक्षुषत्वाङ्गीकारात्। एवं त्वगादिगम्ययोरप्रामाणिकाश्रयाश्रयिभावाभावस्य त्वगादिगम्यत्वात्, योग्यानुपलब्धेस्त्वभावप्रमाजनकत्वमस्माकमनभिमतमेवेति न किञ्चिदेतत्।

(भुवन०)—परः 'अथ योग्यानुपलब्धी'त्यादि 'इति मन्यसे' इत्यन्तामप्रामाणिकाभावस्य प्रमित्यनुपपत्तिमाशङ्कते—**अथ योग्यानुपलब्धीत्यादि**। योग्यस्य घटादेरनुपलब्धिरनुपलम्भस्तया गम्यो ज्ञेयो ह्यभावः। यत्र दर्शनयोग्यस्य घटादेरनुपलब्धिस्तत्र तस्याभावः। यथा आलोकादिसामग्र्यां सत्यां मुण्डभूतले घटादेरभावः। अत्र योग्यानुपलब्धीत्युक्तं, अतो योग्यतालक्षणमाख्याति—**प्रतियोगितद्धर्मेति**। प्रतियोगिनो घटादयः, तद्धर्माः घटत्वादयः, तेभ्यो व्यतिरिक्ता आलोकसद्भावादिका प्रतियोगिप्रतीतिकारिणी सामग्री योग्यता इत्युच्यते। प्रतियोगितद्धर्मव्यतिरिक्ता प्रतियोगिप्रमापकसामग्री योग्यतेत्यर्थः। प्रामाणिकप्रतियोगिनः सामग्रीमुक्त्वा अप्रामाणिकप्रतियोगिनस्तामाह—**अप्रामाणिकप्रतीतीति**। अप्रामाणिको निषेध्यमान आश्रयाश्रयिभावादिः तस्य या प्रतीतिः, तस्या या सामग्री सा पुनर्भ्रान्तिसामग्र्येव। प्रतियोगितद्धर्मयोः प्रतियोगिप्रतीतिहेतुत्वाद्योग्यतान्तर्भावः किं न स्यादत्राह—**सा च प्रतियोगीत्यादि**। सा च भ्रान्तिसामग्री। प्रतियोगी अप्रामाणिकः, तद्धर्माश्च अप्रामाणिकत्वादयस्तद्व्यतिरिक्तैवेत्यर्थः। तथापि योग्यानुपलब्धेरभावप्रमापकत्वे प्रकृते किमायातमित्यत आह—**तस्यां च सत्यामिति**। तस्यां भ्रान्तिसामग्र्यां सत्यामालोकाद्यपेक्षणीयान्तराभावादप्रामाणिकस्यानुपलब्धिर्नास्ति, किं तु अप्रामाणिकस्य सर्वदोपलब्धिरेवास्ति। भ्रान्तिसामग्र्यां भ्रान्त्युत्पत्तिनियमादित्यर्थः। यदि चाप्रामाणिकस्यानुपलब्धिरङ्गीक्रियते, तदा किं स्यादित्यत आह—**अनुपलब्धौ चेति**। यद्यप्रामाणिकस्यानुपलब्धिः स्यात्, तदा तस्यां सत्यामप्रामाणिकोपलम्भसामग्रीरूपा या योग्यता सैव नास्ति। तस्यां सत्यामुपलब्धेरेव सम्भवात्। अथ फलितं प्रादुष्करीकरीति—**तेन योग्यतेत्यादि**। तेन कारणेन योग्यतासहितस्य अप्रामाणिकस्य या अनुपलब्धिस्तस्या असम्भवादप्रामाणिकस्य खरविषाणादेर्योऽभावस्तत्र या प्रमितिः प्रमाणं, तस्या अनुपपत्तिरघटमानतेति पदान्वयः। भावार्थस्त्वयम्। अप्रामाणिकं शशशृङ्गादि यद्वस्तु नवाद्यमस्ति, तादृशं सर्वदैवास्ति, तस्य तुच्छत्वात्प्रकाशादिकारणान्तरानपेक्षत्वेन घटादिवत्कादाचित्कोपलम्भानुपलम्भासम्भवात्। तस्य च सामग्र्यपि भ्रान्तिरूपा यादृक्षास्ति तादृशी सर्वदैवास्ति। अतोऽप्रामाणिकस्य सर्वदा प्रतीतिसामग्रीसद्भावेन अनुपलब्धेरसम्भवात्सर्वदोपलब्धिरेव स्यात्। तथा चाप्रामाणिकस्य सर्वदोपलभ्यमानत्वेन योग्यानुपलब्धिगम्यत्वलक्षणोऽभाव एव न स्यादिति कथं तत्राभावे प्रमाणमुपपद्यत इति। मन्यस इति पर्यन्तं परोक्तमाशङ्क्य अप्रामाणिकाभावस्य प्रत्यक्ष... गम्यत्वमभ्युपगम्य सिद्धान्ती प्रतिविधत्ते—तन्नेति। चाक्षुषयोश्चक्षुर्ग्राह्ययोः घटभूतलयोर्योऽप्रामाणिक... आश्रयाश्रयिभावस्तदभावस्य चाक्षुषत्वाङ्गीकारात्। अयमाशयः। तथा अप्रामाणिकाभावे ... ...त्वात् तन्मते। अस्माकं तु मते तत्र प्रत्यक्षमेव प्रमाणं स्फुरतीति।

एवं त्वगादीति । त्वक् चर्म, स्पर्शनेन्द्रियमिति यावत् । आदिपदेन जिह्वादीनां ग्रहः । घोरान्धकारनिकरे त्वगादिना गम्ययोर्ज्ञेययोरेतद्घटैतद्भूतलादिकयोरेव योऽयमप्रामाणिकः आश्रयाश्रयिभावस्तदभावस्य त्वगादिगम्यत्वात् स्पार्शनप्रत्यक्षज्ञेयत्वादित्यर्थः । योग्यतासहितानुपलब्धेरसम्भवादिति यदुक्तं तत्रत्याह—योग्यानुपलब्धेरित्यादि । अभावस्य या प्रमा प्रमितिस्तज्जनकत्वं योग्यानुपलब्धेरस्माकं नाभिमतमिति पूर्वोक्तं दूषणं न किञ्चिदित्यर्थः ।

न च कारणाभावादत्यन्तासद्गोचरानुभवाभावेन प्रतियोगिस्मृत्यनुपपत्तौ तदभावप्रमानुपपत्तिरिति युक्तम् । एतद्घटैतद्भूतलाश्रयाश्रयिभावादेर्वाक्यादिभ्योऽनुभवात् ।

(भुवन०)—प्रतियोगिनोऽप्रामाणिकस्य पूर्वानुभवसंस्कारस्यपद्धयाभावात्तत्स्मृतेरभावेन तदभावप्रमितिर्न स्यादत्राह—न च कारणाभावादित्यादि । अत्यन्तमसद्रूपं खरविषाणादि, तद्गोचरो योऽनुभवस्तस्याभावेन कुतस्तदभावः इत्याह—कारणाभावादिति । तथाविधं किञ्चित्कारणं नास्ति येनात्यन्तासतोऽनुभवः स्यादित्यर्थः, इत्यनुभवाभावेन प्रतियोगिनोऽप्रामाणिकस्य स्मृत्यनुपपत्तौ । तदभावेति । तस्यात्यन्तासतो योऽभावस्तत्र प्रमायाः प्रत्यक्षादेः प्रमितेरनुपपत्तिरिति न च युक्तमिति संटङ्कः । अत्र हेतुमाह—एतद्घटैतद्भूतलेत्यादिवाक्यादिभ्य इति । अत्र आदिपदेन लिङ्गाभाससंग्रहः ।

न च एतद्घटैतद्भूतलयोराश्रयाश्रयिभावस्य जातत्वाज्जनिष्यमाणत्वाद्वा कथं तस्यात्यन्ताभाव इति वाच्यम् । यस्य घटस्य एतद्भूतलाश्रयाश्रयिभावो न जातो, नापि भविष्यति, तस्य घटस्य एतद्भूतलेन आश्रयाश्रयिभावो निष्प्रमाणक इति तदभावस्यात्यन्ताभावत्वेन स्वीकारात् ।

(भुवन०)—एतद्घटैतद्भूतलसंयोगस्य जातत्वाज्जनिष्यमाणत्वाद्वा अत्यन्ताभावस्त्रिकालवर्तमानोऽयुक्त इत्याशङ्क्याह—न चैतद्घटैतादित्यादि । इति न च वाच्यमिति सम्बन्धः । अयमर्थः । यत्सर्वथा असद्रूपं खरविषाणादि, तस्यैवात्यन्ताभावो युक्तः, विवक्षितयोरेतयोस्तु घटभूतलयोराश्रयाश्रयिभावो जातो वा भावी वेति कथं तस्यात्यन्ताभावो युक्तिमानिति पराशङ्कां प्रदर्श्य सिद्धान्तवादी गूढस्वाभिप्रायमाविर्भावयति—यस्य घटस्येत्यादि । यस्य घटस्य एतद्भूतलेन सह आश्रयाश्रयिभावः सम्बन्धः कदापि न जातो नापि भावी, तस्य घटस्यैतद्भूतलेन विवक्षितभूतलेनाश्रयाश्रयिभावो निष्प्रमाणकः प्रमाणाभावः । प्रत्यक्षादेः प्रमाणस्य तत्रानुदयादिति, तदभावस्यैतद्घटैतद्भूतलाप्रमाणिकाश्रयाश्रयिभावाभावस्यैव अत्यन्ताभावत्वेन स्वीकारादिति पदार्थः ।

यद्वा एतद्घटैतद्भूतलयोराश्रयाश्रयिभावो जातो भविष्यति वा, तदुभयव्यतिरिक्तो यः एतद्घटैतद्भूतलयोराश्रयाश्रयिभावो निष्प्रमाणकः, तस्याभावोऽत्यन्ताभावः । यः पुनरेतद्घटैतद्भूतलयोराश्रयाश्रयिभाव आसीत्, तस्येदानीमभावः प्रध्वंसः । यः पुनरेतद्घटैतद्भूतलयोराश्रयाश्रयिभावो भविष्यति, तस्येदानीमभावः प्रागभाव इति व्यवस्था ।

योग्यता नास्ति। तेन योग्यतासहितानुपलब्धेरसम्भवादप्रामाणिकाभावप्रमितेरनुपपत्तिरिति मन्यसे, तन्न। चाक्षुषयोरप्रामाणिकाश्रयाश्रयिभावाभावस्य चाक्षुषत्वाङ्गीकारात्। एवं त्वगादिगम्ययोरप्रामाणिकाश्रयाश्रयिभावाभावस्य त्वगादिगम्यत्वात्, योग्यानुपलब्धेस्त्वभावप्रमाजनकत्वमस्माकमनभिमतमेवेति न किञ्चिदेतत्।

(भुवन०)—परः 'अथ योग्यानुपलब्धी'त्यादि 'इति मन्यसे' इत्यन्तामप्रामाणिकाभावस्य प्रमित्यनुपपत्तिमाशङ्कते—**अथ योग्यानुपलब्धीत्यादि**। योग्यस्य घटादेरनुपलब्धिरनुपलम्भस्तया गम्यो ज्ञेयो ह्यभावः। यत्र दर्शनयोग्यस्य घटादेरनुपलब्धिस्तत्र तस्याभावः। यथा आलोकादिसामग्र्यां सत्यां मुण्डभूतले घटादेरभावः। अत्र योग्यानुपलब्धीत्युक्तं, अतो योग्यतालक्षणमाख्याति—**प्रतियोगितद्धर्मेति**। प्रतियोगिनो घटादयः, तद्धर्माः घटत्वादयः, तेभ्यो व्यतिरिक्ता आलोकसद्भावादिका प्रतियोगिप्रतीतिकारिणी सामग्री योग्यता इत्युच्यते। प्रतियोगितद्धर्मव्यतिरिक्ता प्रतियोगिप्रमापकसामग्री योग्यतेत्यर्थः। प्रामाणिकप्रतियोगिनः सामग्रीमुक्त्वा अप्रामाणिकप्रतियोगिनस्तामाह—**अप्रामाणिकप्रतीतीति**। अप्रामाणिको निषेध्यमान आश्रयाश्रयिभावादिः तस्य या प्रतीतिः, तस्या या सामग्री सा पुनर्भ्रान्तिसामग्र्येव। प्रतियोगितद्धर्मयोः प्रतियोगिप्रतीतिहेतुत्वाद्योग्यतान्तर्भावः किं न स्यादत्राह—**सा च प्रतियोगीत्यादि**। सा च भ्रान्तिसामग्री। प्रतियोगी अप्रामाणिकः, तद्धर्माश्च ह्यप्रामाणिकत्वादयस्तद्व्यतिरिक्तैवेत्यर्थः। तथापि योग्यानुपलब्धेरभावप्रमापकत्वे प्रकृते किमायातमित्यत आह—**तस्यां च सत्यामिति**। तस्यां भ्रान्तिसामग्र्यां सत्यामालोकाद्यपेक्षणीयान्तराभावादप्रामाणिकस्यानुपलब्धिर्नास्ति, किं तु अप्रामाणिकस्य सर्वदोपलब्धिरेवास्ति। भ्रान्तिसामग्र्यां भ्रान्त्युत्पत्तिनियमादित्यर्थः। यदि चाप्रामाणिकस्यानुपलब्धिरङ्गीक्रियते, तदा किं स्यादित्यत आह—**अनुपलब्धौ चेति**। यद्यप्रामाणिकस्यानुपलब्धिः स्यात्, तदा तस्यां सत्यामप्रामाणिकोपलम्भसामग्रीरूपा या योग्यता सैव नास्ति। तस्यां सत्यामुपलब्धेरेव सम्भवात्। अथ फलितं प्रादुष्करीकरीति—**तेन योग्यतेत्यादि**। तेन कारणेन योग्यतासहितस्य अप्रामाणिकस्य या अनुपलब्धिस्तस्या असम्भवादप्रामाणिकस्य खरविषाणादेर्योऽभावस्तत्र या प्रमितिः प्रमाणं, तस्या अनुपपत्तिरघटमानतेति पदान्वयः। भावार्थस्त्वयम्। अप्रामाणिकं शशशृङ्गादि यद्वस्तु तद्यादृशमस्ति, तादृशं सर्वदैवास्ति, तस्य तुच्छत्वात्प्रकाशादिकारणान्तरानपेक्षत्वेन घटादिवत्कादाचित्कोपलम्भानुपलम्भासम्भवात्। तस्य च सामग्र्यपि भ्रान्तिरूपा यादृश्यस्ति तादृशी सर्वदैवास्ति। अतोऽप्रामाणिकस्य सर्वदा प्रतीतिसामग्रीसद्भावेन अनुपलब्धेरसम्भवात्सर्वदोपलब्धिरेव स्यात्। तथा चाप्रामाणिकस्य सर्वदोपलभ्यमानत्वेन योग्यानुपलब्धिगम्यत्वलक्षणोऽभाव एव न स्यादिति कथं तत्राभावे प्रमाणमुपपद्यत इति। मन्यस इति पर्यन्तं परोक्तमाशङ्क्य अप्रामाणिकाभावस्य प्रत्यक्षत्वाभ्युपगमेन सिद्धान्ती प्रतिविवक्ते—**तन्नेति**। चाक्षुषयोश्चक्षुर्ग्राह्ययोः घटभूतलयोर्योऽप्रामाणिकाश्रयाश्रयिभावस्तदभावस्य चाक्षुषत्वाङ्गीकारात्। अयमाशयः। त्वया अप्रामाणिकाभावे प्रमितेरनुपपत्तिरुक्ता। अस्माकं तु मते तत्र प्रत्यक्षमेव प्रमाणं स्फुरतीति।

एवं त्वगादीति । त्वक् चर्म, स्पर्शनेन्द्रियमिति यावत् । आदिपदेन जिह्वादीनां ग्रहः । घोरान्धकारनिकरे त्वगादिना गम्ययोर्द्वयोरेतद्घटैतद्भूतलादिकयोरेव योऽयमप्रामाणिकः आश्रयाश्रयिभावस्तदभावस्य त्वगादिगम्यत्वात् स्पार्शनप्रत्यक्षज्ञेयत्वादित्यर्थः । योग्यतासहितानुपलब्धेरसम्भवादिति यदुक्तं तत्रत्याह—योग्यानुपलब्धेरित्यादि । अभावस्य या प्रमा प्रमितिस्तज्जनकत्वं योग्यानुपलब्धेरस्माकं नाभिमतमिति पूर्वोक्तं दूषणं न किञ्चिदित्यर्थः ।

न च कारणाभावादत्यन्तासद्गोचरानुभवाभावेन प्रतियोगिस्मृत्यनुपपत्तौ तदभावप्रमानुपपत्तिरिति युक्तम् । एतद्घटैतद्भूतलाश्रयाश्रयिभावादेर्वाक्यादिभ्योऽनुभवात् ।

(भुवन०)—प्रतियोगिनोऽप्रामाणिकस्य पूर्वानुभवसंस्कारस्वपद्वयाभावात्तत्स्मृतेरभावेन तदभावप्रमितिर्न स्यादत्राह—न च कारणाभावादित्यादि । अत्यन्तमसद्रूपं खरविषाणादि, तद्गोचरो योऽनुभवस्तस्याभावेन कुतस्तदभावः इत्याह—कारणाभावादिति । तथाविधं किञ्चित्कारणं नास्ति येनात्यन्तासतोऽनुभवः स्यादित्यर्थः, इत्यनुभवाभावेन प्रतियोगिनोऽप्रामाणिकस्य स्मृत्यनुपपत्तौ । तदभावेति । तस्यात्यन्तासतो योऽभावस्तत्र प्रमायाः प्रत्यक्षादेः प्रमितेरनुपपत्तिरिति न च युक्तमिति संटङ्कः । अत्र हेतुमाह—एतद्घटैतद्भूतलेत्यादिवाक्यादिभ्य इति । अत्र आदिपदेन लिङ्गाभाससंग्रहः ।

न च एतद्घटैतद्भूतलयोराश्रयाश्रयिभावस्य जातत्वाज्जनिष्यमाणत्वाद्वा कथं तस्यात्यन्ताभाव इति वाच्यम् । यस्य घटस्य एतद्भूतलाश्रयाश्रयिभावो न जातो, नापि भविष्यति, तस्य घटस्य एतद्भूतलेन आश्रयाश्रयिभावो निष्प्रमाणक इति तदभावस्यात्यन्ताभावत्वेन स्वीकारात् ।

(भुवन०)—एतद्घटैतद्भूतलसंयोगस्य जातत्वाज्जनिष्यमाणत्वाद्वा अत्यन्ताभावस्त्रिकालवर्तमानोऽयुक्त इत्याशङ्क्याह—न चैतद्घटैतादित्यादि । इति न च वाच्यमिति सम्बन्धः । अयमर्थः । यत्सर्वथा असद्रूपं खरविषाणादि, तस्यैवात्यन्ताभावो युक्तः, विवक्षितयोरेतयोस्तु घटभूतलयोराश्रयाश्रयिभावो जातो वा भावी वेति कथं तयोरात्यन्ताभावो युक्तिमानिति पराशङ्कां प्रदर्श्य सिद्धान्तवादी गूढस्वाभिप्रायमाविर्भावयति—यस्य घटस्येत्यादि । यस्य घटस्य एतद्भूतलेन सह आश्रयाश्रयिभावः सम्बन्धः कदापि न जातो नापि भावी, तस्य घटस्यैतद्भूतलेन विवक्षितभूतलेनाश्रयाश्रयिभावो निष्प्रमाणकः प्रमाणाग्राह्यः । प्रत्यक्षादेः प्रमाणस्य तत्रानुदयादिति, तदभावस्यैतद्घटैतद्भूतलाप्रमाणिकाश्रयाश्रयिभावाभावस्यैव अत्यन्ताभावत्वेन स्वीकारादिति पदार्थः ।

यद्वा एतद्घटैतद्भूतलयोराश्रयाश्रयिभावो जातो भविष्यति वा, तदुभयव्यतिरिक्तो यः एतद्घटैतद्भूतलयोराश्रयाश्रयिभावो निष्प्रमाणकः, तस्याभावोऽत्यन्ताभावः । यः पुनरेतद्घटैतद्भूतलयोराश्रयाश्रयिभाव आसीत्, तस्येदानीमभावः प्रध्वंसः । यः पुनरेतद्घटैतद्भूतलयोराश्रयाश्रयिभावो भविष्यति, तस्येदानीमभावः प्रागभाव इति व्यवस्था ।

(भुवन०)—" सर्वव्याख्याविकल्पानां द्वयमिष्टं प्रयोजनम् ।
पूर्वत्रापरितोषो वा व्याप्तिर्वा विषयान्तरे ॥ "

इति विषयान्तरव्याप्त्यर्थं पक्षान्तरमाह—यद्वा एतदित्यादि । तदुभयव्यतिरिक्तो भूतभाव्येतदाश्रयाश्रयिभावद्वयभिन्नः आश्रयाश्रयिभावो न कदापि जातो न भावी यश्च वर्तमानः सोऽपि च । तस्यापि जन्मनोऽतीतत्वेन जातत्वात् । तेन तदुभयव्यतिरिक्तेत्यनेन भूतभाविभवद्व्यतिरिक्तोऽसन्नेवाश्रयाश्रयिभावोऽप्रामाणिक उपात्तः । ततस्तस्याभावोऽत्यन्ताभाव इति पक्षान्तरार्थः। एतस्मादनन्तरोक्तपक्षस्य निषेधमुखरचनावैचित्र्येणैव भेदो, न त्वर्थत इति भावः । कथं तर्ह्याश्रयाश्रयिभावस्य प्राक्प्रध्वंसाभावयोर्व्यवस्था इत्यत आह—यः पुनरेतदित्यादि ।

अथ यदि इह भूतलेऽयं घटो नास्तीत्यत्र एतद्घटैतद्भूतलयोराश्रयाश्रयिभावो निष्प्रमाणकः प्रतिषिध्यते, तर्हि घटोत्पत्तेः प्रागूर्ध्वं च घटावयवेषु घटो नास्तीत्यत्रापि एतद्घटावयवैतद्घटयोराश्रयाश्रयिभाव एव तत्कालीनो निष्प्रमाणकः प्रतिषिध्यतामिति गतं प्राक्प्रध्वंसाभावाभ्यामित्युच्यते[1], तत्राप्योमित्येवोत्तरम् । द्विविध एव ह्यभावः, अन्योन्याभावोऽत्यन्ताभावश्चेति । यश्च कार्योत्पत्तिपूर्वक्षणे कार्यसमवायिकारणयोराश्रयाश्रयिभावो निष्प्रमाणकः, तस्यात्यन्ताभावः प्रागभाव इत्युच्यते । यश्च कार्योत्पत्त्युत्तरक्षणे कार्यसमवायिकारणयोराश्रयाश्रयिभावो निष्प्रमाणकः, तस्यात्यन्ताभावः प्रध्वंस इत्युच्यते शास्त्रकारैः, न तु प्राक्प्रध्वंसाभावौ अत्यन्ताभावाद्भिन्नाविति ।

(भुवन०)—अथ परो व्यवस्थाभङ्गं शङ्कते—अथ यदीहेत्यादि । यद्येवंविधः आश्रयाश्रयिभावो निष्प्रमाणकः सन् प्रतिषिध्यते, तदा अतिप्रसङ्गात्प्राक्प्रध्वंसाभावयोर्व्यवच्छेद एव न स्यादित्याह—तर्हीत्यादि । घटो यदोत्पन्नो नास्ति तदा मृद्रूपेषु घटावयवेषु यदा घटो विनष्टस्तदा कपालरूपेषु घटावयवेषु च घटो नास्तीत्यत्राप्येतद्घटैतद्घटावयवयोराश्रयाश्रयिभाव एव तत्कालीनो घटानुत्पादविनाशकालिको भवद्युक्त्या निष्प्रमाणकः सन् प्रतिषिध्यताम् । तस्य च प्रतिषेधे प्रागभावप्रध्वंसाभावावेव प्रतिषिद्धौ स्याताम् । अप्रामाणिकाभावस्य अत्यन्ताभावरूपत्वेन स्वीकारात् । तथाच सति गतमेव प्रागभावप्रध्वंसाभावाभ्यामित्यर्थः । इति पूर्वपक्षिणोक्ते सिद्धान्त्याह—ओमिति । यत्त्वयाभ्यधायि तदेवमेव । एतदेवोपपादयति—द्विविध इत्यादि । अन्योन्याभावात्यन्ताभावरूपौ द्वावेवाभावौ शास्त्रकाराणां संमतौ । प्राक्प्रध्वंसाभावौ तु अत्यन्ताभावरूपावेव, न तु भिन्नौ । एतदेव दर्शयति—यश्चेति । घटपटादिकं यत्कार्यं तस्योत्पत्तिपूर्वक्षणेऽनुत्पत्तिक्षणे । कार्यसमवायीति । कार्यं घटपटादिकं, समवायिकारणं[2] मृत्तिकातन्त्वादि, तयोर्य आश्रयाश्रयिभावोऽसद्भूतत्वान्निष्प्रमाणकस्तस्यात्यन्ताभावः प्रागभाव इति । यश्चेति । कार्यस्य घटादेरुत्पत्त्युत्तरक्षणे विनाशक्षणे कार्यसमवायिकारणयोर्घटमृदादिरूपयोराश्रयाश्रयिभावस्यात्यन्ताभावः प्रध्वंस इति ।

---

१ °इत्युच्येत, तत्रा° इति थ पुस्तकपाठः। २ °कारणानि मृत्तिकातन्तुरूपाणि त° इति छ. द. पुस्तकपाठः।

यद्वा अनुत्पत्तिः प्रागभावः । स च निराश्रय एव । घटो नोत्पद्यते इत्येव प्रतीतेः । एवं विनाशः प्रध्वंसः । सोऽपि निराश्रय एव । घटो विनष्ट इत्याश्रयानवच्छेदेनैव प्रतीतेः । यस्तु समवायिकारणनिष्ठः कार्योत्पत्तेः प्रागूर्ध्वं च इहेदानीं घटो नास्तीत्यभावः प्रतीयते, स तूक्तरीत्या अत्यन्ताभाव एवेति ।

(भुवन०)—परमतप्रसिद्धया अभावस्वरूपं निरूपयति—यद्वा अनुत्पत्तिरित्यादि । घटादेरनुत्पत्तिः प्रागभावः । अनुत्पत्तेरपि कार्यसमवायिकारणयोराश्रयाश्रयिभावाभावादत्यन्ताभावतो न भेद इत्याह—स चेति । आश्रयानवच्छेदेनेति । आश्रयस्यापरिज्ञानेन समवायिकारणसंसर्गमन्तरेणेत्यर्थः । कस्तर्ह्यत्यन्ताभावोऽत्राह—यस्त्विति । घटादिकार्यस्योत्पत्तौ विनाशे च समवायिकारणं मृत्स्नादि । 'स्वसमवेतकार्योत्पादकं समवायिकारणमि'ति तल्लक्षणात् । तत्र यः समवायिकारणनिष्ठः कार्योत्पत्तेः पूर्वं पश्चाच्चेहेदानीं घटो नास्तीत्यभावः प्रतीयते, स तूक्ता या पूर्वत्र रीतिस्तया अत्यन्ताभाव एव ।

अथ एतद्घटैतद्भूतलाश्रयाश्रयिभावाभावे प्रमाणं प्रवर्तमानं किमभावमात्रं गोचरयति, किंवा एतद्घटैतद्भूतलाश्रयाश्रयिभावविशेषितमभावम् । आद्ये नाभावविशेषसिद्धिः । द्वितीयेऽपि निष्प्रमाणकविषयं प्रमाणं चेति व्याहतमित्युच्यते । तन्न । आभासप्रतिपन्ने निष्प्रमाणके तदभावविशेषस्यैव प्रमाणविषयत्वात्, स्मृते कुम्भादौ तदभावविशेषस्येव ।

(भुवन०)—अत्यन्ताभावः प्रमीयते न वा । न चेदसिद्धः, प्रमीयते चेत्तत्र विकल्पद्वयेनाशङ्कते—अथैतद्घटेति । एतद्घटैतद्भूतलयोर्यः आश्रयाश्रयिभावस्तदभावे प्रवर्तमानं प्रमाणमभावमात्रं गोचरयति, किंवा आश्रयाश्रयिभावेन विशेषितमभावम् । आश्रयाश्रयिभावं तदभावं च गोचरयतीत्यर्थः । पक्षद्वयमपि दूषयति—आद्ये इति । एतत्प्रतियोगिकोऽयमभावः इत्येवमभावविशेषस्यासिद्धिः । अभावमात्रस्यैव ग्रहणात् । निष्प्रमाणकेति । निष्प्रमाणकस्याश्रयाश्रयिभावादेर्विषयोऽप्रमाणं चेति व्याघातः । यदि निष्प्रमाणकविषयं तर्हि प्रमाणं कथमिति, अत्र प्रतिसमाधत्ते—तन्नेति । आभासेन प्रमाणाभासेन प्रतिपन्ने निष्प्रमाणके आश्रयाश्रयिभावादौ तदभावविशेषस्यैव प्रमाणविषयत्वात् । अयं भावः । संसर्गादिराभासप्रतिपन्नः संसर्गाभावविशेषश्च प्रमाणप्रतिपन्नः । स्मृते कुम्भादाविति । यथा स्मृते कुम्भादौ मनसि सद्रूपत्वेनाभावात् निष्प्रमाणकेऽपि स्मृतकुम्भाभावविशेषस्य प्रमाणविषयत्वमित्यर्थः ।

अथ निष्प्रमाणकाभावे किं प्रमाणम् । एतद्घटैतद्भूतलाश्रयाश्रयिभावो नास्तीत्यादिप्रत्यक्षमेव । अनुमानं च—एतच्चक्षुः एतच्चक्षुर्जन्यप्रामाणिकप्रतियोगिकविषयत्वरहिताभावप्रमाजनकं, चक्षुष्ट्वात् अन्यचक्षुर्वदित्यादिकम् । इत्यलमतिविस्तरेण ।

---

१ 'विशेषणत्वा' इति छ पुस्तकपाठः ।

केवलान्वयिनि धर्मे बाधकमाह—

ऽपि न ।
स्वस्मिन्वृत्तिरवर्तनेन सहिता व्याघातमत्राश्रिता ॥ [1] इति ।

(भुवन०)—एतच्चक्षुरित्यादि । एतच्चक्षुरिन्द्रियादिविवक्षितचक्षुः । प्रामाणिकः प्रमाणग्राह्यः प्रतियोगी यस्याभावस्य स प्रामाणिकप्रतियोगिकः । स विषयो यस्य ज्ञानस्य तत्प्रामाणिकप्रतियोगिकविषयम् । एतच्चक्षुर्जन्यं च तत्प्रामाणिकप्रतियोगिकविषयं च, तस्य भावः तत्त्वम् । तेन रहितो योऽभावः तस्मिन् या प्रमा प्रमाणं तस्या जनकम् [2] । अत्रैतच्चक्षुर्जन्यप्रामाणिकप्रतियोगिकविषयत्वरहिताभावो द्विधा स्यात्, अनेतच्चक्षुर्ग्राह्यः प्रामाणिकप्रतियोगिकोऽभावो वा, एतच्चक्षुर्ग्राह्योऽप्रामाणिकप्रतियोगिकोऽभावो वा । आद्यो यद्यपि प्रामाणिकप्रतियोगिकविषयत्वरहितो नास्ति तथाप्येतच्चक्षुर्जन्यं यत्प्रामाणिकप्रतियोगिकविषयत्वं तेन रहितः एव । द्वितीयो यद्यप्येतच्चक्षुर्ग्राह्यत्वरहितो नास्ति तथाप्येतच्चक्षुर्जन्यं यत्प्रामाणिकप्रतियोगिकविषयत्वं तेनै रहितो नास्ति एव । तत्राद्यः पक्षः पक्षे व्याहतः। न ह्येतच्चक्षुर्यः एतच्चक्षुषा न गृह्यतेऽभावस्तस्य प्रमाजनकम् । द्वैतीयीकस्तु पक्षे सिध्यन्नप्रामाणिकप्रतियोगिकाभावस्य चाक्षुषत्वं साधयति । आद्यो विकल्पश्च सपक्षे प्रयोजकः । अथ व्यावृत्त्यचिन्ता । चक्षुरुक्तसाध्यवदित्युक्ते दृष्टान्तभागे सिद्धसाध्यता, तद्व्यावृत्त्यर्थमेतदिति । भावप्रमाजनकत्वेनार्थान्तरं वारयति—अभावप्रमेति । अन्योन्याभावादिप्रमाजनकत्वेनार्थान्तरं पराकरोति—प्रामाणिकप्रतियोगिकविषयत्वरहितेति । अप्रसिद्धविशेषणतां दृष्टान्ते साध्यवैकल्यं च परिहर्तुमेतच्चक्षुर्जन्येत्युक्तम् । आदिपदेनैतच्छ्रोत्रमेतच्छ्रोत्रजन्यप्रामाणिकप्रतियोगिकविषयत्वरहिताभावप्रमाजनकं श्रोत्रत्वादन्यश्रोत्रवत् इत्यादिसंग्रहः ।

'मानं हन्त न केवलान्वयवतो धर्मस्य सत्त्वेऽपि चे'त्यादिवृत्तस्याद्यपादं व्याख्याय द्वितीयमवतारयति—केवलान्वयिनीति । स्वस्मिन्निति । प्रमेयत्वादिहेतोः स्वस्मिन्वृत्तिरवृत्तिश्च व्याहतेत्यर्थः । इह स्वस्मिन्वृत्तीत्यादिपदे सहितशब्दः समुच्चयाभिप्रायेण बोद्धव्यः । दृश्यते हि समुच्चयेऽपि सहितपदप्रयोगः । तद्यथा—"रोहिणीसहितमुत्तरात्रयमि"ति श्रीपतिवचने ।

तथाहि[3]—प्रमेयत्वादिकं स्वस्मिन् वर्तते न वा । आद्ये व्याघातः । न हि तदेव तस्मिन् वर्तते इति संभवति, माता वन्ध्येतिवत् । यथा हि या माता सा वन्ध्या न भवत्येवेति नियमः । एवं यत्प्रमेयत्वाश्रितं अभिधेयत्वादिकं प्रमेयं, यच्च प्रमेयत्वाश्रयः, तत्प्रमेयत्वं न भवत्येवेत्येतावपि नियमौ ।

---

१ °बाधकान्तरमा° इति घ पुस्तकपाठः । २ °तेन रहिता या अभावप्रमा तस्याः जनकम् । अत्रैतच्चक्षुर्जन्यप्रामाणिकप्रतियोगिकविषयत्वरहिताभावप्रमा द्विधा स्यात्, अनेतच्चक्षुर्जन्याप्रामाणिकप्रतियोगिकाभावविषया वा, एतच्चक्षुर्जन्याप्रामाणिकप्रतियोगिकाभावविषया वा । आद्या यद्यपि प्रामाणिकप्रतियोगिकविषयत्वरहिता नास्ति तथाप्येतच्चक्षुर्जन्यत्वविशिष्टं यत्प्रामाणिकप्रतियोगिकविषयत्वं तेन रहिता एव । द्वितीया यद्यप्येतच्चक्षुर्जन्यत्वरहिता नास्ति तथाप्येतच्चक्षुर्जन्यत्वविशिष्टं यत्प्रामाणिकप्रतियोगिकविषयत्वं तेन रहिता अस्त्येव । तत्राद्यः° इति अधिकः पाठः च पुस्तके वर्तते । ३ °त् । तथा हि° इति थ पुस्तकपाठः ।

(भुवन०)—पक्षद्वयेऽपि व्याघातं दर्शयति—प्रमेयत्वादिकमिति । न हि तदेवेति । न हि प्रमेयत्वे प्रमेयत्वं वर्तत इति सम्भवति, आत्माश्रयबाधकतर्कात् । दार्ष्टान्तिकमाह—एवं-यत्प्रमेयेत्यादि । अभिधेयत्वादिकं यत्प्रमेयत्वेनाश्रितं, यच्च घटादिकं प्रमेयं प्रमेयत्वधर्माश्रयः, तत्प्रमेयत्वं न भवत्येव । अयमाशयः । अभिधेयत्वादिधर्मेषु घटादिरूपप्रमेयेषु च प्रमेयत्वं वर्तते । परमभिधेयत्वादिकं प्रमेयं च प्रमेयत्वरूपं न सम्भवति । तेनाभिधेयत्वप्रमेयत्वादौ प्रमेयत्ववर्तनेऽपि प्रमेयत्वरूपत्वाभावात् प्रमेयत्वे प्रमेयत्वं न वर्तत एव । इत्येतावपि नियमाविति । आद्यो नियमोऽभिधेयत्वादिधर्ममाश्रित्योपपादितः । द्वितीयस्तु प्रमेयं घटादिकं धर्मिणमाश्रित्योक्त इति नियमद्वयस्यापि साफल्यम् ।

अथ या माता सा वन्ध्या न भवति, या च वन्ध्या सा माता नेत्युभयेनियमो व्याघातस्थले दृष्टः । प्रकृते तु यत्प्रमेयत्वाश्रितं न तत्प्रमेयत्वमिति नियमसत्त्वेऽपि यत्प्रमेयत्वं न तत्प्रमेयत्वाश्रयः इति प्रतिवादिनं प्रति नियमो न सिद्धः । असाधारणत्वात् । तेन न व्याघातः इत्युच्यते । तन्न । एकनियमेन व्याघातोपपत्तौ द्वितीयनियमस्य निरर्थकत्वात् असाधारणेऽपि व्याप्तेर्वक्ष्यमाणत्वाच्चेति । द्वितीये पक्षे प्रमेयत्वादीनां केवलान्वयित्वव्याघातः । न हि स्वस्माद्व्यावृत्तः केवलान्वयी चेति संभवति ।

(भुवन०)—प्रकृते त्विति । यत्प्रमेयत्वाश्रितं न तत्प्रमेयत्वमिति सत्त्वाभिधेयत्वादौ नियमसद्भावेऽपि, यत्प्रमेयत्वं तत्प्रमेयत्वस्याश्रयो नेति नियमः प्रतिवादिनं वैशेषिकादिकं प्रति न सिद्धः । असाधारणत्वादिति । पक्षमात्रवृत्तित्वेन सपक्षवृत्तिरहितत्वादसाधारणत्वमित्यर्थः । आचार्यः प्रत्युत्तरयति—तन्नेति । प्रमेयत्वाश्रितस्य प्रमेयत्वाभावव्याप्त्या एकनियमेन व्याघातोपपत्तौ द्वितीयनियमो निरर्थक इत्यर्थः । असाधारणे इति । असाधारणेऽपि नियमे व्याप्तिस्तत्र केवलव्यतिरेक्यनुमानादौ वक्ष्यते इत्यतश्च प्रमेयत्वादिकं स्वस्मिन् वर्तते न वेति विकल्पे आद्यो निरस्तः । संप्रति द्वितीयं निरस्यति—द्वितीये पक्षे इति । न हि स्वस्मादिति । एकस्मादेकस्मादपि यो व्यावृत्तः स केवलान्वयीति न संभवति । केवलान्वयित्वस्य सर्ववस्तुनिष्ठत्वरूपत्वात् ।

एवं केवलान्वयिनं धर्मं निरस्येदानीं केवलान्वयिना धर्मेण सह कस्यचिदपि हेतोर्व्याप्तिर्न घटते इत्याह—

साध्याभाववदाश्रितान्यविरहो धूमादिलब्धस्थिति-
र्व्याप्तिः सा न हि केवलान्वयवता धर्मेण संगच्छते ॥ २ ॥

इति । साध्याभाववद्वृत्तित्वाभावो हि व्याप्तिः व्याप्यत्वं अविनाभावः इति चोच्यते । तस्यैवान्वयव्यतिरेकाभ्यां धूमादिनिष्ठत्वानुमित्यङ्गत्वावधार-

१ [illegible] इति च पुस्तकपाठः । २ '[illegible]' इति च पुस्तकपाठः ।

णात् । न च केवलान्वयिना धर्मेण कस्यचिदपि हेतोः साध्याभाववद्वृत्तित्वाभावरूपा व्याप्तिः शक्यावगन्तुम् । केवलान्वयिनि साध्याभाववदप्रतीतौ तद्वृत्तित्वाभावस्य दुरधिगमत्वात् ।

(भुवन०)—साध्याभाववदाश्रितत्वविरह इत्यादिपदत्रयं व्याकरोति—साध्याभाववद्वृत्तित्वेत्यादि । साध्यस्य योऽभावः विपक्षः, तत्र वृत्तित्वाभावो व्यतिरेकव्याप्तिः । व्याप्यत्वमविनाभावः इत्येतौ व्याप्तेः पर्यायौ । धूमादिलक्षणस्थितिरित्येतद्व्याचष्टे—तस्यैवेति । तस्यैव अविनाभावस्यैव । अन्वयव्यतिरेकाभ्यामिति । यत्र धूमस्तत्र वह्निः, यत्र वह्निर्न भवति तत्र धूमोऽपि न भवतीत्येवं धूमादिनिष्ठस्यानुमितिः अनुमानं, तदङ्गतावधारणात् । 'व्याप्तिः सा न ही'त्यादि व्याख्याति—न च केवलान्वयिनेत्यादि । न च केवलान्वयिना धर्मेण महाविद्यासाध्यादिरूपेण कस्यचिदपि प्रमेयत्वादिहेतोः, साध्याभाववन्तो महाविद्यासाध्यरहिताभावाः, तत्र वृत्तित्वाभावरूपा व्यतिरेकव्याप्तिः संभवति । इह हेतुमाह—केवलान्वयिनीति । केवलान्वयिनि हेतौ साध्यस्यापि केवलान्वयित्वात्तदभावस्यैवाभावात् साध्याभाववदप्रतीतौ साध्याभाववत्सु वृत्तित्वाभावस्य दुरधिगमत्वात्, महाविद्यायां विपक्षाभावात् साध्याभाववद्वृत्तित्वमेव दुरधिगममिति प्रतियोगिज्ञानाभावात् कुतस्तरां साध्याभाववद्वृत्तित्वाभावावगम इत्यर्थः ।

अथ न साध्याभाववद्वृत्तित्वाभावो व्याप्तिः, किन्तु अनौपाधिकः संबन्धः, स चाभिधेयत्वादिना प्रमेयत्वादेः शक्यावगम इति मन्यसे । तन्न । किमभिधेयत्वव्यापकः प्रमेयत्वाव्यापकश्च धर्म उपाधित्वेनाभिमतः प्रमितो न वा । आद्ये तदभावप्रतीतिर्बाधिता । द्वितीये तदभावप्रतीतिरशक्या प्रतियोग्यप्रमितेरिति । यावन्तोऽभिधेयत्वादिसाध्यव्यापकाः तावत्सु प्रमेयत्वादिसाधनाव्यापकत्वं निषिध्यते । यावन्तश्च मेयत्वादिसाधनाव्यापकाः, तावत्सु अभिधेयत्वादिसाध्यव्यापकत्वं निषिध्यते । तस्मादनौपाधिकत्वसिद्धिरित्यपि न युक्तम् । प्रकृतसाध्यव्यापकप्रकृतसाधनाव्यापकधर्माप्रतीतौ तदभावस्य भङ्गिसहस्रेणाप्यधिगन्तुमशक्यत्वात् ।

(भुवन०)—उदयनमतमाशङ्कते—अथ न साध्याभावेति । यत्र साध्यसाधनयोः सम्बन्धे उपाधिर्न भवति, सोऽनौपाधिकः सम्बन्धो व्याप्तिः । स चाभिधेयत्वादिनेत्यादि । शब्दोऽभिधेयः प्रमेयत्वात् घटादिवदित्याद्यनुमाने विपक्षाभावादनौपाधिकः संबन्धः शक्यावगमः । अत्र चाभिधेयत्वादिधर्मो यदुपात्तस्तदुपलक्षणम् । एवमन्येऽपि महाविद्यासाध्यादयः केवलान्वयिधर्मा अत्र ज्ञेयाः । तथाहि—महाविद्यायां स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वादिसाध्यस्य सर्ववस्तुनिष्ठत्वात्केवलान्वयित्वेन विपक्षाभावाद्यस्य कस्याप्युपाधेरावश्यकपक्षेतरदोषग्रस्तत्वेन अनौपाधिकसंबन्धत्वं शक्यावगममित्यर्थः । अथ दूषयति—तन्न । किमभिधेयत्वेत्यादि । साधनाव्यापकः साध्यव्यापकः उपाधिरित्युपाधिलक्षणम् । तत्र अभिधेयत्वसाध्याव्यापकः प्रमेयत्वसाधना-

व्यापको यः उपाधित्वेनाभिमतः, स प्रमितः प्रमाणेन गृहीतो न वा । विकल्पद्वयमपि निर्लोडयति—आद्ये तदभावेति । यदि स उपाधिः प्रमितस्तर्हि तदभावप्रतीतिर्बाधिता । प्रमाणगृहीतस्य असद्भूतत्वेन कर्तुमशक्यत्वात् । द्वितीये इति । यद्युपाधिरप्रमितः, कथं तर्हि तदभावप्रतीतिः कर्तुं शक्या । प्रतियोगिनः उपाधेरप्रतीतेः । 'प्रतियोगिज्ञानाधीनज्ञानोऽभावः' इति वचनात् । अथ पुनरप्याशङ्कते—यावन्त इत्यादि अनौपाधिकत्वसिद्धिरित्यन्तेन । अयमर्थः—यः उपाधिरभिधेयत्वादिसाध्यव्यापको भवति स प्रमेयत्वादिसाधनाव्यापको न भवति । यश्च मेयत्वादिसाधनाव्यापकः सोऽभिधेयत्वादिसाध्यव्यापको न भवतीत्युपाधेः साधनाव्यापकसाध्यव्यापकत्वरूपसंपूर्णलक्षणाभावादत्रानुमानेषु अनौपाधिकसंबन्धत्वसिद्धिः । अथ आचार्य उत्तरयति—इत्यपि न युक्तमिति । हेतुमाह—प्रकृतसाध्येत्यादि । प्रकृतमभिधेयत्वादिसाध्यं तस्य व्यापकः, प्रकृतं मेयत्वादिसाधनं तस्याव्यापकश्च यो धर्मः उपाधिलक्षणः, तस्याप्रतीतौ प्रतियोगिज्ञानाभावात् तदभावस्य उपाधिलक्षणधर्माभावस्य भङ्गिसहस्रेण प्रकारसहस्रेणाप्यधिगन्तुं परिज्ञातुमशक्यत्वात् ।

एवं सति धूमानुमानादिष्वपि अनौपाधिकत्वमशक्याधिगममिति चेत् । एवमस्तु । न नः काचित्क्षतिः ।

(भुवन०)—अथैवमभिहिते परोऽतिप्रसङ्गमुपपादयति—एवं सति धूमानुमानेत्यादि । अनौपाधिकः संबन्धो व्याप्तिरित्यस्माभिरस्वीकरणान्नायं प्रसङ्ग इत्याह—एवमस्त्विति ।

अथ नियमो व्याप्यत्वम् । नियमश्चायोगव्यवच्छेदः । स चाभिधेयत्वादिसाध्यस्य मेयत्वादिसाधनवन्निष्ठात्यन्ताभावप्रतियोगित्वाभावः शक्योऽधिगन्तुमिति मन्यसे । तदपि न । अभिधेयत्वादिसाध्यनिष्ठस्य मेयत्वादिसाधनवन्निष्ठात्यन्ताभावप्रतियोगित्वविरहस्य व्यापकत्वेन मेयत्वाद्यनिष्ठतया मेयत्वादीनां व्याप्यत्वभङ्गस्य दुरपन्हवत्वात् ।

(भुवन०)—अथ प्रकारान्तरेण व्याप्तिविषयामाशङ्कां कुरुते—अथ नियमः इति । यत्र साधनं तत्र साध्येन भाव्यमेवेति यो नियमः, तदेव साधनस्य साध्येन व्याप्यत्वम् । अयोगव्यवच्छेद इति । साधनस्य साध्येन सह अयोगो न किन्तु योग एव । स चाभिधेयेति । स च अयोगव्यवच्छेदोऽभिधेयत्वादिसाध्यस्य मेयत्वादिसाधनवन्तो घटादयः, तेषु निष्ठो योऽत्यन्ताभावः, तस्य यत्प्रतियोगित्वं, तदभावः शक्यो ज्ञातुम् । अयमाशयः—मेयत्वादिसाधनवत्सु अभिधेयत्वादिसाध्यस्य अभावो नास्तीत्येवावता यत्र हेतुः तत्र साध्येन भाव्यमेवेत्येवं व्याप्तिरस्तीत्यर्थः । दूषयति—तदपि नेत्यादि । मेयत्वादिसाधनवत्सु निष्ठो योऽत्यन्ताभावः तस्य यत्प्रतियोगित्वं तद्विरहस्य अभिधेयत्वादिसाध्यनिष्ठस्य । व्यापकत्वेनेति । अभिधेयत्वादिकं साध्यं व्यापकं, तन्निष्ठो यो मेयत्वादिवन्निष्ठात्यन्ताभावप्रतियोगित्वाभावः सोऽपि व्यापकनिष्ठत्वेन व्यापक एवेत्यर्थः । मेयत्वाद्यनिष्ठतयेति । अयमर्थः—यो हि मेयत्वादिवन्निष्ठात्यन्ताभावप्रतियोगित्वाभावोऽभिधेयत्वादिसाध्यनिष्ठो व्यापकः स मेयत्वादिहेत्वनिष्ठ एव । मेयत्वादिव्याप्यानिष्ठस्य व्याप्यत्वेन

व्यापकत्वाभावात् । यथा सैव घटे सत्तास्ति न सैव पटे इति । व्याप्यत्वभङ्गस्येति । पूर्वं ह्यभिधेयत्वादिसाध्यस्य मेयत्वादिसाधनवन्निष्ठात्यन्ताभावप्रतियोगित्वाभावो व्याप्तिरुक्ता । सा च साध्यसाधनोभयनिष्ठा स्यात् । मेयत्वादिवन्निष्ठात्यन्ताभावप्रतियोगित्वविरहश्च यः साध्यनिष्ठः स साधननिष्ठ इति मेयत्वादीनां यद्व्याप्यत्वं व्याप्तिः, तस्य भङ्गो दुरपन्हव एवेत्यर्थः ।

अथ मेयत्वादिसाधनवन्निष्ठात्यन्ताभावप्रतियोगित्वविरहोऽभिधेयत्वादिसाध्यनिष्ठो व्याप्यत्वमनुमानाङ्गमिति ब्रूषे । तन्न । साध्यस्यैवंरूपव्याप्यत्वावगमेऽपि पक्षधर्मत्वानवगमात् । अवगमे वा अनुमानवैयर्थ्यात्[1] । न च साध्यगतं व्याप्यत्वं साधनगतं च पक्षधर्मत्वमनुमानाङ्गमिति युक्तम् । व्याप्तिपक्षधर्मतयोः समानाधिकरणयोरनुमितिजनकत्वस्योभयवादिसिद्धत्वात् ।

(भुवन०)—अस्मन्मते साध्यगतं व्याप्यत्वं, न तु साधनगतमिति पराभिप्रायं प्रकटयति— **अथ मेयत्वादिति ।** मेयत्वादिसाधनवन्निष्ठात्यन्ताभावप्रतियोगित्वविरहो यः एवाभिधेयत्वादिसाध्यनिष्ठः तदेव साधनस्य साध्येन व्याप्यत्वमिति भावार्थः । ग्रन्थकारः परिहरति—**तन्न । साध्यस्येत्यादि ।** साध्यस्य अभिधेयत्वादेर्यद्यप्येवंरूपं केवलसाध्यगतं व्याप्यत्वमवगतं, परं तथापि पक्षधर्मत्वमवगतं नास्ति । पक्षधर्मता च विलोक्यते । यतोऽनुमानस्य द्वे रूपे व्याप्यत्वं पक्षधर्मता च । तत्रान्यतररूपानवगमेऽनुमानमेव न स्यात् । **अवगमे वेति ।** साध्यस्य यदि पक्षधर्मता अवगता तदा अनुमानवैयर्थ्यम् । साध्यस्य पक्षधर्मताव्यवस्थापनार्थमेवानुमानकरणात् । **न च साध्येत्यादि ।** साध्यगतं हि व्याप्यत्वं, पक्षधर्मत्वं च साधनगतमिति भिन्नाधिकरणे व्याप्यत्वपक्षधर्मते अनुमानाङ्गमिति न च युक्तम् । हेतुमाह—**व्याप्तिपक्षेति ।** व्याप्तिपक्षधर्मतयोः समानाधिकरणयोरेकाधिकरणयोरित्यर्थः ।

अथ यद्वन्निष्ठात्यन्ताभावप्रतियोगित्वविरहः साध्यस्य तत्त्वं व्याप्यत्वम् । तच्च प्रमेयत्वादीनां घटते इति ब्रूषे । तन्न । यद्वन्निष्ठेत्यत्र यच्छब्देन, तत्त्वमित्यत्र च तच्छब्देन किं प्रमेयत्वादिस्वरूपं विवक्षितं, तद्धर्मो वा कश्चित् । नाद्यः । हेतुस्वरूपातिरिक्तव्याप्यत्वानङ्गीकारे व्याप्यत्वासिद्धेर्दुर्वारत्वात् । न द्वितीयः । प्रमेयत्वादिव्यतिरिक्तस्य यत्तच्छब्दार्थस्य निर्वक्तुमशक्यत्वात् ।

(भुवन०) महाविद्यावादी शङ्कते—**अथ यद्वन्निष्ठेति ।** यच्छब्देन प्रमेयत्वादिहेतवः, तद्वत्सु निष्ठो योऽत्यन्ताभावः तस्य यत्प्रतियोगित्वं तद्विरहो यः साध्यस्य । तत्त्वमिति । तस्य साधनस्य भावः तत्त्वं व्याप्यत्वम् । साधनस्य साध्यवन्निष्ठत्वं व्याप्यत्वमित्यर्थः । विकल्पैः परिहरति—**तन्न । यद्वदित्यादि ।** यद्वन्निष्ठेत्यत्र यच्छब्देन, तत्त्वं व्याप्यत्वमित्यत्र च तच्छब्देन च किं प्रमेयत्वादिस्वरूपं विवक्षितं तद्धर्मो वा । प्रमेयत्वादिधर्मो वेत्यर्थः । आद्यं पक्षं दूषयति—**नाद्य इत्यादि ।** यद्वन्निष्ठेत्यत्र यच्छब्देन, तत्त्वं व्याप्यत्वमित्यत्र च तच्छब्देन किं प्रमेयत्वादिस्वरूपं विवक्षितं तद्धर्मो

१ °वैयर्थ्यम् । न° इति ग पुस्तक पाठः ।

वा । प्रमेयत्वादिधर्मो वेत्यर्थः । आद्यं पक्षं दूषयति—नाद्य इत्यादि । हेतुस्वरूपादधिकं यद्व्याप्यत्वं तदनङ्गीकारे व्याप्यत्वं व्याप्तिः तस्या असिद्धिरेव । अयमभिप्रायः—साधनस्य हि व्याप्यत्वं साध्येन स्यात् । तत्र यदि साधनमात्रस्वरूपमेव व्याप्यत्वं स्वीक्रियेत, तर्हि हेत्वाभासस्यापि व्याप्यत्वं भवेदिति व्याप्यत्वस्यासिद्धिरेव । द्वितीयं पक्षं दूषयति—न द्वितीय इति । प्रमेयत्वादिव्यतिरिक्तस्य यत्तच्छब्दार्थस्य विचारासहत्वेन निर्वक्तुमशक्यत्वात् ।

यत्तच्छब्दार्थो मेयत्वादिकमेव । तस्य भावः तत्त्वं व्याप्यत्वमित्यपि न । तस्य भावः किं तस्य धर्ममात्रं धर्मविशेषो वा । आद्ये मेयत्वस्य सर्वव्याप्यतापत्तिः । द्वितीये तदनिरुक्तिरिति ।

(भुवन०)—यत्तच्छब्दार्थः इति । यत्तच्छब्दार्थो मेयत्वादिकमेव नापरं किमपीत्यर्थः । एतदुक्तं विकल्पयति—तस्य भाव इति । तस्य मेयत्वादेर्भावः । आद्यविकल्पं दूषयति—आद्ये मेयत्वस्येति । यदि मेयत्वस्य तद्भावो व्याप्यत्वरूपो धर्ममात्रमभिधीयते, तदा मेयत्वस्य सर्वधर्मैर्व्याप्यतापत्तिः स्यात् । अयं भावः—तस्य भावो व्याप्यत्वमित्युक्तम् । तत्र यदि व्याप्यत्वं मेयत्वस्य धर्मः, तर्हि मेयत्वं व्याप्यं जातमेव । यच्च व्याप्यं तद्धि व्यापकेन व्याप्यते एवेति मेयत्वस्य व्याप्यरूपत्वेन घटत्वपटत्वादिसर्वधर्मैर्व्याप्यता प्रसज्येत । नास्ति च मेयत्वस्य व्याप्यत्वम् । तस्य व्यापकरूपत्वात् । तस्मान्न प्राच्यः पक्षः क्षोदक्षमः । द्वितीयं निरस्यति—द्वितीय इति । तस्य मेयत्वादिसंबन्धिनो विशेषधर्मस्य निर्णीतस्य अप्रतीतावप्रतीतेरनिरुक्तिः ।

अथ अविद्यमानविपक्षत्वे सति सपक्षे सत्त्वं मेयत्वादीनामभिधेयत्वादिव्याप्यत्वमिति मन्यसे । तन्न । अविद्यमानविपक्षत्वं नाम विपक्षाभावः । तथा च किं केवलान्वयिनि विपक्षः प्रमितो न वा । आद्ये विपक्षाभावप्रतीतेर्बाधितत्वेन व्याप्यत्वासिद्धिः । द्वितीयेऽपि विपक्षाप्रमितौ तदभावप्रमितेर्व्याप्यत्वासिद्धिः ।

(भुवन०)—भूषणसंमतं मतं शङ्कते—अथाविद्यमानेति । विपक्षाभावे सति सपक्षे सत्त्वं यत्तदेव मेयत्वादीनामभिधेयत्वादिव्याप्येन व्याप्यत्वम् । अन्त्रमतेन निराकुरुते—तन्नेत्यादि । विकल्पद्वयेऽपि दोषं दर्शयति—आद्ये विपक्षेति । यदि विपक्षः प्रमितस्तर्हि विपक्षाभावप्रतीतिर्निर्बाधिता । यतो यो हि मानेन गृहीतः स कथं तदभावः कर्तुं शक्यः । तस्माद्विपक्षाभावप्रतीतेर्बाधात् व्याप्यत्वं व्याप्तिः तस्या असिद्धिः । द्वितीयेऽपीति । यदि विपक्षो न प्रमितः, तदा प्रतियोगिनोऽनिरूपणात् तदभावस्य अनिरूप्यत्वादसिद्धिः ।

किञ्च विपक्षाभावस्यानुमित्यङ्गत्वे केवलव्यतिरेकिण्यन्वयव्यतिरेकिणि चाविद्यमानविपक्षयोरनुमितिजनकत्वाभावप्रसङ्गः । सपक्षे सत्त्वस्य चानुमितिजनकत्वे सपक्षरहितस्य केवलव्यतिरेकिणोऽनुमितिजनकत्वाभावप्रसङ्गः । एतेन अन्वयव्यतिरेकिण्यपि सपक्षसत्त्वस्य विपक्षाभावस्य चानुमितिजनकत्वं निरस्तम् ।

---

१ '[illegible]' इति ख पुस्तके पाठः ।

१३–१५ [illegible]

(भुवन०)—केवलान्वयिनि विपक्षाभावः किमप्रयोजकः प्रयोजको वा । आद्ये पक्षे यत्पूर्वमविद्यमानविपक्षत्वे सतीत्यादिलक्षणमभ्यधायि, तस्य लक्षणत्वासम्भवः । द्वितीयेऽतिप्रसङ्गः, तमेव दर्शयति—किञ्च विपक्षेति । यदि विपक्षाभावोऽनुमानाङ्गं, तदानीं केवलव्यतिरेकिणोऽन्वयव्यतिरेकिणश्च हेतोर्विपक्षसत्त्वेनानुमितिजनकत्वं न स्यात् । अनन्तरोक्तव्याप्यत्वलक्षणेऽविद्यमानविपक्षत्वं दूषयित्वा सपक्षे सत्त्वमपि दूषयति—सपक्षे इति । ननु यथान्वयव्यतिरेकिणि सपक्षसत्त्वस्य प्रयोजकत्वं, तथा केवलान्वयिन्यपि सपक्षसत्त्वस्य प्रयोजकत्वं भविष्यतीति पराभिप्रायमाशङ्क्याह—एतेनेत्यादि । एतावतान्वयव्यतिरेकिण्यपि हेतौ सपक्षसत्त्वापरपर्यायस्यान्वयस्य यदनुमितिजनकत्वं तन्निरस्तम् । इदमत्र तत्त्वम् । अन्वयव्यतिरेकिणि सपक्षसत्त्वस्य प्रयोजकत्वाभावात्केवलान्वयिन्यपि तस्य न प्रयोजकत्वम् । एतेन व्याप्यत्वलक्षणे सपक्षे सत्त्वमपि न्युदस्तं मन्तव्यम् ।

तस्मात्साध्याभाववद्वृत्तित्वविरहो व्यतिरेकापरपर्यायो व्याप्यत्वमनुमानाङ्गमिति स्थिते केवलान्वयिनो व्याप्यत्वासिद्धिर्दुर्वारेति । तदिदं यथेष्टचारिण्या महाविद्यया संसर्गमनुभवतः केवलान्वयिनः प्राणान्तिकं प्रायश्चित्तम् । न च वैशेषिकादीनां केवलान्वयिनं निराकुर्वतामपसिद्धान्तः । सूत्रकारभाष्यकाराभ्यां क्वचिदपि तदव्युत्पादनात् । टीकाकारादीनां चास्माभिरनादरणात् । आदरणे वा तदीयकेवलान्वयिव्युत्पादनस्य परमतत्वेन व्याख्यानात् ॥

इति श्रीतार्किकन्यायाचार्यपरमपण्डितभट्टवादीन्द्रविरचिते महाविद्या-
विडम्बने केवलान्वयिभङ्गो नाम द्वितीयः परिच्छेदः ॥ २ ॥

(भुवन०)—परमतनिरासेन सिद्धं स्वमतमुपसंहरति—तस्मात्साध्याभावेति । साध्याभाववद्वृत्तित्वविरहो विपक्षवृत्तित्वाभावो व्याप्यत्वं व्यतिरेकव्याप्तिरित्यर्थः—केवलान्वयीति । केवलान्वयिनो हेतोर्व्याप्यत्वं व्याप्तिमत्त्वम् असिद्धिर्दुर्वारेत्यर्थः—तदिदं यथेष्टेति । अत्रानुक्तोऽपि [illegible] महाविद्याया अकुलस्त्रीत्वमारोपयति । तस्याश्च संसर्गो [illegible] प्रायश्चित्तं मरणमेव । सूत्रकारादिपूर्वाचार्यव्युत्पादितकेवलान्वयिनो भङ्गे कथं न [illegible]—न च वैशेषिकेति । ग्रन्थकर्ता हि वैशेषिकः, तत्र वैशेषिकादीनां केवलान्वयिनं निराकुर्वतामपसिद्धान्त इति न च वाच्यमित्यर्थः—तदव्युत्पादनादिति । ननु केवलान्वयि[illegible]—टीकाकारादीनामिति । टीकाकाराः कन्दलीकिरणावल्यादिटीकाकर्तारः । ननु [illegible] कथं तद्वेनादरणमित्याह—आदरणे वेति । तदीये केवलान्वयिव्युत्पादने तस्य परमतत्वेन व्याख्यातत्वादित्याशयः ।

इति [illegible]
[illegible]
[illegible] ॥

अथ तृतीयः परिच्छेदः ।

नमस्यामो दूरीकृतभवनभङ्गं[1] भगवतो
वपुर्विश्वारम्भस्थितिलयनिदानं पुररिपोः ।
यदस्पृष्टं भोगैरपि दलितकामं करुणया
भवानीभ्रूभङ्गप्रणयकलहेभ्यः स्पृहयति ॥ १ ॥

(मुक्त०)—[2]द्वैतादिनिध्वनमङ्गलद्वयश्चरममङ्गलमाचष्टे—नमस्याम इत्यादि । वयं नमस्यामो नमस्कुर्मः । किं, वपुः । कस्य, पुररिपोः श्रीमहादेवस्य । किंभूतं वपुः—दूरीकृतेत्यादि । भवनमुत्पत्तिः, भङ्गो विनाशः । तौ दूरीकृतौ येन तत्तथा । एतावता शाश्वतमित्यर्थः । पुनः कीदृशं वपुः—विश्वारम्भेत्यादि । विश्वारम्भो निर्माणम् । स्थितिरवस्थानम् । लयो विनाशः । तेषां निदानं कारणम् । यद्वपुर्भोगैरस्पृष्टं दलितकाममपि भवानीभ्रूभङ्गप्रणयकलहेभ्यः स्पृहयति । ननु यद्येवंविधं वपुस्तदा भवानीकटाक्षरागो विरुद्ध इत्याह—करुणयेति । एतावता नीरागोऽपि सन्करुणयैव गौरीमाद्रियत इत्यर्थः ॥ १ ॥

उपाधिव्याधिनिर्धूतमन्वयव्यतिरेकिणम् ।
मत्वोद्भिन्नमहाविद्याः शिवादित्यादितार्किकाः ॥ २ ॥

(मुक्त०)—महाविद्याप्रवर्तकानां निराकरणं श्लोकद्वयेन प्रस्तावयति—उपाधीति । अन्वयव्यतिरेकिणं प्रयोगमुपाधिव्याधिना कम्प्रं मत्वा ज्ञात्वा उद्भिन्नाः अन्तर्भूतव्यर्थत्वात्प्रकटिता महाविद्या यैस्ते उद्भिन्नमहाविद्याः शिवादित्यादितार्किकाः । जनायन्तेति क्रियाध्याहारः । अन्वयव्यतिरेकिणमुपाधिकदर्थितं ज्ञात्वा शिवादित्यादितार्किकैः केवलान्वयित्वेन महाविद्याः कृता इत्यर्थः ॥ २ ॥

तेषामेष विशेषेण निराकरणसंभ्रमः ।
श्रीसिंहधर्माध्यक्षेण वादीन्द्रेण वि[3]धीयते ॥ ३ ॥

(मुक्त०)—तेषामिति । तेषां शिवादित्यादितार्किकाणां वादीन्द्रेण श्रीसिंहनरेश्वरस्य धर्माधिकारिणा निराकरणं क्रियते इति संटङ्कः ॥ ३ ॥

असिद्धविरुद्धानैकान्तिकसत्प्रतिपक्षकालात्ययापदिष्टाः पञ्च हेत्वाभासाः सूत्रकारादिभिर्व्युत्पादिताः ।

असिद्धोऽपि द्वेधा, पक्षधर्मत्वासिद्धो व्याप्यत्वासिद्धश्च । तत्र न यद्यपि महाविद्याहेतुः पक्षधर्मत्वासिद्धः, तथापि व्याप्यत्वासिद्धो भवत्येवेति व्युत्पादितं द्वितीयपरिच्छेदे ।

---

१ 'भवभुवनभङ्गं' इति घ पुस्तकपाठः । २ 'द्वैतादिनिध्वनमङ्गलेत्यादि चरममङ्गलमाचष्टे इत्यन्तो ग्रन्थांशः' छ द पुस्तकयोर्नास्ति । ३ 'विरच्यते' इति घ पुस्तकपाठः ।

किञ्च,

अथ नूतनतर्कज्ञमनःकुमुदचन्द्रमाः ।
महाविद्यातमःस्तोममुपाधिरुपढौकते ॥ ४ ॥

यो भङ्गिस्थनिवृत्तिमत्त्वरहितो[1] यद्वर्जिते मेयता
मेयत्वे श्रुतिगोचरत्वविरहः स स्यादुपाधिर्ध्रुवः[2] ।

भङ्गो विनाशः । स विद्यते यस्य असौ भङ्गी । अनित्य इत्यर्थः । तत्र स्थिता निवृत्तिरत्यन्ताभावः । तद्वत्त्वं तत्प्रतियोगित्वं । तेन रहितः इत्यर्थः । तदनेन अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वरहितत्वं अश्रावणत्वादीनामनित्यत्वरूपसाध्यव्यापकत्वं दर्शितम् । यद्वर्जिते मेयतेति । येन अश्रावणत्वेन वर्जिते अश्रावणत्वात्यन्ताभाववति शब्दत्वादौ मेयतेत्यर्थः । तदनेन मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वमश्रावणत्वादीनां मेयत्वादिसाधनाव्यापकत्वं दर्शितम् । सः श्रुतिगोचरत्वविरहः श्रवणेन्द्रियग्राह्यत्वात्यन्ताभावः । मेयत्वे साधनाभिमते, उपाधिर्भवेदित्यर्थः ।

(भुवन०)—असिद्धोऽपि द्वेधेति । पक्षस्य यो हेतुधर्मो न स्यात्स पक्षधर्मत्वासिद्धो, यथा अनित्यः शब्दश्चाक्षुषत्वात् घटवदिति । व्याप्यत्वासिद्धश्च साधनस्य साध्येन यद्व्याप्यत्वं तेनासिद्धो व्याप्तिशून्य इत्यर्थः । औपाधिकव्याप्तिकश्च[3] व्याप्यत्वासिद्धः । तत्र न यद्यपीति । यद्यपि महाविद्याहेतुः मेयत्वादिः पक्षे शब्दादौ वर्तनान्न पक्षधर्मत्वासिद्धः—तथापीति । तथापि व्याप्यत्वासिद्धो व्याप्तिशून्यो भवत्येवेति द्वितीयपरिच्छेदे प्रत्यपादि । व्याप्तिशून्यो व्याप्यत्वासिद्ध इति पुरापि प्रादर्शि ।

औपाधिकव्याप्तिकोऽपि व्याप्यत्वासिद्धो भवतीति तदुपपादनायाह—किंच । अथेत्यादि । उपाधिरुपढौकते । कं । महाविद्यारूपतमःस्तोमम् । किंविशिष्टः उपाधिः—नूतनेति । नूतना ये तर्कज्ञास्तेषां मनांस्येव कुमुदानि तत्र चन्द्रमाः । वादिप्रयुक्तमहाविद्यानुमानादिखण्डनाच्चित्ताह्लादक इत्यर्थः । उपाधेश्चन्द्रत्वारोपणान्महाविद्यातमःस्तोमनिराकरणं युक्तमेव ॥ ४ ॥

अथोपाधिदोषोद्भावनाय पद्यमाह—यो भङ्गिस्थेत्यादि ।

पूर्वार्धं व्याचष्टे—भङ्गो विनाश इति । तद्वत्त्वं तत्प्रतियोगित्वमिति । नन्वत्र तद्वत्त्वं तत्प्रतियोगित्वं कथं, यतो भङ्गिस्थनिवृत्तिमन्तोऽनित्याः पदार्थाः । कथं तर्हि तेषां प्रतियोगित्वम् । [illegible]ते । सर्वं वस्तु हि स्वनिष्ठात्यन्ताभावप्रतियोगि । न हि घटे घटोऽस्ति आत्माश्रयात् । तस्माद्घटो [illegible] स्यादेवेति तद्वत्त्वं तत्प्रतियोगित्वं समीचीनमेव । तेन रहित इति । [illegible] उपाधेरत्यन्ताभावो नास्तीति परमार्थः—तदनेनेति । अनित्यत्ववन्तोऽनित्य-

---

१ °रहिते यं° इति घ पुस्तकपाठः । २ °धिर्ध्रुवम्° । इति घ पुस्तकपाठः । ३ °व्याप्तिकोऽपि व्या° छ पुस्तकपाठः ।

पदार्थाः, तेषु निष्ठो योऽत्यन्ताभावस्तस्य यत्प्रतियोगित्वं, तेन यद्रहितत्वं, तदश्रावणत्वादीनामनुपाधी-नामनित्यत्वरूपसाध्यस्य व्यापकत्वं दर्शितम् । इदमत्र हृदयम् । यत्र यत्रानित्यत्वं तत्र तत्राश्रावणत्वं यथा घटादावित्येवमनुपाधेः साध्यव्यापकत्वम् । तदनेनेत्यादि । तत्तस्मात्कारणात् अनेन अनन्तरो-क्तेन मेयत्ववन्तो मेयभावाः तेषु निष्ठो योऽत्यन्ताभावः तस्य यत्प्रतियोगित्वं तदश्रावणत्वादीनां मेयत्वादिसाधनस्याव्यापकत्वमित्यर्थः । एतावता मेयत्वसाधनैवत्त्वपि अश्रावणत्वोपाधिर्नास्ति । तथा च यत्र यत्र मेयत्वं तत्र तत्र अश्रावणत्वं नास्ति, शब्दत्वादौ मेयत्वसत्त्वेऽप्यश्रावणत्वाभावादित्य-श्रावणत्वस्य साधनाव्यापकत्वम् । श्रवणेन्द्रियेति । अश्रावणत्वमित्यर्थः ।

अयमभिप्रायः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम् । साध्यं च तदेव यद्विप्रतिपन्नं प्रति पक्षे मेयत्वेन बोधयितुमभिप्रेतम् । अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं इत्यत्र अनित्यत्वं च परं प्रति पक्षे मेयत्वेन बोधयितुमभिप्रेतम् । तस्मादनित्यत्वरूपसाध्यव्यापको मेयत्वादिसा-धनाव्यापकः श्रोत्रग्राह्यात्यन्ताभावः उपाधिर्भवत्येव ।

(भुवन०)—अश्रावणत्वं नोपाधिः, नित्ये गगनादौ अश्रावणत्वोपाधिसद्भावेऽप्यनित्यत्व-साध्याभावेन समव्याप्तिकत्वाभावादित्याशङ्क्याह—अयमभिप्रायः इति । अत्र समव्याप्तिर्न विवक्षितेतिभावः । किं तत्साध्यं यस्य व्यापक उपाधिरत्राह—साध्यं चेति । पक्षे मूलानुमानपक्षे शब्दे इत्यर्थः । अयं शब्दः स्वस्वेतरेत्यादि । उपलक्षणं चेदम् । तेनात्र अन्यान्यपि पूर्वोक्तमहावि-द्यानुमानानि मन्तव्यानि ।

अथ साध्यव्यापकः साधनाव्यापक इत्यत्र साध्यपदेन व्यापकत्वाभिमतं विवक्षितम् । प्रकृते च पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकर-णत्वं व्यापकम् । न च तस्य श्रावणत्वात्यन्ताभावो व्यापकः । पक्षीकृतशब्द-तदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्ववत् शब्दत्वादिनिष्ठात्यन्ताभावप्र-तियोगित्वात् । तेन साध्यव्यापकताभावान्नायमनुपाधिरिति मन्यसे । तन्न । किं व्यापकत्वाभिमतव्यापकः साधनाव्यापक इत्युपाधिसामान्यलक्षणं, किंवा [3]प्रकृतसाध्यसाधनसंबन्धोपाधिलक्षणम् । नाद्यः । व्याघातात् । यत्किञ्चिद्व्याप-काभिमतव्यापकस्य स्वात्मादिकिञ्चित्साधनव्यापकत्वेन साधनाव्यापकत्वानु-पपत्तेः । नापि द्वितीयः । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकर-णत्वव्यापकमेयत्वव्यापकस्य भवद्भिरनङ्गीकाराल्लक्ष्यलक्षणयोरप्यसिद्धेः, सिद्धौ वा सोपाधित्वस्य दुर्वारत्वादिति ।

---

१ 'साधनवत्त्वसमं' इति छ द पुस्तकपाठः । २ 'भवदेव' इति व पुस्तकपाठः । ३ 'प्रकृतसाध्यव्याप-कत्वे सति प्रकृतसाधनाव्यापकत्वमुपाधिः' इति व पुस्तकपाठः । ४ 'व्यापकत्वानि' इति व पुस्तकपाठः ।

किञ्च,

अथ नूतनतर्कज्ञमनःकुमुदचन्द्रमाः ।
महाविद्यातमःस्तोममुपाधिरुपढौकते ॥ ४ ॥

यो भङ्गिस्थनिवृत्तिमत्त्वरहितो[1] यद्वर्जिते मेयता
मेयत्वे श्रुतिगोचरत्वविरहः स स्यादुपाधिर्ध्रुवः[2] ।

भङ्गो विनाशः । स विद्यते यस्य असौ भङ्गी । अनित्य इत्यर्थः । तत्र स्थिता निवृत्तिरत्यन्ताभावः । तद्वत्त्वं तत्प्रतियोगित्वं । तेन रहितः इत्यर्थः । तदनेन अनित्यत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वरहितत्वं अश्रावणत्वादीनामनित्यत्वरूपसाध्यव्यापकत्वं दर्शितम् । यद्वर्जिते मेयतेति । येन अश्रावणत्वेन वर्जिते अश्रावणत्वात्यन्ताभाववति शब्दत्वादौ मेयतेत्यर्थः । तदनेन मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वमश्रावणत्वादीनां मेयत्वादिसाधनाव्यापकत्वं दर्शितम् । सः श्रुतिगोचरत्वविरहः श्रवणेन्द्रियग्राह्यत्वात्यन्ताभावः । मेयत्वे साधनाभिमते, उपाधिर्भवेदित्यर्थः ।

(भुवन०)—असिद्धोऽपि द्वेधेति । पक्षस्य यो हेतुधर्मो न स्यात्स पक्षधर्मत्वासिद्धो, यथा अनित्यः शब्दश्चाक्षुपत्वात् घटवदिति । व्याप्यत्वासिद्धश्च साधनस्य साध्येन यद्व्याप्यत्वं तेनासिद्धो व्याप्तिशून्य इत्यर्थः । औपाधिकव्याप्तिकश्च[3] व्याप्यत्वासिद्धः । तत्र न यद्यपीति । यद्यपि महाविद्याहेतुः मेयत्वादिः पक्षे शब्दादौ वर्तनान्न पक्षधर्मत्वासिद्धः—तथापीति । तथापि व्याप्यत्वासिद्धो व्याप्तिशून्यो भवत्येवेति द्वितीयपरिच्छेदे प्रत्यपादि । व्याप्तिशून्यो व्याप्यत्वासिद्ध इति पुरापि प्रादर्शि ।

औपाधिकव्याप्तिकोऽपि व्याप्यत्वासिद्धो भवतीति तदुपपादनायाह—किंच । अथेत्यादि । उपाधिरुपढौकते । कं । महाविद्यारूपतमःस्तोमम् । किंविशिष्टः उपाधिः—नूतनेति । नूतना ये तर्कज्ञास्तेषां मनांस्येव कुमुदानि तत्र चन्द्रमाः । वादिप्रयुक्तमहाविद्यानुमानादिखण्डनाच्चित्ताह्लादक इत्यर्थः । उपाधेश्चन्द्रत्वारोपणान्महाविद्यातमःस्तोमनिराकरणं युक्तमेव ॥ ४ ॥

अथोपाधिदोषोद्भावनाय पद्यमाह—यो भङ्गिस्थेत्यादि ।

पूर्वार्धं व्याचष्टे—भङ्गो विनाश इति । तद्वत्त्वं तत्प्रतियोगित्वमिति । नन्वत्र तद्वत्त्वं तत्प्रतियोगित्वं कथं, यतो भङ्गिस्थनिवृत्तिमन्तोऽनित्याः पदार्थाः । कथं तर्हि तेषां प्रतियोगित्वम् । उच्यते । सर्वं वस्तु हि स्वनिष्ठात्यन्ताभावप्रतियोगि । न हि घटे घटोऽस्ति आत्माश्रयात् । तस्माद्घटो घटनिष्ठात्यन्ताभावप्रतियोगी स्यादेवेति तद्वत्त्वं तत्प्रतियोगित्वं समीचीनमेव । तेन रहित इति । अनित्यपदार्थेषु उपाधेरत्यन्ताभावो नास्तीति परमार्थः—तदनेनेति । अनित्यत्ववन्तोऽनित्य-

---

१ 'रहिते यं' इति घ पुस्तकपाठः । २ 'धिर्ध्रुवम्' । इति घ पुस्तकपाठः । ३ 'व्याप्तिकोऽपि व्या' छ पुस्तकपाठः ।

व्याप्यनिवृत्तेरावश्यकत्वेन पक्षीकृतशब्दे एव मेयत्वपक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वयोर्व्याप्तिभङ्गादित्यवेहि । इदमेव चान्यत्राप्युपाधिदूषणत्वबीजम् ।

(भुवन०)—आशङ्कते—कथमिति । अस्योपाधेरित्यर्थः । आचार्यः प्रत्याचष्टे—अश्रावणत्वेति । अश्रावणत्वं यः उपाधिर्व्यापकस्तस्य निवृत्तावनित्यत्वं साध्यरूपं व्याप्यं निवर्तत एव । तथा हि—यत्र यत्र अनित्यत्वं तत्र तत्र अश्रावणत्वं यथा घटादौ । यत्राश्रावणत्वं न स्यात्तत्रानित्यत्वमपि न, यथा शब्दत्वे नित्यत्वेन वादिप्रतिवादिनोः संमते । एतावता उपाधिर्निवर्तमानः साध्यं गृहीत्वा निवृत्तः । किं तर्हीत्याह—पक्षीकृतशब्दे इति । पक्षीकृतशब्दे एव यन्मेयत्वसाधनं पक्षीकृतेत्यादिमहाविद्यासाध्यं च तयोर्व्याप्तिभङ्गात् । अयमर्थः । उपाधिधर्मो व्याप्तिः साधने चकास्ति, जपापुष्पधर्मो लौहित्यं स्फटिकोपल इवेत्युपाधिना साध्यसाधनयोर्व्याप्तिभङ्गः । इदमेव चेति । अन्यत्राप्यनुमानेपूपाधेर्दूषणत्वमेवमेवेति भावः ।

यद्वा स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं अनित्यत्वेन विशेष्य अश्रावणत्वमुपाधिर्वक्तव्यः । तथाहि—यत् एतच्छब्दैतच्छब्देतरनिष्ठत्वरहितानित्यनिष्ठाधिकरणत्वे सति अनित्यं, तत् अश्रावणमिति साध्यव्यापकत्वम् । अश्रावणत्वं च मेयत्ववत् शब्दत्वादिनिष्ठात्यन्ताभावप्रतियोगीति साधनाव्यापकम् । तेन भवत्युपाधिः । न चाभिप्रेतसाध्यव्यापकस्य विशेषितसाध्यव्यापकस्य चोपाधित्वेऽतिप्रसङ्गः । एवंविधोपाधिमतामनुमानत्वानङ्गीकारात् । तद्रहितेषु च स्वतः एवातिप्रसङ्गनिवृत्तिरिति । अन्यथा व्यापकत्वाभिमतसाध्यव्यापकस्यापि उपाधित्वे प्रवर्तमानस्यातिप्रसङ्गस्य कः शास्ता इति ।

(भुवन०)—प्रकारान्तरेणोपाधिं व्युत्पादयति—यद्वा स्वस्वेतरेति । स्वस्वेतरेत्यादिमहाविद्यासाध्यमनित्यत्वेन विशिष्टं कृत्वा अश्रावणत्वमुपाधिर्वक्तव्यः । एतदेवोपाधेः साध्यव्यापकत्वदर्शनपूर्वकं दर्शयति—तथा हीति । यदेतच्छब्देत्यादिमहाविद्यासाध्यवत्त्वे सति अनित्यं तदश्रावणं, यथा घटादि । उपाधेः साध्यव्यापकतां प्रदर्श्य साधनाव्यापकतामाह—अश्रावणत्वं चेति । मेयत्ववच्छब्दत्वादि तत्र निष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगि अश्रावणत्वम् । एतावता मेयत्वसाधनवति शब्दत्वादावश्रावणत्वरूपोपाधेरत्यन्ताभावः । शब्दत्वे मेयत्वसद्भावेऽप्यश्रावणत्वस्य असद्भावात् । आशङ्कापूर्वं परिहरति—न चाभिप्रेतेति । अभिप्रेतसाध्यमनित्यत्वम्, विशेषितसाध्यं महाविद्यासत्कम् । हेतुमाह—एवंविधेति । एवंविधोपाधिमतामनुमानानामित्यर्थः । तद्रहितेष्विति । एवंविधोपाधिरहितेषु स्वयमेवातिप्रसङ्गनिवृत्तेः । अन्यथेति । एवंविधोपाधिरहितानुमानेष्वपि अतिप्रसङ्गकरणे । व्यापकत्वाभिमतेति । व्यापकत्वेनाभिमतं मुख्यं यत्साध्यमनित्यत्वादि तद्व्यापकस्या-

---

१ अत्याग्रे ' अत्र साध्यसाधनयोर्व्याप्तिः । सा अश्रावणत्वेन सोपाधिका ' इत्यधिकं च पुस्तके दृश्यते । २ 'पुष्पलौहि' इति च पुस्तकपाठः । ३ 'ष्वपि अप्रसङ्ग' इति छ द पुस्तकपाठः ।

(भुवन०) अत्र महाविद्यावादी शङ्कते—अथ साध्येति । व्यापकत्वेनाभिमतं व्यापकत्वाभिमतमित्यर्थः । प्रकृते चेति । प्रकृते प्रस्तुते महाविद्यानुमाने पक्षीकृतेत्यादिकं व्यापकं साध्यं न्यस्तम् । न च तस्येति । न च तस्य महाविद्यासाध्यस्य स्वस्वेतरेत्यादिकस्य श्रावणत्वात्यन्ताभावोऽश्रावणत्वोपाधिर्व्यापकः । हेतुमाह—पक्षीकृतेति । पक्षीकृतशब्देत्यादिमहाविद्यासाध्यसहितं यच्छब्दत्वादि तत्र निष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगित्वात् अश्रावणत्वोपाधेरित्यर्थः । एतावता महाविद्यासाध्यवति शब्दत्वेऽश्रावणत्वस्याभावाद्यत्र महाविद्यासाध्यं तत्रोपाधिरित्युपाधेः साध्यव्यापकत्वं नास्ति । फलितमाह—तेन साध्येति । आचार्यो दूषयति—तन्नेति । व्यापकत्वेति । व्यापकत्वाभिमतं साध्यमित्यर्थः । किंवा प्रकृतसाध्यसाधनेति । प्रकृतसाध्यव्यापकः प्रकृतसाधनाव्यापक उपाधिरिति विशेषलक्षणं वा विवक्षितमिति भावः ।

आद्यं दूषयति—नाद्यः इति । व्याघातं स्पष्टयति—यत्किञ्चिद्व्यापकेति । व्यापकं च तदभिमतं च व्यापकाभिमतं साध्यं यत्किञ्चिदनित्यत्वादि, तद्व्यापकस्य स्वात्मादि यत्किञ्चित्साधनमश्रावणत्वादिरूपमेव, तस्य व्यापकत्वादुपाधेः साधनाव्यापकत्वानुपपत्तिः । स्वात्मादीत्यत्र स्वात्मशब्दः पूर्वोक्ताश्रावणत्वोपाध्यपेक्षः । अयमाशयः—घटादयो नित्याः अश्रावणत्वादात्मादिवदित्याद्यनुमाने नित्यत्ववादिना कृते योऽश्रावणत्वादिर्हेतुः, स एतदुपाधिरूपः एवेत्यश्रावणत्वाद्युपाधिरेतस्य साधनस्य व्यापक एवेति साधनाव्यापकत्वं नोपपद्येतेत्यर्थः । द्वितीयमुत्थापयति—नापि द्वितीय इति । पक्षीकृतशब्देत्यादि । साध्यव्यापकस्य मेयत्वसाधनाव्यापकस्योपाधेर्भवद्भिरस्वीकाराल्लक्ष्यलक्षणयोः, लक्ष्य उपाधिः, लक्षणं प्रकृतसाध्यव्यापक इत्यादिकं विशेषलक्षणं, तयोरप्यसिद्धेः । लक्षणत्वस्वीकारे तु तस्योपाधित्वमेव स्यादित्याह—सिद्धौ वेति ।

अथ महाविद्याविरोधिनामपि साध्यव्यापकः साधनाव्यापकः इत्युपाधिसामान्यलक्षणं वा विवक्षितम् । उभयथापि पूर्वदोषापत्तिरिति मन्यसे । तन्न । अस्माभिः साध्यपदेन पक्षनिष्ठतया विप्रतिपन्नं प्रति प्रतीत्यपर्यवसानेन ज्ञाप्यस्यानित्यत्वस्य प्रकृतस्य विवक्षितत्वात् । तेन अनित्यत्वव्यापको मेयत्वाव्यापकः इति प्रकृतोपाधिविशेषलक्षणम् ।

(भुवन०)—चोद्यपरिहारसाम्यरूपया प्रतिबन्द्या परः शङ्कते—अथ महाविद्येति । महाविद्याविरोधिनां भवतामपि साध्यव्यापकेत्यादिविकल्पयोः पूर्वदोषः स्यादित्यर्थः । ग्रन्थकारः प्रत्युत्तरयति—तन्नेति । अस्माभिः साध्यपदेन महाविद्यासाध्यं न विवक्षितं, किन्तु पक्षे शब्दादौ निष्ठतया विप्रतिपन्नं प्रतिवादिनं प्रति प्रतीत्यपर्यवसानेन अनित्यत्वं विना साध्यप्रतीतिर्न स्यादित्यपर्यवसानेन ज्ञाप्यमनित्यत्वं विवक्षितम् । एतावता किमुक्तं भवतीत्यत आह—तेनेत्यादि । [illegible] य उपाधिरश्रावणत्वादिरूप इति भावः ।

कथं पुनरस्य दोषत्वमिति चेत् । अश्रावणत्वव्यापकनिवृत्तौ अनित्यत्व-

१ 'अथ मह०' इति च पुस्तक पाठः ।

व्याप्यनिवृत्तेरावश्यकत्वेन पक्षीकृतशब्दे एव मेयत्वपक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वयोर्व्याप्तिभङ्गादित्यवेहि । इदमेव चान्यत्राप्युपाधिदूषणत्वबीजम् ।

(भुवन०)—आशङ्कते—कथमिति । अस्योपाधेरित्यर्थः । आचार्यः प्रत्याचष्टे—अश्रावणत्वेति । अश्रावणत्वं यः उपाधिर्व्यापकस्तस्य निवृत्तावनित्यत्वं साध्यरूपं व्याप्यं निवर्तत एव । तथा हि—यत्र यत्र अनित्यत्वं तत्र तत्र अश्रावणत्वं यथा घटादौ । यत्राश्रावणत्वं न स्यात्तत्रानित्यत्वमपि न, यथा शब्दत्वे नित्यत्वेन वादिप्रतिवादिनोः संमते । एतावता उपाधिर्निवर्तमानः साध्यं गृहीत्वा निवृत्तः । किं तर्हीत्याह—पक्षीकृतशब्दे इति । पक्षीकृतशब्दे एव यन्मेयत्वसाधनं पक्षीकृतेत्यादिमहाविद्यासाध्यं च तयोर्व्याप्तिभङ्गात् । अयमर्थः[1] । उपाधिधर्मो व्याप्तिः साधने चकास्ति, जपापुष्प[2]धर्मो लौहित्यं स्फटिकोपल इवेत्युपाधिना साध्यसाधनयोर्व्याप्तिभङ्गः । इदमेव चेति । अन्यत्राप्यनुमानेपूपाधेर्दूषणत्वमेवमेवेति भावः ।

यद्वा स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं अनित्यत्वेन विशेष्य अश्रावणत्वमुपाधिर्वक्तव्यः । तथाहि—यत् एतच्छब्दैतच्छब्देतरनिष्ठत्वरहितानित्यनिष्ठाधिकरणत्वे सति अनित्यं, तत् अश्रावणमिति साध्यव्यापकत्वम् । अश्रावणत्वं च मेयत्ववत् शब्दत्वादिनिष्ठात्यन्ताभावप्रतियोगीति साधनाव्यापकम् । तेन भवत्युपाधिः । न चाभिप्रेतसाध्यव्यापकस्य विशेषितसाध्यव्यापकस्य चोपाधित्वेऽतिप्रसङ्गः । एवंविधोपाधिमतामनुमानत्वानङ्गीकारात् । तद्रहितेषु च स्वतः एवातिप्रसङ्गनिवृत्तिरिति । अन्यथा व्यापकत्वाभिमतसाध्यव्यापकस्यापि उपाधित्वे प्रवर्तमानस्यातिप्रसङ्गस्य कः शास्ता इति ।

(भुवन०)—प्रकारान्तरेणोपाधिं व्युत्पादयति—यद्वा स्वस्वेतरेति । स्वस्वेतरेत्यादिमहाविद्यासाध्यमनित्यत्वेन विशिष्टं कृत्वा अश्रावणत्वमुपाधिर्वक्तव्यः । एतदेवोपाधेः साध्यव्यापकत्वदर्शनपूर्वकं दर्शयति—तथा हीति । यदेतच्छब्देत्यादिमहाविद्यासाध्यवत्त्वे सति अनित्यं तदश्रावणं, यथा घटादि । उपाधेः साध्यव्यापकतां प्रदर्श्य साधनाव्यापकतामाह—अश्रावणत्वं चेति । मेयत्ववद्यच्छब्दत्वादि तत्र निष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगि अश्रावणत्वम् । एतावता मेयत्वसाधनवति शब्दत्वादावश्रावणत्वरूपोपाधेरत्यन्ताभावः । शब्दमेयत्वतद्भावेऽप्यश्रावणत्वस्य असद्भावात् । आशङ्कापूर्वं परिहरति—न चाभिप्रेतेति । अभिप्रेतसाध्यमनित्यत्वम्, विशेषितसाध्यं महाविद्यासत्कम् । हेतुमाह—एवंविधेति । एवंविधोपाधिमतामनुमानानामित्यर्थः । तद्रहितेष्विति । एवंविधोपाधिरहितेषु स्वयमेवातिप्रसङ्गनिवृत्तेः । अन्यथेति । एवंविधोपाधिरहितानुमानेऽ[3]पि अतिप्रसङ्गकरणे । व्यापकत्वाभिमतेति । व्यापकत्वेनाभिमतं मुख्यं यत्साध्यमनित्यत्वादि तद्व्यापकस्या-

---

१ अस्याग्रे ' अत्र साध्यसाधनयोर्व्याप्तिः । सा अश्रावणत्वेन सोपाधिका ' इत्यधिकं च पुस्तके दृश्यते । २ 'पुष्पलौहि' इति च पुस्तकपाठः । ३ 'प्यपि अप्रसङ्ग' इति छ द पुस्तकपाठः ।

(भुवन०) अत्र महाविद्यावादी शङ्कते—अथ साध्येति । व्यापकत्वेनाभिमतं व्यापकत्वाभिमतमित्यर्थः । प्रकृते चेति । प्रकृते प्रस्तुते महाविद्यानुमाने पक्षीकृतेत्यादिकं व्यापकं साध्यं न्यस्तम् । न च तस्येति । न च तस्य महाविद्यासाध्यस्य स्वत्वेतरेत्यादिकस्य श्रावणत्वात्यन्ताभावोऽश्रावणत्वोपाधिर्व्यापकः । हेतुमाह—पक्षीकृतेति । पक्षीकृतशब्देत्यादिमहाविद्यासाध्यसहितं यच्छब्दत्वादि तत्र निष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगित्वात् अश्रावणत्वोपाधेरित्यर्थः । एतावता महाविद्यासाध्यवति शब्दत्वेऽश्रावणत्वस्याभावाद्यत्र महाविद्यासाध्यं तत्रोपाधिरित्युपाधेः साध्यव्यापकत्वं नास्ति । फलितमाह—तेन साध्येति । आचार्यो दूषयति—तन्नेति । व्यापकत्वेति । व्यापकत्वाभिमतं साध्यमित्यर्थः । किंवा प्रकृतसाध्यसाधनेति । प्रकृतसाध्यव्यापकः प्रकृतसाधनाव्यापक उपाधिरिति विशेषलक्षणं वा विवक्षितमिति भावः ।

आद्यं दूषयति—नाद्यः इति । व्याघातं स्पष्टयति—यत्किञ्चिद्व्यापकेति । व्यापकं च तदभिमतं च व्यापकाभिमतं साध्यं यत्किञ्चिदनित्यत्वादि, तद्व्यापकस्य स्वात्मादि यत्किञ्चित्साधनमश्रावणत्वादिरूपमेव, तस्य व्यापकत्वादुपाधेः साधनाव्यापकत्वानुपपत्तिः । स्वात्मादीत्यत्र स्वात्मशब्दः पूर्वोक्ताश्रावणत्वोपाध्यपेक्षः । अयमाशयः—घटादयो नित्याः अश्रावणत्वादात्मादिवदित्याद्यनुमाने नित्यत्ववादिना कृते योऽश्रावणत्वादिर्हेतुः, स एतदुपाधिरूप एवेत्यश्रावणत्वाद्युपाधिरेतस्य साधनस्य व्यापक एवेति साधनाव्यापकत्वं नोपपद्येतेत्यर्थः । द्वितीयमुत्थापयति—नापि द्वितीय इति । पक्षीकृतशब्देत्यादि । साध्यव्यापकस्य मेयत्वसाधनाव्यापकस्योपाधेर्भवद्भिरस्वीकाराल्लक्ष्यलक्षणयोः, लक्ष्य उपाधिः, लक्षणं प्रकृतसाध्यव्यापक इत्यादिकं विशेषलक्षणं, तयोरप्रसिद्धेः । लक्षणत्वस्वीकारे तु तस्योपाधित्वमेव स्यादित्याह—सिद्धौ वेति ।

अथ महाविद्याविरोधिनामपि साध्यव्यापकः साधनाव्यापकः इत्युपाधिसामान्यलक्षणं वा विवक्षितम् । उभयथापि पूर्वदोषापत्तिरिति मन्यसे । तन्न । अस्माभिः साध्यपदेन पक्षनिष्ठतया विप्रतिपन्नं प्रति प्रतीत्यपर्यवसानेन ज्ञाप्यस्यानित्यत्वस्य प्रकृतस्य विवक्षितत्वात् । तेन अनित्यत्वव्यापको मेयत्वाव्यापकः इति प्रकृतोपाधिविशेषलक्षणम् ।

(भुवन०)—चोद्यपरिहारसाम्यरूपया प्रतिवन्द्या परः शङ्कते—अथ महाविद्येति । महाविद्याविरोधिनां भवतामपि साध्यव्यापकेत्यादिविकल्पयोः पूर्वदोषः स्यादित्यर्थः । ग्रन्थकारः प्रत्युत्तरयति—तन्नेति । अस्माभिः साध्यपदेन महाविद्यासाध्यं न विवक्षितं, किन्तु पक्षे शब्दादौ निष्ठतया विप्रतिपन्नं प्रतिवादिनं प्रति प्रतीत्यपर्यवसानेन अनित्यत्वं विना साध्यप्रतीतिर्न स्यादित्यपर्यवसानेन ज्ञाप्यमनित्यत्वं विवक्षितम् । एतावता किमुक्तं भवतीत्यत आह—तेनेत्यादि । प्रकृतोऽधिकृतो य उपाधिरश्रावणत्वादिरूप इति भावः ।

कथं पुनरस्य दोषत्वमिति चेत् । अश्रावणत्वव्यापकनिवृत्तौ अनित्यत्व-

१ "अथ महा" इति च पुस्तकपाठः ।

व्यापकीभूतसाध्यं महाविद्यासत्कं, तदभाववतो व्यावर्त्यत्वमित्यादिव्यवस्था गरीयसी निष्प्रमाणका। कल्पनालाघवे सति कल्पनागौरवबाधकतर्कसद्भावात् ।

ननु अस्तु पक्षं पक्षीकृत्य प्रवर्तमानासु महाविद्यासु अयमुपाधिः । सपक्षविपक्षादीन् पक्षीकृत्य प्रवर्तमानमहाविद्यास्तु उपाधिविधुरा एवेत्यत आह—

" सर्वत्रैवमुपाधिरप्रतिहतः, " इति

अयं घटः एतद्वैतच्छब्दव्यतिरिक्तत्वरहितानित्यान्यः मेयत्वादित्यत्र अश्रावणत्वमुपाधिः । एतच्छब्दनिष्ठतया परं प्रति साध्यस्य अनित्यत्वस्य व्यापकत्वात् । मेयत्वसाधनाव्यापकत्वाच्च । अनित्यत्वरूपसाध्यरहितशब्दत्वादिव्यावर्त्यसत्त्वेन पक्षेतरत्वानाक्रान्तत्वाच्चेति । तथा गगनं शब्देतरानित्यनित्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादित्यत्रापि अश्रावणत्वमुपाधिः । एतच्छब्दनिष्ठत्वेन साधयितुमभिप्रेतस्य अनित्यत्वस्य व्यापकत्वात्, मेयत्वाव्यापकत्वाच्च । सिषाधयिषितानित्यत्वाभाववतः शब्दत्वादेर्व्यावर्त्यस्य सत्त्वेन पक्षेतरत्वानाक्रान्तत्वाच्चेति । एवं साध्यादीनपि पक्षीकृत्य शब्दानित्यत्वे प्रवर्तमानासु महाविद्यास्वेवमुपाधिर्द्रष्टव्यः ।

ननु अस्तु नाम अनित्यत्वे प्रवर्तमानासु महाविद्यासु अश्रावणत्वमुपाधिः । अन्वयव्यतिरेकिसाध्यान्तरप्रवर्तमानासु न कश्चिदुपाधिरित्यत्राप्येतदेवोत्तरम् । सर्वत्रैवमुपाधिरप्रतिहत इति । यत्र यत्रान्वयव्यतिरेकिणि हेतौ यो य उपाधिः, तत्तत्साध्यप्रवर्तमानमहाविद्यासु स स एवोपाधिः पूर्वन्यायेन द्रष्टव्यः । यः पुनरन्वयव्यतिरेकी निरुपाधिक एव, तत्साध्यप्रवर्तमानमहाविद्याप्यनौपाधिकी एवास्तु । किं नः छिन्नम् । तदप्रामाण्यस्य वक्ष्यमाणदोषैरपि सिद्धेः ।

(भुवन०)—तुरीयपादभागमवतारयितुं चोदयति । नन्वस्त्विति । इत आरभ्य एतदेवोत्तरं सर्वत्रैवमुपाधिरप्रतिहत [illegible] । ननु स [illegible] मेयत्वात् [illegible] सोऽयं [illegible] मेयत्वा[illegible] महाविद्यानाम् [illegible] [illegible]ह्याह—यत्र यत्रान्वयीति । यत्र यत्र अन्वयव्यतिरेकिणि [illegible] । तत्तदिति । [illegible] स स [illegible] द्रष्टव्यः । [illegible]

१. [illegible]

ष्युपाधित्वेऽतिप्रसङ्गस्य कः शास्ता शिक्षयिता । अयमभिप्रायः—कस्मिंश्चिदनुमाने सत्योपाधावपि केनाप्युद्भाविते‌ऽतिप्रसङ्गः कथं निवार्यः ।

ननु अत्र अयं शब्दः पक्षः । एतद्व्यतिरिक्तं च सर्वं सपक्षः । तेन विपक्षरूपव्यावर्त्याभावात् अश्रावणत्वस्य पक्षेतरत्वमित्यत आह—

"शब्दत्वादि निवर्त्यमस्ति न ततः पक्षेतरत्वभ्रमः" इति । यत् विप्रतिपन्नं प्रति पक्षनिष्ठतया वादिना साध्यते तत्साध्यम् । तदभाववांश्च विपक्षः उपाधेर्व्यावर्त्यः । तथाविधश्च अश्रावणत्वस्य शब्दत्वादिरेव । तेन व्यावर्त्यसत्वान्न पक्षेतरत्वभ्रान्तिः कर्तव्या ।

(भुवन०)—श्लोकतृतीयपादावताराय आशङ्कां कुरुते—नन्वत्रेति । पक्षेतरत्वमिति । विमता हिंसा अधर्मसाधनं हिंसात्वात् म्लेच्छहिंसावदित्यत्र निषिद्धत्वमुपाधिः । अस्योपाधेः संध्यावन्दनादिर्विपक्षो व्यावर्त्यः । संध्यावन्दनादौ निषिद्धत्वाभावात् । अत्र च महाविद्यायां विपक्षत्वाभावाद्विपक्षव्यावर्तनाभावेन पक्षः एव व्यावर्त्योऽस्ति । तथा चोपाधेः पक्षेतरत्वं दोषः । शब्दत्वादीति । अत्र शब्दत्वाद्युपाधेर्निवर्त्यमस्ति । यतोऽत्राश्रावणत्वमुपाधिः । स च शब्दत्वादेर्विपक्षाद्व्यावृत्त एव, शब्दत्वेऽश्रावणत्वाभावादित्युपाधेः शब्दत्वादिविपक्षो व्यावर्त्यः । तस्मात्पक्षेतरत्वभ्रमो न कार्य इत्याशयः । श्लोकतृतीयपादं व्याख्याति । यत् विप्रतिपन्नमिति । विप्रतिपन्नं प्रतिवादिनं प्रति यदनित्यत्वादि पक्षे शब्दादौ निष्ठतया वादिना साध्यते तत्साध्यम् । तस्य साध्यस्याभावो नित्यत्वं, तद्वांश्च नित्यो विपक्षः । उपाधेर्व्यावर्त्य इति । यत्र कुत्राप्युपाधिः स्यात्, स विपक्षे पक्षे च वर्तमानो न विलोक्यते । तथा च सति तस्योपाधेर्विपक्षः पक्षश्च व्यावर्त्यौ भवतीति सर्वत्रोपाधेः रीतिः । यत्र च विपक्षो व्यावर्त्यो न भवेत्तत्र केवलपक्षस्यैव व्यावर्तनादुपाधेः पक्षेतरत्वं दोषः । अत्र च तथा नाशङ्कनीयम् । शब्दत्वादिविपक्षादश्रावणत्वोपाधेर्व्यावृत्तत्वादित्यर्थः । नानाग्रहमुपाधिव्यावर्त्यमाह—तथाविधश्चेति ।

यत् वादिनो व्यापकत्वेनाभिमतं तदभाववान् विपक्षः उपाधिव्यावर्त्यो न त्वन्य इति चेत् । न । सर्वत्र विप्रतिपत्तिगोचरसाध्याभाववतो व्यावर्त्यत्वम् । तथाभूतव्यावर्त्यरहितस्योपाधेः पक्षेतरत्वमित्येतावतैव सकलव्यवस्थोपपत्तौ, व्यापकीभूतसाध्याभाववतो व्यावर्त्यत्वं, तथाभूतव्यावर्त्यरहितस्य च पक्षेतरत्वमित्यादिव्यवस्थाया गरीयस्या निष्प्रमाणकत्वादिति ।

(भुवन०)—महाविद्यावादी शङ्कते—यद्वादिनो व्यापकेति । व्यापकत्वेन साध्यत्वेनाभिमतं महाविद्यासाध्यं स्वस्वेतरेत्यादिरूपं तदभाववान्विपक्षः उपाधिना व्यावर्त्यो, न त्वन्यो भवदभिमतो मुख्यानुमानसाध्यविपक्षः इति भावः । आचार्यः उत्तरयति—न सर्वत्रेति । विप्रतिपत्तिगोचरं यत्साध्यमनित्यत्वादि तदभावो नित्यत्वं, तद्वतो नित्यस्य व्यावर्त्यत्वम् । व्यापकीभूतेति ।

१ 'उपाधेर्व्या' इति घ पुस्तकपाठः ।

लभ्यान्वयव्यतिरेकिसाध्यव्यापकस्योपाधेरनुपपत्तिः । अयमभिप्रायः—महाविद्यायां हि अपर्यवसान-लभ्यानित्यत्वादिसाध्यसद्भावेन तद्व्यापक उपाधिः सम्भवति, नान्यत्र केवलान्वयिषु । तत्रानन्तरोक्तसाध्यासम्भवात् । तस्मात्केवलान्वयिषूपाधेरभावः इत्यर्थः ।

इति संक्षेपतोऽस्माभिरुपाधिरुपवर्णितः ।
महाविद्यानिरासार्थं तन्मूलकषणक्षमः ॥ ९ ॥

मूलश्लोकस्तु—

यो भङ्गिस्थनिवृत्तिमत्त्वरहितो यद्वर्जिते मेयता
मेयत्वे श्रुतिगोचरत्वविरहः स स्यादुपाधिर्ध्रुवः ।
शब्दत्वादि निवर्त्यमस्ति न ततः पक्षेतरत्वभ्रमः
सर्वत्रैवमुपाधिरप्रतिहतो नो चेन्न हेत्वन्तरे ॥ ६ ॥

(भुवन०)—श्लोकः स्पष्टः ॥ ५ ॥

अथ संनह्यतेऽभीष्टविरोधस्तर्कमुद्रया ।
प्रतिवादिमहाविद्याघर्षणाय विचक्षणः ॥ ७ ॥

(भुवन०)—उत्तरश्लोकतात्पर्यमाह—अथ संनह्यते इति । अभीष्टविरोधः संनह्यते सन्नद्धो भवति । कया । तर्कमुद्रया तर्कयुक्त्या ॥ ७ ॥

धत्तेऽभीष्टविरुद्धतां निगदितो हेतुः समुन्मीलयन्
इष्टाभावमभीष्टतुल्यनयतः पक्षे विचारक्षमाम् । इति

यथाकथितो हेतुर्मेयत्वादिः पक्षीकृतशब्दे तत्तदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं साधयन् पक्षे साध्यप्रतीत्यपर्यवसानाद्वाद्यभिमतमनित्यत्वं साधयति। तथा पक्षीकृतशब्दे तत्तदितरवृत्तित्वरहितानित्यत्वात्यन्ताभाववन्निष्ठाधिकरणत्वं साधयन् पक्षे साध्यप्रतीत्यपर्यवसानरूपानित्यत्वसिद्धितुल्यन्यायेन वाद्यभिमतानित्यत्वात्यन्ताभावं साधयति । तेन वाद्यभिमतानित्यत्वरूपसाध्याभावसाधकत्वादयमभीष्टविरुद्धो विशेषविरुद्ध इष्टविघातकारी चेत्युच्यते । व्यापकत्वाभिमतसाध्याभावव्याप्यत्वं विरुद्धत्वम् । तच्च प्रकृते नास्तीति नायं विरुद्ध इत्यत आह—

किञ्चिद्व्यापकमीप्सितं तदपरं भेदस्तयोः कीदृशः
साध्यत्वे तदभावसाधकतया लोके विरुद्धस्थितिः ॥ ८ ॥ इति ।

(भुवन०)—अभीष्टविरुद्धतां दर्शयति—धत्तेऽभीष्टेत्यादि । निगदितो हेतुर्मेयत्वादिरभीष्टस्य विरुद्धता अभीष्टविरुद्धता, तां विचारक्षमां धत्ते । किं कुर्वन्नित्युन्मीलयन् । कम् । इष्टाभावम् । इष्टमनित्यत्वम्, तदभावो नित्यत्वम् । कस्मात् । अभीष्टतुल्यनयतः अभीष्टमनित्यत्वं यथा साध्यते,

आत्मवदित्यत्र अयमस्यात्मैतदात्मैतत्परमाणुव्यतिरिक्तद्रव्यवृत्तिनित्यान्यः प्रमेयत्वाद्धटादिवदित्यत्र क उपाधिरत्राह—यः पुनरन्वयेति । तदप्रामाण्यस्येति । निरुपाधिकस्याप्यनुमानस्य अप्रामाण्यं वक्ष्यमाणदोषैर्विरुद्धतानैकान्तिकत्वादिभिरपि सेत्स्यतीत्यर्थः ।

यः पुनर्व्युत्पादितमपि साध्यव्यापकं साधनाव्यापकं चोपाधिं प्रमेयत्वादौ न मन्यते, तस्य अयं शब्दोऽनित्यः, सामान्यवत्त्वे सति अस्मदादिबाह्यप्रत्यक्षत्वादित्यादावपि अश्रावणत्वादिरुपाधिर्न स्यात्, अविशेषादित्याह—

'नो चेन्न हेत्वन्तरे,' इति

(भुवन०)—चतुर्थपादान्त्यभागतात्पर्यमाह—यः पुनर्व्युत्पादितमिति । य एवं पूर्वोत्पादितमप्युपाधिं न स्वीकुरुते, तस्य अयं शब्दोऽनित्यः इत्यत्रापि अश्रावणत्वोपाधिर्न स्यात् । अस्ति चात्रोपाधिः । तथाहि । यद्यदनित्यं तत्तदश्रावणं यथा घटादि । यत्राश्रावणत्वाभावः तत्रानित्यत्वाभावो यथा शब्दत्वे इति साध्यव्यापकत्वम् । तथा शब्दे सामान्यवत्त्वे सति यदस्मद्बाह्यप्रत्यक्षत्वं तस्मिन्सत्यपि अश्रावणत्वोपाधेरभावात्साधनाव्यापकत्वं चोपाधेः । शब्दस्वरूपविपक्षव्यावर्त्यसत्त्वेन च न पक्षेतरत्वमिति । नो चेन्न हेत्वन्तर इति । यदि पूर्वोपपादितः उपाधिर्न भवति, तदा हेत्वन्तरे सामान्यवत्त्वे सति अस्मद्बाह्यप्रत्यक्षत्वादित्यादिकेऽप्युपाधिर्न स्यादित्यर्थः ।

अथ प्रतीत्यपर्यवसानलभ्यसाध्यव्यापकः तथाविधसाध्याभाववद्रूपपक्षव्यावर्त्यवांश्चोपाधिः क्वचिदपि न दृष्टः इति चेत् । न । पक्षे व्यापकीभूतसाध्यसाधकं विपक्षादीन् पक्षीकृत्य पक्षे तथाभूतसाध्यसाधकमनुमानमपि क्वचिन्न दृष्टमेव । महाविद्यैव तथा दृश्यते इति चेत् । तर्हि तदुपाधिरपि तथाभूतो दृश्यते इति संतोष्टव्यम् । न चैवं सति सकलकेवलान्वयिप्रामाण्यभङ्ग इति वाच्यम् । तत्प्रामाण्यस्यास्माभिरनङ्गीकारात् । अङ्गीकारे वा सर्वत्रापर्यवसानलभ्यान्वयव्यतिरेकिसाध्याभावेन तद्व्यापकस्योपाधेरनुपपत्तिरिति ।

(भुवन०)—परः शङ्कते—अथ प्रतीत्यपर्यवसानेति । प्रतीतेरपर्यवसानेन अभवनेन लभ्यं यदनित्यत्वादिसाध्यं, तस्य व्यापकः, तथाविधं यदनित्यत्वादि साध्यं तस्य योऽभावः, तद्रूपो यो विपक्षो व्यावर्त्यस्तद्वांश्चोपाधिर्न क्वापि दृष्टचरः । आचार्यः परिहरति—न पक्षे व्यापकेति । पक्षे विपक्षादौ व्यापकीभूतं साध्यं महाविद्यासाध्यं, तत्साधकं सत् विपक्षादीन्पक्षीकृत्य पक्षे शब्दे तथाभूतसाध्यमनित्यत्वादिकं तत्साधकमनुमानमपि क्वचिन्न दृष्टमित्यर्थः । ननु यदि केवलान्वयी न स्वीक्रियते, तर्ह्यदृष्टादि कस्यचित्प्रत्यक्षं मेयत्वाद्धटवदित्यादेः केवलान्वयित्वेन अस्वीकारार्हत्वात्सर्वज्ञसिद्धिः कथमित्याशङ्कापरिहारायाह—अङ्गीकारे वेति । केवलान्वयिहेतोरङ्गीकारे वा सर्वानुमानेष्वपर्यवसानलभ्यं यदन्वयव्यतिरेकिणो मूलानुमानस्य साध्यं, तदभावेन व्यापकस्य अपर्यवसान-

१ 'अस्मदादिबाह्येन्द्रियग्राह्यत्वादि' इति घ पुस्तकपाठः । २ 'वणत्वमुपा' इति घ पुस्तकपाठः । ३ 'तथाभूता द' । इति घ पुस्तकपाठः ।

लभ्यान्वयव्यतिरेकिसाध्यव्यापकस्योपाधेरनुपपत्तिः । अयमभिप्रायः—महाविद्यायां हि अपर्यवसान-लभ्यानित्यत्वादिसाध्यसद्भावेन तद्व्यापक उपाधिः सम्भवति, नान्यत्र केवलान्वयिषु । तत्रानन्तरोक्तसाध्यासम्भवात् । तस्मात्केवलान्वयिषूपाधेरभावः इत्यर्थः ।

इति संक्षेपतोऽस्माभिरुपाधिरुपवर्णितः ।
महाविद्यानिरासार्थं तन्मूलकषणक्षमः ॥ ५ ॥

मूलश्लोकस्तु—

यो भङ्गिस्थनिवृत्तिमत्त्वरहितो यद्वर्जिते मेयता
मेयत्वे श्रुतिगोचरत्वविरहः स स्यादुपाधिर्ध्रुवः ।
शब्दत्वादि निवर्त्यमस्ति न ततः पक्षेतरत्वभ्रमः
सर्वत्रैवमुपाधिरप्रतिहतो नो चेन्न हेत्वन्तरे ॥ ६ ॥

(भुवन०)—श्लोकः स्पष्टः ॥ ५ ॥

अथ संनह्यतेऽभीष्टविरोधस्तर्कमुद्रया ।
प्रतिवादिमहाविद्याघर्षणाय विचक्षणः ॥ ७ ॥

(भुवन०)—उत्तरश्लोकतात्पर्यमाह—अथ संनह्यते इति । अभीष्टविरोधः संनह्यते सन्नद्धो भवति । कया । तर्कमुद्रया तर्कयुक्त्या ॥ ७ ॥

धत्तेऽभीष्टविरुद्धतां निगदितो हेतुः समुन्मीलयन्
इष्टाभावमभीष्टतुल्यनयतः पक्षे विचारक्षमाम् । इति

यथाकथितो हेतुःमेयत्वादिः पक्षीकृतशब्दे तत्तदितरवृत्तित्वरहितानित्य-निष्ठाधिकरणत्वं साधयन् पक्षे साध्यप्रतीत्यपर्यवसानाद्वाद्यभिमतमनित्यत्वं साधयति । तथा पक्षीकृतशब्दे तत्तदितरवृत्तित्वरहितानित्यत्वात्यन्ताभाववन्नि-ष्ठाधिकरणत्वं साधयन् पक्षे साध्यप्रतीत्यपर्यवसानरूपानित्यत्वसिद्धितुल्यन्या-येन वाद्यभिमतानित्यत्वात्यन्ताभावं साधयति । तेन वाद्यभिमतानित्यत्वरूप-साध्याभावसाधकत्वादयमभीष्टविरुद्धो विशेषविरुद्ध इष्टविघातकारी चेत्यु-च्यते । व्यापकत्वाभिमतसाध्याभावव्याप्यत्वं विरुद्धत्वम् । तच्च प्रकृते नास्तीति नायं विरुद्ध इत्यत आह—

किञ्चिद्व्यापकमीप्सितं तदपरं भेदस्तयोः कीदृशः
साध्यत्वे तदभावसाधकतया लोके विरुद्धस्थितिः ॥ ८ ॥ इति ।

(भुवन०)—अभीष्टविरुद्धतां दर्शयति—धत्तेऽभीष्टेत्यादि । निगदितो हेतुर्मेयत्वादिरभी-ष्टस्य विरुद्धता अभीष्टविरुद्धता, तां विचारक्षमां धत्ते । किं कुर्वन्नुन्मीलयन् । कम् । इष्टाभावम् । इष्टमनित्यत्वम्, तदभावो नित्यत्वम् । कस्मात् । अभीष्टतुल्यनयतः अभीष्टमनित्यत्वं यथा साध्यते,

आत्मवदित्यत्र अयममात्मैतदात्मैतत्परमाणुव्यतिरिक्तत्वरहितनित्यान्यः प्रमेयत्वाद्धटादिवदित्यत्र कः उपाधिरत्राह—यः पुनरन्वयेति। तदप्रामाण्यस्येति। निरुपाधिकमहाविद्याया अप्रामाण्यं वक्ष्यमाणदोषैर्विरुद्धतानैकान्तिकत्वादिभिरपि सेत्स्यतीत्यर्थः।

यः पुनर्व्युत्पादितमपि साध्यव्यापकं साधनाव्यापकं चोपाधिं प्रमेयत्वादौ न मन्यते, तस्य अयं शब्दोऽनित्यः, सामान्यवत्त्वे सति अस्मद्बाह्यप्रत्यक्षत्वादित्यादावपि अश्रावणत्वादिरुपाधिर्न स्यात्, अविशेषादित्याह—

'नो चेन्न हेत्वन्तरे,' इति

(भुवन०)—चतुर्थपादान्त्यभागतात्पर्यमाह—यः पुनर्व्युत्पादितमिति। य एवं पूर्वोत्पादितमप्युपाधिं न स्वीकुरुते, तस्य अयं शब्दोऽनित्यः इत्यत्रापि अश्रावणत्वोपाधिर्न स्यात्। अ चात्रोपाधिः। तथाहि। यद्यदनित्यं तत्तदश्रावणं यथा घटादि। यत्राश्रावणत्वाभावः तत्रानि त्वाभावो यथा शब्दत्वे इति साध्यव्यापकत्वम्। तथा शब्दे सामान्यवत्त्वे सति यदस्मद्बाह्यप्रत्यक्ष तस्मिन्सत्यपि अश्रावणत्वोपाधेरभावात्साधनाव्यापकत्वं चोपाधेः। शब्दत्वरूपविपक्षव्यावर्त्यसत्त्वे च न पक्षेतरत्वमिति। नो चेन्न हेत्वन्तर इति। यदि पूर्वोपपादितः उपाधिर्न भवति, त हेत्वन्तरे सामान्यवत्त्वे सति अस्मद्बाह्यप्रत्यक्षत्वादित्यादिकेऽप्युपाधिर्न स्यादित्यर्थः।

अथ प्रतीत्यपर्यवसानलभ्यसाध्यव्यापकः तथाविधसाध्याभाववद्रूपपक्षव्यावर्त्यवांश्चोपाधिः क्वचिदपि न दृष्टः इति चेत्। न। पक्षे व्यापकीभूतसाध्यसाधकं विपक्षादीन् पक्षीकृत्य पक्षे तथाभूतसाध्यसाधकमनुमानमपि क्वचि दृष्टमेव। महाविद्यैव तथा दृश्यते इति चेत्। तर्हि तदुपाधिरपि तथाभू दृश्यते इति संतोष्टव्यम्। न चैवं सति सकलकेवलान्वयिप्रामाण्यभङ्ग इ वाच्यम्। तत्प्रामाण्यस्यास्माभिरनङ्गीकारात्। अङ्गीकारे वा सर्वत्रापर्यवसा लभ्यान्वयव्यतिरेकिसाध्याभावेन तद्व्यापकस्योपाधेरनुपपत्तिरिति।

(भुवन०)—परः शङ्कते—अथ प्रतीत्यपर्यवसानेति। प्रतीतेरपर्यवसानेन अभवनेन ल यदनित्यत्वादिसाध्यं, तस्य व्यापकः, तथाविधं यदनित्यत्वादि साध्यं तस्य योऽभावः, तद्रूपो विपक्षो व्यावर्त्यस्तद्वांश्चोपाधिर्न क्वापि दृष्टचरः। आचार्यः परिहरति—न पक्षे व्यापकेति पक्षे विपक्षादौ व्यापकीभूतं साध्यं महाविद्यासाध्यं, तत्साधकं सत् विपक्षादीन्पक्षीकृत्य पक्षे श तथाभूतसाध्यमनित्यत्वादिकं तत्साधकमनुमानमपि क्वचिन्न दृष्टमित्यर्थः। ननु यदि केवलान्वयी स्वीक्रियते, तर्ह्यदृष्टादि कस्यचित्प्रत्यक्षं मेयत्वाद्धटवदित्यादेः केवलान्वयित्वेन अस्वीकारार्हत्वात्स ज्ञसिद्धिः कथमित्याशङ्कापरिहारायाह—अङ्गीकारे वेति। केवलान्वयिहेतोरङ्गीकारे वा सर्वा मानेष्वपर्यवसानलभ्यं यदन्वयव्यतिरेकिणो मूलानुमानस्य साध्यं, तदभावेन व्यापकस्य अपर्यवसा

१ 'अस्मदादिबाह्येन्द्रियग्राह्यत्वादि' इति घ पुस्तकपाठः। २ 'वणत्वमुपा' इति घ पुस्तकपाठः
३ 'तथाभूता द' । इति घ पुस्तकपाठः।

लभ्यान्वयव्यतिरेकिसाध्यव्यापकत्वोपाधेरनुपपत्तिः । अयमभिप्रायः—महाविद्यायां हि अपर्यवसान-लभ्यानित्यत्वादिसाध्यसद्भावेन तद्व्यापक उपाधिः सम्भवति, नान्यत्र केवलान्वयिषु । तत्रानन्तरोक्तसाध्यासम्भवात् । तस्मात्केवलान्वयिषूपाधेरभावः इत्यर्थः ।

इति संक्षेपतोऽस्माभिरुपाधिरुपवर्णितः ।
महाविद्यानिरासार्थं तन्मूलकषणक्षमः ॥ ५ ॥

मूलश्लोकस्तु—

यो भङ्गिस्थनिवृत्तिमत्त्वरहितो यद्वर्जिते मेयता
मेयत्वे श्रुतिगोचरत्वविरहः स स्यादुपाधिर्ध्रुवः ।
शब्दत्वादि निवर्त्यमस्ति न ततः पक्षेतरत्वभ्रमः
सर्वत्रैवमुपाधिरप्रतिहतो नो चेन्न हेत्वन्तरे ॥ ६ ॥

(भुवन०)—श्लोकः स्पष्टः ॥ ५ ॥

अथ संनह्यतेऽभीष्टविरोधस्तर्कमुद्रया ।
प्रतिवादिमहाविद्याधर्षणाय विचक्षणः ॥ ७ ॥

(भुवन०)—उत्तरश्लोकतात्पर्यमाह—अथ संनह्यते इति । अभीष्टविरोधः संनह्यते सज्जो भवति । कया । तर्कमुद्रया तर्कयुक्त्या ॥ ७ ॥

धत्तेऽभीष्टविरुद्धतां निगदितो हेतुः समुन्मीलयन्
इष्टाभावमभीष्टतुल्यनयतः पक्षे विचारक्षमात् । इति

यथाकथितो हेतुर्मेयत्वादिः पक्षीकृतशब्दे तत्तदितरकृतित्वरहितानित्यनिष्ठाधिकरणत्वं साधयन् पक्षे साध्यप्रतीत्यपर्यवसानादात्मभिन्नानित्यत्वं साधयति । तथा पक्षीकृतशब्दे तत्तदितरकृतित्वरहितानित्यत्वात्यन्ताभाववद्वृत्ति-त्वाधिकरणत्वं साधयन् पक्षे साध्यप्रतीत्यपर्यवसानरूपानित्यत्वविरोधिन्यायेन आत्मभिन्नानित्यत्वात्यन्ताभावं साधयति । तेन आत्मभिन्नानित्यत्ववत्-साध्याभावसाधकत्वादयमभीष्टविरुद्धो विशेषविरुद्ध इष्टविघातकृदित्युच्यते । व्यापकत्वाभिमतसाध्याभावव्याप्यत्वं विरुद्धत्वम् । तच्च प्रकृते नास्तीति नायं विरुद्ध इत्यत आह—

सिद्धिसाधकताभिमतं तद्रूपं हेत्वन्तरैः कीदृशाः
साध्यत्वे तद्भावसाधकतया नोक्ता विरुद्धा इति ॥ ८ ॥ इति ।

(भुवन०)—अभीष्टविरुद्धं दर्शयति—[illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] । [illegible] । [illegible] । [illegible] [illegible]

तथा नित्यत्वमपीति तत्तुल्यन्यायात् । कस्मिन् । पक्षे शब्दादौ । अनित्यत्ववन्नित्यत्वमपि साधयन्विरुद्धः स्यादित्यर्थः ।

श्लोकार्धं व्याचष्टे—**यथाकथित इत्यादि** । मेयत्वादिहेतुः पक्षीकृतशब्दे तत्तदितरेत्यादि महाविद्यासाध्यं साधयन्पक्षे यत्साध्यप्रतीतेरपर्यवसानमनुपपत्तिः, तद्बलेन यथा वाद्यभिमतमनित्यत्वं साधयति, तथैव वाद्यभिमतं यदनित्यत्वं तदत्यन्ताभावो नित्यत्वं तदपि साधयति । तथापि किं दूषणमित्याह—**तेन वाद्यभिमतेति** । वाद्यभिमतं यदनित्यत्वरूपं साध्यं तदभावो नित्यत्वं, तत्साधकत्वादयमभीष्टविरुद्धः । 'हेतुभेदाभावेन तुल्यबलः साध्याभावसाधकोऽभीष्टविरुद्धः' इति संपूर्णतल्लक्षणस्य सद्भावात् । उत्तरार्धावताराय शङ्कते—**व्यापकत्वाभिमतेति** । व्यापकत्वाभिमतं साध्यमत्र स्वस्वेतरेत्यादिकं महाविद्यासत्कं । तदभावेन व्याप्यो हि हेतुर्विरुद्ध इत्युच्यते । अयं तु पारिशेष्यलभ्यानित्यत्वसाध्यस्य अभावेन व्याप्यो, न तु महाविद्यासाध्यस्याभावेन । ततो नायं विरुद्ध इत्यर्थः ।

उत्तरार्धं दर्शयति—**किञ्चिद्व्यापकमिति** । किञ्चिद्व्यापकं महाविद्यासाध्यं किञ्चित्तस्मादपरं च व्यापकप्रतीत्यपर्यवसानलभ्यमनित्यत्वादि, तयोः साध्यत्वे भेदः कीदृशो, न कोऽपीत्यर्थः । तयोः साध्ययोर्योऽभावस्तत्साधको लोके तार्किकलोके विरुद्धो हेतुरुच्यते इत्यभिप्रायः ॥ ८ ॥

प्रकृतव्यापकाभावव्याप्यः प्रकृतो हेतुर्विरुद्ध इत्ययुक्तम् । प्रकृतहेतोरेवंरूपत्वप्रमितौ विरुद्धत्वस्य दुर्वारत्वात् । अप्रमितौ अस्य लक्षणस्य स्वरूपासिद्धत्वात् । तस्मात्साध्याभावसाधकः प्रकृतो हेतुर्विरुद्ध इत्युच्यते ।

(भुवन०)—श्लोकोत्तरार्धं व्याख्यातुं परोक्तं दूषयति—**प्रकृतव्यापकेति** । प्रकृतं व्यापकं महाविद्यासाध्यं, तदभावेन व्याप्यः प्रकृतो हेतुर्मेयत्वादिर्विरुद्ध इति भावः । प्रकृतव्यापकाभावव्याप्यत्वं हेतोः प्रमितं न वा । आद्यं प्रत्याह—**प्रकृतहेतोरिति** । प्रकृतहेतोर्मेयत्वादेरेवंरूपत्वप्रमितौ प्रकृतव्यापकाभावव्याप्यत्वप्रमितौ विरुद्धत्वं दुर्वारम् । द्वितीयं प्रत्याह—**अप्रमिताविति** । यदि प्रकृतव्यापकाभावव्याप्यत्वं हेतोरप्रमितं, तदानीमेतल्लक्षणस्य स्वरूपमेवासिद्धम् । यतः एतल्लक्षणं हि विशेषलक्षणत्वेन अन्यत्राप्रसिद्धम् । तर्हि किं लक्षणमित्याह—**तस्मात्साध्याभावेति** ।

साध्यं च द्विविधम् । किञ्चिद्व्यापकाभिमतं, किञ्चिद्व्यापकप्रतीत्यपर्यवसानलभ्यम् । न चानयोः प्रतिवादिना पक्षनिष्ठतयानङ्गीकृतयोर्वादिना च तन्निष्ठतया बोध्यमानयोः साध्यत्वे कश्चिद्विशेषोऽस्ति । व्यापकत्वाभिमतसाध्याभावव्याप्यत्वं तु व्यापकविरुद्धापरपर्यायं विरुद्धविशेषलक्षणम् । यदि पुनर्विरुद्धविशेषलक्षणाभावात् नायं विरुद्धः, तर्हि अभिप्रेतसाध्यविशेषाभावसाधको विरुद्ध इति विरुद्धविशेषलक्षणाभावाद्व्यापकाभिमताभावव्याप्योऽपि विरुद्धो न स्यादिति । यद्वा मा भूदयं विरुद्धः, तथाप्यभीष्टविरुद्धापरपर्यायं हेत्वाभासान्तरं भविष्यति ।

---

१ 'अनित्यत्वं नित्यत्व' इति छ द पुस्तकपाठः ।

(भुवन०)—श्लोकार्थं व्याचाख्याति—साध्यं च द्विविधमित्यादि। व्यापकत्वेनाभिमतं महाविद्यासाध्यम्। व्यापकं महाविद्यासाध्यं, तस्य या प्रतीतिस्तस्याः अपर्यवसानेन लभ्यमनित्यत्वादि। न चानयोरिति। अनयोः साध्ययोः प्रतिवादिना महाविद्यानिराकर्त्रा पक्षे शब्दादौ निष्टतया अनङ्गीकृतयोर्वादिना महाविद्यावादिना तन्निष्टतया पक्षनिष्ठतया बोध्यमानयोः न च साध्यत्वे कश्चिद्विशेषोऽस्ति। यतः उभयमपि साध्यतयोच्यते। प्रकारान्तरेणाशङ्कते—व्यापकत्वाभिमतेति। व्यापकत्वेनाभिमतं महाविद्यासाध्यं तस्य योऽभावस्तेन व्याप्यत्वं हेतोस्तद्व्यापकविरुद्धः इत्यपरपर्यायं विरुद्धहेतोर्विशेषलक्षणमित्याशयः। आचार्यः प्रत्युत्तरयति—तर्हीत्यादि। अभिप्रेतः साध्यविशेषोऽनित्यत्वादिः, तदभावसाधको विरुद्ध इत्यभिप्रायः। व्यापकाभिमतेति। व्यापकं यदभिमतं महाविद्यासाध्यमित्यर्थः। तर्हि संशयः एव स्यान्न निर्णयोऽत्राह—यद्वा मा भूदिति।

सत्प्रतिपक्ष एवायं, न विरुद्धो, न हेत्वाभासान्तरमिति शिवादित्यमिश्राः। तन्न। साध्याभावसाधकतुल्यबलद्वितीयहेतावेव पूर्वाचार्याणां प्रतिपक्षव्यवहारात्, साध्याभावसाधकत्वमात्रेण प्रतिपक्षत्वे विरुद्धस्यापि प्रतिपक्षत्वप्रसङ्गात्। तुल्यबलत्वाभावान्न विरुद्धः प्रतिपक्षो बाधवदिति चेत्। अथ तुल्यबलत्वविशेषणं किमर्थम्। विरुद्धादिनिवृत्त्यर्थमिति चेत्। अथ विरुद्धादयः किमर्थं निवर्त्याः। पूर्वाचार्याणां तत्र प्रतिपक्षव्यवहाराभावादिति चेत्। एवं तर्हि प्रकृतहेत्वन्यत्वमपि विशेषणमुपादेयमेव। पूर्वाचार्यैस्तस्यैव तं प्रति प्रतिपक्षत्वेन अव्यवहारादित्यलमुपजीव्यैः सह कलहेन।

(भुवन०)—परमतं प्रकटयति—सत्प्रतिपक्ष इति। अयं हेतुः प्रकरणसम एवेति शिवादित्यमिश्राः प्राहुरिति। परमतं निरस्यति—तन्न। साध्याभावेति। साध्याभावसाधको यः पूर्वहेतोस्तुल्यबलो द्वितीयहेतुस्तत्रैव पूर्वाचार्याणां सत्प्रतिपक्षत्वव्यवहारात्। इदं हृदयम्। पूर्वानुमानोक्तहेतुना मेयत्वादिना अनित्यत्वादिसाध्यसाधकेन तुल्यबलः, तत्प्रमेयत्वादेश्च यो द्वितीयहेतुरभिधेयत्वादिः पूर्वोक्तानित्यत्वादिसाध्याभावसाधकः स एव सत्प्रतिपक्षः। साध्याभावसाधकस्यैव प्रतिपक्षत्वेऽतिप्रसङ्गमाह—साध्याभावेति। साध्याभावसाधक एव यदि प्रतिपक्षः, तर्हि विरुद्धोऽपि साध्याभावसाधकत्वात्प्रतिपक्षः प्रसज्येत। परः शङ्कते—तुल्यबलेति। साध्याभावसाधकोऽपि तुल्यबल एव प्रतिपक्षो नातुल्यबलः, तस्मात्तुल्यबलत्वाभावाद्विरुद्धः प्रतिपक्षो नोच्यते, यथा बाधः कालात्ययापदिष्टस्तुल्यबलत्वाभावान्न प्रतिपक्षः। प्रश्नपूर्वकं परिहरति—अथ तुल्येत्यादि। साध्याभावसाधकस्तुल्यबलः प्रतिपक्ष इति प्रतिपक्षलक्षणे तुल्यबलत्वविशेषणं किमर्थमित्यर्थः। [illegible]—एवं तर्हीति। प्रकृतो हेतुर्मेयत्वादिस्तदुक्त, तस्मादन्योऽभिधेयत्वादिस्तत्त्वम्। एतदुक्तम्—अथ प्रतिपक्षलक्षणे तुल्यबलत्वविशेषणमुक्तम्,

---

१ 'बाधः प्रतिपक्षलक्षणेऽन्तर्भवति' इति क पुस्तकपाठः।

तथा प्रकृतहेत्वन्य इत्यपि विशेषणमुपादेयम् । तथा च साध्याभावसाधकतुल्यबलः प्रकृतहेत्वन्यः प्रतिपक्ष इति प्रतिपक्षलक्षणमुक्तं भवति । प्रकृतहेत्वन्यः इति विशेषणाङ्गीकरणे हेतुमाह— पूर्वाचार्यैरिति । तस्यैव मेयत्वादेरेव, तं प्रति मेयत्वादिकमेव प्रति प्रतिपक्षत्वेन पूर्वाचार्यैर्व्यवहारात् । पूर्वाचार्याणां हि पूर्वोक्तहेत्वन्यस्मिन्नेव प्रतिपक्षत्वव्यवहारोऽस्ति न तु मेयत्वादेरेव मेयत्वादिकं प्रतीतिभावार्थः । उपजीव्यैरिति । अयमभिप्रायः । पूर्वाचार्यैः प्रकृतहेत्वन्य इति विशेषणमुपादायि । शिवादित्यमिश्राश्च नोपाददते इति यः उपजीव्यैः पूर्वाचार्यैः सह भवतां कलहस्तेन कृतम् । एतावता पूर्वोक्तहेतोः सत्प्रतिपक्षत्वमुत्थापितं, अभीष्टविरुद्धत्वं तु स्थापितं भवति ।

महाविद्यान्तरेष्वपि अनित्यपदस्थाने अनित्यत्वात्यन्ताभावपदं प्रक्षिप्य साध्यप्रतीत्यपर्यवसानादनित्यत्वात्यन्ताभावसाधकत्वमुपपाद्य अभीष्टविरुद्धता द्रष्टव्येति ।

(भुवन०)—उक्तमन्यत्रातिदिशति । महाविद्येति । अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यवृत्तिधर्मवानित्यादौ अनित्यत्ववृत्तिपदस्थाने नित्यवृत्तिपदं प्रयुज्यत इत्यर्थः ।

अपि सर्वगुणोऽभीष्टविरोधेन विनश्यति ।
किं पुनर्दोषसंघातैर्महाविद्या समाकुला ॥ ९ ॥

(भुवन०)—अभीष्टविरुद्धतामुपसंहरति—अपि सर्वगुण इति । सर्वगुणोऽपि हेतुरभीष्टविरोधदोषेण विनश्यति । अन्योऽपि जनः सर्वगुणोऽप्यभीष्टस्य मित्रादेर्विरोधेन विनश्यत्येव । महाविद्याया दोषसंघातैः समाकुलायास्तु किमुच्यते ॥ ९ ॥

अथ सव्यभिचारत्वमुन्मीलत्कुलिशश्रियम्[१] ।
महाविद्यामहाभूभृत्पक्षच्छेदाय सज्जते ॥ १० ॥

(भुवन०)—अनैकान्तिकतोद्भावनाय प्रक्रमते—अथ सव्यभिचारत्वमिति । सव्यभिचारत्वमनैकान्तिकत्वं महाविद्यामहाद्रिपक्षच्छेदाय सज्जते । किं कुर्वत् । उन्मीलत् । अन्तर्भूतण्यर्थत्वादुन्मीलयत् । कां कुलिशश्रियम् । यद्वोन्मीलत्कुलिशद्युतीति पदमवगन्तव्यम् । तथा च सव्यभिचारत्वस्यैतद्विशेषणम् ॥ १० ॥

सर्वमेव वस्तु स्वनिष्ठात्यन्ताभावप्रतियोगीत्युक्तम् । तेन महाविद्यासाध्ये तदत्यन्ताभाववति मेयत्वस्य गतत्वादनैकान्तिकत्वमिति । किञ्च,

त्वत्साध्यं स्वभिदान्यमेयनिहिताऽभावान्वितत्वाश्रयो
मेयत्वादिति केवलान्वयिमतेऽस्माकं तु तद्भेदतः ।
यद्वा मेयनिवृत्तताधिकरणं साध्यं त्वदीयं ततो
भिन्नत्वादिति साध्यवर्जिततनौ लब्धस्थितिर्मेयता ॥ ११ ॥

त्वत्साध्यमिति । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वादिकं

१ 'कुलिशद्युति' । इति घ पुस्तकपाठः ।

विवक्षितम् । स्वभिदेति । स्वान्योन्याभावः । मेयनिहितो मेयाश्रितः । स चासौ अभावश्च । तेन अन्वितः । तस्य प्रतियोगी । तस्य भावः तत्त्वम् । तस्याश्रयः तदधिकरणमित्यर्थः । प्रयोगस्तु—पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वान्योन्याभावव्यतिरिक्तमेयनिष्ठाभावप्रतियोगित्वाश्रयः, मेयत्वात् घटवदिति । पक्षीकृतसाध्यान्योन्याभावव्यतिरिक्तश्च सर्वेषामन्योन्याभावः प्रमेयेऽस्त्येवेति तेषां सपक्षता । प्रकृतसाध्यस्य चान्योन्याभावव्यतिरिक्तो मेयनिष्ठोऽभावः सिध्यन्नत्यन्ताभाव एव सिध्यति । तस्य साध्यस्य सदाननत्वेन प्राक्प्रध्वंसाभावानुपपत्तेः । तेन साध्याभाववति गमनान्मेयत्वस्य सव्यभिचारत्वं अनैकान्तिकत्वापरपर्यायं दुर्वारम् । अयं हेतुः केवलान्वयिप्रामाण्यवादिनाम् । अस्माकं तु स्वान्योन्याभावव्यतिरिक्तमेयनिष्ठाभावप्रतियोगित्वान्यत्वादिति हेतुः । तदिदमुक्तं तद्भेदत इति । तदन्यत्वादित्यर्थः । तच्छब्देन च स्वान्योन्याभावव्यतिरिक्तमेयनिष्ठाभावप्रतियोगित्वं परामृश्यते ।

(भुवन०)—अनैकान्तिकत्वं दर्शयति—सर्वमेवेति । सर्वं वस्तु घटादि स्वनिष्ठो योऽत्यन्ताभावस्तस्य प्रतियोगि । इदमत्राकूतम् । घटे यदि घटः [illegible] । 'अव्यवधानेन स्वापेक्षणमात्माश्रयः' इति तल्लक्षणात् । तस्माद्घटादौ स्वात्यन्ताभावो विद्यते एवेति सर्वं वस्तु स्वात्यन्ताभावप्रतियोगि भवतीति [illegible] । तेन [illegible] । महाविद्यानाम्ये स्वादेतरेत्यादौ तस्य महाविद्यालक्षणस्यैव योऽत्यन्ताभावस्तत्प्रतियोगि [illegible] दिति । अयमर्थः—महाविद्यालक्षणे पूर्वोक्तयुक्त्या स्वात्यन्ताभावप्रतियोगित्वम् । तथा च [illegible] स्वात्यन्ताभाववति महाविद्यालक्षणे विद्यते [illegible] । '[illegible]' इति तल्लक्षणात् ।

[illegible]

[illegible] ॥ ११ ॥

[illegible]

सापेक्षत्वं वारयति मेयनिष्ठेतिपदेन । ननु कथमत्र व्याप्यत्वगमोऽत्राह—पक्षीकृतसाध्येत्यादि । घटान्योन्याभावः पटेऽस्ति, पटान्योन्याभावश्च घटे इत्येवंप्रकारेण सर्वेषां घटपटादीनामन्योन्याभावः प्रमेयेऽस्ति । ततस्तेषां घटपटादीनां सपक्षता । तेन साध्याभाववन्तीति । अयमाशयः । अनेनानुमानेन महाविद्यासाध्यस्य मेयेऽत्यन्ताभावोऽस्तीति साधितम् । मेयत्वहेतुस्तु तत्रापि मेये वर्तत इति साध्याभाववति गमनान्मेयत्वस्य अनैकान्तिकत्वम् । नन्वयमपि भवतो हेतुर्महाविद्याया इव केवलान्वयी, ततोऽस्यापि हेतोरनैकान्तिकत्वं कथं नेत्याह—अयं हेतुरित्यादि । अयं मेयत्वादिति हेतुः । तर्हि भवद्भिः किं हेतूक्रियतेऽत्राह—अस्माकं त्विति । अत्र साध्यधर्मान्यत्वादिति हेतुः । व्याप्तिश्च यत्स्वान्योन्याभावव्यतिरिक्तमेयनिष्ठाभावप्रतियोगित्वान्यत् तत्स्वान्योन्याभावव्यतिरिक्तमेयनिष्ठाभावप्रतियोगित्वाश्रयो, यथा घटादि । अयं भावः । सर्वेऽपि भावाः परस्परापेक्षया मेयनिष्ठात्यन्ताभावप्रतियोगित्ववन्तः, तथा मेयनिष्ठात्यन्ताभावप्रतियोगित्वरूपो यो धर्मस्तस्मादन्ये भिन्ना अपि भवन्ति । धर्मधर्मिणोर्भिन्नत्वात् ।

व्यतिरेकव्याप्तिस्तु यन्मेयनिष्ठाभावप्रतियोगित्वाश्रयो न भवति, तन्मेयनिष्ठाभावप्रतियोगित्वान्यन्न भवति । यथा मेयनिष्ठाभावप्रतियोगित्वमेव, स्वात्मन्यवृत्तेः । तेन तस्मिन्नेव तदत्यन्ताभाववति मेयत्वस्य अनैकान्तिकत्वमिति परिहृतम् ।

(भुवन०)—अस्यापि हेतोः केवलान्वयित्वेन कथं न व्यभिचाराशङ्केत्याह—व्यतिरेकव्याप्तिरित्यादि । व्यतिरेकव्याप्तौ मेयनिष्ठाभावप्रतियोगित्वं दृष्टान्तः । तच्च मेयनिष्ठाभावप्रतियोगित्वस्याश्रयो न भवति, स्वस्मिन्स्वस्य अवृत्तेः । नापि मेयनिष्ठाभावप्रतियोगित्वं स्वस्मादन्यद्भवति । स्वस्य स्वतोऽन्यत्वे स्वरूपस्यैव हानेः । तेन तस्मिन्निति । तेनान्वयव्यतिरेकिहेतूकरणादिकारणेन, तस्मिन्नेव महाविद्यानुमानोत्थापकानुमानसाध्य एव स्वात्यन्ताभाववति वर्तनान्मेयत्वहेतोरनैकान्तिकत्वं परेणोद्भाव्यमानमाशङ्क्य परिहृतमित्यर्थः ।

यद्वैवं प्रयोगः—पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वाधिकरणं, मेयत्वान्यत्वे सति मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वान्यत्वात्, घटवदिति । तदिदमुक्तं—यद्वा मेयनिवृत्तताधिकरणं साध्यं त्वदीयं ततो, भिन्नत्वादिति साध्यवर्जिततनौ लब्धस्थितिर्मेयता । मेयनिवृत्तता मेयनिष्ठात्यन्ताभावप्रतियोगित्वम् । ततो भिन्नत्वादिति । मेयनिष्ठात्यन्ताभावप्रतियोगित्वमेयत्वाभ्यामन्यत्वादित्यर्थः । एवं सर्वमहाविद्यासाध्यानि पक्षीकृत्य अनैकान्तिकत्वं साधनीयम् ।

---

१ 'निष्ठान्योन्याभाव' इति च पुस्तक पाठः । २ 'निष्ठान्योन्याभाव' इति च पुस्तक पाठः ।

(भुवन०)—उत्तरार्धं व्याचष्टे—यद्वैवमिति । अत्र पूर्वोक्त एव पक्षः । पूर्वोक्तसाध्यमध्याच्च स्वान्योन्याभावव्यतिरिक्तेति पदं त्यक्तं, अत्यन्ताभावेति चोपात्तम् । शेषं तदेव । हेतुश्चात्र यत्साध्यं तदन्यत्वादित्येव, परं मेयत्वान्यत्वे सतीत्यधिकं पदम् । तच्च चेन्न गृहेत, तर्हि मेयत्वे मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वान्यत्वरूपसाधनसत्त्वेऽपि मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वाश्रयत्वरूपसाध्याभावेन यत्र यत्र साधनं तत्र तत्र साध्यमिति व्याप्त्यभावान्मेयत्वेन व्यभिचारो भवेत् । तद्व्यावृत्त्यर्थं मेयत्वान्यत्वे इत्युपादायि । मेयत्वं चाशेषलक्षणम् । अन्येऽपि वाच्यत्वसत्त्वादयो ये केवलान्वयिधर्मास्तदन्यत्वे सतीति मन्तव्यम् । अन्यथा वाच्यत्वादिभिरपि व्यभिचारः केन निवार्येतेति भावार्थः । यद्वा मेयनिवृत्ततेति । मेयान्निवृत्तो मेयनिवृत्तः, तस्य भावो मेयनिवृत्तता । एतावता मेयनिष्ठात्यन्ताभावप्रतियोगित्वं प्रोक्तम् । यतो मेयनिष्ठात्यन्ताभावप्रतियोगी मेयनिवृत्त एवेति । मेयनिवृत्ततायाः अधिकरणं त्वदीयं साध्यं महाविद्यासत्कम् । एतावता पक्षीकृतेत्यादिपक्षे मेयत्ववन्निष्ठेत्यादि साध्यं सूचितम् । ततो भिन्नत्वादिति । ततो मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वधर्मान्मेयत्वधर्माच्च भिन्नत्वादन्यत्वादित्यर्थः । अनेन मेयत्वान्यत्वेत्यादिहेतुरसूचि । अयं सर्वसव्यभिचारत्वपक्षपरमार्थः—महाविद्यासाध्यं स्वस्मिन्वर्तते न वा । वर्तते चेत्तदा आत्माश्रयः । नो चेत्तर्हि स एव विपक्ष इति युक्त्या महाविद्यासाध्ये महाविद्यासाध्यवर्जिते तथा पूर्वानुमानाभ्यां मेयमध्ये महाविद्यासाध्याभावसाधनात्, महाविद्यासाध्यरहिते घटादिमेये च मेयत्वस्य वर्तनात् अनैकान्तिकत्वमित्यर्थः ।

न चैवं सति सकलसाध्यानि पक्षीकृत्य सर्वहेतूनामनैकान्तिकत्वस्य साधयितुं शक्यत्वात्सर्वानुमानोच्छेद इति वाच्यम् । महाविद्यानुमानानैकान्तिकत्वस्य तत्साधनस्य च सकलानुमानानैकान्तिकत्वेन तत्साधनेन च व्याप्त्यभावेन ताभ्यां तयोरापादयितुमशक्यत्वात् । एवंविधानुमानानां चास्माभिः प्रामाण्यानङ्गीकारात् । महाविद्यावादिना चैवंविधानुमानप्रामाण्ये विप्रतिपत्तुमशक्यत्वादिति ।

(भुवन०)—न वाच्यमित्यत्र हेतुमाचष्टे—महाविद्यानुमानानैकान्तिकत्वस्येति । महाविद्यानुमानानैकान्तिकत्वस्य प्राक्प्रदर्शितस्य सर्वानुमानानैकान्तिकत्वेन सह, तथा महाविद्यानुमानानैकान्तिकत्वसाधनस्य सर्वानुमानानैकान्तिकत्वसाधनेन सह व्याप्त्यभावात् । व्याप्त्यभावश्चात्रेत्थम् । न हि यत्र यत्र महाविद्यानुमानानैकान्तिकत्वं तत्र तत्र सकलानुमानानैकान्तिकत्वमिति तथा यत्र महाविद्यानुमानानैकान्तिकत्वसाधनं तत्र सर्वानुमानानैकान्तिकत्वसाधनमिति च व्याप्तिरस्ति । व्याप्त्यभावेन किं तदित्याह—ताभ्यां तयोरापादयितुमिति । ताभ्यां महाविद्यानुमानानैकान्तिकत्वतत्साधनाभ्यां तयोः सर्वानुमानानैकान्तिकत्वतत्साधनयोरापादयितुमशक्यत्वात् । यतः आपादकेनापाद्यं तदेव आपाद्यते यद्यापाद्यापादकयोर्व्याप्तिः स्यात्, व्याप्तिमूलत्वात्तर्कस्य । द्वितीयं हेतुं ब्रूते—

१ 'न चैवं सक' । इति ख, ग पुस्तकपाठः ।

एवंविधेति । यद्धेतूनामनैकान्तिकत्वं साधयितुं शक्यते, तान्येवंविधानुमानानि महाविद्यानुमानादीनि तेषामस्माभिः प्रामाण्यं नाङ्गीक्रियते इत्याशयः ।

एवं पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वव्यतिरिक्तैतद्धर्मत्वरहिताधिकरणं, मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वव्यतिरिक्तैतन्निष्ठत्वरहिताधिकरणत्वान्यत्वात् घटवदित्यादिभिरपि सर्वमहाविद्यासु अनैकान्तिकत्वं साधनीयमिति ।

(भुवन०)—महाविद्यानैकान्तिकत्वसाधनाय तार्तीयिकमनुमानं दर्शयति—पक्षीकृतशब्देति पक्षीकृतेत्यादि महाविद्यासाध्यं पक्षः । मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वव्यतिरिक्तश्चासौ एतद्धर्मत्वरहितश्च, तदाश्रयः इत्यन्वयः । मेयत्ववति मेये निष्ठो योऽत्यन्ताभावस्तस्य यत्प्रतियोगित धर्मस्तस्मादन्यः । एतद्धर्माः पक्षीकृतमहाविद्यासाध्यधर्माः, तत्त्वेन रहितश्च धर्मः पक्षीकृतमहाविद्यासाध्यान्यधर्मो वा, व्यतिरिक्तपदेन कर्षितं मेयत्ववन्निष्ठात्यन्ताभावप्रतियोगित्वं वा । आद्यो व्याहतः न हि पक्षान्यधर्मः पक्षे वर्तते इति सम्भवति । द्वितीयस्तु पक्षे सिध्यन् क्वापि मेये पक्षीकृतमहाविद्यासाध्यस्याभावं साधयति । तथा च साधनवति साध्याभावान्मेयत्वस्य व्यभिचारपिशाचसंचारदुःसंचरत्वम् । आद्यः पक्षः पक्षान्यधर्मरूपः सर्वत्र सपक्षे प्रयोजकः । मेयत्वादिव्यावृत्त्यर्थमेतद्धर्मत्वरहितग्रहणम् । एतद्धर्मत्वरहिताधिकरणमित्युक्ते व्याघातः, तद्व्यावृत्त्यर्थं मेयत्ववन्निष्ठेत्यादिग्रहणम् । अत्र यत्साध्यं तदन्यत्वादिति हेतुरिति हेतुव्यावृत्त्यानि स्पष्टानि ।

इति सव्यभिचारत्वदोषेणाकुलिता सती ।
कुलस्त्रीव महाविद्या प्राणानुज्झति लज्जिता ॥ १२ ॥

(भुवन०)—सव्यभिचारत्वमुपसंहरति—इति सव्यभिचारेति ॥ १२ ॥

अथ सत्प्रतिपक्षत्वं पक्षिराजस्य पक्षतिः ।
पराभवति दुर्वारमहाविद्याभुजङ्गमान् ॥ १३ ॥

(भुवन०)—सत्प्रतिपक्षत्वदोषायोपक्रमते—अथ सदिति । सत्प्रतिपक्षत्वं प्रकरणसमत्वं, प्रत्यनुमानबाधितत्वमिति यावत् । पक्षिराजस्य गरुडस्य पक्षतिः पक्षमूलम् ॥ १३ ॥

धर्मी च त्वदभीष्टसाध्यरहितः साध्यस्तदेकाश्रितैः
साध्याभाववदाश्रितत्वरहितैः साध्यप्रसिद्धिः पुनः ।
साध्यं ते स्वभिदान्यजन्मनिधनाऽनाक्रान्तभावस्फुर-
द्भेदस्य प्रतियोगितत्त्वविरहादित्यादिभिर्जायते ॥ १४ ॥

धर्मी पक्षीकृतः शब्दः । त्वदभीष्टं साध्यं, स्वस्वेतरवृत्तित्वरहितानित्य- [illegible] । तद्रहितः तदत्यन्ताभाववान् । साध्यः अनुमेयः इत्यर्थः ।

१ °ति । येः सर्वेतूना° इति च पुस्तकपाठः । २ °सिध्यन्न क्वापि° इति द पुस्तकपाठः ।

प्रयोगस्तु—अयं शब्दः एतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वात्यन्ताभाववान्, एतदन्यत्वरहितत्वात् । यत्पुनरेतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वात्यन्ताभाववत् न[1], न तदेतदन्यत्वरहितं यथा घटः । एतदन्यत्वरहितश्चायम् । तस्मादितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वात्यन्ताभाववानित्यादि । साध्याभाववद्वृत्तित्वरहितत्वे सति साध्यवद्वृत्तित्वं साध्यव्याप्यत्वम् । न चैतत्प्रकृतपक्षनिष्ठसाध्याधिगममन्तरेण शक्यमधिगन्तुमिति व्याप्यत्वासिद्धः प्रकृतो हेतुरिति चेत् । न । साध्याभाववद्वृत्तित्वरहितत्वमात्रेण व्याप्यत्वेनानुमानोपपत्तौ साध्यवद्वृत्तित्वस्य वैयर्थ्येन व्याप्यकोटिनिवेशाभावात् । साध्याभाववद्वृत्तित्वरहितत्वमात्रस्य व्याप्यत्वे गगनादीनामपि प्रकृतसाध्यव्याप्यत्वप्रसक्तिः । तेषामप्यनाश्रितत्वेन प्रकृतसाध्याभाववदाश्रितत्वविरहादिति चेत् । एवमस्तु, को दोषः । तथा सति गगनादीनां प्रकृतसाध्यानुमापकत्वप्रसङ्ग इति चेत् । न । व्याप्यत्वेऽपि तेषामनाश्रितत्वेन पक्षधर्मत्वानुपपत्तेः । तदिदमुक्तम्—साध्याभाववदाश्रितत्वरहितैरिति ।

(भुवन०)—सत्प्रतिपक्षतां दर्शयति—धर्मी चेति । धर्मी शब्दः, त्वदभीष्टं साध्यं महाविद्यासाध्यं, तेन रहितः साध्यः साधनीयः । कैः । तदेकाश्रितैः । तस्मिञ्छब्दे एवैकस्मिन् ये आश्रिता धर्माः शब्दमात्रनिष्ठास्तैरित्यर्थः ॥ १४ ॥

श्लोकं व्याचाख्येति—धर्मी पक्षीकृत इति । प्रयोगेण सत्प्रतिपक्षतां स्पष्टयति—अयं शब्द इत्यादि । अयं शब्दः पक्षः, एतदितरेत्यादिमहाविद्यासाध्यस्य योऽत्यन्ताभावस्तद्वान् एतदन्यत्वरहितत्वात् । एतस्माच्छब्दाद्यदन्यत्वं तेन रहितत्वात् एतच्छब्दत्वादित्यर्थः । व्यतिरेकव्याप्तिमाह—यत्पुनरित्यादि । यन्महाविद्यासाध्यरहितं तदेतच्छब्दादन्यदेव, यथा घटादीति तात्पर्यार्थः । व्याप्तिभङ्गार्थं व्याप्यत्वस्वरूपं परः प्रश्नयति—साध्याभावेति । साध्याभाववान्विपक्षः तत्र वृत्तित्वरहितत्वेऽवर्तमानत्वे सति साध्यवति सपक्षे वृत्तित्वं यत्तत्साध्येन हेतोर्व्याप्यत्वम् । न चैतत्साध्यव्याप्यत्वं प्रकृतपक्षोऽयं शब्दः, तन्निष्ठं साध्यं महाविद्यासाध्यात्यन्ताभाववत्त्वं तस्याधिगमं विना शक्याधिगमम् । व्यतिरेकित्वेन सपक्षस्य साध्यवतोऽप्यनुमानेऽभावात् । व्याप्यत्वासिद्ध इति । हेतोर्व्याप्यत्वेन व्याप्यत्वं तेनासिद्धोऽन्यपक्षासिद्धत्वो प्रकृतो हेतुरिति तदर्थः । सिद्धान्ती समाधत्ते—न । साध्याभावेति । साध्याभाववान्विपक्षः, तत्रावृत्तित्वमात्रेण हेतोर्व्याप्यत्वेन अनुमानोपपत्तौ, साध्यवान्सपक्षः, तत्र वृत्तित्वस्य वैयर्थ्येन, व्याप्तौ हेतुत्वस्य कोटौ प्रवेशाभावात् । इदं तात्पर्यम्—साध्याभाववद्वृत्तित्वराहित्यमात्रेण हेतोर्व्याप्यत्वम् । सपक्षवृत्तित्वं तु हेतुत्वं

१ 'इह न भवति, करो' । इति घ पुस्तकपाठः । २ '[illegible]' इति घ पुस्तकपाठः । ३ '[illegible]ते' इति घ पुस्तकपाठः ।

न्यर्थमिति । अतिप्रसङ्गं शङ्कते—साध्येति । यर्हि साध्याभाववद्वृत्तित्वरहितत्वमेव व्याप्यत्वं तर्हि गगनादीनामपि प्रकृतसाध्येन व्याप्यत्वप्रसङ्गः । हेतुमाह—तेषामपीति । तेषामपि गगनादीनामपि । अनाश्रितेति । न आश्रिताः अनाश्रिताः, कस्यापि नाश्रिता इत्यर्थः । यतो गगनादयो नित्यभावाः निरवयवत्वेन स्वावयवानप्यनाश्रिताः एव । तेषां भावोऽनाश्रितत्वं तेन अनाश्रितत्वेन । प्रकृतसाध्यं महाविद्यासाध्याभाववत्त्वं तदभाववान्विपक्षः, तस्य यदाश्रितत्वं तस्य विरहात् । अयमत्र तत्त्वार्थः—विपक्षवृत्तिराहित्यस्यैव व्याप्यत्वेऽत्र गगनत्वादिकोऽपि हेतुः प्रसज्येत । गूढाभिप्रायेणानुवदति—एवमस्त्विति । अगृहीतपराभिप्रायः परः शङ्कते—तथा सतीति । तथा सति साध्याभाववदाश्रितत्वविरहात्साध्यव्याप्यत्वे गगनादीनां प्रकृतसाध्यं महाविद्यासाध्याभाववत्त्वं तस्यानुमापकत्वं ज्ञापकत्वं तत्प्रसञ्जनमिति हृदयम् । अभिप्रायं प्रकटयन्प्रत्याचष्टे—न । व्याप्यत्वेऽपीति विपक्षवृत्तिराहित्यात्साध्येन व्याप्यत्वेऽपि, तेषां गगनादीनां कस्याप्यनाश्रितत्वेन पक्षस्य शब्दस्य धर्मत्वानुपपत्तेः । पक्षधर्मता च विलोक्यते—'व्याप्तिपक्षधर्मतावल्लिङ्गमि'ति वचनात् । तत्पक्षधर्मताभावाद्गगनादीनां न साध्यानुमापकत्वप्रसक्तिरित्यभिप्रायः । एवं च साध्याभाववद्वृत्तिरहितत्वमात्रमेव व्याप्यत्वमिति सिद्धम् । तथैवानुवदति—तदिदमिति । साध्याभाववन्तं[1] ये आश्रितास्तत्त्वरहितैर्विपक्षवृत्तिहीनैरित्यर्थः । एतावता व्यतिरेकव्याप्तिः सूचिता भवति ।

पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वात्यन्ताभावाप्रसिद्धेरप्रसिद्धविशेषणतेति चेत् । न । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वान्योन्याभावव्यतिरिक्तप्राक्प्रध्वंसाभावत्वरहिताभावप्रतियोगित्वाश्रयः स्वान्योन्याभावव्यतिरिक्तप्राक्प्रध्वंसाभावत्वरहिताभावप्रतियोगित्वान्यत्वात् घटवत् इत्यादिना साध्यप्रसिद्धेः । प्राक्प्रध्वंसाभावाभ्यामर्थान्तरतानिरासार्थं प्रागभावप्रध्वंसाभावत्वरहितग्रहणम् । एवंविधार्थान्तरतानङ्गीकारवादिनं प्रति तु तन्नोपादेयमेव । एवमनुमानान्तरैरपि साध्यप्रसिद्धिर्द्रष्टव्या । तदिदमुक्तं साध्यप्रसिद्धिः पुनरित्यादिना । ते तव । साध्यं स्वादिदान्यः स्वान्योन्याभावान्यः । जन्मनिधनानाक्रान्तः उत्पत्तिविनाशरहितभावात् स्फुरन् भेदो यस्य स भावस्फुरद्भेदः अभावः, तस्य प्रतियोगी तत्प्रतियोगित्वाक्रान्तं । तत्त्वविरहः तदन्यत्वम् । शेषं सुगमम् ।

(भुवन०)—पक्षदोषं शङ्कते—पक्षीकृतेति । पक्षीकृतेत्यादिमहाविद्यासाध्यात्यन्ताभावसपक्षेऽप्रसिद्धेरप्रसिद्धविशेषणता पक्षस्येति चेत्, समाधत्ते—न पक्षीकृतेत्यादि । पक्षीकृतेत्यामहाविद्यासाध्यं पक्षः, स्वान्योन्याभावव्यतिरिक्तः प्रागभावप्रध्वंसाभावत्वेन रहितश्चाभावोऽर्थात्यन्ताभावः एव, तस्य यत्प्रतियोगित्वं तदाश्रय इति साध्यो धर्मः । इह यत्साध्यं तदन्यत्वादि

१ 'भाववति ये आ' इति च छ द पुस्तकपाठः । २ 'भाववद्व्यति' इति घ पुस्तकपाठः । ३ 'तद्विरहाय प्रा' इति घ पुस्तकपाठः ।

हेतुः । घटात्मादयो हि स्वान्योन्याभावान्यः प्राक्प्रध्वंसत्वरहितश्चाभावः पक्षनिष्ठान्योन्याभावः, तत्प्रतियोगित्वधर्मादन्येऽपि भवन्ति तद्धर्मवन्तश्चेति तेषां सपक्षता । व्यावृत्त्यानि स्पष्टानि । अने-नानुमानेन महाविद्यासाध्यस्य अत्यन्ताभावप्रतियोगित्वं प्रादर्शीति साध्यप्रसिद्धिः । एवंविधार्था-न्तरतेति । ये तु महाविद्यासाध्यस्य नित्यत्वात्प्राक्प्रध्वंसाभावौ न मन्यन्ते, तेषामेवंविधार्थान्तरता न स्यादिति तान्प्रति तत्प्राक्प्रध्वंसाभाववत्त्वरहितेति विशेषणं नोपादेयमेवेत्यर्थः । एवमिति । स्वसाध्यं अत्यन्ताभावप्रतियोगित्वव्यतिरिक्तैतन्निष्ठत्वरहिताधिकरणं अत्यन्ताभावप्रतियोगित्वव्यति-रिक्तैतन्निष्ठत्वरहितान्यत्वात्, घटवत् । अत्यन्ताभावप्रतियोगित्वव्यतिरिक्ताः ये एतस्मिन्पक्षीकृते स्वसाध्ये निष्ठाः धर्मास्त्वत्साध्यत्वादयः, तत्त्वेन रहितो धर्मोऽनेतन्निष्ठो वा अत्यन्ताभावप्रतियोगित्वं वा । आद्यः पक्षे व्याहतः, सपक्षे च प्रयोजकः । द्वितीयस्तु पक्षे सिध्यन्नत्यन्ताभावप्रतियोगी पक्ष इति साधयतीत्यादिभिरनुमानान्तरैरिति भावः । उक्ते मूलपदमवतार्य व्याचाख्यायते—तदिदमुक्तमित्यादि । उत्पत्तिविनाशरहितः प्राक्प्रध्वंसाभाववत्त्वरहितः । तदन्यत्वमिति । तदन्यत्वं तस्मात्साध्यादन्यत्वमिति हेतुः ।

यद्वा प्रकृतसाध्यसाधकानुमानसाध्यं पक्षीकृतशब्दनिष्ठत्वेन विशेष्य तेनैव सत्प्रतिपक्षत्वं सर्वमहाविद्यानामुद्भावनीयम् । प्रयोगस्तु-पक्षीकृतशब्देत-दितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वान्योन्याभावव्यतिरिक्तप्राक्प्रध्वं-साभावत्वरहितपक्षीकृतशब्दनिष्ठाभावप्रतियोगित्वाश्रयः, स्वान्योन्याभावव्य-तिरिक्तप्राक्प्रध्वंसाभावत्वरहितपक्षीकृतशब्दनिष्ठाभावप्रतियोगित्वान्यत्वात् घटवत् इत्यादि ।

(मुक्त०)—धर्मी चेदत्र यत्रास्तु चित्तर्धनाद्धे—चेदिति । प्रकृतं साध्यं सत्प्रतिपक्षानु-मानसाध्यं, तस्य साधकमनुमानं साध्यप्रसिद्धिजनकं, तस्य साध्यं स्वान्योन्याभावान्यत्वादिकं, पक्षी-कृतशब्दनिष्ठत्वेन विशेष्य । अयमर्थः—पूर्वमनुमानद्वयेन कृत्वा महाविद्यासाध्यस्यैवात्यन्ता-भावः प्रत्यपादि । अत्र येनैव अनुमानेन महाविद्यासाध्यस्य अत्यन्ताभावः [illegible] प्रति-पाद्यते । तथा च साध्यप्रसिद्धिर्द्वितीयानुमानमपि न विशेष्यत इति तेनैव प्रकृतसाध्यसाधकानु-मानेनैव सत्प्रतिपक्षणीयमिति । प्रयोगं स्पष्टं विवृणोति—पक्षीकृतेति । पक्षीकृतशब्दनिष्ठत्वं स्पष्टम् । शेषं पूर्ववत् ।

शिवादित्यमिश्रास्तु एवंविधान्यायेन साध्याप्रसिद्धिं कृत्वा, अयं शब्दः एतन्महाविद्यासाध्यात्यन्ताभावव्यतिरिक्तत्वनिष्ठत्वरहिताधिकरणं, मेयत्वात् घटवत् इति सत्प्रतिपक्षयन्ति । तन्न । हेतुभेदाभावेन अन्यानि विशेषणान्यभावात् । तस्मादयं शब्दः एतन्महाविद्यासाध्यात्यन्ताभावव्यतिरिक्त-त्वनिष्ठत्वरहिताधिकरणं, तथा स्वव्यतिरिक्तवृत्तित्वरहितानित्यत्वात्यन्ताभाववन्नि-ष्ठाधिकरणं, अभिधेयत्वादित्यादिना सत्प्रतिपक्षणीयम् ।

(भुवन०)—मतान्तरमाह—शिवादित्येति । पूर्वोक्तन्यायेनेति । साध्यप्रसिद्धिः पुनरि-त्याद्युक्तन्यायेन महाविद्यासाध्यस्य अभावप्रसिद्धिं विधाय प्रतिपक्षानुमानं कुर्वते—अयं शब्द इति। स्वस्मिञ्शब्दे निष्ठाः स्वनिष्ठाः शब्दत्वादयः । एतन्महाविद्यासाध्यात्यन्ताभावव्यतिरिक्ताश्च ते स्वनिष्ठाश्च, तेषां भावस्तत्त्वं, तेन रहितो धर्मः शब्दान्यनिष्ठो वा, एतन्महाविद्यासाध्यात्यन्ताभावो वा । आद्यः पक्षे व्याहतः, सपक्षे च प्रयोजकः । द्वितीयस्तु महाविद्यासाध्यात्यन्ताभाव एव, तदधि-करणं शब्दः इत्यर्थः । परमतं निरस्यति—तन्नेति । महाविद्यायामपि मेयत्वादिहेतुः, प्रतिपक्षानु-मानेऽप्ययमेव हेतुरिति हेत्वैक्येन अस्यापि दोषस्य अभीष्टविरोधे एवान्तर्भावः इत्यर्थः । कथं तर्हि प्रतिपक्षणीयमित्याह—तस्मादिति । अत्र प्रयोजनव्याख्यानमनन्तरोक्तमेव ज्ञेयम् । प्रयोगान्तरं रचयति—तथा स्वस्वेतरेति । अत्रानन्तरोक्तः एव पक्षः । अनित्यत्वस्यात्यन्ताभावो नित्यत्वं, तद्वान्नित्यः, तत्र निष्ठा यस्य । स्वस्मिन्पक्षीकृतशब्देतरस्मिंश्च वृत्तित्वरहिताश्च येऽनित्यत्वात्यन्ता-भाववन्निष्ठास्तदाश्रयः शब्द इत्यर्थः । स्वस्वेतरवृत्तित्वरहितः स्वमात्रवृत्तिर्वा, स्वेतरमात्रवृत्तिर्वा । द्वितीयः पक्षे व्याहतः इति स्वमात्रवृत्तिः शब्दत्वादिः पक्षे सिध्यति । स च धर्मोऽनित्यत्वात्यन्ता-भाववन्निष्ठस्तर्ह्येव, यर्हि शब्दो नित्यः स्यात्, तस्य धर्मस्य अन्यत्रावर्तनादिति शब्दनित्यत्वसिद्धिः। अत्र सपक्षे शब्दान्यत्वं धर्मः सर्वत्र ज्ञेयः । स चानित्यत्वात्यन्ताभाववति गगनादौ निष्ठः एव। अत्राभिधेयत्वादिति हेतुः, पूर्वत्र च मेयत्वादितीत्यस्यानुमानस्य सत्प्रतिपक्षत्वम् । 'हेतुभेदेन साध्या-भावसाधकः समानबलः सत्प्रतिपक्षः' इति तल्लक्षणात् ।

यद्वैवं सत्प्रतिपक्षता । वर्तमानः कालः इदानींतनपक्षीकृतशब्दतदितर-वृत्तित्वरहितानित्यनिष्ठाधिकरणत्वरहितवान् कालत्वात् अतीतकालवत् इत्या-दि । इदानींतनपक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वरहितः इदानींतनत्वरहितो वा स्यात्, पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठा-धिकरणत्वरहितो वा स्यात् । आद्यः पक्षे व्याहतः । न हि इदानीमस्ति इदानीं-तनत्वरहितश्चेति घटते । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिक-रणत्वरहितश्च पक्षीकृतशब्दव्यतिरिक्तो न संभवत्येव । पक्षीकृतशब्दान्यत्वस्य पक्षीकृतशब्दतदितरवृत्तित्वरहितस्य घटाद्यनित्यनिष्ठस्य पक्षीकृतशब्दव्यति-रिक्ते सर्वस्मिन्नुपपत्तेरिति । तेन पक्षीकृतः शब्दः एव पक्षीकृतशब्दतदितरवृ-त्तित्वरहितानित्यनिष्ठाधिकरणत्वरहितो वर्तमाने काले पर्यवसानात्सिध्यतीति पक्षीकृतशब्दे अनित्यत्वाभावसिद्धिरिति । एवमिदानींतनत्वविशेषितसकलम-हाविद्यासाध्यवत्त्वरहितान्वितवर्तमानकालसाधनेन सर्वासामपि महाविद्यानां सत्प्रतिपक्षता द्रष्टव्या ।

१ 'प्रयोगव्या' इति च पुस्तकपाठः ।

(भुवन०)—सत्प्रतिपक्षतां प्रयोगान्तरेण स्पष्टयति—यद्वैवमिति । इदानीन्तनं यत्पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं महाविद्यासाध्यं तेन रहितो यस्तद्वान्वर्तमानः कालः इत्यन्वयः । अनुमानं व्याचष्टे—इदानींतनेति । आद्यः पक्षे इति । आद्यः इदानीन्तनत्वरहितरूपः पक्षे व्याहतः, सपक्षे च सार्थकः । व्याघातमाह—नहीति । वर्तमानकालधर्मस्य इदानींसत्त्वादिदानीन्तनत्वरहितत्वं व्याहतमित्यर्थः । द्वितीयं पक्षं व्याख्याति—पक्षीकृतेत्यादि । महाविद्यासाध्यरहितः पक्षितशब्दः एवेत्यर्थः । हेतुमाह—पक्षीकृतशब्दान्येति । पक्षीकृतशब्दान्यत्वधर्मस्य पक्षशब्दादन्यस्मिन्नेव वर्तनात्पक्षीकृतशब्दतदितरवृत्तित्वरहितस्य तथा घटादयोऽनित्यास्तेषु निष्ठत्व पक्षीकृतशब्दव्यतिरिक्ते सर्वस्मिन् घटात्मादौ घटनात् । तेन पक्षीकृत इति । तेन हेतुनैवंविधमहाविद्यासाध्यरहितः पक्षितशब्दः एव । तद्वांश्च वर्तमानः काल इत्याशयः । सिद्धं दर्शयति—पक्षीकृतशब्द इति । अयमर्थः—महाविद्यासाध्यं शब्दानित्यत्वसाधनायोपन्यस्तम् । तच्चेच्छब्दे न वर्तते, तर्हि शब्देऽनित्यत्वस्य योऽभावो नित्यत्वं तस्य सिद्धिरभूदेव ! अथ व्यावर्त्यचिन्ता । अतीतकालेन भागे सिद्धसाधननिवारणाय वर्तमानः काल इति प्रोक्तं । अप्रसिद्धविशेषणतां निवारयति—इदानीन्तनेत्यनेन । व्याघातं परिहरति—पक्षीकृतेत्यादिना । अर्थान्तरता अप्रसिद्धविशेषणता च मा भूदिति रहितेतिपदग्रहणम् । एवमिदानीमिति । इदानीन्तनत्वेन विशेषितं यत्सकलमहाविद्यासाध्यवत्त्वं तेन रहितः पक्षीकृतशब्दादिः, तेनान्वितो यो वर्तमानकालः तत्साधनेनेत्यर्थः ।

न च अनिदानींतनकालत्वमुपाधिः । पक्षातिरिक्तव्यावर्त्याभावेन पक्षेतरत्वग्रस्तत्वात् । अयं कालः इदानींतनैतदुपाधिव्यतिरिक्तैतत्साध्यव्यापकव्यतिरिक्तैतत्साध्यव्यापकवान् कालत्वादित्यादिना प्रकृतोपाधेः प्रकृतसाध्यव्यापकत्वभङ्गाच्च । इदानींतनैतदुपाधिव्यतिरिक्तैतत्साध्यव्यापकव्यतिरिक्तो हि इदानींतनत्वरहितो वा स्यात्, एतदुपाधिव्यतिरिक्तैतत्साध्याव्यापकव्यतिरिक्तो वा । आद्यः पक्षे व्याहतः । एतदुपाधिव्यतिरिक्तैतत्साध्याव्यापकव्यतिरिक्तोऽपि एतत्साध्यव्यापको वा अयमुपाधिर्वा । आद्यः एतत्साध्याव्यापकपदेन निरस्तः । द्वितीये पुनरस्योपाधेरेतत्साध्याव्यापकत्वसिद्धिरिति । प्रकृतहेतुव्यापकाभावाव्याप्यत्वान्नायं प्रकृतहेतुप्रतिपक्षः, धूमवत्त्वादिवदिति चेत् । न । प्रकृतहेतुप्रतिपक्षत्वाप्रमितौ, तदभावसाधनस्य अप्रसिद्धविशेषणत्वात् । अत्रैव तत्प्रमितौ, तदभावसाधनस्य बाधितत्वात् । एतद्व्यतिरिक्तस्थले च तत्प्रमितौ तेनैव सत्प्रतिपक्षत्वस्य दुर्वारत्वादिति ।

(भुवन०)—उपाधिशङ्कां निरस्यति—न चानिदानीमिति । न चातीतकाले अनिदानीन्तनकालत्वमुपाधिः । हेतुमाह—पक्षातिरिक्तेति । यत्र अनिदानीन्तनकालत्वं नास्ति, तत्रेदानी-

१ 'धर्मस्य इदानीन्तनत्वरहि' इति छ द पुस्तकपाठः ।

न्तनेत्यादिसाध्यवत्त्वमपि नास्ति, यथा पक्षे वर्तमानकाले एवेति पक्षाद्व्यतिरिक्त यथावर्त्य विपक्ष, तदभावेन पक्षेतरत्वदोषः उपाधेरिति भावः । एतदुपाधेः साध्यव्यापकतामनुमानेन भनक्ति— **अयं काल इत्यादि** । एष चासौ उपाधिश्चैतदुपाधिः, तस्माद्व्यतिरिक्ताश्च ते एतत्साध्याव्यापकाश्च, एतदुपाधिव्यतिरिक्तैतत्साध्याव्यापकाः । इदानीन्तनाश्च ते एतदुपाधिव्यतिरिक्तैतत्साध्याव्यापकाश्च । तेभ्यो व्यतिरिक्ताश्च ते एतत्साध्याव्यापकाश्च, तद्वानयं वर्तमानः काल इत्यन्वयः । अथ व्यावर्त्य चिन्ता । अयं कालः एतत्साध्याव्यापकवानित्युक्ते एतत्साध्याव्यापकैर्घटादिभिः सिद्धसाधनं स्यात् । तद्व्यावृत्त्यर्थमेतत्साध्याव्यापकव्यतिरिक्तेत्युक्तम् । एवमुच्यमाने च व्याघातः । न हि एतत्साध्याव्यापकव्यतिरिक्ताः एतत्साध्यव्यापकाश्च धर्माः सम्भवन्ति । तन्निवृत्त्यर्थमेतदुपाधिव्यतिरिक्तेत्युपात्तम् । एतदुपाधिव्यतिरिक्तैतत्साध्यव्यापकव्यतिरिक्तैतत्साध्याव्यापकवानित्युक्ते यद्यप्येतदुपाधेरेतत्साध्याव्यापकत्वं सिध्यति, तथाप्यतीतकालादौ सपक्षे एवंविधधर्माभावात्साध्यवैकल्यं स्यात्, तदर्थमिदानीन्तनेति पदोपादानम् । अनुमानं ग्रन्थकृद्व्याचाख्यायते—**इदानीमिति** । एतत्साध्यं पूर्वानुमानोक्तमिदानीन्तनपक्षीकृतेत्यादिकं, तस्याव्यापकाः एतत्साध्याव्यापका इत्यर्थः । इदानीन्तनाः वर्तमानाः, एतदुपाधिः अनिदानीन्तनकालत्वरूपः, तद्व्यतिरिक्ता एतत्साध्यव्यापकाश्च धर्मा घटत्वपटत्वादयः, तद्व्यतिरिक्तो धर्मो द्विधा स्यादिति परमार्थः । **आद्यः पक्षे व्याहत इति** । आद्यः इदानीन्तनत्वरहितरूपः साध्याव्यापकः साध्यव्यापको वाऽस्मिन्वर्तमानकाले पक्षे व्याहत इत्यर्थः । द्वितीयं पक्षं व्याचष्टे—**एतदुपाधीति** । एतत्साध्यव्यापकोऽस्तित्वप्रमेयत्वादिरित्यर्थः । सिद्धमुपपादयति—**द्वितीय इति** । अयमुपाधिरेतत्साध्याव्यापकेत्यन्त्यविशेषणविशिष्टः पारिशेष्यात्पक्षे साधितः इत्येतस्योपाधेरेतत्साध्यव्यापकत्वं सिद्धम् । अत्रातीतकालादौ सपक्षे इदानीन्तनत्वरहितो धर्मो ज्ञेयः । परः शङ्कते—**प्रकृतहेत्विति** । प्रकृतो हेतुर्मेयत्वादिः, तस्य व्यापकं महाविद्यासाध्यं, तस्य योऽभावस्तेन न व्याप्यते इत्यतो हेतोर्नायं पूर्वोक्तप्रतिपक्षानुमानस्य कालत्वादिति हेतुः प्रकृतहेतोर्महाविद्यासत्कस्य मेयत्वादेः प्रतिपक्षः इति पदान्वयः । अयं भावः । येन हेतुना यत्साध्यं साध्यते, तत्साध्यं तस्य हेतोर्व्यापकम् । कालत्वादिति प्रतिपक्षहेतुना च महाविद्याऽभावः साध्यः । न च महाविद्यासाध्याभावेन प्रतिपक्षहेतुर्व्याप्यः, कालत्वरूपप्रतिपक्षहेतुमत्यपि काले महाविद्यासाध्याभावाभावात् । निदर्शनं दर्शयति—**धूमवत्त्वादिवदिति** । यथा धूमवत्त्वादिहेतवो महाविद्यासाध्याभावाव्याप्यत्वान्न प्रकृतहेतुप्रतिपक्षाः, तथायमपि हेतुरित्यभिप्रायः । एतावतैवं परेणानुमानं विहितं भवति । तथाहि—नायं हेतुः प्रकृतहेतुप्रतिपक्षः प्रकृतहेतुव्यापकाभावाव्याप्यत्वात् धूमवत्त्वादिवदिति । अत्र परानुमाने प्रकृतहेतुप्रतिपक्षोऽप्रमितो न वेति विकल्प्याद्यं प्रत्याह— **प्रकृतेति** । प्रकृतहेतोर्मेयत्वादेर्यत्प्रतिपक्षत्वं, तस्य अप्रमितौ तदभावसाधनस्य प्रकृतहेतुप्रतिपक्ष… …धन. अप्रसिद्धविशेषणत्वं दृष्टान्तेऽप्रसिद्धत्वमित्यर्थः । भावार्थस्त्वयम्—यत्पक्षे साध्य…ते, तद्धि सपक्षे प्रसिद्धं स्यादिति हि रीतिः । अत्र च यदि प्रतिपक्षत्वं न प्रमितं, तदा प्रति… तदभावोऽप्यप्रमितः एव । तथा च तदभावसाधनस्याप्रसिद्धत्वान्न सिद्धिः । द्वितीय… प्रमितत्वमस्मिन्नेवानुमाने, अनुमानान्तरे वा । आद्यं दूषयति—**अत्रैवेति** । अत्रैवानुमाने तत्प्र…

१ °साध्याभावाद् । ° इति छ पुस्तकपाठः ।

निवौ प्रतिपक्षत्वप्रमितौ तदभावसाधनस्य प्रतिपक्षत्वाभावसाधनस्य बाधितत्वम् । यतः प्रमाणेन गृहीतस्य न ह्यभावः कर्तुं शक्यः । द्वितीयं दूषयति—एतद्व्यतिरिक्तेति । एतस्माद्व्यतिरिक्ते स्थले अनुमानान्तरे तत्प्रमितौ प्रकृतहेतुप्रतिपक्षत्वप्रमितौ तेनैवान्यस्थले प्रमितप्रकृतहेतुप्रतिपक्षत्वेनैव सत्प्रतिपक्षतेत्याशयः ।

किञ्च, किमिदं प्रकृतहेतुप्रतिपक्षत्वं, किं प्रकृतहेतुव्यापकाभावव्याप्यत्वं, किंवा प्रकृतहेतुपक्षनिष्ठतया प्रकृतविप्रतिपत्तिगोचरानित्यत्वाद्यभावसाधकत्वे सति प्रकृतहेतुतुल्यबलत्वम्, किंवा प्रकृतहेतुपक्षनिष्ठतया प्रकृतव्यापकाभावसाधकत्वे सति प्रकृतहेतुतुल्यबलत्वम्, किंवा अन्यदेव किञ्चित् । आद्याभावसाधने साध्याविशिष्टता । द्वितीये बाधः । तृतीयेऽपि बाध एव । पक्षे प्रकृतव्यापकाभावप्रतीतिमन्तरेण अनित्यत्वाभावप्रतीतेरपर्यवसानादिति । न हि अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं अनित्यत्वाभाववांश्चेति शक्यं प्रतिपत्तुम् । चतुर्थस्तु अप्रसिद्धत्वादेव निषेद्धुमशक्य इति स उपेक्षणीयः । कालात्ययापदिष्टतां पुनरग्रे व्युत्पादयिष्यामः ।

(भुवन०)—परोक्तानुमाने प्रकृतहेतुप्रतिपक्षः किंरूपोऽत्र विवक्षितः इत्यादि विकल्पयति—किञ्चेत्यादि । प्रकृतहेतुर्मेयत्वादिः, तस्य व्यापकं महाविद्यासाध्यं, तस्य योऽभावः, तेन व्याप्यत्वं, किंवा प्रकृतहेतोः प्रमेयत्वादेर्यः पक्षः शब्दादिः, तन्निष्ठतया यत्प्रकृतं विप्रतिपत्तिगोचरानित्यत्वादि-साध्यं तदभावसाधकत्वे सति प्रकृतहेतोर्मेयत्वादेः तुल्यं बलं यस्य स तथा, तद्भावस्तत्त्वम् । किंवा प्रकृतहेतोर्यः पक्षः, तन्निष्ठतया प्रकृतव्यापकं महाविद्यासाध्यं, तदभावसाधकत्वे सति प्रकृत-हेतोस्तुल्यबलत्वम् । किंवा अन्यदेवैतद्विकल्पचतुष्टयविलक्षणं किञ्चिदित्यर्थः । विकल्पचतुष्टयमपि क्रमाद्दू-षयति—आद्याभावेति । आद्याभावसाधने प्रकृतहेतुव्यापकाभावव्याप्यत्वलक्षणप्रतिपक्षत्वाभाव-साधने । अयं हेतुः प्रकृतहेतुव्यापकाभावव्याप्यत्वलक्षणप्रतिपक्षो न भवति, प्रकृतहेतुव्यापकाभाव-व्याप्यत्वात् [illegible] हेतोः साध्याविशिष्टता स्यात् । साध्याविशिष्टता साध्यविशि-ष्टता । साध्यसम एव हेतुरित्यर्थः । द्वितीयतृतीयौ निरस्यति—द्वितीयेत्यादि । हेतुमाह—पक्षे प्रकृतेति । पक्षे शब्दे, प्रकृतव्यापकं महाविद्यासाध्यं, तदभावप्रतीतिं विना अनित्यत्वाभाव-प्रतीतिर्न पर्यवस्यतीति भावः । एतदेव विवृणोति—न हीत्यादि । [illegible]

महाविद्याहेतौ प्रादर्शि, बाधं किमिति न दर्शितवन्तः इत्याशङ्कयाह—कालात्ययेति । महाविद्याहेतोरिति शेषः ।

अप्येकप्रतिपक्षोऽपि न क्षमः स्वार्थसिद्धये ।
महाविद्या तु किं नाम प्रतिपक्षशताकुला ॥ १५ ॥

(भुवन०)—सत्प्रतिपक्षतामुपसंहरति—अप्येकेति ॥ १५ ॥

अथ प्रबन्धादादिष्टं यद्धेत्वाभासपञ्चकम् ।
तत्प्रत्युक्तमहाविद्याबलात्तस्यां प्रपञ्च्यते ॥ १६ ॥

तथाहि,

किञ्च स्वव्यभिचारमुल्ललयति प्रोन्मीलयत्यात्मनः
सोपाधित्वमुदाहरत्यभिमतव्याप्यत्वभङ्गं निजम् ।
आचष्टे प्रतिपक्षमात्मविषयं बाधां समुन्मुद्रय-
त्याधत्ते स्थितिविप्लवं च भजते प्रत्यर्थितामात्मनः ॥१७॥ इति।

तथाहि—अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादित्यनैकान्तिकम् । एतच्छब्दैतच्छब्देतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं वा स्वस्वेतरवृत्तित्वरहितमेयत्ववन्निष्ठात्यन्ताभावप्रतियोगिनिष्ठाधिकरणं मेयत्वात् घटवदिति व्यभिचारानुमानात् । तदिदमुक्तं किञ्च स्वव्यभिचारमुल्ललयतीति । स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वे च पक्षीकृतशब्दान्यत्वमुपाधिः । न च साध्यव्यापकत्वानिश्चयात्पक्षेतरत्वस्यानुपाधित्वमिति युक्तम् । पक्षीकृतशब्देतरत्वं स्वस्वेतरवृत्तित्वरहितप्रकृतसाध्यव्यापकनिष्ठाधिकरणं मेयत्वादिति प्रकृतसाध्यव्यापकत्वानुमानात् । न च साध्यव्यापकत्वसाधनाव्यापकत्वनिश्चयेऽपि पक्षेतरत्वादेवायमनुपाधिरिति युक्तम् । व्यापकव्यावृत्तौ व्याप्यव्यावृत्तेरावश्यकत्वेन साधनवति पक्षे एव व्याप्तिभङ्गस्यावश्यकत्वात् । अन्यथा स्थलान्तरेऽपि उपाधेर्दूषणत्वानुपपत्तेः ।

(भुवन०)—उत्तरश्लोकतात्पर्यमाह—अथ प्रबन्धादिति । प्रबन्धो नैरन्तर्यमनन्तरमिति यावत् । अनन्तरमेव यद्धेत्वाभासपञ्चकमसिद्धविरुद्धानैकान्तिकसत्प्रतिपक्षबाधरूपमुपदिष्टं तद्धेत्वाभासपञ्चकं तस्यां वादिप्रयुक्तमहाविद्यायां प्रपञ्च्यते विस्तार्यते । कस्मात् प्रत्युक्तमहाविद्याबलात् । प्रतिसन्मुखमुक्ता प्रत्युक्ता या महाविद्या प्रत्यनुमानरूपा तद्बलात् । एतावता महाविद्ययैव महाविद्या दूष्यते इत्यर्थः ॥ १६ ॥

(मुक्त०)—हेत्वाभासत्वपक्षकं श्लोकेनोपपादयति—किञ्चेति । मेयत्वादिकः पूर्वोक्तो महाविद्याहेतुः स्वव्यभिचारमात्मनोऽनैकान्त्यमुल्लसयति अङ्कुरयति, प्रोन्मीलयति प्रकाशयति, स्थितिविक्रमव्यवस्थानादेन, स्वस्य प्रत्यर्थिनां विरोधितां भजते ॥ १७ ॥

श्लोकं व्याचष्टे—यथाहीत्यादि । कटुनिर्मिते—एतच्छब्देति । एतच्छब्देत्यादि स्वस्वेतरेत्यादि वा महाविद्यानाख्यं पक्षः । [illegible]

[illegible]

पर्वतेतरत्वोपाधौ उद्भाविते पक्षस्यैव व्यावर्तनात्सङ्कीर्णत्वम् । पक्षेतरत्वोपाधितो न सर्वानुमानोच्छेद-प्रसङ्ग इत्यर्थः । कुतो न तुल्यत्वमाह—व्यापकेति । व्यापक उपाधिः, तदभावतो व्याप्यस्य तस्य व्यावृत्तेरवश्यंभावित्वेन मेयत्वादिसाधनवति पक्षे शब्दे एव व्यभिचारात् । तथाहि—यत्र यत्र तत्रोपाधिर्यथा घटादौ, यत्र चोपाधेरभावस्तत्र साध्यस्याप्यभावो यथा शब्दे एव इति । उपाधिर्व्या-वर्तमानः साध्यमपि व्यावर्तयतीत्युपाधिना साधनस्य गृहीतव्यभिचारात्साध्यसाधनयोर्व्याप्तिभङ्गः स्फुट एव साफल्यमित्याशयः । विपर्यये बाधकमभिधत्ते—अन्यथेति । यदीदृशोऽपि नोपाधिः, तर्हि सर्वा-न्तरे अनुमानान्तरेऽप्युपाधेर्दूषणत्वं नोपपद्यते इत्यर्थः ।

किञ्च पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्यापकत्वं स्वस्वेतरवृत्तित्वरहितमेयत्वाव्यापकनिष्ठाश्रिताधिकरणं मेयत्वात् घटवदिति चोपाध्यनुमानम् । मेयत्वाव्यापकत्वं स्वस्वेतरवृत्तित्वरहितपक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्यापकनिष्ठाधिकरणं मेयत्वात् घटवदिति चोपाध्यनुमानः। पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्यापकत्वं च मेयत्वादावेव सिद्धम् । मेयत्वाव्यापकत्वं चानुष्णत्वादौ सिद्धमिति नानयोराश्रयासिद्धत्वादि शङ्कनीयम् । तदिदमुक्तं प्रोन्मीलयत्यात्मनः सोपाधित्वमिति । व्याप्यत्वासिद्धं च मेयत्वम् । मेयत्वं स्वस्वेतरवृत्तित्वरहितपक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वाव्याप्यनिष्ठाधिकरणं मेयत्वादिति व्याप्यत्वाभावानुमानात् ।

(भुवन०)—अथ पुनरपि पक्षेतरत्वोपाधेः साधनाव्यापकत्वं चानुमानाभ्यां दर्शयति—किं च पक्षीकृतेत्यादि । महाविद्यासाध्यव्यापकत्वं पक्षः, मेयत्वस्य अव्यापके निष्ठो मेयत्वाव्यापकनिष्ठः, तस्याश्रितो मेयत्वाव्यापकनिष्ठाश्रितः । स्वस्वेतरवृत्तित्वरहितश्चासौ मेयत्वाव्यापकनिष्ठाश्रितश्च तदधिकरणमिति पदान्वयः । स्वस्मिन् महाविद्यासाध्यव्यापकत्वे पक्षीकृते स्वस्मात्पक्षादितरस्मिंश्च वृत्तित्वरहितः स्वमात्रवृत्तिर्वा स्वेतरमात्रवृत्तिर्वा । तत्र द्वितीयः पक्षान्योन्याभावादिपक्षे व्याघातान्निषिद्धः । स्वमात्रवृत्तिस्तु एतत्पक्षत्वं धर्मः पक्षे सिध्यति । स च धर्मो मेयत्वस्य अव्यापके निष्ठो यो धर्मस्तदाश्रितस्तदैव, यदि महाविद्यासाध्यव्यापकत्वरूपः पक्षो मेयत्वाव्यापकनिष्ठः स्यात् । तथा च यैर्हि महाविद्यासाध्यव्यापकत्वमुपाधिधर्मो मेयत्वाव्यापकनिष्ठो जातः, तर्हि मेयत्वरूपसाधनाव्यापकः उपाधिर्जातः एवेति पक्षीकृतशब्देतरत्वोपाधेः साधनाव्यापकत्वम् । अत्र सपक्षे स्वेतरमात्रवृत्तिरेतत्पक्षान्यत्वादिर्धर्मोऽवगन्तव्यः । स च धर्मो मेयत्वाव्यापको घटादिः, तन्निष्ठो घटत्वादिर्धर्मस्तदाश्रित एवेति साध्यप्रसिद्धिः । आश्रिताधिकरणमित्युक्ते एतत्पक्षमात्रवृत्तिधर्मेणोपाधेः साधनव्यापकत्वेऽप्युपपद्यमानेन अर्थान्तरम् । तन्निवृत्तये मेयत्वाव्यापकनिष्ठेति । एतावत्युच्यमाने च मेयत्वादिना अर्थान्तरत्वम्, अत उक्तं स्वेतरवृत्तित्वरहितेति । तथापि सपक्षे

१ 'वृत्तिरहि' इति ख पुस्तकपाठः । २ 'यदि महा' इति छ पुस्तकपाठः ।

साध्यप्रसिद्धिर्नेत्याह—स्वेति । उपाधेः साधनाव्यापकत्वमनुमाय साध्यव्यापकत्वायानुमिमीते—मेयत्वाव्यापकत्वमिति । मेयत्वसाधनस्य अव्यापकत्वं पक्षः । स्वं पक्षः । स्वेतरत् पक्षादन्यत् । तद्युगले यो न वर्तते स धर्मो द्विधा स्यात्, स्वमात्रवृत्तिः स्वेतरमात्रवृत्तिश्च । उत्तरः पक्षे व्याहतः । तेनाद्यः एतत्स्वत्वादिः पक्षे सिध्यति। स च पक्षीकृतेत्यादिमहाविद्यासाध्यस्य व्यापके निष्ठो यो धर्मः तदाश्रितः तदेव, यदि पक्षीकृतं मेयत्वाव्यापकत्वं महाविद्यासाध्यव्यापकनिष्ठं भवेत् । तथा च यदि मेयत्वाव्यापकत्वमुपाधिधर्मो महाविद्यासाध्यव्यापकनिष्ठोऽजनि, तदुपाधिर्महाविद्यासाध्यव्यापकः संपन्न एवेति साध्यव्यापकत्वं पक्षीकृतशब्दैतत्त्वोपाधेः सिद्धिसौलभ्यात् । अत्रापि सर्वत्र धर्मधर्म्यादौ सपक्षे पक्षान्यत्वदर्शनेन महाविद्यासाध्यव्यापकं मेयत्वादि, तन्निष्ठमस्तित्वादि, तदाश्रितेन साध्यानुगमः । व्यावर्त्यानि उक्तार्थानि । उपाध्यनुमान इति । अनुमानशब्दो हि पुंनपुंसकलिङ्गो लिङ्गानुशासने प्रत्यपादीत्यतः उपाध्यनुमानः इत्युक्तम् । महाविद्यासाध्यव्यापकत्वं मेयत्वाव्यापकत्वं च न क्वचित्प्रसिद्धमित्याश्रयासिद्धिरित्याह—पक्षीकृतेति । यत्र यत्र महाविद्यासाध्यं तत्र तत्र मेयत्वमिति महाविद्यासाध्यव्यापकत्वस्य मेयत्वादौ सिद्धेः । अन्यत्वादौ मेयत्वसद्भावेऽप्यनुगतत्वाभावेन यत्र यत्र मेयत्वं, तत्र तत्रानुगतत्वमिति व्याप्तेरभावात् मेयत्वाव्यापकत्वस्यानुगतत्वादौ सिद्धेश्च अनयोः पूर्वोक्तहेत्वोराश्रयासिद्धत्वादि नाशङ्कनीयमिति भावः । एवमौपाधिकव्याप्तिकत्वेन व्याप्यत्वासिद्धत्वं महाविद्याहेतोः प्रतिपादितम् । साध्यव्याप्यत्वाभावत्वेन व्याप्यत्वासिद्धत्वमाह—व्याप्यत्वासिद्धं चेति । हेतोर्यत्साध्येन व्याप्यत्वं तेन असिद्धं मेयत्वं महाविद्यासाध्यं मेयत्वहेतुं न व्याप्नोतीत्यर्थः । एतदेव महाविद्यानुमानेनाह—मेयत्वमिति । स्वं मेयत्वं, स्वस्मान्मेयत्वादितरत्सर्वं जगत् । तयोर्युगले यो न वर्तते धर्मः स द्वेधा स्यात्, स्वमात्रवृत्तिः स्वेतरमात्रवृत्तिर्वा । द्वितीयः पक्षान्यत्वादिः पक्षे व्याहतत्वान्न पक्षोपयोगी इति भावेन एतत्स्वत्वादिर्धर्मः पक्षे सिध्यति । स च पक्षीकृतेत्यादिमहाविद्यासाध्येन अव्याप्यो यः तत्र निष्ठस्तदेव, यदि मेयत्वं महाविद्यासाध्याव्याप्यं भवेदिति मेयत्वस्य महाविद्यासाध्येन अव्याप्यत्वं सिद्धम् । व्यावर्त्यानि यथा—मेयत्वेनाधिकरणमित्युक्ते येन केनापि वाच्यत्वादिधर्मेण मेयत्वस्य प्रकृतसाध्यव्याप्यत्वेऽप्युपपादनेन अर्थान्तरम्, अत उक्तमव्याप्यमिति । तथापि घटत्वेनाव्याप्यमन्यितत्वं तन्निष्ठेन अभिधेयत्वादिना अर्थान्तरत्वं, तदर्थं पक्षीकृतेत्यादि । स्वत्वेतरत्वादिविशेषणकृत्यं पूर्ववदेवेति पुनर्नोच्यते ।

न च पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वाव्याप्याप्रसिद्धेरप्रसिद्धविशेषणतेति वाच्यम् । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्याप्यत्वं स्वस्वेतरवृत्तित्वरहितकृतकत्वव्याप्यनिष्ठाधिकरणं मेयत्वादिति प्रसिद्धेः । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्याप्यत्वं स्वस्वेतरवृत्तित्वरहितमेयत्वाव्याप्यनिष्ठाधिकरणं मेयत्वादिति व्याप्यत्वाभावानुमानम् । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वस्वेतरवृत्तित्वरहितमेयत्वाव्यापकनिष्ठाधिकरणं मेयत्वादिति वा । न च अनेन पक्षे मेयत्वव्यापकत्वाभावसिद्धिः, ननु मेयत्वे तद्व्याप्यत्वाभावसिद्धिरिति

साध्यप्रसिद्धिर्नेत्याह—स्वेति। उपाधेः साधनाव्यापकत्वमनुमाय साध्यव्यापकत्वायानुमिमीते—मेयत्वाव्यापकत्वमिति। मेयत्वसाधनस्य अव्यापकत्वं पक्षः। स्वं पक्षः। स्वेतरत् पक्षादन्यत्। तद्युगले यो न वर्तते स धर्मो द्विधा स्यात्, स्वमात्रवृत्तिः स्वेतरमात्रवृत्तिश्च। उत्तरः पक्षे व्याहतः। तेनाद्यः एतत्पक्षत्वादिः पक्षे सिध्यति। स च पक्षीकृतेत्यादिमहाविद्यासाध्यस्य व्यापके निष्ठो यो धर्मः तदाश्रितः तदैव, यदि पक्षीकृतं मेयत्वाव्यापकत्वं महाविद्यासाध्यव्यापकनिष्ठं भवेत्। तथा च यदि मेयत्वाव्यापकत्वमुपाधिधर्मो महाविद्यासाध्यव्यापकनिष्ठोऽजनि, तर्हुपाधिर्महाविद्यासाध्यव्यापकः संपन्न एवेति साध्यव्यापकत्वं पक्षीकृतशब्देतरत्वोपाधेः सिद्धिसौधमध्यास्त। अत्रापि सर्वत्र धर्मेष्वन्यादौ सपक्षे पक्षान्यत्वधर्मेण महाविद्यासाध्यव्यापकं मेयत्वादि, तन्निष्ठमस्तित्वादि, तदाश्रितेन साध्यानुगमः। व्यावर्त्यानि उक्तानार्थानि। उपाध्यनुमान इति। अनुमानशब्दो हि पुंनपुंसकलिङ्गो लिङ्गानुशासने प्रत्यपादीत्यतः उपाध्यनुमानः इत्युक्तम्। महाविद्यासाध्यव्यापकत्वं मेयत्वाव्यापकत्वं च न क्वचिन्निर्णीतमित्याश्रयासिद्धिरित्याह—पक्षीकृतेति। यत्र यत्र महाविद्यासाध्यं तत्र तत्र मेयत्वमिति महाविद्यासाध्यव्यापकत्वस्य मेयत्वादौ सिद्धेः। उष्णत्वादौ मेयत्वसद्भावेऽप्यनुष्णत्वाभावेन यत्र यत्र मेयत्वं, तत्र तत्रानुष्णत्वमिति व्याप्तेरभावात् मेयत्वाव्यापकत्वस्यानुष्णत्वादौ सिद्धेश्च अनयोः पूर्वोक्तहेत्वोराश्रयासिद्धत्वादि नाशङ्क्यमिति भावः। एवमौपाधिकव्याप्तिकत्वेन व्याप्यत्वासिद्धत्वं महाविद्याहेतोः प्रतिपादितम्। साध्यव्याप्यत्वाभावत्वेन व्याप्यत्वासिद्धत्वमाह—व्याप्यत्वासिद्धं चेति। हेतोर्यत्साध्येन व्याप्यत्वं तेन असिद्धं मेयत्वं महाविद्यासाध्यं मेयत्वहेतुं न व्याप्नोतीत्यर्थः। एतदेव महाविद्यानुमानेनाह—मेयत्वमिति। स्वं मेयत्वं, स्वस्मान्मेयत्वादितरत्सर्वं जगत्। तयोर्युगले यो न वर्तते धर्मः स द्वेधा स्यात्, स्वमात्रवृत्तिः स्वेतरमात्रवृत्तिर्वा। द्वितीयः पक्षान्यत्वादिः पक्षे व्याहतत्वात्तत्पक्षोपयोगी इति प्राचीनः एतत्पक्षत्वादिर्धर्मः पक्षे सिध्यति। स च पक्षीकृतेत्यादिमहाविद्यासाध्येन अव्याप्यो यः तत्र निष्ठस्तदैव, यदि मेयत्वं महाविद्यासाध्याव्याप्यं भवेदिति मेयत्वस्य महाविद्यासाध्येन अव्याप्यत्वं सिद्धम्। व्यावर्त्यानि यथा—मेयत्वनधिकरणमित्युक्ते येन केनापि वाच्यत्वादिधर्मेण मेयत्वस्य प्रकृतसाध्यव्याप्यत्वेऽप्युपपादनानेन अर्थान्तरम्, अत उक्तमव्याप्यनिष्ठेति। तथापि घटत्वेनाव्याप्यनास्तित्वं तन्निष्ठेन अभिधेयत्वादिना अर्थान्तरत्वं, तदर्थं पक्षीकृतेत्यादि। स्वस्वेतरेत्यादिविशेषणकृत्यं पूर्ववदेवेति पुनर्नोच्यते।

न च पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वाव्याप्याप्रसिद्धेरप्रसिद्धविशेषणतेति वाच्यम्। पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्याप्यत्वं स्वस्वेतरवृत्तित्वरहितकृतभिन्नावृत्तनिष्ठाधिकरणं मेयत्वादिति तत्सिद्धेः। पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्याप्यत्वं स्वस्वेतरवृत्तित्वरहितमेयत्वावृत्तिनिष्ठाधिकरणं मेयत्वादिति व्याप्यत्वाभावानुमानम्। पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वस्वेतरवृत्तित्वरहितमेयत्वाव्यापकनिष्ठाधिकरणं मेयत्वादिति वा। न च अनेन पक्षे मेयत्वव्यापकत्वाभावसिद्धिः, ननु मेयत्वे तद्व्याप्यत्वाभावसिद्धिरिति

वाच्यम्। महाविद्यावदपर्यवसानात्तत्सिद्धेः। न हि प्रकृतं साध्यं मेयत्वाव्यापकं मेयत्वं च तद्व्याप्यमिति प्रतिपत्तुं शक्यम्। तदिदमुक्तं उदाहरत्यभिमतव्याप्यत्वभङ्गं निजमिति। अभिमतं साध्यं, तद्व्याप्यत्वं अभिमतव्याप्यत्वमिति। तस्य भङ्गः तदभाव इति।

(भुवन०)—अत्र पक्षीकृतेत्यादिमहाविद्यासाध्याव्याप्यस्य कस्याप्यप्रसिद्धेः, तन्निष्ठवर्तस्यापि सपक्षेऽप्रसिद्धत्वात् अप्रसिद्धविशेषणत्वं पक्षस्य आशङ्कमानः परिहरति—**न च पक्षीकृतेत्यादि**। महाविद्यासाध्यस्य सर्वव्यापकत्वान्महाविद्यासाध्येन अव्याप्यस्य अप्रसिद्धेः, तन्निष्ठवर्तस्याप्यप्रसिद्धत्वात्पक्षोऽप्रसिद्धविशेषणः इति परमार्थः। हेतुमाह—**पक्षीकृतेत्यादि**। पक्षीकृतेत्यादिमहाविद्यासाध्यव्याप्यत्वं पक्षः। स्वस्वेतरवृत्तित्वरहितश्चासौ कुतश्चिद्व्यावृत्तनिष्ठश्चेति विग्रहः। स्वशब्देनैतत्पक्षग्रहः। अत्र स्वमात्रवृत्तिरेतत्पक्षत्वादिर्धर्मः पक्षेऽवसेयः। स च कुतश्चिद्व्यावृत्ते निष्ठ तदैव, यदि पक्षितं महाविद्यासाध्यव्याप्यत्वं कुतश्चिद्व्यावृत्तं स्यात्। तथा च यतो महाविद्यासाध्यव्याप्यत्वं व्यावृत्तं स महाविद्यासाध्याव्याप्यः सिद्ध एव। पक्षान्यत्वादिधर्मेण कुतश्चिद्व्यावृत्तं घटत्वादि तन्निष्ठेन साध्यप्रसिद्धिः। व्याप्यत्वं यथोक्तसाध्यवदित्युक्तेऽग्निमत्त्वव्याप्यत्वं कुतश्चिद्घटादेर्व्यावृत्तं स्वमेव तन्मात्रनिष्ठधर्मवदित्यर्थान्तरम्। तदर्थं पक्षीकृतेत्यादि गृहीतम्। पक्षीकृतेत्यादिव्याप्यत्वमधिकरणमित्युक्ते स्वमात्रनिष्ठधर्मेण अर्थान्तरं, तत उक्तं कुतश्चिद्व्यावृत्तनिष्ठेति। इतरद्विशेषणं व्याख्यातार्थम्। **तत्सिद्धेरिति**। पक्षीकृतेत्यादिमहाविद्यासाध्याव्याप्यत्वसिद्धेरित्यर्थः। मेयत्वहेतोर्महाविद्यासाध्यव्याप्यत्वं प्रयोगान्तरेण निरस्यति—**पक्षीकृतेति**। मेयत्वेऽवृत्तिर्यस्य स मेयत्वावृत्तिः, तत्र निष्ठा यस्य स तथा। स्वस्वेतरवृत्तित्वरहितश्चासौ मेयत्वावृत्तिनिष्ठश्च तस्याश्रय इत्यर्थः। इह स्वमात्रवृत्तिरेतत्पक्षत्वं धर्मो मेयत्वावृत्तिनिष्ठः पक्षे सिध्यन्महाविद्यासाध्यव्याप्यत्वस्य[2] पक्षितस्य मेयत्वे अवृत्तिं साधयति। तथा च मेयत्वस्य महाविद्यासाध्येन अव्याप्यत्वं सिद्धमेव। इह सपक्षे पक्षान्यत्वं धर्मोऽवसेयः। मेयत्वहेतोरेव व्याप्यत्वाभावानुमानं तृतीयमाचष्टे—**पक्षीकृतेत्यादि**। महाविद्यासाध्यं पक्षः। अत्रैवंविधो धर्मः स्वेतरमात्रवृत्तिः स्वमात्रवृत्तिश्च। तत्राद्यः पक्षे व्याहत इति द्वीतियः एतत्पक्षत्वं धर्मः पक्षे सन् सिध्यति। स च मेयत्वस्य अव्यापके निष्ठस्तर्ह्येव, यदि महाविद्यासध्यं मेयत्वाव्यापकं स्यात्। यदि च महाविद्यासाध्यं मेयत्वाव्यापकं समजनि, तदा मेयत्वं महाविद्यासाध्येन अप्याव्यं संपन्नमेवेति व्याप्यत्वाभावः। महाविद्यासाध्यान्यत्वधर्मेण मेयत्वाव्यापकं घटत्वं तन्निष्ठेन साध्यानुगमः। व्यावर्त्यानि पूर्ववद्बोद्धव्यानि। आशङ्कां कुर्वन्निराकरोति—**न च अनेनेति**। अनेन अनन्तरोक्तेनैवानुमानेन पक्षे महाविद्यासाध्यरूपे मेयत्वस्य यद्व्यापकत्वं तस्याभावसिद्धिः स्यात्, न तु मेयत्वे तद्व्याप्यत्वस्य महाविद्यासाध्यरूपव्यापकव्याप्यत्वस्य अभावसिद्धिरिति न वाच्यम्। हेतुमाह—**महाविद्येति**। यथा महाविद्यायायां अपर्यवसानेन साध्यसिद्धिः, तथेहापि। यदि महाविद्यासाध्ये मेयत्वाव्यापकत्वं सिद्धं, तदानीं मेयत्वतदव्याप्यं सिद्धमेवेत्यपर्यवसाना-

१ 'अपक्षीकृ' इति छ द पुस्तकपाठः। २ 'व्याप्यत्वासपक्षि' इति छ द पुस्तकपाठः।

व्याप्यत्वाभावसिद्धिः । एतदेव विशदयति—न हीति । प्रकृतं साध्यं महाविद्यासाध्यं मेयत्वस्याव्यापकं, मेयत्वं च तेन महाविद्यासाध्येन व्याप्यमित्ययुक्तं, व्याघातादित्यर्थः । उक्ते मूलपदं दर्शयति—तदिदमिति । तदेव व्याचष्टे—अभिमतमिति । अभिमतं साध्यं महाविद्यासाध्यं, तेन व्याप्यत्वं तद्व्याप्यत्वमिति ।

किञ्च अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणमित्यत्र अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वरहितः एतदन्यत्वरहितत्वादित्यादयः प्रतिपक्षाः । न च पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वरहितत्वमप्रसिद्धमितिवाच्यम् । पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वस्वेतरवृत्तित्वरहितकुतश्चिद्व्यावृत्तनिष्ठाधिकरणं मेयत्वात् घटवदिति तत्सिद्धेः ।

(भुवन०)—प्रतिपक्षं लक्षयति—किञ्चेत्यादि । अयं शब्दः स्वस्वेतरेत्यादिमहाविद्यासाध्येन रहितः एतदन्यत्वरहितत्वात् । एतच्छब्दार्थदन्यत्वं तेन रहितत्वात् एतच्छब्दत्वात् । व्यतिरेके घटादि कुतो न वाच्यमत आह—पक्षीकृतेति । एतन्महाविद्यासाध्यं पक्षः । स्वस्वेतरवृत्तित्वरहितश्चासौ कुतश्चिद्व्यावृत्तनिष्ठश्चेति विग्रहः । इह स्वमात्रवृत्तिरेतन्महाविद्यासाध्यत्वादिको धर्मः पक्षे साध्यः । स च कुतश्चिद्व्यावृत्तनिष्ठत्वदेव, यदि पक्षितं महाविद्यासाध्यं कुतश्चिद्व्यावृत्तं भवेत् । यतश्च तद्व्यावृत्तं स महाविद्यासाध्यरहितः संपन्न एवेति पक्षितमहाविद्यासाध्यरहितत्वप्रसिद्धिः । पक्षान्योन्याभावानुपादाय साध्याधिगमः ।

अयं शब्दो नित्यः शब्दत्वादिति वा प्रतिपक्षः । न चायं पक्षधर्मोऽपि सपक्षविपक्षव्यावृत्तत्वादसाधारण इति वाच्यम् । व्याप्तिपक्षधर्मतयोरखण्डने असाधारणस्य दूषणत्वानङ्गीकारात् । व्याप्यत्वानिश्चयादगमक इति चेत् । न । शब्दत्वं स्वस्वेतरवृत्तित्वरहितनित्यत्वव्याप्यनिष्ठाधिकरणं मेयत्वात् घटवदिति व्याप्यत्वसिद्धेः । तदिदमुक्तं आचष्टे प्रतिपक्षमात्मविषयमिति । आत्मविषयं प्रतिपक्षं निर्धारयतीत्यर्थः ।

(भुवन०)—न चायमिति । अयं शब्दत्वादिर्हेतुः पक्षधर्मोऽपि सपक्षविपक्षाभ्यां व्यावृत्तत्वादसाधारणानैकान्तिकः । नहि सपक्षे सपक्षावृत्तेः [illegible] असाधारणानैकान्तिकोऽनैकान्तिकभेदो वा असत्प्रतिपक्षितो वा । अत्र च नित्यत्वे साध्ये गगनादीनां सपक्षत्वेऽपि हेतोः सपक्षाव्यावृत्तेरसाधारणत्वमिति रहस्यं । हेतुमाह—व्याप्तिपक्षेति । व्याप्तिश्च पक्षधर्मता च व्याप्तिपक्षधर्मते, तयोरखण्डने सति असाधारणस्यानैकान्तिकत्वेन दूषणत्वं नोरीक्रियते इत्यर्थः । [illegible] । व्याप्तिपक्षधर्मताविशिष्टानि [illegible] इति । [illegible]—व्याप्यत्वेति । अयं शब्दत्वादिति हेतुर्नित्यत्वसाध्येन व्याप्यत्वं हेतोः [illegible] अगमक इत्यर्थः । समाधत्ते—न । शब्दत्वमिति । स्वस्वेतरवृत्तित्वरहितो धर्मः शब्दत्वादिः

पक्षे ज्ञेयः । स च नित्यत्वव्याप्यनिष्ठस्तदैव, यदि शब्दत्वं नित्यत्वव्याप्यं भवेदिति शब्दत्वस्य नित्यत्वव्याप्यत्वसिद्धिः । पक्षान्यत्वधर्मेण नित्यत्वव्याप्ये आत्मत्वादौ निष्ठेन साध्यानुगतिः । शब्दत्वान्यान्यत्वादिना धर्मेण अर्थान्तरपरिहाराय नित्यत्वव्याप्यनिष्ठेत्युपात्तम् । शेषं सुगमम् ।

किञ्च अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादित्ययं कालात्ययापदिष्टः । अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वरहित इत्यस्मदादिवचनजनितप्रमितिबाधात् । न च अस्याः प्रमितित्वमसिद्धमिति वाच्यम् । इदं ज्ञानं स्वस्वेतरवृत्तित्वरहितप्रमितिनिष्ठाधिकरणं मेयत्वाद्घटवदिति तत्सिद्धेः । पूर्वज्ञानविपरीतप्रमितित्वमेव बाधकत्वं, नान्यत् किञ्चित् । तदिदमुक्तं बाधां समुन्मुद्रयतीति । समुद्घाटयतीत्यर्थः ।

(भुवन०)—कालात्ययापदिष्टतां स्पष्टयति—किञ्च अयमित्यादि । प्रमाणाबाधितसाधकत्वेन नात्र हेतौ बाधासम्बन्धवैधुर्यमित्यत आह—अयं शब्द इति । अयं शब्दः स्वस्वेतरत्वादिसाध्यरहितः इत्येवंरूपा या अस्मदादिवचनजनिता प्रमितिः आगमप्रमाणं, तया बाधः इति भावः । न च अस्या इति । अस्या अस्मदादिवचनजनितप्रमितेः प्रमितित्वमागमप्रमाणत्वमसिद्धमिति न च वाच्यम् । कुतो न वाच्यमित्यत आह—इदं ज्ञानमिति । अस्मदादिवाक्यजन्यज्ञानमित्यर्थः । एतज्ज्ञानत्वं धर्मः पक्षेऽवसेयः । स च प्रमितिनिष्ठः तदानीमेव, यदि पक्षितमेतज्ज्ञानं प्रमितिरूपं स्यादित्येतज्ज्ञानस्य प्रमितित्वसिद्धिः । सपक्षे एतज्ज्ञानान्यत्वं धर्मो बोद्धव्यः । स च प्रमितिः प्रत्यक्षादिप्रमाणं तन्निष्ठः एवेति तेन साध्यानुगतिः । घटादिज्ञानेन सिद्धसाधनता मा भूदितीदं ज्ञानमित्युक्तं । तत्सिद्धेरिति । अस्मदादिवचनप्रमितित्वसिद्धेरित्यर्थः । पूर्वमहाविद्याया बाध्यत्वं दर्शयितुं बाधकलक्षणं लक्षयति—पूर्वेति । पूर्वज्ञानं महाविद्यासाध्यवत्त्वज्ञानं शब्दस्य, तस्माद्विपरीतप्रमितित्वं शब्दस्य महाविद्यासाध्यरहितत्वज्ञानं, तदेव बाधकत्वं, तच्चास्मदादिवाक्यजनितप्रमितेरस्त्येवेति भावार्थः । एवं मेयत्वादिहेतोः कालात्ययापदिष्टता समादिष्टा । 'प्रमाणबाधितसाध्यसाधकत्वं कालात्ययापदिष्टत्वमि'ति तल्लक्षणात् ।

किञ्च सकलमहाविद्यानां सिद्धान्तविप्लावकत्वं नाम दूषणम् । तथाहि—गगनादयः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति, पार्थिवपरमाणुः स्वस्वेतरवृत्तित्वरहितनित्यरूपादिमन्निष्ठाधिकरणं मेयत्वादिति, आप्यादिपरमाणुः स्वस्वेतरवृत्तित्वरहितपाकजरूपादिमन्निष्ठाधिकरणं मेयत्वादिति, ईश्वरः स्वस्वेतरवृत्तित्वरहितानित्यज्ञानेच्छाप्रयत्नधर्माधर्मसुखदुःखद्वेषभावनावन्निष्ठाधिकरणं मेयत्वादित्यादेः सर्वत्र सुवचत्वात् । न चैवमादीनामागमबाधः । विवादपदमागमः स्वस्वेतरवृत्तित्वरहिताप्रमाणनिष्ठाधिकरणं मेयत्वादित्यादेः तत्प्रामाण्यप्रतिक्षेपेऽपि सुवचत्वात् ।

(भुवन०)—इदानीं सिद्धान्तविप्लावकत्वदूषणं प्रादुष्करोति—किञ्च सकलेति । विप्लावकत्वं व्यवस्थारहितत्वम् । ननु नित्या गगनादयः, तथा चतुर्विधाः अपि परमाणवो नित्याः,

पार्थिवपरमाणोः रूपरसगन्धस्पर्शाश्चानित्याः, वायवीयपरमाणुषु स्पर्शो नित्योऽपाकजश्च, रूपरसगन्धास्तु तत्र सन्त्येव न । आप्यपरमाणोः रूपरसस्पर्शाः नित्याः, गन्धस्तु तत्र नास्त्येव । तैजसपरमाणोः रूपस्पर्शौ नित्यौ, रसगन्धौ तु न स्तः । तथा तैजसाप्यपरमाणुषु रूपाद्यपाकजम् । पार्थिवपरमाणुषु रूपादिपाकजम् । ईश्वरज्ञानेच्छाप्रयत्ना नित्याः । धर्माधर्मादयस्तु तत्र न सन्तीति सिद्धान्तमर्यादाभङ्गाभावात्कथं विप्लावकत्वमित्यत आह—तथा हीत्यादि । गगनादयः पक्षः । आदिपदेन आत्मपरमाण्वादिसंग्रहः । अनुमानव्याख्या पूर्ववत् । गगनादीनां सिद्धान्ते नित्यत्वं प्रत्यपादि, महाविद्यया चाऽनित्यत्वमपि साध्यते इति सिद्धान्तविप्लवः । पार्थिवेत्यादि । नित्यं च तद्रूपादि च नित्यरूपादि । आदिशब्देन रसगन्धस्पर्शपरामर्शः । नित्यरूपादयो विद्यन्ते येषु ते नित्यरूपादिमन्तः, तन्निष्ठो धर्मः पार्थिवपरमाणुत्वादिः पक्षे सिष्यन्पक्षितपार्थिवपरमाणूनां नित्यरूपादिमत्त्वं साधयेदिति भावः । सपक्षे अनित्यरूपादिमानाप्यादिपरमाणुस्तन्निष्ठेन पक्षान्योन्याभावेन पक्षान्यसर्वनिष्ठेन साध्याधिगमः । वैशेषिकादिमते पार्थिवाणूनामनित्यरूपादिमत्त्वं प्रतिपाद्यते, अत्र तु विपरीतसाधनाद्विप्लावकत्वम् । आप्यादीति । आदिपदात्तेजोऽणूनां ग्रहणम्, न तु वायवीयाणूनाम् । तेषां केवलस्पर्शवत्त्वेन रूपादिमत्त्वाभावात् । पाकजं च तद्रूपादि च तद्वत्सु निष्ठो यो धर्मः, तदाश्रय इत्यर्थः । आदिशब्दाद्रसस्पर्शपरामृष्टिः । अत्र आप्यादिपरमाणुत्वं साध्यधर्मः पाकजरूपादिमन्निष्ठः पक्षे सिष्यन्पाकजरूपादिमत्त्वमाप्याद्यणूनां साधयति । पक्षान्यत्वं धर्मः सपक्षे ज्ञातव्यः । स च पाकजरूपादिमान्पार्थिवाणुस्तन्निष्ठोऽस्त्येवेति साध्यप्रसिद्धिः । पार्थिवाणवो हि[3] सूर्यादितेजसा ज्वलितत्वात्पाकजरूपादिमन्तः उच्यन्ते । आप्याद्यणवस्तु अज्वलितत्वादपाकजरूपादिमन्तः इति सिद्धान्तस्थितिः । अत्र च तद्वैपरीत्यकरणात्स्थितिभङ्गः । ईश्वर इति । ईश्वरो हि नित्यज्ञानादिमान्धर्माधर्मादिरहितश्च संप्रतिपन्नः,अत्र चान्यथापि साधनाद्विप्लवः । ज्ञानं चेच्छा च प्रयत्नश्च धर्मश्च अधर्मश्च सुखं च दुःखं च द्वेषश्च भावना च, अनित्याश्च ते ज्ञानादयश्चेति विग्रहः । इहेश्वरत्वं धर्मः उभयविशेषणविशिष्टः पक्षे सिष्यन्पक्षस्येश्वरस्य अनित्यज्ञानादिमत्त्वं साधयेत् । पक्षान्योन्याभावमनित्यज्ञानादिवति क्षेत्रज्ञात्मनि निष्ठमादाय साध्यानुगमः । इत्यादेरिति । अत्रादिपदेन 'श्रुतिः स्वस्वेतरवृत्तित्वरहिताप्रमाणनिष्ठाश्रयो ज्ञेयत्वाद्घटात्मादिवत्' तथा 'ईश्वरः स्वस्वेतरवृत्तित्वरहितजगत्कर्तृत्वरहितनिष्ठाश्रयो मेयत्वाद्घटादिवदि'त्यादीनां ग्रहणम् । न चैवमिति । एवमादीनां गगनाद्यनित्यत्वादिसाधकानुमानानामित्यर्थः । कुतो नेत्याह—विवादेत्यादि । अत्र विप्रतिपन्नागमत्वं पक्षे साध्यधर्मः । सपक्षे च पक्षान्यत्वं धर्मः । स चाप्रमाणे प्रत्यक्षादिप्रमाणादन्यस्मिन्निष्टः एवेत्यर्थः । शेषमनुमानमुत्तानार्थम् । तत्प्रामाण्येति । तस्य विवादपदागमस्य यत्प्रामाण्यं तत्प्रतिक्षेपेऽपीति भावः ।

अथ सिद्धान्तविप्लावकत्वं कुत्रान्तर्भवतीति पृच्छसि, तर्हि न क्वचिदित्यवेहि । यथा[3]ऽसिद्धत्वादयः पृथगेव दूषणं, एवमिदमपि । यद्वा प्रतिबन्ध्यामस्या-

---

१ °सपक्षे च नित्य° इति च पुस्तकपाठः । २ °ध्याधिगतिः । वैशे° इति च पुस्तकपाठः । ३ °हि प्रलयकाले ज्वलि° इति च पुस्तकपाठः । ३ °या अप्रसिद्ध° इति ग पुस्तकपाठः ।

न्तर्भावः। यद्येवंविधैरनुमानैः शब्दानित्यत्वं साध्यते, तर्हि गगनानित्यत्वमपि कस्मान्न साध्यते इति।

(भुवन०)—परः पृच्छति। अथेति। सिद्धान्त्याह—तर्हीति। यथा असिद्धत्वविरुद्धत्वादिदोषाः मुख्याः एव, तथा सिद्धान्तविप्लावकत्वमपि मुख्यमेव दूषणमित्याकूतम्। स्वतन्त्रदूषणत्वाऽस्वने गौरवं बाधकस्तर्के इत्याशङ्क्याह—यद्येति। प्रतिबन्द्यामन्तर्भावप्रकारमेवाविर्भावयति—यद्येवंविधैरिति। एवंविधैर्महाविद्यानुमानैर्यदि शब्दस्यानित्यत्वं साध्यते, तर्हि तथैव गगनाऽनित्यत्वमपि कथं न साध्यते इति। एतत्तत्त्वम्। 'चोद्यपरिहारसाम्यं प्रतिबन्दीतर्कः' इति हि तल्लक्षणम्। ततोऽत्रापि यद्येवमित्यादिना चोद्यपरिहारसाम्यमदर्शि।

यदि पुनः सिद्धान्तविप्लावकत्वं सर्वसाधनदूषणसाधारणं दूषणं नाङ्गीक्रियते, तर्हि यस्मिन्कस्मिंश्चिदप्यनुमाने परेण पक्षेतरत्वेन सोपाधिकत्वेऽभिहिते संदिग्धसाध्यपक्षवृत्तित्वेन संदिग्धानैकान्तिके वा अभिहिते किं वक्तव्यम्। एवंमति सर्वानुमानविप्लव इति वक्तव्यमिति चेत्। तर्हि स्वीकृतमायुष्मता सिद्धान्तविप्लावकत्वस्य दूषणत्वम्। एवं वाद्युदीरितसाधने भवता अनैकान्तिकत्वादिसम्यग्दूषणेऽभिहिते, यदि वादी नैतस्यानैकान्तिकत्वादिकं दूषणमिति वदति, तर्हि भवता किं वक्तव्यम्। अपसिद्धान्तः स्यादिति वक्तव्यमिति चेत्। न। एतस्य हेतोर्यदनैकान्तिकत्वं तस्य तेन दूषणत्वानङ्गीकारात्। एवं तर्हि सर्वथानैकान्तिकत्वस्य दूषणत्वं न स्यादिति चेत्। अङ्गीकृतं तर्हि सिद्धान्तविप्लावकत्वस्य दूषणत्वमित्यलं कलहेन।

(भुवन०)—पूर्वपक्षिणं शङ्कते—यदि पुनरिति। सर्वसाधनानां यानि दूषणानि असिद्धत्वादीनि तेषां साधारणं समानमित्यन्वयः। परमार्थस्त्वयं—यादृशमसिद्धत्वादिदूषणं तादृशं सिद्धान्तविप्लावकत्वदूषणमपि यदि नाभ्युपेयते। तर्हि यस्मिन्निति। पक्षेतरत्वस्योपाधिदूषणत्वेऽपि शब्दो नित्यः कृतकत्वाद्घटवदित्यादौ यत्र क्वाप्यनुमाने प्रतिवादिना पक्षेतरत्वेन सोपाधिके प्रोक्ते। तथा 'संदिग्धविपक्षवृत्तिः संदिग्धानैकान्तिकः' इति तल्लक्षणे सत्यपि, प्रतिवादिना संदिग्धसाध्यो यत्र स संदिग्धसाध्यः, स चासौ पक्षश्च, तद्वृत्तित्वेन हेतोः संदिग्धानैकान्तिकत्वे प्रसञ्जिते, किं वाच्यं भवतेत्याशयः। परः उत्तरयति—एवं सतीति। घट्टकुट्यां प्रभातमिति न्यायेन परिहरति—तर्हि स्वीकृतमिति। प्रकारान्तरेण सिद्धान्तविप्लावकत्वं स्वीकारयति—एवं वाद्युदीरितेति। नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदित्यादौ नैयायिकवाद्युदीरिते साधने भवता प्रतिवादिना अनैकान्तिकत्वादिसम्यग्दूषणेऽभिहिते, यदि वादी नैतस्य हेतोरनैकान्तिकत्वादि दूषणमिति वदति, तदा त्वया किं वाच्यमित्यर्थः। परः प्रत्याचष्टे—अपसिद्धान्त इति। परिहरति—

---

1 'कथं न इति' इति ख पुस्तकपाठः। 2 'स्वयमवता' इति ख पुस्तकपाठः।

[?]ति । एतस्य हेतोर्वाधुक्तस्य यदनैकान्तिकत्वं तस्यानैकान्तिकत्वस्य भवदुक्तादितस्य तेन वादिना [?]षणत्वं नाङ्गीक्रियते इत्यर्थः । परः परिहारमाह—एवं तर्हीति । सिद्धं नः समीहितमित्याह—[?]ङ्गीकृतमिति ।

अथ प्रतिबन्दी तर्कः एव । तर्कश्च आपाद्यापादकयोर्व्याप्तिमूलः । न च प्रमेयत्वस्य पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वसाधकत्वस्य प्रमेयत्वस्येश्वरतदितरवृत्तित्वरहितानित्यज्ञानादिमन्निष्ठाधिकरणत्वसाधकत्वेन व्याप्तिरस्ति । अतो मूलशैथिल्यात्तर्काभासोऽयमिति मन्यसे । तन्न । प्रसङ्गव्यतिरिक्तप्रतिबन्द्यादितर्काणां व्याप्तिमूलत्वानङ्गीकारात् । अन्यथा सम्यक्साधनेऽपि परेण पक्षेतरत्वोपाधिपक्षनिष्ठसंदिग्धानैकान्तिकत्वादिना दूषिते सम्यगनैकान्तिकत्वादौ च परेण नात्रानैकान्तिकत्वदूषणमित्युक्ते भवतोऽपि न किञ्चिदुत्तरं स्यादिति । तदिदमुक्तं आधत्ते स्थितिविप्लवं चेति ।

(भुवन०)—सिद्धान्तविप्लावकत्वस्य प्रतिबन्द्यामन्तर्भावं पूर्वोक्तमालम्ब्य शङ्कते—अथ प्रतिबन्दीत्यादि । यद्ययमनग्निः स्यात्तर्हि निर्धूमः प्रसज्येत । अत्रानग्नित्वमापादकं, निर्धूमत्वमापाद्यं; यत्रापादकं तत्रापाद्यमिति व्याप्तिमूलस्तर्कः । न च प्रमेयेति । प्रमेयत्वहेतोर्यत्पक्षीकृतेत्यादिमहाविद्यासाध्यसाधकत्वं तस्य न च व्याप्तिरस्ति । केन सह । मेयत्वहेतोरेव यदीश्वरेत्यादिमहाविद्यासाध्यसाधकत्वं तेन इत्यन्वयः । भावार्थस्तु अयम्—यत्र यत्र मेयत्वस्य पक्षीकृतेत्यादिसाध्यसाधकत्वरूपमापादकं, तत्र तत्र मेयत्वस्य ईश्वरेत्यादिसाध्यसाधकत्वरूपमापाद्यमित्यापाद्यापादकयोर्व्याप्तेरभावः इति । किं तर्हीत्याह—अत इति । व्याप्तिरूपं यन्मूलं तस्य शैथिल्यादयं प्रतिबन्दी तर्कस्तर्काभास इति आचार्यः समाधत्ते—तन्नेत्यादि । प्रतिबन्दीन्यायाघातात्माश्रयपरस्पराश्रयादितर्काणामित्यर्थः । विपक्षे बाधकमभिधत्ते—अन्यथेति । अन्यथा प्रतिबन्द्यादितर्काणां व्याप्तिमूलत्वस्वीकारे धूमत्वादिसम्यक्साधनेऽपि परेण प्रतिवादिना पक्षेतरत्वोपाधिना पक्षनिष्ठतया संदिग्धानैकान्तिकत्वादिना च दूषिते, तथा 'नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदि'त्यत्र ध्वनिनानैकान्त्यम् । यतो वैशेषिकादिमते ध्वनिरनित्यः श्रावणश्च भवति । "नादगुणः श्रावणोऽवर्णात्मा अनित्यः शङ्खादिभवो ध्वनिरि"त्यादि तत्त्वरूपादिति ध्वनिना सम्यगनैकान्तिकत्वादावुद्भाविते ऽपि नात्रैतद्दूषणमिति परेणोक्ते च, तदापि न किञ्चिदुत्तरमित्यर्थः । भावस्त्वयम्—परेणैवमुक्ते सति भवतात्र पक्षेतरत्वस्योपाधित्वे सर्वानुमानानां पक्षेतरत्वोपाधिग्रस्तत्वं स्यादित्यादि प्रतिबन्द्येव वाच्या । न च यत्रैकस्मिन्ननुमाने पक्षेतरत्वस्योपाधित्वं तत्र सर्वानुमानेषु पक्षेतरत्वस्योपाधित्वमिति व्याप्तिरस्ति । भवदाशयेन तु व्याप्तिर्विलोक्यते एवेति तव न किञ्चिदुत्तरं स्यादिति । पूर्वोक्तं मूलमनुवदन्नवतारयति—तदिदमिति । स्थितिः सिद्धान्तव्यवस्था ।

किञ्च पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वस्वेतर-

1 'पक्षेतरत्वोपाधिं' इति छ द पुस्तकपाठः ।

वृत्तित्वरहितपक्षाविद्यमाननिष्ठाधिकरणं मेयत्वादिति विरुद्धत्वम्। पक्षीकृत-शब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वरूपप्रकृतव्यापकाभावस्य पक्ष-निष्ठतया प्रकृतहेतुनैव साधनादिति। पक्षनिष्ठतया प्रकृतव्यापकाभावसाध-कत्वमेव च साक्षाद्विरुद्धलक्षणं, न तु प्रकृतव्यापकाभावव्याप्यत्वं। तस्य साक्षा-द्विरुद्धावान्तरभेदलक्षणत्वादिति संक्षेपः। तदिदमुक्तं भजते प्रत्यर्थितामात्मन इति। एवं सर्वमहाविद्यास्वपि अनैकान्तिकत्वादिसाधकत्वं योज्यम्।

(भुवन०)—विरुद्धत्वं महाविद्याहेतोराह—किञ्चेत्यादि। स्वत्वेतरवृत्तित्वरहितो ऽयं एतन्महाविद्यासाध्यत्वमेतत्पक्षान्यान्यत्वादिर्वा पक्षे द्रष्टव्यः। स च पक्षे शब्देऽविद्यमानो यत्नादि-स्तर्ह्येव, यर्हि पक्षितं महाविद्यासाध्यं पक्षेऽविद्यमानं भवेदिति विरुद्धत्वम्। पक्षान्यत्वेन व्याप्ति-सिद्धिः। स्वमात्रनिष्ठधर्मेणार्थान्तरता मा भूदित्युक्तं—पक्षाविद्यमाननिष्ठेति। पक्षाविद्यमाने घ-टादौ निष्ठेन मेयत्वादिना अर्थान्तरं वारयति—स्वेतरवृत्तित्वरहितेति। अप्रसिद्धविशेषणत्वं परि-हर्तुं—स्वेति। विरुद्धत्वे हेतुमाह—पक्षीकृतेत्यादि। पक्षीकृतशब्देत्यादिरूपं यत्प्रकृतव्यापकं महाविद्यासाध्यं तस्य योऽभावः, तस्य पक्षे शब्दे निष्ठतया प्रकृतहेतुना मेयत्वेनैव साधनात्। ननु प्रकृतव्यापकाभावव्याप्यो हि विरुद्धो हेतुर्नतु प्रकृतव्यापकाभावसाधकः इत्यपराशङ्कां पराकरोति—पक्षनिष्ठतयेत्यादि। पक्षे शब्दे निष्ठतया प्रकृतव्यापकमत्र महाविद्यासाध्यं, तदभावसाधकत्वमेव साक्षाद्विरुद्धहेतुलक्षणं, न तु महाविद्यासाध्याभावेन व्याप्यत्वं विरुद्धहेतुलक्षणमित्याकूतम्। हेतुं दृढ़—तस्येति। तस्य प्रकृतव्यापकाभावव्याप्यत्वस्य साक्षाद्विरुद्धस्य योऽवान्तरभेदः तल्लक्षणत्वं न तु सा-क्षाद्विरुद्धलक्षणत्वमित्यर्थः। पूर्वोक्तमन्यत्रातिदिशति—एवं सर्वेति। अयं शब्दोऽनित्यत्वव्यतिरि-क्तैतद्धर्मत्वरहिताधिकरणं मेयत्वाद्घटवदित्यत्र अनित्यत्वव्यतिरिक्तैतद्धर्मत्वरहिताधिकरणं मेयत्वादि-ष्टात्यन्ताभावप्रतियोगित्वव्यतिरिक्तैतद्धर्मत्वरहिताधिकरणं मेयत्वाद्घटवदित्यनैकान्त्यादिसाधकत्व-कारेण "किञ्च स्वव्यभिचारम्" इत्यारभ्य ये पूर्वमूचिरे दोषाः अनैकान्तिकत्वसोपाधिकत्वादय-स्ते सर्वमहाविद्यास्वप्यूहनीयाः इति रहस्यम्।

ननु महाविद्यारीतिरप्रमाणं प्रमाणं वा। आद्ये न तद्बलादनैकान्तिकत्वा-दिदोषसिद्धिरिति निर्दुष्टत्वं महाविद्यायाः। द्वितीये तु अङ्गीकृतप्रमाणभावायां महाविद्यायामनैकान्तिकत्वादिव्युत्पादनं व्याहतमित्यत आह—

स्वव्याघातकमुत्तरं तव मते जातिस्तदत्रापि किं
स्वव्याघातकतैव दुष्टिजननी किंवोत्तरत्वान्विता।
आद्ये स्यात्तव जातिसाधनमिदं पक्षे द्वितीये पुन-
र्वैयर्थ्यं प्रथमं च दूषणमिह न्यायस्य तुल्यत्वतः॥ १८॥

अयमर्थः—स्वव्याघातकमुत्तरं जातिरिति हि परस्य संमतम्। तत्र किं स्वव्याघातकत्वमेव दुष्टत्वं गमयति, किंवा उत्तरत्वसहितम्। आद्ये महावि-

थापि स्वानैकान्तिकत्वादिदूषणोत्पादनेन स्वव्याघातकैवेति कथं न दुष्टा । केवलमुत्तरत्वाभावाज्जातिसाधनमियम् । अन्यत्तु जात्युत्तरमिति । द्वितीये तु उत्तरत्वविशेषणं व्यर्थम् । स्वव्याघातकत्वस्यैव दुष्टत्वबोधापरपर्यायदुष्टिजनकत्वात् । दुष्टत्वबोधानुपयोगिविशेषणोपादाने च स्वव्याघातकं साधनं जातिरिति साधनत्वविशेषणोपादानेन उत्तरस्यापि जातित्वं निवर्त्यतः किमुत्तरं स्यादिति ।

(भुवन०)—उत्तरश्लोकावतारणाय चोदयति—नन्विति । आद्यं दूषयति—आद्ये नेति । महाविद्यायाः अप्रमाणत्वे महाविद्यात्वेन नानैकान्तिकत्वादिदोषनिरूपणमिति [illegible] मस्त्वैवेति भावः । द्वैतीयिकं निर्लोठयति—द्वितीये इति । महाविद्यायाः [illegible] दोषोत्पादनं स्याहतमित्याशयः ।

एतावता द्वितीयविकल्पोक्तां प्रमाणीकृतमहाविद्या[illegible] [illegible] जात्युत्तरमिति पराभूतां निरस्यति—स्वव्याघातकमुत्तरमित्यादि ॥ १८ ॥

साध्वं स्वाहुरते—अयमर्थः इत्यादि । [illegible] [illegible] वेति । जातिर्हि दुष्टत्वमिषा, जातौ सर्वं दुष्टत्वाद [illegible] । [illegible] । तेन तत्र 'स्वव्याघातकमुत्तरं जाति'रिति [illegible] [illegible] किं वा स्वव्याघातकमुत्तरमिति भावः । [illegible]—आद्ये इति । [illegible] [illegible] दुष्टत्वे महाविद्यायाः [illegible] । [illegible] । [illegible] स्वव्याघातकत्वमस्ति, न दूषकत्वम् । [illegible] [illegible] । [illegible]—द्वितीये इति । [illegible]

[illegible]

[illegible]

स भवत्येवेत्याह—समानेत्यादि । दुर्बलं वादिनं दृष्ट्वा स्वव्याघातत्वाभावमप्यभ्युपेत्य भङ्ग्यन्तरं भणति—यदि चेति । अत्र महाविद्यायां यदि 'विरुद्धसमुच्चयो व्याघातः' इत्येवंरूपो व्याघातो बाधकतर्को न सम्भवति, तर्हि पूर्वोक्तव्याघातदोषाभावेन यथैव पूर्वमुक्तं तथैवानैकान्त्यं महाविद्यायामनुज्ञाव्यमिति तात्पर्यम् ।

अथ अनैकान्तिकत्वानुमानेऽपि अनेनैव न्यायेन अनैकान्तिकत्वानुमानान्मूलानुमानानैकान्तिकत्वपरिहार इति चेत् । न । अनैकान्तिकत्वानुमानानैकान्तिकत्वानुमानेऽपि अनेनैव न्यायेन अनैकान्तिकत्वानुमानान्मूलानुमानानैकान्तिकत्वस्य नोद्वस्थ्यात् । एवमुत्तरत्राप्यनैकान्तिकत्वानुमाने वक्तव्यम् ।

(भुवन०)—अन्यः शङ्कते—अथ अनैकान्तिकत्वेति । महाविद्यानुमानोच्छेदाय यत्प्रतिवादिनानैकान्त्यानुमानं विहितं तस्मिन्नप्यनेनैव महाविद्यानुमानानैकान्तिकत्वन्यायेनानैकान्तिकत्वे कृते, मूलानुमानस्य यदनैकान्तिकत्वं तस्य परिहारः । मूलानुमानतदनैकान्त्यानुमानं तदनैकान्त्यानुमानाश्चैवं विधेयाः । तथाहि—अयं शब्दः स्वत्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वात् घटात्मादिवदिति मूलानुमानम् । तदनैकान्त्याय प्रतिवादी अनुमिमीते यथा—स्वत्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं स्वत्वेतरवृत्तित्वरहितमेयत्ववन्निष्ठात्यन्ताभावप्रतियोगिनिष्ठाश्रयो मेयत्वाद् घटात्मादिवदिति मूलानुमानानैकान्त्यानुमानम् । अथास्याप्यनैकान्त्यं यथा—स्वत्वेतरवृत्तित्वरहितमेयत्ववन्निष्ठात्यन्ताभावप्रतियोगिनिष्ठाश्रयत्वं स्वत्वेतरवृत्तित्वरहितं मेयत्ववद्वृत्तिनिष्ठाश्रयो मेयत्वाद् घटादिवदिति मूलानुमानानैकान्त्यानुमानानैकान्त्यान्मूलमहाविद्यया निर्दुष्टत्वं परिहरति—नेत्यादि । स्वत्वेतरवृत्तित्वरहितमेयत्ववद्वृत्तिनिष्ठाश्रयत्वं स्वान्योन्याभाववत्प्रतियोगिमेयत्ववन्निष्ठाभावप्रतियोगित्वाश्रयः प्रमेयत्वाद् घटात्मादिवदित्यनुमानेन मूलानुमानानैकान्त्यानुमानस्य अनैकान्तिकीकरणाय यदनुमानं प्रयुक्तं, तस्याप्यनैकान्त्ये कृते मूलमहाविद्यया अनैकान्त्यं तदवस्थमेवेति तत्त्वम् । ननु तस्मिन्नप्यनैकान्त्यं महाविद्यया अनुमातुं शक्यमत आह—एवमिति । एवं चतुर्थानुमानानैकान्त्याय पञ्चमानुमाने वादिना प्रयुक्ते तत्रापि पञ्चमानुमानादावपि वक्तव्यमित्यर्थः ।

एवं सति अनैकान्तिकत्वसमर्थनोपयुक्तानुमानपरंपरानुपरमप्रसङ्ग इति चेत् । न । मूलानुमानानैकान्तिकत्वपरिहारोपयुक्तानुमानपरंपरानुपरमप्रसङ्गस्य त्वत्पक्षेऽपि समानत्वात् । अनवस्थानुपरम इति चेत् । तुल्यम् । एवं सति उभयोः समानत्वात्कस्यापि विजयो न व्यवतिष्ठते इति चेत् । एवमस्तु । महाविद्यावादी सर्वत्र विजयते इत्यभिमानस्त्वपहृतः ।

(भुवन०)—अनवस्थाभङ्गं मत्वोभयत्र विजयापत्तिं शङ्कते—एवं सतीति । मूलमहाविद्यायाः अनैकान्तिकत्वसमर्थने [illegible] न अनुमानपरंपरा न [illegible] इत्यर्थः । अन्येन

१ '[illegible]' इति ख पुस्तकपाठः । २ '[illegible]' इति ख पुस्तकपाठः । ३ '[illegible] मानं महं' इति ख पुस्तकपाठः । ४ '[illegible]' इति ख पुस्तकपाठः ।

दूषयति—**न मूलेति**। मूलानुमानं शब्दानित्यत्वसाधकं महाविद्यानुमानं, तदनैकान्तिकत्वस्य परिहारायोपयुक्तानुमानपरंपरापि नोपरमते इति तात्पर्यार्थः। परः आह—**श्रमादिति**। तस्याः पूर्वोनुमानपरंपराया उपरमः इत्यर्थः। प्रत्याचष्टे—**तुल्यमिति**। अस्माकमपि श्रमात्तदुपरम इति रहस्यम्। साधकबाधकयोरभावे संशयः परिशिनष्टीत्याह—**एवं सत्युभयोरिति**। आपाततः स्वीकुरुते—**एवमस्त्विति**।

किञ्च साध्याभाववद्वृत्तित्वाभावनिश्चयोऽनुमानाङ्गमित्युक्तम्। न चासौ साध्याभाववद्वृत्तित्वानुमाने प्रत्यनीके सति संभवति। तेन साधनवादिन एव पराजय इति गुरवः।

(भुवन०)—महाविद्याविडम्बनाभिमानस्तवापि गलितोऽत्राह—**किञ्चेति**। साध्याभाववान्विपक्षः, तद्वृत्तित्वाभावनिश्चयोऽनुमानाङ्गमिति पूर्वमुक्तम्। न चासौ विपक्षवृत्तित्वाभावनिश्चयः साध्याभाववान्विपक्षस्तद्वृत्तित्वसाधके अनुमाने प्रत्यनीके विपरीते सति सम्भवति। किं तर्हीत्याह—**तेन साधनेति**। साधनवादिनो महाविद्यावादिनः एव पराजयः पराभव इति **गुरवः** प्रभाकराचार्याः प्राहुरिति संटङ्कः।

अथार्थान्तरता नाम कृत्या नृत्यति सङ्गरे।
सप्रपञ्चमहाविद्याग्रासकौतूहलाकुला॥ १९॥

(भुवन०)—अर्थान्तरतामाविष्कर्तुं प्रक्रमते—**अथार्थान्तरेति**। कृत्या अनर्थकरी देवता राक्षसीत्यर्थः। सप्रपञ्चाः सविस्तराः याः महाविद्यास्तद्ग्रासे यत्कौतूहलं तेनाकुला। अत्र महाविद्यावादिप्रतिवादिनोर्विवादसङ्ग्रामे नानाप्रकारसारयुक्तिपङ्क्तिहेतिसंहतिहन्यमाना असमानमहाविद्यानु-

व्याप्यत्वम् । खत्वेतरेत्यादिसाध्यवति गगनादावनित्यत्वस्याभावेन यत्रोक्तसाध्यं तत्रानित्यत्वमिति व्याप्तेरभावादित्यर्थः । अनित्यत्वरहिते गगनात्मादौ कथितसाध्यसद्भावेन विशेष्यस्य विशेषणाव्याप्तत्वान्नापि तृतीयः इत्याह—नो सामान्यविशेषतेति । सामान्यविशेषतायां हि सामान्यस्य विशेष्यत्वं, विशेषस्य च विशेषणत्वं स्यादिति । अत्र च महाविद्यासाध्याऽनित्यत्वयोर्न विशेष्यविशेषणभावोऽस्ति । गगनादौ महाविद्यासाध्यरूपविशेष्यसद्भावेऽपि अनित्यत्वरूपविशेषणाभावेन यत्र विशेष्यं तत्र विशेषणमिति व्याप्तेरभावात् । तस्मात् नो सामान्यविशेषतापीत्यर्थः । महाविद्यासाध्यापर्यवसानस्य दुर्निरूपत्वेन ततः उक्तप्रकारादनित्यत्वस्य बोधे प्रकारान्तरं च नास्ति । समास्कन्दतीति । स्कन्द्धातोरुभयार्थत्वात्तन्नागच्छति शोषयति वेति ॥ २० ॥

सिध्यतु वा मेयत्वादेः पक्षीकृतशब्दे पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वम् । अनित्यत्वसिद्धिस्तु कुतः । न हि प्रकृतसाध्यमेवानित्यत्वम् । तद्वतोऽपि गगनादेर्व्यावृत्तत्वात् । नापि तस्य व्यापकम् । तत एव । नच पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वव्यापकव्याप्यत्वेनाभिमतस्य मेयत्वादेः तत्त्वव्यापकाभ्यामन्येन व्याप्तिर्भवता शक्याऽभ्युपगन्तुम् । न च अव्यापकमपि अनित्यत्वं पक्षधर्मतावलाद्व्यापकधर्मिसंसर्गवत्स्वेत्स्यतीति युक्तम् । हेतोः पक्षधर्मतया व्यापकपक्षसंबन्धमात्रचरितार्थत्वात् ।

(भुवन०)—एवं व्याख्यानयति—सिध्यतु वेत्यादि । मेयत्वादिहेतुकः पक्षितशब्दे महाविद्यासाध्यं सिध्यतु, अनित्यत्वं तु कुतः सिध्यतीति तदर्थः । एतदेव द्रढयति—नहीति । प्रकृतसाध्यं महाविद्यासाध्यमेवानित्यत्वमिति तदर्थः । हेतुमाह—तद्वतोऽपीति । प्रकृतसाध्यवतो गगनादेः सकाशादनित्यत्वस्य व्यावृत्तत्वात् । नापि तस्येति । तस्य प्रकृतसाध्यस्य व्यापकमप्यनित्यत्वं व्यापकम् । तत एव, प्रकृतसाध्यवतोऽपि गगनादेरनित्यत्वस्य व्यावृत्तत्वादेवेति । इदं तत्त्वम् । यत्र व्याप्यं तत्र व्यापकेन भाव्यमिति हि नियमः । अत्र च प्रकृतसाध्यरूपव्याप्यं गगनादौ अस्ति, न तु अनित्यत्वरूपव्यापकम् । तस्मादनित्यत्वस्य महाविद्यासाध्यव्यापकत्वं न घटत इति । ननु मेयत्वहेतुरेव व्याप्तिबलात् [illegible] किं न [illegible]—न चेति । पक्षीकृतेत्यादि [illegible] महाविद्यासाध्यं [illegible] मेयत्वादिहेतोः [illegible] मेयत्वं, व्यापकं महाविद्यासाध्यं [illegible] न व्याप्तिः [illegible] । [illegible]— मेयत्वमहाविद्यासाध्ययोर्व्याप्यव्यापकभावोऽस्तु । [illegible] शक्यते इति । न च अव्यापकमिति । हेतोः पक्षधर्मत्वात् [illegible] [illegible] न च हेतोः पक्षधर्मत्व[illegible] अनित्यत्वं मेयत्वस्य [illegible] सिध्यतीति न च [illegible] । [illegible] न युक्तम्—हेतोरिति । [illegible] व्यापकं प्रकृतसाध्यं [illegible] । [illegible] [illegible] ।

१ [illegible] २ [illegible]
[illegible]

अथ पक्षनिष्ठव्यापकप्रतीत्यपर्यवसानात्पक्षे अनित्यत्वसिद्धिरिति मन्यसे। तन्न। किमिदमयं शब्दः स्वस्वेत्तरवृत्तित्वरहितानित्यनिष्ठाधिकरणमिति पक्षनिष्ठव्यापकप्रतीतेरनित्यत्वमन्तरेण अपर्यवसानं अनित्यत्वमनालम्ब्यानुपपत्तिर्वा, अनित्यत्वालम्बनत्वनियमो वा। नाद्यः। अनित्यत्वमनालम्ब्य प्रतीतेरनुपपत्तिर्नाम किमनित्यत्वानालम्बनायाः प्रतीतेः प्रागभावः, किंवा अनित्यत्वानालम्बनः प्रतीतेः प्रागभावः। नाद्यः। अनित्यत्वानालम्बनत्वे तस्या विवक्षितानित्यत्वगोचरत्वव्याघातात्। नापि द्वितीयः। अनित्यत्वानालम्बनस्य एतत्प्रतीतिप्रागभावस्य एतत्प्रतीत्यनित्यत्वगोचरत्वाक्षेपकत्वे मानाभावात्। नापि द्वितीयः। पक्षनिष्ठव्यापक[1]प्रतीतेरनित्यत्वालम्बनत्वनियमस्य असिद्धेः।

(भुवन०)—परः स्वाभिप्रायं प्रादुष्करीकरीति—अथ पक्षेति। पक्षे शब्दादौ निष्ठं यद्व्यापकं महाविद्यासाध्यं तत्प्रतीतेर्यदपर्यवसानमनुपपत्तिः, तस्मादिति परमार्थः। दूषयति—तन्नेति। स्वस्वेतरेत्यादिरूपं यत्पक्षनिष्ठं व्यापकं महाविद्यासाध्यं तत्प्रतीतेरनित्यत्वं विनाऽपर्यवसानं किमिदमित्यन्वयः। विकल्पयति—अनित्यत्वमिति। अनित्यत्वालम्बनात् विना महाविद्यासाध्यस्य शब्देऽनुपपत्तिरित्येको विकल्पः। अनित्यत्वेति। शब्दे प्रकृतसाध्यसाधनेऽनित्यत्वमालम्बनीयमेव नियमेनेति द्वितीयः। आद्यं विकल्पं द्विधा विकल्प्य खण्डयति—नाद्यः इति। अनित्यत्वमनालम्ब्य प्रतीतेरनुपपत्तिः किंरूपा, अनित्यत्वानालम्बना या प्रतीतिः तस्याः प्रागभावः। अनित्यत्वानालम्बना प्रतीतिर्नोत्पद्यत इत्यभिप्रायः। किं वेति। अनित्यत्वालम्बनं विना प्रतीतिर्नोपपद्यत इति रहस्यम्। आद्यं प्रति प्राह—नाद्यः इति। तस्याः प्रतीतेर्यदि अनित्यत्वस्यानालम्बनत्वं, तदा विवक्षितं पक्षीकृतशब्दनिष्ठं यदनित्यत्वं तद्गोचरत्वव्याघातः इति हृदयम्। अपरं पक्षं निराकुरुते—नापीति। अनित्यत्वानालम्बनं पक्षीकृतशब्दे महाविद्यासाध्यप्रतीतेः प्रागभावः पक्षे प्रकृतसाध्यप्रतीतेरनित्यत्वगोचरत्वं आक्षिपतीत्यत्र मानं नास्तीत्याकूतम्। पूर्वकल्पयोरौदीच्यं कल्पं निरसितुमाह—नापि द्वितीय इति। द्वितीयोऽनित्यत्वालम्बनत्वनियमरूपः। इह हेतुं वदति—पक्षनिष्ठेति। पक्षः शब्दघटादिः, तन्निष्ठं व्यापकं महाविद्यासाध्यं, तत्प्रतीतिः शब्दस्यानित्यत्वमालम्बत एवेति नियमस्यासिद्धेरिति।

अथ मतं, अस्ति तावद्धूमवत्त्वादग्निमान् पर्वत इत्यनुमानानन्तरं पर्वतनिष्ठवह्निविशेषे पाकार्थिनां प्रवृत्तिः तत्प्राप्तिश्च। तेन अवश्यं पर्वतो वह्निमानित्यत्र वह्निविशेषस्फूर्तिरङ्गीकर्तव्या। न च वह्निमत्त्वमेवासौ, नापि तस्य व्यापकः। वह्निमत्त्वघनोऽपि महानसादेर्व्यावृत्तत्वात्। न च अव्यापक-

1 'व्यापकत्वप्रती' इति ग पुस्तकपाठः। 2 'विवक्षित' पक्षीकृतशब्दस्तदनित्यत्वगो' इति छ द पुस्तकपाठः।

मपि पक्षधर्मताबलात्साध्यपक्षसंसर्गातिरिक्तं सिध्यतीति त्वयैवोक्तम् । तत्कथं पर्वतनिष्ठवन्हिविशेषसिद्धिः ।

(भुवन०)—अथ धूमानुमानेऽप्यर्थान्तरताप्रयत्नेन प्रतिबन्दीमुपादत्ते परः—अथ मतमिति । इत आरभ्य 'तदयुक्तमि'ति यावत्पराशङ्का । अस्ति तावदिति । वह्निविशेषः तार्णपार्णादिकः पाकादियोग्योऽग्निरित्यर्थः । तत्प्राप्तिरिति । तत्प्राप्तिः पर्वतनिष्ठवह्निविशेषप्राप्तिः । न च वह्निमत्त्वमिति । वह्निमत्त्वे वा असौ वह्निविशेषो न स्यात् । वह्निविशेषस्य वह्निमत्त्वजातेर्भिन्नत्वात् । नापीति । नापि तस्य वन्हिमत्त्वस्य असौ वन्हिविशेषो व्यापकः । वन्हिविशेषस्य वह्निमत्त्ववत्यपि महानसादौ अवर्तनात् । न चाव्यापकमिति । वह्निविशेषादिकं धूमवत्त्वादिहेत्वव्यापकमपि साधनस्य पक्षधर्मताबलात् साध्यं वह्निमत्त्वं, पक्षः पर्वतः, तत्संयोगादधिकं सिध्यतीति पूर्वं त्वयैव महाविद्याविडम्बनाभिमानिनैवोक्तम् । तत्कथमिति । तत्रात्पर्वते सामान्येन वह्निमत्त्वे सिद्धेऽपि वह्निविशेषसिद्धिः कथमिति भावः ।

अथ धूमवत्त्वस्य वन्हिमत्त्वं व्यापकम् , वन्हिमत्त्वं च वन्हिविशेषघटितमूर्त्ति, तेन पर्वते वन्हिमत्त्वमधिगम्यमानं वन्हिविशेषावच्छिन्नमेवाधिगम्यते इति । एवं तर्हि पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वमपि व्यापकं पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठविशेषघटितमूर्त्तीति सोऽपि पक्षे सिध्यत्येव ।

(भुवन०)—शङ्कते—अथ धूमेति । धूमवत्त्वव्याप्यस्य वह्निमत्त्वं व्यापकम् । वह्निमत्त्वं चेति । "निर्विशेषं हि सामान्यं भवेत् शशविषाणवत् । सामान्यरहितत्वेन विशेषास्तद्वदेव ही"ति वचनाद्वह्निमत्त्वं सामान्यं वह्निविशेषेण घटितमूर्तीत्यभिप्रायः । फलितमाह—तेनेत्यादि । यदैव वह्निमत्त्वं ज्ञायते, तदैव वह्निविशेषोऽप्यवगम्यते इत्याशयः । मार्गमागतोऽसीत्याह—एवं तर्हीति । सोऽपि पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठविशेषः पक्षीकृतशब्दानित्यत्वे सति शब्दत्वादिरित्यर्थः[1] ।

अथ पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठविशेषसिद्धावपि पक्षमात्रनिष्ठत्वे सति अनित्यनिष्ठः कथं पक्षे सिध्यतीत्युच्येत, तर्हि धूमानुमाने वन्हिविशेषसिद्धावपि कथं पर्वतनिष्ठवन्हिविशेषसिद्धिरिति वक्तव्यम् ।

(भुवन०)—आशङ्कते—अथ पक्षीकृतेति । पक्षीकृतेत्यादिविशेषस्य घटादौ सत्त्वे सिद्धावपि, पक्षः शब्दः, तन्मात्रनिष्ठत्वे सति योऽनित्यनिष्ठः शब्दानित्यत्वे सति शब्दत्वादिः, स कथं पक्षे शब्दे सिध्यतीत्यर्थः । तुल्यधर्मतया परिहरति—तर्हीति ।

अथ वह्निविशेषो द्विविधः—अपर्वतनिष्ठः, पर्वतनिष्ठश्च । आद्यः पक्षे व्याघातादिना निरुद्धः । तेन द्वितीयस्य सिद्धिरिति । एवं तर्हि पक्षीकृतश-

१ 'शब्दादिरि' इति छ पुस्तकपाठः ।

ब्दतदितरवृत्तित्वरहितानित्यनिष्ठोऽपि द्वेधा, पक्षीकृतशब्दानिष्ठः तन्निष्ठश्च। आद्यः पक्षे व्याहत इति द्वितीयस्य सिद्धिरिति ।

(भुवन०)—दहनानुमाने पर्वतनिष्ठवह्निविशेषसिद्धिं शङ्कते—अथ वह्नीति । पक्षे पर्वते इत्यर्थः । व्याघातादिनेति । विरुद्धसमुच्चयो व्याघातः । आदिपदेन प्रमाणविरोधसंग्रहः । इदानीं समः समाधिरित्याह—एवं तर्हीत्यादि । तन्निष्ठः पक्षीकृतशब्दनिष्ठः । पक्षे विवक्षितशब्दे इत्यर्थः।

अथ पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वं किं पक्षानिष्ठानित्यनिष्ठघटितमूर्त्ति किंवा पक्षमात्रनिष्ठानित्यनिष्ठघटितमूर्ति, किंवा उभयविशेषघटितमूर्त्ति। आद्ये पक्षानिष्ठस्यापि पक्षे प्रसङ्गः, द्वितीये पक्षमात्रवृत्तेरपि सपक्षे प्रसङ्गः, तृतीये तु उभयोरपि उभयत्र प्रसङ्ग इत्युच्येत, तर्हि वन्हिमत्त्वमपि किमपर्वतनिष्ठवन्हिविशेषघटितमूर्त्ति, किंवा पर्वतनिष्ठवन्हिविशेषघटितमूर्त्ति, किंवा उभयविशेषघटितमूर्त्तीति विकल्प्य पूर्ववद्दोषो वक्तव्य इति ।

(भुवन०)—महाविद्यासाध्यं स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठविशेषघटितमूर्तीति पूर्वोक्तं विकल्पैः शाशङ्कि—अथ पक्षीकृतेति । पक्षे शब्दादौ अनिष्ठः, अनित्ये घटादौ च निष्ठो घटत्वादिर्यो धर्मः तेन घटिता विहिता मूर्तिः यस्य तत्तथा । किं वा पक्षमात्रेति । शब्दमात्रे निष्ठोऽनित्यनिष्ठश्च शब्दानित्यत्वे शब्दत्वादिर्धर्मः, तेन घटितमूर्ति । किंवोभयेति । अनन्तरोक्तविकल्पद्वयस्य पक्षेतरवृत्तिपक्षमात्रवृत्तिरूपौ उभयविशेषाविति हृदयाभिप्रायः । तृतीयं भेदं वेभिदीति—तृतीये इति । पक्षानिष्ठपक्षमात्रनिष्ठयोरुभयोरप्युभयत्र पक्षे सपक्षे च प्रसङ्गः । "एकस्मिन् ये प्रसज्यन्ते द्वयोर्भावे कथं न ते" इति न्यायात् । अथात्रापि महाविद्यावादी परप्रयुक्तयुक्तिसाम्यमादिशति—तर्हीति । एतत्स्पष्टम् ।

अथ वन्हिमत्त्वव्याप्यपर्वतनिष्ठधूमवत्त्वानुभवः एव तदनन्तरभाविनीं वन्हिमत्त्ववन्हिविशेषावच्छिन्नपर्वतानुमितिं जनयिष्यति, किमपर्यवसानादिना इत्युच्यते, एवं तर्हि पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्व- [illegible] एव पक्षीकृतशब्दतदितरवृत्तित्वरहि- [illegible] सति अनित्यनिष्ठविशेषावच्छिन्नपक्षी- [illegible] जनयिष्यतीति संतोष्टव्यम् ।

(भुवन०)—अथ वह्नीति । वह्निमत्त्वसाध्येन व्याप्यं यत्पर्वतनिष्ठं धूमवत्त्वसाधनं तस्या- एव, तस्मात्पर्वतनिष्ठधूमवत्त्वानुभवादनन्तरभाविनीं वन्हिमत्त्ववन्हिविशेषाभ्यामवच्छिन्नो

१ °त्वं किमपक्षनि° इति घ पुस्तकपाठः । २ °येऽपक्षनि° इति घ पुस्तकपाठः ।

विशिष्टो यः पर्वतः तदनुमितिं जनयिष्यति, किमपर्यवसानादिना अनुपपत्त्यादिनेत्यर्थः । प्रतिबन्द्यैव प्रत्युत्तरयति—एवमित्यादि । पक्षीकृतेत्यादिमहाविद्यासाध्येन व्याप्यं यत्पक्षीकृतनिष्ठं मेयत्वं साधनं तदनुभवः एव । पक्षीकृतेत्यादिसाध्यं च पक्षमात्रनिष्ठत्वे सति, अनित्यनिष्ठविशेषश्च शब्दानित्यत्वे सति शब्दत्वादिरूपः । ताभ्यामवच्छिन्नस्य विशिष्टस्य पक्षीकृतशब्दस्य अनुमितिमिति पदान्वयः ।

एवं सकलमहाविद्यासु धूमानुमानेसमानन्यायेन विशेषसिद्धिरुपपादनीयेति । तदयुक्तम् । पर्वतो वह्निमान् धूमवत्त्वादित्यत्रापि धूमवत्त्वव्यापकवह्निमत्त्वावच्छिन्नपर्वतातिरिक्तवह्निविशेषाप्रतीतेः । कथं तर्हि अविसंवादिविशेषविषयप्रवृत्तिसाक्षिका वह्निविशेषप्रतीतिरिति चेत् । अयं पर्वतः एतद्वह्निमान् एतद्धूमवत्त्वात्, न यदेवं न तदेवं, यथा ह्रद इत्यनुमानादित्यवेहि । न च अनयोर्वह्निधूमविशेषयोः पूर्वमप्रतीतेर्व्याप्तिग्रहणासंभवः इति वाच्यम् । महानसादौ धूमवत्त्ववह्निमत्त्वव्याप्तिग्रहणसमये सकलधूमवह्निविशेषतन्निष्ठव्याप्तिप्रतीत्यङ्गीकारात् । न च एतस्य वह्निविशेषस्य पूर्वमेव प्रतीतत्वे अनुमानवैयर्थ्यम् । अस्य वह्निविशेषस्य पूर्वं प्रतीतत्वेऽपि एतत्पर्वतनिष्ठतया पूर्वमप्रतीतेः ।

(भुवन०) उपसंहरति—एवमिति । विशेषसिद्धिरनित्यत्वादिसिद्धिरित्यर्थः । एवं महाविद्यावादिनोऽभिप्रायमाशङ्क्य प्रत्याचष्टे—तदयुक्तमिति । कुतोऽयुक्तमित्यत आह—पर्वत इति । धूमवत्त्वहेतोर्व्यापकं वह्निमत्त्वं, तेन अवच्छिन्नपर्वतादतिरिक्तस्य वह्निविशेषस्य अप्रतीतेरिति संबन्धः । पाकार्थिनां विशेषप्रतीतिरनुभूयते, तत्र का गतिरिति आशङ्कते—कथमिति । अविसंवादी यो विशेषः पाकादियोग्याग्नित्वरूपः, तद्विषया या प्रवृत्तिः, तत्साक्षिका वह्निविशेषप्रतीतिः कथमिति योजना । अयमर्थः । यया अविसंवादिविशेषविषया प्रवृत्तिर्जन्यते सा वह्निविशेषप्रतीतिः कथमिति । गतिमाह—अयं पर्वतः इति । एतद्वह्निर्विवक्षितः पाकादियोग्योऽग्निरित्यर्थः । आशङ्कामुच्छिनत्ति—नच अनयोरिति । अनयोर्विवक्षितयोर्धूमवह्निविशेषयोः पूर्वं महानसादौ अप्रतिपन्नत्वाद्व्याप्तिग्रहणं न संभवतीति न च आपादनीयमिति भावः । कस्मात् वाच्यमित्यत आह—महानसादाविति । महानसादौ सामान्येन धूमवत्त्ववह्निमत्त्वयोर्व्याप्तिग्रहणसमये सकलधूमवह्निविशेषयोः निष्ठा सकलधूमवह्निविशेषनिष्ठा या व्याप्तिः, तस्याः प्रतीतेरङ्गीकारादिति पदान्वयः । वह्निविशेषस्यैतस्य पूर्वं प्रतीतेः, तदा सिद्धसाधनत्वेन अनुमानवैयर्थ्यमित्याशङ्क्य इत्याह—न च एतस्येति । पूर्वं महानसादावित्यर्थः । हेतुमाचष्टे—अस्येति ।

अस्तु वा वह्निमत्त्वावच्छेदकतया पर्वते वह्निविशेषवत्पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वावच्छेदकतया पक्षीकृतशब्दे पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठविशेषसिद्धिः । पक्षीकृतशब्दमात्रनिष्ठा-

१ 'महानसादौ' इति ख पुस्तकपाठः ।

(भुवन०)—भङ्गान्तरं भणितुं प्रस्तावयति—किञ्च व्याघातेति । यदि शब्दा- नाभ्युपेयते, तर्हि पक्षे पक्षेतरत्वधर्मसिद्ध्या व्याघातः स्यादिति व्याघातबलादियं महाविद्यानुमितिः पक्षीकृतशब्दस्यानित्यत्वे विश्राम्यतीति भावः । ननु व्याघातः कः, अत्राह—व्याघात इति । द्वयोर्विरोधप्रतीतिर्व्याघातः इत्यर्थः । सा चेति । सा च विरोधप्रतीतिर्विरुद्धयोर्द्वयस्य या प्रमितिः तज्जन्येत्यक्षरयोजना । प्रकृते चेति । प्रकृते महाविद्यानुमानेऽनित्यत्वस्याभावो नित्यत्वं, पक्षीकृतश- ब्दमात्रवृत्तिरनित्यनिष्ठः पक्षीकृतशब्दानित्यत्वे शब्दत्वादिः, तौ द्वावपि विरोधिनौ । पूर्वकालीनो व्या- घातः शब्दानित्यत्वसिद्ध्युपयोगी किंवा उत्तरकालीनः इति गूढाभिप्रायेण द्वैधं विकल्प्य प्राचीनं प्रति आह—न चेत्यादि । पक्षीकृतशब्दमात्रवृत्त्यनित्यनिष्ठो धर्मः शब्दानित्यत्वे सति शब्दत्वादिः प्रकृतानुमितेर्महाविद्यानुमानात्पूर्वं न च प्रमाणेन गृहीतः । तद्धर्मस्य पूर्वं प्रतीतौ महाविद्यानुमान- वैयर्थ्यात् । एतावतानुमितेः पुरा विरुद्धप्रमितेरभावात्पूर्वकालीनव्याघातासम्भवेन पौरस्त्यः पक्षो- ऽपास्तो भवति । उदीचीनं कल्पमपास्यते—अनुमितीति । अनुमानकरणादुत्तरकाले विरुद्धप्रतीति- श्चेद्व्याघातः, तदा स निरर्थकः एवेत्यर्थः । हेतुना पूर्वोक्तं द्रढयति—व्याघातेति । अनित्यत्वं विनापि व्याघाताभावेन हेतुना अनुमितेः पूर्वमेव पर्यवसितत्वादिति पदान्वयः । तात्पर्यार्थस्त्वयम्— व्याघातबलात् हि अनित्यत्वमिति भवानवादीत् । अत्र चानुमानावसरे व्याघाताभावेन शब्दस्या- नित्यत्वं विनाप्यनुमितिः पर्याप्तेत्युत्तरकालजातो व्याघातो व्यर्थः एवेति ।

किञ्च, किं व्याघाते एकपरिहारेण द्वितीयस्योपलम्भो बीजं, किंवा उभ- योः परस्परपरिहारेणोपलम्भः, किंवा उभयोर्नियमेन परस्परपरिहारेणोपल- म्भः । आद्ये घटत्वमेयत्वादेर्व्याघातापत्तिः । द्वितीये घटत्वशुक्लत्वादेर्व्याघा- तापत्तिः वक्ष्यमाणदोषश्च । तृतीयस्तु प्रकृते न संभवत्येव । अनित्यत्वाभावस्य पक्षीकृतशब्दमात्रवृत्त्यनित्यनिष्ठधर्ममन्तरेणोपलम्भेऽपि अनित्यत्वाभावम- न्तरेण पक्षीकृतशब्दमात्रनिष्ठानित्यनिष्ठधर्मस्यानुपलम्भात् । उभयोः पर- स्परपरिहारेणोपलम्भेऽपि परस्परपरिहारनियमस्य निष्प्रमाणत्वाच्चेति ।

(भुवन०)—अथ व्याघातमेव त्रिः पक्षयित्वा प्रतिक्षिपति—किञ्च किमित्यादि । एक- मन्तरेणापि द्वितीयस्योपलम्भो व्याघाते बीजं कारणमिति परमार्थः । प्राचिकं पक्षं परास्यते— आद्ये इति । यद्यपि घटत्वे मेयत्वमस्ति, तथापि मेयत्वे घटत्वाभावाद्घटत्वपरिहारेण मेयत्वस्य पटा- दावुपलम्भोऽस्ति । ततः एकपरिहारेण द्वितीयोपलब्धौ चेद्व्याघातः, तदात्रापि व्याघातः प्रसज्येत । नास्ति व्याघातो, घटत्वे मेयत्वसद्भावादित्यादिमः पक्षो न क्षोदक्षमः । पुरःसरपक्षं क्षिपति— द्वितीये इति । रक्ते घटे घटत्वं शुक्लत्वं विनाप्युपलब्धम्, पटादौ च शुक्लत्वं घटत्वमन्तरेणाप्युपलब्धमिति परस्परपरिहारोपलम्भादेकस्मिन् शुक्ले घटे घटत्वशुक्लत्वसंसर्गस्य व्याघाताभावेऽपिव्याघातः आप- द्येतेत्यर्थः । वक्ष्यमाणेति । परस्परपरिहारोपलम्भस्य व्याघातबीजत्वे निष्प्रमाणकत्वं नाम तृतीय- पक्षस्य वक्ष्यमाणदोषश्च स्यादित्यत्र घटना । तार्त्तीयीकमसम्भवेन निराकरोति—तृतीयः इति ।

१ 'पक्षमात्रवृत्त्यनित्यनिष्ठो' इति च पुस्तकपाठः । २ 'संसर्गव्याघात' इति छ द पुस्तकपाठः

त्वसम्भवमनुपपादयति—अनित्यत्वाभावेति । अनित्यत्वाभावो नित्यत्वं, तस्य गगनादौ पक्षमात्रवृत्त्य-नित्यनिष्ठधर्ममन्तरेणोपलम्भेऽपि, अनित्यत्वाभावो नित्यत्वं, तं विना पक्षमात्रवृत्त्यनित्यनिष्ठधर्मस्या-नुपलम्भात् । अयं मथितार्थः—यद्यपि पक्षमात्रवृत्त्यनित्यनिष्ठधर्मं विनापि नित्यत्वं गगनादावुपल-भ्यते, तथापि नित्यत्वं विना पक्षमात्रवृत्त्यनित्यनिष्ठो धर्मः पक्षीकृतशब्दानित्यत्वे शब्दत्वादिर्नोपल-भ्यते एव । ननु नित्यत्वं विनाप्येवंविधधर्मोपलब्धिः पक्षीकृतशब्देऽस्त्येव । न । पक्षीकृतशब्दे ह्ययं धर्मोऽद्यापि व्याघातबलात्साध्यमानोऽस्ति । व्याघातश्चात्र विकल्प्य खण्ड्यमानोऽस्ति । व्याघातसिद्धौ च तत्सिद्धिर्भविष्यतीति तद्धर्मस्य पक्षे विवादास्पदीभूतत्वात्कुत्रापि नोपलब्धिः संभवति । तस्मादत्र परस्परपरिहारोपलम्भनियमाभावेन तृतीयभेदो न संभवत्येवेति । उभयोः परस्परपरिहारोपलम्भेऽपि तन्नियमस्याप्रामाणिकत्वं सङ्क्षिपते—उभयोरिति । दण्डित्वकुण्डलित्वयोः परस्परपरिहारोपलम्भेऽपि देवदत्तादौ द्वयोरपि सहोपलम्भादेतन्नियमस्य निष्प्रमाणकत्वमिति भावना ।

अथ व्याघातो मा भूत्, प्रतीतापर्यवसानं तु भविष्यतीति । प्रतीतं हि पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वमस्मादेवानुमानात् । तच्च पक्षीकृतशब्दानित्यत्वमन्तरेणापर्यवस्यत् तद्गमयतीति । तन्न । किमिदमनित्य-त्वमन्तरेणापर्यवसानं प्रकृतसाध्यस्य, किमनित्यत्वव्याप्यत्वं, अनित्यत्वेन विना अनुपपद्यमानत्वं वा । नाद्यः । गगनादौ व्याप्तिभङ्गात् । नापि द्वितीयः । तेन विनापि भवतः तेन-विनानुपपद्यमानत्वासिद्धेः । पक्षीकृतशब्दतदितरवृत्ति-त्वरहितानित्यनिष्ठाधिकरणत्वपक्षीकृतसंसर्गोऽनित्यत्वव्याप्यः, अनित्यत्वेन विनानुपपद्यमानो वा इति चेत् । न । तस्यापि उभयसंसर्गिनिष्ठतया पक्षी-कृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वे नित्येऽपि वर्तमानत्वेन अनित्यत्वाव्याप्यत्वात्, तेन विनाप्युपपद्यमानत्वाच्चेति । पक्षीकृतशब्दतदितर-वृत्तित्वरहितानित्यनिष्ठाधिकरणत्वे सति पक्षीकृतशब्दत्वमनित्यत्वव्याप्यं, अनित्यत्वेन विनानुपपद्यमानं वेति चेत् । न । तस्य असाधारणत्वेन व्याप्य-त्वानुपपद्यमानत्वविरहात् । अन्यथा तस्य नित्यत्वव्याप्यत्वानित्यत्वेन-विनानु-पपद्यमानत्वयोरप्यापत्तेः, पक्षीकृतशब्दव्यतिरिक्तविशेषणवैयर्थ्याच्चेति । सेय-मर्थान्तरता सकलमहाविद्यासु संचारणीया । ये तु महाविद्याविशेषनिष्ठाः भङ्गिविशेषेण अर्थान्तरताविशेषाः, तेऽन्यत्र प्रपुञ्चयिष्यन्ते इति ।

(मूलम्८)—[illegible] कारयते—अथ व्याघातः इति । प्रतीतापर्यवसानमिति किम् । प्रतीतापर्यवसानमेव व्यक्तीकुरुते—प्रतीतं हीत्यादि । तच्च पक्षीकृतशब्दतदितरवृत्तित्वर-हितानित्यनिष्ठाधिकरणत्वं [illegible] । तद्गमयतीति । [illegible] । विकल्पमुखेन दूषयते—तन्न । किमिदमिति । [illegible] किमिदमिति [illegible] । द्वितीयं विकल्पयते—[illegible] । [illegible] ।

११ [illegible]

किमनित्यत्वेन व्याप्यत्वं । यत्र यत्र महाविद्यासाध्यं तत्र तत्रानित्यत्वमिति भावः । अनित्यत्वेनेति । अनित्यत्वं विना महाविद्यासाध्यं नोपपद्यते एवेत्यर्थः । प्राक्तनं प्रति जल्पति—नाप इति । गगनादौ महाविद्यासाध्यसत्त्वेऽप्यनित्यत्वस्य अभावाद्व्याप्तिभङ्गः इति हृदयम् । द्वितीयमपवदति—नापीति । युक्तिं खेटयति—तेन विनेति । तेन अनित्यत्वेन विनापि गगनादौ भवतो वर्तमानस्य महाविद्यासाध्यस्य तेन अनित्यत्वेन विना यदनुपपद्यमानत्वं तस्यासिद्धेः । अयमाशयः—अनित्यत्वेन विनापि गगनादौ महाविद्यासाध्यसद्भावान्महाविद्यासाध्यस्य अनित्यत्वेन विना अनुपपद्यमानत्वमसिद्धमिति । अथ परः आरेकते—पक्षीकृतेति । पक्षीकृतेत्यादिसाध्यस्य पक्षीकृतशब्देन सह संसर्गोऽनित्यत्वेन व्याप्यः, अनित्यत्वेन विनानुपपद्यमानो वेति परारेकार्थः । पूर्वपक्षिणोक्ते सिद्धान्ती आह—न । तस्यापीति । तस्यापि पक्षीकृतेत्यादिमहाविद्यासाध्यपक्षीकृतशब्दसंसर्गस्यापि उभयसंसर्गिणौ महाविद्यासाध्यपक्षरूपौ तत्र निष्ठतया, पक्षीकृतेत्यादिसाध्ये नित्ये शाश्वतेऽपि वर्तमानत्वेन अनित्यत्वेनाव्याप्यत्वात्, तेनानित्यत्वेन विनाप्युपपद्यमानत्वाच्चेति पदाक्षरयोजना । अयं तत्त्वार्थः । संसर्गस्य द्विष्ठत्वान्नित्येऽपि महाविद्यासाध्ये वर्तनादनित्यत्वस्य च तत्रावर्तनाद्यत्र प्रकृतसंसर्गः तत्रानित्यत्वमिति व्याप्तिभङ्गात्प्रकृतसंसर्गस्यानित्यत्वेन व्याप्यत्वं न घटाकोटिमाटीकते । तथा अनित्यत्वं विनापि प्रकृतसंसर्गस्य अनित्ये महाविद्यासाध्ये वर्तनादनित्यत्वेन विना अनुपपद्यमानत्वमपि न जाघट्यादिति ।

पूर्वपक्षी आक्षिपति—पक्षीकृतेति । पक्षीकृतेत्यादिमहाविद्यासाध्यवत्त्वे सति यत्पक्षीकृतशब्दत्वं तत् अनित्यत्वेन व्याप्यं, अनित्यत्वेन विना अनुपपद्यमानं वेत्यर्थः । अत्र हि शब्दस्यानित्यत्वं साध्यं, साध्येन च यो व्याप्यते स हेतुरिति पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वे सति पक्षीकृतशब्दत्वस्य अनित्यत्वरूपसाध्यासाधकत्वादवास्तवमपि अनित्यत्वसाध्यव्यापकत्वाद्धेतुत्वं मनसि निधाय पराचष्टे—न । तस्येति । तस्य पक्षीकृतेत्यादिसाध्यवत्त्वे सति पक्षीकृतशब्दत्वस्य, असाधारणानैकान्तिकत्वेन व्याप्यत्वानुपपद्यमानत्वयोर्विरहादित्यक्षरार्थः । भावार्थस्त्वयम्—सति सपक्षे सपक्षाप्रवेशी असाधारणानैकान्तिकोऽनध्यवसितो वा अनैकान्तिकभेदो वा । तत्र अस्य हेतोः सपक्षे घटादौ सत्यपि सपक्षाप्रवेशित्वेन असाधारणानैकान्तिकत्वात् यत्र पक्षीकृतेत्यादिसाध्यवत्त्वे सति पक्षीकृतशब्दत्वं तत्रानित्यत्वमिति व्याप्तेः क्वापि सपक्षे प्रसिद्धत्वाभावेन अनित्यत्वव्याप्यत्वाद्यनुपपत्तिरिति । विपक्षे बाधकमादिशति—अन्यथेति । अन्यथा असाधारणत्वेऽप्यनित्यत्वव्याप्यत्वाद्यभ्युपगमे तस्य पक्षीकृतेत्यादिसाध्यवत्त्वे सति पक्षीकृतशब्दत्वस्य नित्यत्वव्याप्यत्वाद्यपि आपद्येत, युक्तेरुभयत्रापि साम्यादिति । न केवलमस्य हेतोरसाधारण्यं, व्यर्थविशेषणत्वमपीत्याह—पक्षीकृतशब्दव्यतिरिक्तेति । पक्षीकृतशब्दात् व्यतिरिक्तं विशेषणं सद्वैयर्थ्यात् । चकारो दोषान्तरसूचकः । एतावता पक्षीकृतशब्दत्वमेव हेतुरस्तु, व्यर्थमन्यद्विशेषणमिति भावः । उक्तानित्यत्वानिर्दिशति—सैषामित्यादि । ननु भवद्भिः सामान्येन महाविद्यानिष्ठार्थान्तरता प्रदर्शिता, न प्रत्येकं महाविद्याविशेषनिष्ठेत्याशङ्क्याह—ये तु महाविद्येति । अन्यत्र ग्रन्थान्तरे इत्यर्थः ।

---

१ 'साध्यव्यापकत्वा' इति च पुस्तकपाठः ।

अथ अयं शब्दो नित्योऽनित्यो वेति विप्रतिपत्तौ यदा अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादित्यादिमहाविद्या प्रयुज्यते, तदा अस्तु नाम अर्थान्तरता। यदा पुनरयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं न वा इत्येव विवादः, तदा कथमर्थान्तरतेति चेत्। मा भवतु तदा अर्थान्तरता, प्राचीनदोषास्तु भविष्यन्त्येव।

(भुवन०)—अथ परोक्ता—अथायं शब्द इति। शब्दस्य नित्यत्वानित्यत्वविषये विवादे सति यदा महाविद्यिकोऽयं शब्दः स्वस्वेतरेत्यादिकमनुमिनोति, तदा महाविद्यासाध्यं शब्दे सिध्यतु, अनित्यत्वं तु कुतस्त्यमित्येवंरूपार्थान्तरता भवतु। यदा पुनरिति। यदा त्वयं शब्दः स्वस्वेतरेत्यादिमहाविद्यासाध्यवान्न वेति विवादः, तदा कौतस्कुतीयमर्थान्तरता, अन्यस्यार्थस्यैवाभावादित्यक्षरार्थयोजना। प्रत्युत्तरं प्राह—मा भवत्विति। प्राचीनदोषाः उपाध्यनैकान्त्यादयः।

किञ्च, अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं न वेत्यादिविवाद एव दुर्घटः। केवलान्वयित्वाभिमतधर्माभावस्याप्रसिद्धत्वेन न वेति पक्षानुत्थानात्।

(भुवन०)—उक्तविवादमूरीकृत्य मा भवतु तदार्थान्तरतेत्यभिहितं, साम्प्रतमुक्तविवाद एव न सम्भवेदित्याह—किं चेत्यादि। किंच दूषणान्तरोक्तौ। हेतुमाह—केवलान्वयीति। केवलान्वयित्वेन सर्ववस्तुनिष्ठत्वेनाभिमतो यो धर्मः, तदभावस्याप्रसिद्धत्वेन न वेति पक्षः एव नोत्तिष्ठति। अयमभिप्रायः—महाविद्यासाध्यधर्मस्य त्वन्मते केवलान्वयित्वेन सर्वत्र सत्त्वान्न वेति पक्षः एव नोदियादिति।

अथ पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वादिः केवलान्वयित्वाभिमतः पक्षनिष्ठो न वेति विवादमुद्भाव्य, अयं शब्दः स्वस्वेतरवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति प्रयोगमारचयसि, तदा दुर्वारैवार्थान्तरता। न हि पक्षीकृतशब्दतदितरवृत्तित्वरहितानित्यनिष्ठाधिकरणत्वमेव पक्षीकृतशब्दनिष्ठत्वम्। नापि तस्य व्यापकम्। तस्य त्वन्मते केवलान्वयित्वात्, पक्षीकृतशब्दनिष्ठत्वस्य च गगनादिव्यावृत्तत्वात्। अन्यथा तदभावाप्रसिद्धौ तत्रापि विवादानुपपत्तेः। नापि प्रकृतसाध्यवत्त्वात्पर्यायः प्रकृतसाध्यपक्षसंसर्गः एव पक्षनिष्ठत्वम्। प्रकृतसाध्यवत्त्वस्य त्वन्मते पक्षनिष्ठत्वात्। पक्षनिष्ठत्वस्य च पक्षनिष्ठत्वविरहात्। न च पक्षस्य प्रकृतसाध्यवत्त्वसिद्धिरपर्यवसानात्प्रकृतसाध्यस्य पक्षनिष्ठत्वं गोचरयतीति युक्तम्। अपर्यवसानस्य प्रागेव प्रतिषिद्धत्वादित्यलमात्मव्याघातेन।[1]

[1] 'व्याघातेन' इति ख पुस्तकपाठः।

(भुवन०)—भङ्ग्यन्तरेण परः आक्षिपते—अथ पक्षीकृतेति। यदि पक्षीकृतेत्यादिसाध्यधर्मः केवलान्वयित्वेनाभिमतः पक्षे शब्दे निष्ठो न वेति विवादं प्रकटीकृत्य, महाविद्यासाध्यस्य पक्षनिष्ठत्वारोपणाय अयं शब्दः इत्याद्यनुमिमीषे। तदेति। तदा महाविद्यासाध्यं भवतु, महाविद्यासाध्यस्य पक्षशब्दनिष्ठत्वं तु कौतस्कुतमितिरूपा अर्थान्तरता दुर्वारैवेत्यर्थः। अर्थान्तरतोपपादनाय युक्तीः प्रयुङ्क्ते—न हि पक्षीकृतेति। न हि पक्षीकृतेत्यादिमहाविद्यासाध्यमेवपक्षीकृतशब्दनिष्ठत्वं, किन्तु महाविद्यासाध्यस्य पक्षीकृतशब्दनिष्ठत्वं धर्मः। धर्मधर्मिणोश्च वैशेषिकादिदर्शने भेदान्न तदेव तदित्यर्थः। नापि तस्येति। पक्षीकृतशब्दनिष्ठत्वं तस्य पक्षीकृतशब्दतदितरेत्यादिसाध्यस्य नातिव्यापकम्। कुतो न व्यापकमत्राह—तस्येति। तस्य पक्षीकृतेत्यादिप्रकृतसाध्यस्येत्यर्थः। पक्षीकृतशब्दनिष्ठत्वस्येति। पक्षीकृतशब्दनिष्टत्वं हि पक्षितशब्दनिष्टे एव अस्ति, न तु गगनादाविति। यत्र पक्षीकृतेत्यादि साध्यं तत्र पक्षीकृतशब्दनिष्ठत्वमिति व्याप्तेरभावात् पक्षीकृतशब्दनिष्टत्वं पक्षीकृतेत्यादिसाध्यस्य नापि व्यापकमित्यर्थः। पक्षीकृतशब्दनिष्टत्वस्य गगनादावपि वर्तमानत्वोपगमे दोषं भाषते—अन्यथेति। तस्य पक्षीकृतशब्दनिष्टत्वस्य योऽभावः, तदप्रसिद्धौ तत्रापि पक्षीकृतशब्दनिष्ठत्वेऽपि विवादानुपपत्तिः। अयं परमार्थः—यदि पक्षीकृतशब्दनिष्ठत्वं गगनादावपि स्यात्, तर्हि केवलान्वयित्वेन महाविद्यासाध्यवत् तस्य सर्वत्र सद्भावात्, महाविद्यासाध्ये पक्षीकृतशब्दनिष्ठत्वमस्ति न वेति विवाद एव न भवेदिति। युक्त्यन्तरेण अर्थान्तरतामेव समर्थयते—नापि प्रकृतेत्यादि। नापि प्रकृतसाध्यं महाविद्यासाध्यं तद्वत्त्वापरपर्यायः, प्रकृतसाध्यं महाविद्यासाध्यं पक्षः शब्दः, तयोः संसर्गः एव महाविद्यासाध्यस्य पक्षनिष्ठत्वमित्यर्थः। हेतुमाह—प्रकृतेति। प्रकृतसाध्यं महाविद्यासाध्यम्। तद्वत्त्वं हि पक्षे शब्दे निष्ठमस्ति त्वन्मते। एवं च प्रकृतसाध्यवत्त्वस्य पक्षनिष्ठत्वं धर्मो जातः। धर्मधर्मिणोश्च तादात्म्याभावात्प्रकृतसाध्यवत्त्वमेव पक्षनिष्ठत्वमिति न समीचीनमित्यर्थः। ननु प्रकृतसाध्यवत्त्वस्य पक्षनिष्ठत्वरूपस्यैव पक्षनिष्ठत्वं किं न स्यादित्याशङ्क्याह—पक्षनिष्ठत्वस्येति। एतत्तत्वम्—यदि प्रकृतसाध्यवत्त्वमेव पक्षनिष्टत्वरूपं स्यात्, तदा प्रकृतसाध्यवत्त्वस्य पक्षनिष्टत्वरूपस्य पक्षनिष्टत्वं न भवेत्। स्ववृत्तिविरोधात्। तस्मात्प्रकृतसाध्यवत्त्वस्य पक्षनिष्टत्वं धर्मः एव, न तु प्रकृतसाध्यवत्त्वमेव पक्षनिष्टत्वमिति। प्रकृतसाध्यपक्षसंसर्गो यद्यपि न पक्षनिष्ठत्वं, तथाप्यपर्यवसानात्पक्षनिष्टत्वं गमयेदिति महाविद्यासाध्यस्य पक्षनिष्टत्वसिद्धिरित्याशङ्क्य वक्ति—न च पक्षस्येति। पक्षस्य शब्दस्य, प्रकृतसाध्यं महाविद्यासाध्यं, तद्वत्त्वसिद्धिः। अपर्यवसानादिति। पक्षे प्रकृतसाध्यवत्त्वसिद्धिः तर्ह्येव, यर्हि महाविद्यासाध्यस्य पक्षनिष्टत्वं स्यादित्यपर्यवसानबलात्प्रकृतसाध्यस्य महाविद्यासाध्यस्य पक्षनिष्टत्वं गोचरयतीति न च युक्तमित्यन्वयः। कस्मान्न युक्तमत्राह—अपर्यवसानस्येति। अपर्यवसानं नाम किं तेन व्याप्यत्वं, तेन विनानुपपद्यमानत्वं वा इत्यादिपूर्वोक्तयुक्तिभिरपर्यवसानस्य प्रागेव प्रतिषिद्धत्वादित्यर्थः। आराध्यविरोधेनेति। आराध्याः सूत्रकारभाष्यकारादयः पूर्वाचार्याः। तैश्च केवलान्वयित्वानङ्गीकारान्महाविद्यापि नोररीचक्रे इति महाविद्यावादिनां तदभ्युपगमे आराध्यविरोधः प्रकटः एवेत्याकूतम्।

१ ' साध्यस्य पक्ष ' इति च पुस्तकपाठः।

इति दूषणपाषाणजर्जरीकृतमूर्तयः।
महाविद्याः क्षणं स्थातुं न क्षमन्ते रणाङ्गणे ॥ २१ ॥

(भुवन०)—पूर्वप्रतिपादितनिखिलदोषदूषितत्वं महाविद्याया निगमयति—इति दूषणेत्यादि। दूषणान्येव पाषाणाः, तैर्जर्जरीकृता मूर्तयो यासां तास्तथेति विग्रहः। तादृरणाङ्गणे महाविद्याः क्षणमपि स्थातुं न क्षमन्ते, न समर्था भवन्तीत्यर्थः ॥ २१ ॥

अथ किमर्थं स्वाभिमतसकलप्रमेयसाधकमहाविद्यानिराकरणम्। जातीनामिव तासामाभासत्वख्यापनार्थम्। अन्यथा महाविद्याप्रयोक्तॄणां शिष्याणां प्रतिवाद्युदीरितप्राचीनदूषणैः पराजयादिति।

(भुवन०)—अन्वयव्यतिरेक्यनुमानसाध्यस्य स्वाभिमतस्य महाविद्यया अनायासेन साधयितुं शक्यत्वात्तन्निरासः किमर्थमित्याशङ्कते—अथ किमर्थमित्यादि। स्वस्य अभिमतानि यानि सकलप्रमेयाणि नित्यत्वानित्यत्वादीनि तत्साधिका याः महाविद्याः तन्निराकरणं किमर्थमित्यन्वयः। प्रश्नं मत्वा सिद्धान्ती समाधत्ते—जातीनामिवेति। यथा जातीनां दूषणाभासत्वं, तथा महाविद्यानां हेत्वाभासत्वख्यापनार्थं महाविद्यानिराकरणमिति भावः। विपर्यये बाधकमभिधत्ते—अन्यथा महाविद्येति। अन्यथा यदि महाविद्यानामाभासत्वं न ख्याप्यते, तदा सम्यक् साधनत्वाभिप्रायेण्या महाविद्याः प्रयुज्यते। तथा च प्रतिवाद्युद्भावितदुष्परिहारपूर्वोक्तानैकान्तिकत्वादिदूषणैः शिष्याणां पराजयः प्रसज्येत। तस्मादाभासत्वख्यापनाय महाविद्यानिरासः समञ्जसः एवेति हृदयाभिप्रायः। एवं च साधनाभासत्वान्महाविद्या कथायां न प्रयोक्तव्येति शिष्यानुशिष्टिरादिष्टा भवति।

किञ्च—

यत्र यत्र परः प्रौढिप्रकर्षमवलम्बते।
श्लाघ्यस्तत्तन्निरासार्थः प्रज्ञाभ्यासवतां श्रमः ॥ २२ ॥
योगीश्वरगुरोः शब्दविद्यामासाद्य तत्त्वतः।
व्यधत्त भट्टवादीन्द्रो महाविद्याविडम्बनम् ॥ २३ ॥

इति श्रीहरकिङ्करन्यायाचार्यपरमपण्डितवादीन्द्रविरचिते महाविद्याविडम्बने
दूषणविवेको नाम तृतीयः परिच्छेदः ॥ ३ ॥

(भुवन०)—महाविद्याप्रयोक्तारो वयं सर्वत्र विजयिनः इति गर्वपर्वताधिरूढानां दुरभिमानभङ्गार्थमपि महाविद्यानिरासः कार्यः इत्याह—किंच यत्रेत्यादि। किंच प्रकारान्तरोक्तौ। यत्र यत्र परः प्रौढिप्रकर्षं पाण्डित्याभिमानमवलम्बते तत्तन्निरासार्थः प्रज्ञाभ्यासवतां दुरधिगमग्रन्थादिविषयिणी या प्रज्ञा प्रतिभा गूढार्थविचारणादिरूपा तस्याः अभ्यासः पौनःपुन्येन परिशीलनं, तत्र तत्पराणां नराणां श्रमः श्लाघ्यो भवतीति योजना। इह यत्र यत्रेत्यत्र यच्छब्दपरामृष्टं तत्तन्निरासेत्यत्र तच्छब्देन परामृश्यते। एतावता महाविद्यायां परस्य प्रौढिप्रकर्षं मत्वा महाविद्यानिरासाय श्रमः श्लाघ्यः एवेत्यभिहितं भवति। तथा च महाविद्यानिरासेऽपरमपि प्रयोजनं प्रदर्शितमित्यर्थः ॥२२॥

श्रीसोमसुन्दरगुरूत्तमपादपद्म-
संसेविना भुवनसुन्दरसूरिणेयम्।
वृत्तिः कृता स्वपरयोरुपकारहेतोः
सेव्या प्रमाणनिपुणैर्विजयोदयाय ॥ १ ॥
हपपुरनामनगरे देवश्रीपार्श्वनाथशुभदृष्टौ।
व्याख्यानदीपिकेयं समर्थिता भवतु जयलक्ष्म्यै ॥ २ ॥
षट्तर्कीपरितर्ककर्कशमतिश्चारित्रराजो यति-
स्त्रैविद्योत्तमरत्नशेखरमुनिर्वादीन्द्रवृन्दाग्रणीः।
एतौ द्वावपि शुद्धबुद्धिविभवौ टीकामिमां सादरं
संशोध्य प्रथमप्रतौ गुणयुतौ संस्थापयामासतुः ॥ ३ ॥
ग्रन्थोऽयं विषमो मतान्तरगतो गूढार्थसार्थान्वितो
व्याख्या नैव पटुः स्फुटार्थघटने नो संप्रदायस्तथा।
तस्मान्मन्दमतिप्रबोधविधये स्पष्टार्थनिष्टङ्किनी
टीकेयं विहिता चिरं विजयतामन्विष्यमाणा बुधैः ॥ ४ ॥

इति श्रीजिनशासन-गगनाङ्गणनभोमणिषड्दर्शनीरहस्याभिज्ञशिरोमणि-सुविहिताचार्य-चक्रचूडामणि-श्रीतपागच्छशृंगारहारभट्टारक-प्रभुश्रीसोमसुन्दरसूरिशिष्यश्रीभुवनसुन्दरसूरिविरचितायां महाविद्याविडम्बनवृत्तौ व्याख्यानदीपिकायां दूषणविवेकव्याख्यानो नाम तृतीयः परिच्छेदः समाप्तः ॥

ग्रन्थश्च संपूर्णः

१ इत आरभ्य श्लोकचतुष्टयात्मिका ग्रन्थकर्तृप्रशस्तिः छ द पुस्तकयोर्न विद्यते। २ 'तपोगच्छ' इति ख पुस्तकपाठः। ३ इतः परं द पुस्तके निम्नलिखितानि प्रशस्तिपद्यानि विद्यन्ते।

१ परिशिष्टम्

श्रीभुवनसुन्दरसूरिविरचितं

लघुमहाविद्याविडम्बनम् ।

स्याद्वादवादप्रबलप्रणाद-
प्रणष्टदुर्वादिमदद्विपेन्द्रा ।
गीःसिंहका यस्य विभाति देवः
स वर्धमानः श्रियमातनोतु ॥ १ ॥

इह हि केऽपि दुर्वाराहङ्कारप्राग्भारपूरिताः श्रीसर्वज्ञोक्तहेयोपादेयविचारचातुरीदूरिताः सकलस्वाभीष्टवस्तुसाधनाय परपक्षनिषेधाय च स्वकपोलकल्पितान्येवंविधान्यनुमानानि प्रकटयन्ति। तथाहि—आत्मा शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् मेयत्वात् घटवत् । अत्र पराहङ्कारप्राग्भारतिरस्कारायोपक्रम्यते ।

हंहो वादिन्, किमेतदनुमानम् । महाविद्यासत्कमिति चेत् । मैवम् । विद्यात्वमपि सावद्यस्य अस्यानुमानस्य विचार्यमाणं न संजाघटीति, दूरेऽस्तु हेत्वाभासः । केवलान्वयित्वेन व्यतिरेकव्याप्तेरभावात् । तथा साध्यमत्र अनित्यत्वं परमार्थतः । ततो यद्यदनित्यत्वं तत्तदश्रावणं, यथा घटपटादयः इति साध्यव्यापकश्चायमुपाधिः । शब्दस्य चानित्यत्वमद्यापि विवादास्पदीभूतम् । तस्मात्तेन व्यभिचाराभावात्सोपाधिरयं हेतुः ।

अथ अत्रानित्यत्वं साध्यं न भवति, किन्तु शब्देतरानित्यनित्येत्यादिकम् । तस्य चोपाधिना व्याप्तिर्नास्ति । शब्दत्वेन व्यभिचारादिति नायमुपाधिरिति चेत् । मैवम् । अस्य हनूमल्लोललाङ्गूलम्बस्यापि अनित्ये एव विश्रामात् । साध्यं च तदेव यद्विप्रतिपन्नं प्रति पक्षे मेयत्वेन साधयितुमभिप्रेतम् । तत्तु अनित्यत्वमेव ।

अथ च विरुद्धतापिशाचीजठरपिठरीप्रक्षिप्तोऽयं हेत्वाभासः । यतोऽत्र साध्यमनित्यत्वम् । तद्विरुद्धं च नित्यत्वम् । तदपि चानेन साधयितुं शक्यते एव । तथाहि—घटः शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् ।

अपरं च अनैकान्तिकत्वदुर्धरसिन्धुरकरप्रहारविधुरोऽप्ययं हेतुर्मेयत्वादिः । तथा हि—महाविद्यासाध्ये महाविद्यासाध्यं विद्यते नवा । विद्यते चेत्, आत्माश्रयः । नो चेत्तर्हिमहाविद्यासाध्ये मेयत्वहेतोर्वर्तनात् महाविद्यासाध्यस्य चावर्तनात्, तस्यैव विपक्षत्वेन अनैकान्तिकः एव अयं हेतुः । तदेवं,

दोषत्रयत्रिपथगातरङ्गप्लाविते मुहुः ।
हेतुतृणे विलग्नोऽपि वादिन् मङ्क्ष्यसि निश्चितम् ॥ २ ॥

किञ्चेयं महाविद्या केवलान्वयिव्याप्तिजीवितव्या । सैव चतुरचेतोभिश्चिन्त्यमाना नोपपद्यते । तथाहि—यद्यत्प्रमेयं तत्तदनित्यं दृष्टमिति नियमो नास्ति । आकाशादौ प्रमेयत्वेऽपि नित्यत्वात् ।

१ 'विद्यत्व' इति पं पुस्तकपाठः ।

किञ्च, अत्र आत्मनः पक्षत्वमेव न संगच्छते। "संदिग्धसाध्यवान्पक्षः" इति पक्षलक्षणम्। तच्चात्र नास्ति। अनित्यत्वस्य शब्दे साध्यत्वेन शब्दस्यैव संदिग्धसाध्यत्वात्। आत्मनो नित्यत्वेन उभयोः सिद्धस्य तथात्वाभावात्। न हि जले शैत्ये साध्यमाने अनलः शीतल इति केनाप्युच्यते। ततश्चात्मादयोऽत्र पक्षत्वेनोपन्यस्ताः अपि अजागलस्तनकल्पत्वेन असत्कल्पाः एव।

एवं सपक्षोऽपि पक्षीकृतो निर्लोठयितव्यः। युक्तेः समानत्वात्। यच्च साध्यं पक्षीक्रियते तदप्ययुक्तम्। साध्यं हि सर्वैरपि धर्मिणि साध्यते, न तु साध्ये। साध्यस्य संदिग्धसाध्यवत्त्वपक्षलक्षणाभावात्। एवमपि साधने घटोऽपि घटे, पटोऽपि पटे साध्यताम्। तार्किकव्यवहारपरित्यागात्।

यदा साध्याभावमपि पक्षीकुरुते, तदप्यसमीचीनम्। सर्वदा असतो निरवयत्वेन पक्षीकर्तुमशक्यत्वात्। असदपि चेत् पक्षीक्रियते, तदा तुरङ्गशृङ्गगगनारविन्दादयोऽपि पक्षीक्रियन्ताम्। युक्तेः समानत्वात्। तुच्छे साध्याभावेऽपि साध्यसाधने दरिद्रस्येव विघ्नं स्यात्।

तत एषा महाविद्या पण्डकेव [illegible]।
[illegible]मात्रेण गोर्हि [illegible] ॥ ३ ॥

अपिच महाविद्याहेतुः केवलान्वयी त्वया उच्यते। केवलान्वयि[illegible]। यतः केवलान्वयित्वं सकलवस्तुनिष्ठत्वं त्वया अभ्युपेयते। तत्र च सति [illegible] न वा। अस्ति चेदात्माश्रयः। न चेत्तर्हि स्वस्मिन्नेव अवर्तमानत्वे [illegible]। [illegible]साध्यमपि सकलवस्तुनिष्ठं स्वीक्रियमाणम्। तथात्वे च महाविद्या[illegible] न वा। वियते चेत्तर्हि व्याघातः। न हि घटे घटो वर्तते एवमित्[illegible]। [illegible]भङ्ग एव। ततश्च—

[illegible]
[illegible] ॥ ४ ॥

[illegible]

[illegible]

[illegible]

अथ वादिनः प्रतिभाक्षये जाते सति प्रतिवादिनो वा प्रतिभाक्षये कर्तव्ये महाविद्याप्रयोगस्योपयुक्तता भावना । तत्र वादिनस्तावत् प्रतिभाक्षये जाते एतद्विद्यानुसारतन्त्रीतिमात्रमतोऽपि श्रीवादिद्विरदपञ्चाननकुण्डलदण्डकृतमाणस्य कौतस्कुती शुभंयुता । प्रतिवादिनस्तु प्रतिभाक्षयमहाविद्याविद्याप्रयोगेऽपि प्रतिवादिनि सैन्ये स्याद्वादमुद्राप्रणिधाने वाक्स्फूर्तिः प्रवीणकृपीणा (?) जर्जरीभवन्ति । दूरे भवन्ति भवन्महाविद्याकोमलकमलनालतयोगाः । न हि करीपालीपरिस्खलन्मदधाराक्षरितसुरभिता दृढैरपि तन्तुप्रयोगैः रोद्धुं पार्यते । तथा—

असंभाव्योऽपि विद्याले महाविद्येति गह्वरम् ।
नामैतस्या अपार्थं तन्मन्ये देवराजवत् ॥ ६ ॥
महाविद्याप्रयोगाणां क्षेपणाय विचक्षणैः ।
सेव्यं लघुमहाविद्याविडम्बनमिदं सदा ॥ ७ ॥
गुणाभिरामिदं यस्य कण्ठपीठे लुठिष्यति ।
सर्पिण्योऽमूर्महाविद्या न स्फुरिष्यन्ति तत्पुरः ॥ ८ ॥
श्रीसोमसुन्दरगुरोः शिष्यः श्रीभुवनसुन्दराचार्यः ।
कृतवानेतत्प्राज्ञप्रज्ञावृद्ध्यै विनयदायी ॥ ९ ॥

इति श्रीभुवनसुन्दराचार्यविरचितं लघुमहाविद्याविडम्बनं समाप्तम् ॥

२ परिशिष्टम् ।

श्रीकुलार्कपण्डितप्रणीतं

षोडशानुमानात्मकं

दशश्लोकीमहाविद्यासूत्रम् ।

१ अपक्षसाध्यवद्वृत्तिविपक्षान्वयियत्न तत् ।
साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते ॥ १ ॥

आत्मा शब्देतरानित्यानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् [illegible] ॥ १ ॥

२ अपक्षसाध्यवद्वृत्ति विपक्षे पक्षिते न यत् ।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम् ॥ २ ॥

आकाशः आकाशशब्देतरानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान्

३ अपक्षसाध्यवद्वृत्तिविपक्षान्वयवर्जितः ।
नानाविपक्षवृत्त्यन्यस्मिन्धर्मोऽस्ति पक्षिते ॥ ३ ॥

शब्दः शब्दानित्यानित्यवृत्त्यन्यनानाविपक्षवृत्तिधर्मवान् ।

४ पक्षापक्षगनादन्यत्साध्यवद्यद्वर्जितम् ।

गन्धवन्तो गन्धवद्गन्धाभावान्यवृत्त्यन्यवन्तः ।

५ पक्षापक्षगनादन्यत् साध्यवद्वृत्ति पक्षगम् ॥ ४ ॥

शब्दः शब्दान्यानित्यवृत्तिधर्मवान् ।

६ तस्मादन्यविनिर्धा [illegible] ।

नित्यत्वं स्वप्रतियोगि [illegible] ।

७ स्वीकृतानन्त [illegible] ॥ ५ ॥

[illegible] ।

८ पक्षापक्षविपक्षा [illegible] ।
भिन्नं साध्य [illegible] ॥ ६ ॥

[illegible]

९ [illegible] ।

[illegible]

१० [illegible] ॥ ७ ॥

[illegible]

११ असाध्यान्यवियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते ।

शब्दः साध्याभावान्यैतद्वियुक्तान्यव्यावृत्तिमान् ।

१२ असाध्यतद्वियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते ॥ ८ ॥

शब्दः साध्याभावतद्वियुक्तान्यव्यावृत्तिमान् ।

१३ पक्षेषु ये सन्ति विवादहीनाः
विहाय तानन्यतरः प्रसाध्यः ।

शब्दः संप्रतिपन्नैतन्निष्ठान्यधर्मवान् ॥

१४ पक्षोऽथवा साध्यविनाकृतेन,

शब्दः साध्यव्यतिरिक्तैतद्धर्मातिरिक्तधर्मवान् ।

१५ विच्छिद्य वाऽभाववदन्वितेन ॥ ९ ॥

शब्दः शब्दनित्यावृत्तिधर्मवान् ।

१६ अपक्षसाध्यवद्वृत्तिविपक्षान्वयि यत्र तत् ।
साध्याश्रयविपक्षान्यविपक्षे व्यतिरेकभाक् ॥ १० ॥

यथा—शब्दः शब्देतरानित्यनित्यावृत्त्याकाशान्यनित्यमात्रवृत्तित्वानधिकरणाकाशधर्मवा

इति षोडशानुमानात्मिकदशश्लोकीमहाविद्यासूत्रं समाप्तम् ॥

३ परिशिष्टम् ।

अथ[1] महाविद्याविवरणम् ।

श्रीभुवनसुन्दरसूरिविरचितटिप्पनसमेतम् ।

श्रु[2]तिमयतनु केचित्केचिदानन्दरूपं
विगलिततनु केचित्केचिदच्छस्वरूपम् ।
अभिदधति यदेकं तन्नमामीह जन्म-
स्थितिलयपरितापारम्भहीनं स्वरूपम् ॥ १ ॥

श्रीभुवनसुन्दरसूरिविरचितं

महाविद्याविवरणटिप्पनम् ।

श्रियो धाम श्रीमज्जिनवरपदाम्भोजयुगलं
गिरं देवीं चेतोऽभिमतफलदाने सुरमणीम् ।
नमस्कृत्यानन्दाद्गुरुचरणयुग्मं च विधिना
महाविद्यावृत्तेः किमपि करवै टिप्पनमहम् ॥ १ ॥

प्रायष्टीकाकृतैतस्या रहस्यं न प्रकाशितम् ।
रहस्याख्यानपूर्वं तद्वृत्तिर्व्याख्यायते मया ॥ २ ॥

महाविद्यावृहद्वृत्तिर्व्याख्याता प्रायशो मया ।
विडम्बनस्य टीकायां विलोक्या सा तदर्थिभिः ॥ ३ ॥

अथ महाविद्या कथं समुत्पन्नेति वाच्यमार्याद्वयमुच्यते ।

भाट्टा नित्यं शब्दं यौगाद्या वादिनस्त्वनित्यं च ।
प्रतिजानते ततोऽयं जातस्तेषां विवादोऽत्र ॥ ४ ॥

तत्तस्यानित्यत्वं प्रतिपादयितुं तु भाट्टवादीन्द्रान् ।
यौगाचार्यो वर्यः कृतवानेतां महाविद्याम् ॥ ५ ॥ युग्मम् ।

अथ सामान्यतो महाविद्यास्वरूपप्रकाशकं पद्यत्रयमुच्यते । तथाहि—

अन्वयव्यतिरेकित्वोपेतमूलानुमाविधौ ।
महाविद्यानुमानं तु प्रयोज्यं केवलान्वयि ॥ ६ ॥

---

१ आदर्शपुस्तकस्य आदौ अन्ते वा ग्रन्थकर्तुर्नामोल्लेखः नोपलभ्यते । २ इत आरभ्य 'बिम्बप्रमाण र्णोपदर्शकत्वमिव' (पृ. १६२) इत्यन्तः ग्रन्थः ख पुस्तके नास्ति, तस्य प्रथमपत्रस्य त्रुटितत्वात् ।

[illegible] समाख्या । [illegible] , [illegible] सर्वं [illegible] । [illegible] । केवलान्वयि । तथाहि [illegible] [illegible] ... [illegible] इत्यादि । [illegible] केवलान्वयीति [illegible] ।

महाविद्यानुमानेषु सर्वेष्वेते भावा विचार्याः । तथाहि—

शब्दस्यानित्यतोल्लसाधितं साध्यं तु नित्येतरं
दृष्टान्ता न केवलान्वयितया ख्याताः पदार्था यतो ।
अत्रैव यथार्थसिद्धि [illegible]
[illegible] ॥ ७ ॥

अत्र महाविद्यानुमानेषु यत् शब्दस्यानित्यता साध्यते तदुपलक्षणम् । तेनानेन प्रकारेण [illegible] नित्यत्वानित्यत्व[illegible]कर्तृकत्वाकर्तृकत्वादि सर्वं साधनीयम् । शब्दस्यानित्यतासाधनाय [illegible] पक्षीकृत्य महाविद्यानुमानं दृश्यते । तथाहि—आत्मा [illegible]नित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् मेयत्वात् घटादिवत् । तथा अनेनैवानुमानेन [illegible] पौरुषेयत्वं साध्यते । तथाहि—आत्मा [illegible] मेयत्वात् घटादिवत् । एवमनेन प्रकारेणान्यदपि सर्वानुमानैः सर्वं साधनीयम् । दृष्टान्तास्तेत्यादि । अत्र महाविद्यानुमानेषु सर्वे नित्या अनित्याश्च पदार्थाः पक्षाश्च दृष्टान्तीकार्याः । पक्षं पक्षतुल्यं[1] च वर्जयित्वा पक्षतुल्यानां पक्षवत् सन्दिग्धसाध्यवत्त्वात् पक्षे विवक्षितसाध्यसाधने पक्षतुल्येऽपि तत्सा- ध्यसिद्धेश्च । अत्र च सर्वेऽपि सपक्षाः कुत इत्याशङ्कायां केवलान्वयितयेत्युक्तम् । महाविद्यासाध्यस्य केवलान्वयित्वात्, केवलान्वयिनि च विपक्षाभावात्, सर्वेऽपि पदार्थाः सपक्षाः साध्या एव । सर्वत्रैवेत्यादि । सर्वमहाविद्यानुमानेषु प्रायो युगलावृत्तिर्विचार्या त्रिधा । तथाहि—यो धर्मो नित्ये एव केवले वर्तते, न अनित्ये, सोऽपि नित्यानित्यरूपे युगले न वर्तते, । तथा अनित्ये एव केवले यो धर्मो वर्तते न नित्ये, सोऽपि नित्यानित्ययुगले न वर्तते । तथा यो नित्ये अनित्येऽपि च न वर्तते, सोऽपि नित्यानित्ययुगले न वर्तते । आत्मा शब्देतरानित्यनित्ययु[2]गवृत्तित्वरहितानित्यवृत्तिधर्मवानित्यत्र चानुमाने पक्षीकृते आत्मनि साध्यो धर्मः शब्दात्मान्यान्यत्वादिः । स च नित्ये आत्मनि वर्तते, न शब्देतरानित्ये । ततः स शब्देतरानित्यनित्यरूपयुगलावृत्तिरुच्यते । अत्र च दृष्टान्ते घटादौ विचार्यमाणा घटत्वादयो धर्माः घटादिरूपेऽनित्ये एव वर्तन्ते, न नित्ये । तेऽपि शब्देतरानित्यनित्यरूपयुगलावर्तिनः उच्यन्ते । तथा क्वाप्युभयत्राप्यवर्तिनो ये भवन्ति तेऽपि युगलावर्तिनो भवन्तीत्यर्थः । इत्यादि सर्वं यथार्थसिद्धि अर्थसिद्ध्यनतिक्रमेण विचार्यमिति काव्यार्थः ।

एवंविधं साध्यमनित्यतां विना
शब्दस्य नोत्पद्यत एव तस्मात् ।
शब्दोऽस्थिरः स्यादिति पारिशेष्यात्
सर्वानुमानेष्विह साध्यसिद्धिः ॥ ८ ॥

---

१ 'तुल्ये तत्सा' इति ध पुस्तकपाठः । २ 'नित्ययुग' इति ध पुस्तकपाठः ।

एवंविधं शब्देतरानित्यनित्यवृत्तित्वानभिकरणानित्यवृत्तिधर्मवानित्यादिरूपं महाविद्यासाध्यं शब्दस्यानित्यतां विना पक्षीकृते आत्मनि न संभवति । तस्माच्छब्दोऽनित्यः स्वीकार्यः इत्येवं-विधपारिशेष्याच्छब्दस्यानित्यत्वरूपसाध्यसिद्धिः स्यादिति । परिशेषलक्षणं च " प्रसक्तप्रतिषेधे-ऽन्यत्राप्रसङ्गाच्छिष्यमाणे संप्रत्ययः परिशेषः " इति ज्ञेयम् । एवं सर्वमहाविद्यानुमानेषु विवक्षितसा-ध्यसिद्धिर्विधेयेति पदार्थः ।

इह हि सर्वः कोऽपि ग्रन्थारम्भे अभीष्टदेवतानमस्कारपूर्वं प्रवर्तते इति पूर्वपुरुषमार्गमनुस्मरन् कुलार्कपण्डितनिर्मितमहाविद्यावृत्तिं चिकीर्षुर्वृत्तिकारः आदावभीष्टदेवतानमस्कारमाह—श्रुतिमयत-नु केचित्केचिदानन्दरूपमित्यादि । तत्स्वरूपं परमात्मरूपं अहं नमामि । तत्किं । यदभिदधति । के कर्तारः । केचित् नित्यस्फोटवादिनो वैयाकरणाः । किंविशिष्टम् । श्रुतिमयेति । श्रुतयो वेदाः ता एव रूपं यस्याः तन्वाः सा श्रुतिमयी, तथाविधा तनुर्यस्य तत्तया । केचिद्वेदान्ता-दिमतानुसारिणः आनन्दरूपं आनन्द एव रूपं स्वरूपं यस्य तत्तया । केचिन्नैयायिकादयो विगलि-ततनु अशरीरमित्यर्थः । तथा केचित्सांख्यादयः अच्छं निर्मलमित्यर्थः । पुनः किंविशिष्टं । जन्मेत्यादि । जन्म जननं, स्थितिः सावधिकमवस्थानं संसारदशायामवस्थानमित्यर्थः । लयो विपत्तिः । तैः कृतो यः परितापः, तस्य यः आरम्भः, तेन हीनम् । एतावता जन्मस्थितिविनाशरहितमिति यावत् । एवं-विधं च ब्रह्मस्वरूपं योगिनामेव गम्यं, न त्वस्मदादीनामित्यर्थः । ग्रन्थान्तरेऽपि चैवमेव परमात्म-स्वरूपं प्रत्यपादि । तथाहि—

" नेन्दोः कला न गिरिजा न कपालशोभि—
नोक्षा न भस्म न जटा न भुजङ्गहारः ।
यस्यास्ति नान्यदपि किञ्चिदुपास्महे त-
द्रूपं पुराणमुनिशीलितमीश्वरस्य ॥ "

अन्यत्रापि । " अपाणिपादो ह्यमनो ग्रहीता " इत्यादि । अपरत्र च " निर्मलनिश्चल-निष्क्रियरूपमि"त्यादि । इतरत्र च—" न रूपं नो गन्धः " इत्यादि ॥ १ ॥

महाविद्यानिगूढार्थदर्शनी दीपिका मया ।
क्रियते धीमतामन्तस्तमोविच्छित्तिहेतवे ॥ २ ॥

(भुवन०)—महाविद्यावृत्तिरीदृशी मया आरभ्यमाणास्तीति वाच्यं श्लोकं वृत्तिकृदाह—महाविद्यानिगूढार्थेत्यादि । स्पष्टमेतत् ॥ २ ॥

पदाक्षेपः पूर्वं तदनु परिपाटीविघटनं
विपक्षव्यावृत्तिस्तदनु तदनु स्वार्थकथनम् ।
ततस्तेषां वृत्तिः प्रतिभटमुपक्रम्य विरले
स्थले कार्येत्येवं विवरणमिदं नः प्रभवति ॥ ३ ॥

---

१ 'पालमुकि' इति ध पुस्तकपाठः । २ 'दो जवनो ग्र' इति पाठः श्वेताश्वतरोपनिषदि । ३ 'दि । परत्र च' इति ध पुस्तकपाठः ।

(भुवन०)—सम्प्रतिविधायकत्वे प्रकारोऽभिधेयाविर्भावात्—अपोद्धारः पूर्वं तु परि-
पाटीविवरणमित्यादि । अपोद्धारः पदव्याख्यानविषयापरोक्षमन्तादिरूपः । परिपाटी क्रमः, तस्य
विवरणं व्याख्यानमित्यर्थः । व्याख्यानविलासाः पदच्छेदविभागाख्यानम् । विग्रहस्य पदार्थ-
तस्य स्वरूपं शक्तितस्य वा व्याकृतिरेतावता पदार्थोक्तिः व्याकृतिः । स्वाभिमतशब्दादिलक्षणा-
सामर्थ्याक्षेपस्य कथनम् । तेषां पदानां वृत्तिर्नोक्तेन आत्मभावेनैव समर्थनपरिभाषादिरूपा प्रत्य-
वस्थः । प्रतिभटं चलितादिनं प्रति व्याख्यातव्ये विषये कापि कापि स्थले अधिकारविशेषे ज्ञायते ।
इत्येवं प्रकारेण नः अस्माकं विवरणे वृत्तिरूपव्याख्यानाभिधौ मार्गे प्रवृत्तिरित्यर्थः । यतोऽन्यत्रापि वि-
वरणलक्षणमेवमेव प्रोक्तम्—

"अपोद्धारः पदं चैव पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थानं व्याख्या तन्त्रस्य षड्विधा ॥"—इति

विवक्षितप्रकरणसिध्यर्थं या चिन्ता सा अपोद्धारः । तथा चोक्तम्—
"चिन्तां प्रकृतसिद्ध्यर्थामुपोद्धातं प्रचक्षते" ।—इति ॥ शेषं तु सुगमम् ॥ ३ ॥

इह ननु केचित्संबन्धप्रयोजनाद्यनभिधानेन असमीचीनत्वमाक्षिपन्ति । तथाहि—प्रकरणेनापि प्रवर्त्तमानेन किमपि प्रतिपाद्यं संबन्धं वा क्रममपेक्ष्य प्रवर्त्तनीयम् । यतः

(भुवन०)—ननु संबन्धप्रयोजनाद्यभिधानाभावेन प्रकरणमेवेदं न स्यादित्याशङ्क्ते—इह खलु केचित्संबन्धप्रयोजनाद्यनभिधानेनेत्यादि । संबन्धो विषयविषयिभावलक्षणो वाच्यवाचकभावलक्षणो वा । प्रयोजनं अनन्तरपरंपरभेदभिन्नं कर्तृश्रोत्रसंबन्धि, तयोरनभिधानेन असमीचीनत्वमाक्षिपन्ति उद्भावयन्ति । केऽपीति संबन्धः । तथाहि—प्रकरणेनापीत्यादि । प्रकरणेनापि प्रतिपाद्यमभिधेयं संबन्धं वा पूर्वोक्तमपेक्ष्य प्रवर्तनीयम् ।

"शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः"

इति हि तल्लक्षणात् । अत्र च तस्याभावादिति । तदपि न विद्वन्मानसमानन्दयति । तस्य सर्वस्यात्र सत्त्वात् । तथाहि—शास्त्रप्रतिपादितार्थैकदेशसंक्षेपकं हि प्रकरणम् । इदमपि तथा । अतः शास्त्रीयैरेव तैरिदमपि तद्वत् । भिन्नोक्तौ ग्रन्थबाहुल्येन प्रकरणत्वव्याघातात् । तस्मात्साधुरेवारम्भः । अत्रापि छलप्रतिवादिनः सर्वमयथावन्मन्यमानस्य प्रमाणेन पूर्वं मुखमुद्रणार्थं पक्षस्य तावदनेकत्वमुदाहरणैरेव सूचितम् ।

---

१ 'शङ्कया' इति ध पुस्तकपाठः । २ 'प्रतिरू' इति ध पुस्तकपाठः । ३ 'अपोद्धा' इति त ध पुस्तकपाठः । ४ 'सिद्धयर्थ मपो' इति त ध पुस्तकपाठः । ५ आदितः 'प्रवर्तनीयम् । यतः' इत्यन्तः ग्रन्थांशः क पुस्तके नास्ति । ६ 'न्तरपरभे' इति व पुस्तक पाठः । ७ 'मानसमानं पदं दर्शयति । तस्य' इति क पुस्तकपाठः । ८ 'सर्वस्यास्य स' इति क पुस्तकपाठः । ९ 'प्रतिपादनैकदेश' इति क पुस्तकपाठः । १० 'भिन्नोक्तैः ग्रन्थ' इति क पुस्तक पाठः ।

(भुवन०)—शास्त्रैकदेशसंबद्धमित्यादि। प्रमाणप्रमेयादिसर्ववस्तुप्रतिपादकस्य शास्त्रस्य य एकदेशः प्रमाणप्रतिपादनादिरूपः तेन संबद्धम्। यथा प्रमाणतद्भेदतदन्यलक्षणादिप्रतिपादनपरं न्यायसारादि प्रकरणम्। शास्त्रकार्यं मोक्षादि। शास्त्रस्य मुख्यत्वेन मोक्षार्थत्वात्। तस्मादन्यत्कार्यं शास्त्रकार्यान्तरं प्रमाणप्रमेयप्रतिपादनादिरूपम्। तस्मिन्स्थितम्। एवं विधं ग्रन्थभेदं विपश्चितो विद्वांसः प्रकरणं प्राहुरित्यर्थः।

तस्य सर्वस्येति। तस्य प्रकरणलक्षणस्येत्यर्थः। शास्त्रीयैरेव तैरित्यादि। शास्त्रीयैः शास्त्रसंबन्धिभिरेव तैः संबन्धप्रयोजनादिभिरिदमपि तद्वत् संबन्धप्रयोजनादिमत्। संबन्धश्चात्र विषयविषयिभावादिः। विषयो महाविद्यानुमानानि, विषयी चैतत्प्रकरणमेव, प्रयोजनं च शब्दानित्यत्वादिसाधनरूपमत्र मन्तव्यम्। तस्मात्तद्वत्त्वेन प्रकरणमेवेदम्। संबन्धप्रयोजनादीनां भिन्नोक्तौ पृथगुक्तौ ग्रन्थबाहुल्येन प्रकरणत्वव्याघातात्। संबन्धप्रयोजनादीनां तु पृथगुक्तौ शास्त्रमेवेदं स्यात्, न तु प्रकरणमित्यर्थः।

यतः—

पक्षत्वं हि क्वचिदपि भजत्यत्र मिथ्या सपक्षः
पक्षीकार्यः क्वचिदपि विपक्षोऽपि वालीक एव।
पक्षः साक्षात्क्वचिदपि भजत्यन्यपक्षस्य कक्षा-
मेवं पक्षः श्रयति बहुधा रूपभेदं नवीनम्॥

विपक्षसपक्षयोस्तु पक्षीकरणमव्यभिचरणार्थमेव। तयोरुल्लङ्घनमिति चेत्। न। उपलक्षणत्वेन अविरोधात्।

(भुवन०)—पक्षत्वं हि क्वचिदपि भजत्यत्र मिथ्या सपक्षः इत्यादि। [illegible] सपक्षो घटादिः क्वापि मिथ्यैव पक्षत्वं भजते। [illegible] पक्ष एव [illegible] [illegible]। एवमग्रेऽपि पक्षाभासत्वं स्वयं ज्ञेयम्। क्वचिदपि [illegible] [illegible] पक्षीकार्यः। साक्षात्पक्षः शब्दरूपः क्वचिदन्यपक्षस्य [illegible] पक्षं [illegible] भजते। [illegible] न पक्षीकृत्य प्रवर्तमानमहाविद्यानु [illegible]। विपक्षसपक्षयोस्तु पक्षीकरणमव्यभिचरणार्थमेवेति। अत्र [illegible] विपक्षसपक्षौ पक्षीकरणमव्यभिचरणार्थम्। [illegible] [illegible] पक्षीकरणे पक्षे विपक्षे सपक्षे च [illegible] स्यात्। [illegible] [illegible] पक्षीकरणम्। तथा च [illegible] विपक्षेऽपि [illegible] [illegible] कापि व्यभिचारो न [illegible]। तयोरुल्लङ्घनमिति चेदिति। [illegible] [illegible] [illegible] स्यादिति चेत् [illegible]—न। [illegible] [illegible] [illegible] विपक्षसपक्षयोरपि पक्षीकरणमविरोधेन।

ननु उपलक्षणत्वेनापि [illegible] [illegible]। [illegible]

१ [illegible] २ [illegible]

पक्षत्वेन संबन्धाभावात्कथं तदिति चेत् । न । यद्रजतमभात् सैषा शुक्तिरित्यत्र रजतस्य शुक्तिकोपलक्षकत्ववदुपपत्तेः, लिप्यक्षराणां वर्णोपलक्षकत्वमिव वेदान्तिमते मायाया ब्रह्मोपलक्षकत्वमिवेति । न च रजतादीनां शुक्त्यादिविशेषणत्वात् दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति वाच्यम् । विशेषणस्य विद्यमानत्वव्याप्तत्वात्, विद्यमानत्वव्यापकनिवृत्तौ निवर्तनादिति ।

(भुवन०)—नोदकः आह—ननूपलक्षणत्वमपीति । उपलक्षणत्वमपि कदाचित्संबन्धिनि कदाचिद्येन सह संवन्धः स्यात्तत्र भवति । "कदाचित्संबद्धं व्यावर्तकमुपलक्षणमि"ति तल्लक्षणात् । **कथं तदिति** । तदुपलक्षणत्वं कथमित्यर्थः । आचार्यः आह—**न । यद्रजतमित्यादि** । यत्पूर्वं भ्रान्तावस्थायां रजतमभात् प्रत्यभात्, सैषा शुक्तिरित्यत्र रजतस्य शुक्तिकोपलक्षकत्ववत् शुक्तिकाप्रत्यायनमिव पूर्वोक्तोपलक्षणत्वोपपत्तेः । अयं भावः—यथा पूर्वप्रतिभातरजतेन शुक्तिकोपलक्ष्यते, तथा पक्षस्य पक्षीकरणेन विपक्षसपक्षयोरपि पक्षीकरणमुपलक्ष्यते इति । अथ पुनरपि दृष्टान्तद्वयेनैतदेव द्रढयति—**लिप्यक्षराणां वर्णोपलक्षकत्वमिवेति** । लिप्यक्षराणां गौर्जरकार्णाटान्ध्रादिलिप्यक्षराणां पुस्तकादिलिखितानां श्रोतृग्राह्यज्ञानमयवर्णोपलक्षकत्वमिव । **वेदान्तिमते इत्यादि** । वेदान्तिमते संसाररूपमायायाः अविद्येति नाम्न्याः यथा ब्रह्मोपलक्षकत्वं परब्रह्मोपलक्षकत्वमित्यर्थः । अयमत्र भावः । असत्यं हि सत्याधारे भवति, शुक्तिकायां यथा रजतप्रतिभासः । एवमत्रापि मायायाः प्रपञ्चरूपायाः असत्यत्वेन केनापि तदाधारेण सत्येन भाव्यम् । सत्यं च विचार्यमाणं ब्रह्मैव, अन्यस्य सर्वस्य प्रपञ्चान्तर्गतत्वादित्यनेन प्रकारेण मायाया ब्रह्मोपलक्षकत्वमित्यर्थः । **न च रजतादीनामित्यादि** । पक्षपक्षीकरणस्योपलक्षणत्वेन विपक्षसपक्षयोः पक्षीकरणं दार्ष्टान्तिकं, रजतस्य शुक्तिकोपलक्षकत्वं दृष्टान्तः, तत्र च यद्रजतमभात् सैषा शुक्तिरित्येवं रजतं विशेषणभूतं सत् शुक्तिकां गमयति, पक्षपक्षीकरणं चोपलक्षणत्वेन विपक्षसपक्षयोः पक्षीकरणं गमयतीत्यतो दृष्टान्तदार्ष्टान्तिकयोः वैषम्यमिति न च वाच्यम् । **विशेषणस्य विद्यमानत्वव्याप्तत्वादिति** । विशेषणस्य विद्यमानत्वेन व्यापकेन व्याप्तत्वात् । "सर्वदा संबद्धं व्यावर्तकं विद्यमानं विशेषणमि"ति तल्लक्षणात् । व्याप्यत्वं च यद्यद्विशेषणं तत्तद्विद्यमानमिति तयोर्व्याप्तिसद्भावादित्यर्थः । **विद्यमानत्वव्यापकनिवृत्तौ निवर्तनादिति** । विद्यमानत्वस्य व्यापकस्य निवृत्तौ विशेषणस्य व्याप्यस्य निवर्तनात् । विद्यमानत्वं हि व्यापकं रजतादेर्निवृत्तं सत् विशेषणत्वमपि रजतादेर्निवर्तयति । तस्माद्रजतादिकमुपलक्षणत्वेनैव स्वीकार्यं, न तु विशेषणत्वेन । उपलक्षणं वा अविद्यमानमपि स्यात्, न तु विशेषणम् । तस्माद्रजतादिवदुपलक्षणत्वेन विपक्षसपक्षयोः पक्षीकरणं युक्तमेवेत्यर्थः ।

(अथ प्रथमानुमानम् ।)

तत्र प्रथमं तावत् शब्दानित्यत्वानुमानम् । तत्रापि तस्यानुमानस्य संग्राहकः श्लोको यथा—अपक्षेति ।

१ 'पपत्तेः । लिं' इति क पुस्तकपाठः । २ 'विद्यमानव्या' इति ख पुस्तकपाठः । ३ 'टान्ध्रीलिप्य' पुस्तकपाठः । ४ 'परमत्र' इति त पुस्तकपाठः । ५ 'गमयति । अतो' इति घ पुस्तकपाठः ।

१ अपक्षसाध्यवद्वृत्तिविपक्षान्वयियन्न तत् ।
साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते ॥ १ ॥

आत्मा शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् मेयत्वात् घटवत् ।

तस्यायमर्थः—अपक्षो यः साध्यवान् सः अपक्षसाध्यवान् । सपक्षः इत्यर्थः । तत्र सपक्षे वर्तमानं यत् तत् अपक्षसाध्यवद्वृत्ति । विपक्षे अन्वयो यस्य तत् विपक्षान्वयि । अपक्षसाध्यवद्वृत्ति च तत् विपक्षान्वयि च इत्यपक्षसाध्यवद्वृत्तिविपक्षान्वयि । तत् यत् न भवति तत् अपक्षसाध्यवद्वृत्तिविपक्षान्वयियन्न । सपक्षविपक्षावृत्तीत्यर्थः । तत्साध्यते इति संबन्धः । किंभूतम् । साध्यवद्वृत्तितायुक्तम् । साध्यवान् सपक्षः, तत्र वर्तते इति साध्यवद्वृत्ति, तस्य भावः इति यावत् ।

(अथ प्रथमानुमानम् ।)

तत्र प्रथमं तावच्छब्दानित्यत्वानुमानस्य सङ्ग्राहकं श्लोकं व्याचिख्यासुराह—अपक्षेतीति ।

" अपक्षसाध्यवद्वृत्तिविपक्षान्वयियन्न तत् ।
साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते " ॥ १ ॥

तस्यायमर्थः—अपक्षो यः साध्यवान् सोऽपक्षसाध्यवान् सपक्षः इत्यर्थः । तत्र सपक्षे घटादौ वर्तमानं यत्तत् अपक्षसाध्यवद्वृत्ति । विपक्षे गगनादौ अन्वयो यस्य तद्विपक्षान्वयि । अपक्षसाध्यवद्वृत्ति च तद्विपक्षान्वयि चेति अपक्षसाध्यवद्वृत्तिविपक्षान्वयि । तद्यन्न भवति तदपक्षसाध्यवद्वृत्तिविपक्षान्वयियन्न । सपक्षविपक्षावृत्तीत्यर्थः । तत्साध्यते इति संबन्धः । किंभूतम् । साध्यवद्वृत्तितायुक्तं साध्यवान्सपक्षः, तत्र वर्तते इति साध्यवद्वृत्ति । तस्य भावः साध्यवद्वृत्तिता, तया युक्तम् । ननु अपक्षसाध्यवद्वृत्तीत्यादिभणनात् महाविद्यानुमानसाध्यस्य सपक्षे विपक्षे च वृत्तिता निषिद्धा । ततस्तत्साध्यवद्वृत्तितेत्यादिभणनात् साध्यवद्वृत्तितायुक्तं साध्यवर्जिते विपक्षे यदि साध्यते, तदा सपक्षविपक्षवृत्तितैव तस्य स्यात् । तथा च कारिकापूर्वार्द्धोत्तरार्द्धयोर्विरोधः एवापद्यते इति चेत् । न । अत्र सपक्षविपक्षयोरवृत्तिता या प्रोक्ता सा युगलावृत्तित्वेन । तथा च सति यो धर्मो विपक्षे साध्यते स सपक्षे नास्ति । शब्दात्मान्यान्यत्वादेः शब्दात्मभ्यामन्यत्र घटादिसपक्षेऽवर्तनादिति स सपक्षविपक्षयुगलावृत्तिरुच्यते । एवंभूतश्च विपक्षे साध्यते । ननु तर्हि स धर्मः शब्दात्मान्यान्यत्वादिः साध्यवद्वृत्तिः कथम् । सत्यम् । अत्र शब्दात्मान्यान्यत्वधर्मस्य शब्दात्मनोऽन्यत्रावर्तनात् साध्यवद्वृत्तित्वं तदैव, यदि शब्दः साध्यवान्स्यादिति परिशेषमानेन शब्द एव साध्यवान् ज्ञातः । तदा च स धर्मः साध्यवति शब्दे वर्तमानो भवतीति साध्यवद्वृत्तित्वं तस्य धर्मस्येति न कश्चिद्विरोधगन्धोऽपि बुद्धिमद्भिरपि शङ्कितुं शक्यते इति ।

इदानीं श्लोकानुमानपदयोजनिका—अत्र शब्देतरानित्येत्यनेन अ५

साध्यवद्वृत्तीति व्याख्यातम् । नित्यवृत्तित्वेत्यनेन विपक्षान्वयीति । अनधिकरणेत्यनेन यन्नेति । अनित्यवृत्तिधर्मवानित्यनेन साध्यवद्वृत्तितायुक्तमिति । आत्मेत्यनेन च साध्यवर्जिते इति । इति पदयोजना ॥

(भुवन०)—अथानुमानम् । आत्मा शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् मेयत्वात् घटवत् । अत्र कारिकायां यादृक्षं लक्षणमुक्तं तादृगेवानुमानेऽपि दर्शयितुं श्लोकानुमानपदयोजनां विधत्ते—**इदानीं श्लोकानुमानेति** । श्लोकश्चानुमानं च श्लोकानुमाने, तयोः परस्परं पदयोजनिका । **अत्र शब्देतरानित्येत्यनेनेति** । वृत्तीत्यग्रेतनपदोक्तमपि द्वयोः संबन्धित्वादत्रापि संबध्यते । तेन शब्दादितरे ये अनित्याः तत्र वृत्तीत्येतावताऽपक्षसाध्यवद्वृत्तीति व्याख्यातम् । यतः शब्देतरानित्येषु यद्वर्तते तन्मूलानुमानापेक्षया सपक्षाः ये अनित्याः घटादयः तेषु वर्तते एव । **नित्यवृत्तित्वेत्यनेन विपक्षान्वयीति व्याख्यातम्** । यतो यन्नित्ये वर्तते तन्मूलानुमानापेक्षया विपक्षे गगनादौ वर्तते एवेति । **अनधिकरणेत्यनेनेति** । शब्देतरानित्यवृत्तित्वस्य अनधिकरणमिति भणनात् श्लोकमध्यस्थं यन्नेति व्याख्यातम् । युगलावृत्तित्वेनोभयोर्न वर्तत एवेत्यर्थः । **अनित्यवृत्तिधर्मवानित्यनेनेत्यादि** । योऽनित्यवृत्तिधर्मवान् स धर्मः साध्यं मूलानुमानापेक्षयाऽनित्यत्वम् । तद्वाननित्यः तत्र वर्तते एवेति भावः । **आत्मेत्यनेनेति** । आत्मा तदैव पक्षीकृतो साध्यमनित्यत्वं, तेन वर्जिते पक्षे साध्यं साध्यते इति योजना ।

अथ व्यावृत्त्यचिन्ता—आत्मा अनित्यवृत्तिधर्मवानिति कृते [illegible] सिद्धसाधनम् । तदर्थं शब्देतरानित्यवृत्तिधर्मवानिति कृतम् । तथा च [illegible] व्यावृत्तिः । तस्याः शब्देऽपि वर्तमानत्वात् । तथापि द्रव्यत्वेन [illegible] तदर्थं नित्यवृत्तित्वानधिकरणेति प्रक्षिप्तम् । द्रव्यत्वं नित्येष्वपि [illegible] चैवमनुमानं स्यात्, आत्मा [illegible] तथाप्येवंभूतधर्मस्य युगलावृत्तेरात्मनि आत्मत्वस्यैव [illegible] तदर्थमनित्यवृत्तीत्युक्तम् ।

(भुवन०)—अथ व्यावृत्त्यचिन्तेति । व्यावृत्त्यानि व्यावर्तनार्हाणि यानि [illegible] मेतत्पदं किमर्थं प्रक्षिप्तमित्यादिरूपा चिन्ता व्यावृत्त्यचिन्ता । एवं सर्वत्रापि ज्ञेयम् । [illegible]नित्यवृत्तिधर्मवानिति कृते सत्तया सिद्धसाधनमिति । सत्ता नित्यानित्ययोर्धर्मः, [illegible]न्यपि विद्यते एव । आत्मनि सत्तासाधनेऽनुमानमप्ययुक्तम् । आत्मनि सत्तायाः उभयोरपि । [illegible] तदर्थं शब्देतरानित्येति । ये शब्दे धर्माः सन्ति तेभ्यः इतरे ये अनित्यधर्माः [illegible] कृते सत्ताव्यावृत्तिः । सत्तायाः शब्देऽपि भावात् । तथापि द्रव्यत्वेन [illegible] द्रव्यत्वं शब्दे नास्ति । शब्दस्य वैशेषिकादिमतेनाकाशगुणत्वात्, अनित्येष्वपि [illegible] तद्वानात्मा स्यात् । तथा च सिद्धसाधनं स्यात् । द्रव्यत्वस्यात्मनि [illegible] द्वत्वादित्यर्थः । तदर्थं नित्यवृत्तित्वानधिकरणेति प्रक्षिप्तम् । द्रव्यत्वं नित्येष्वपि [illegible]

एवंविधो धर्मः नित्यवृत्तित्वानधिकरणं विलोक्यते, द्रव्यत्वं च नित्येष्वपि वर्तते । तस्मान्नित्यवृत्तित्वाऽनधिकरणेति ग्रहणेन तन्निषिद्धमित्यर्थः । तथा चैवमनुमानं स्यात्, आत्मा शब्देतरानित्यनित्यवृत्तित्वानधिकरणधर्मवानिति । तथाप्येवंभूतस्येति । आत्मत्वं हि नित्यवृत्त्यस्ति, न तु अनित्यवृत्तीति पूर्वोक्तयुगलावृत्तिप्रकारेण तत् शब्देतरानित्यनित्यवृत्तित्वानधिकरणमुच्यते । अतः तेन सिद्धसाधनं स्यादेवेति । तदर्थमनित्यवृत्तीत्युक्तमिति । एवंविधो धर्मः अनित्यवृत्तिर्विलोक्यते । आत्मत्वं चानित्यवृत्ति नास्ति । नित्ये एव आत्मनि तस्य वर्तनात् । तस्मात्तन्निषिद्धमित्यर्थः ।

ननु आत्मा शब्देतरधर्मवानिति क्रियतामिति चेत् । न । आत्मत्वेनैव सिद्धसाधनात् । तस्य आत्मधर्मत्वेन शब्देतरधर्मत्वात् । तदर्थं नित्यवृत्तित्वानधिकरणेत्युक्तम् । तथापि विरोधः । आत्मवृत्तित्वे नित्यवृत्तित्वानधिकरणत्वानुपपत्तेः । तदर्थमनित्यपदग्रहणम् । तथाप्यात्मत्वादि युगलावृत्त्यपि भवति । आत्मन्येव वर्तनात् । तदर्थमनित्यवृत्तिधर्मवानिति कृतम् । स च धर्मः आत्मनि नित्ये बोधितः शब्दस्य अनित्यत्वमादाय पर्यवस्यति । स[1] च शब्दात्मनोरन्योन्याभावः एव ।

(भुवन०)—अथ आशङ्कामुखेन प्रकारान्तरेण व्यावृत्तिचिन्तां करोति—नन्वित्यादि । आत्मा शब्देतरधर्मवानित्यादि स्पष्टम् । तथाप्यात्मत्वादि युगलावृत्त्यपि भवतीति । आत्मा शब्देतरानित्यनित्यवृत्तित्वानधिकरणधर्मवानितिकृतेऽप्यात्मत्वमात्मनि नित्ये वर्तते, न अनित्ये । तेन युगलावृत्तित्वेन नित्यानित्ययोरवर्तनादात्मधर्मत्वाच्च तेन सिद्धसाधनं स्यात्, तदर्थमनित्यवृत्तिधर्मवानिति कृतमित्यर्थः ।

अथैतस्यानुमानस्य व्याख्या—आत्मा पक्षः । अनित्ये वृत्तिः यस्य सोऽनित्यवृत्तिः । स चासौ धर्मश्चेति । शब्दादितरे शब्दव्यतिरिक्ता ये अनित्या घटादयो नित्याश्चाकाशादयः, तेषु ये वर्तन्ते धर्माः, तेषु शब्देतरानित्यनित्यवृत्तित्वं धर्मः, तस्यानधिकरणमनाधारः । स चासौ अनित्यवृत्तिधर्मश्चेति समासः । अत्र शब्देतरानित्यनित्ययुगलवृत्तिः धर्मः सत्ताद्रव्यप्रमेयत्वादिः शब्देतरानित्यनित्यवृत्तित्वानधिकरणेतिपदेन निरस्तः । अथ च यो नित्ये एव केवले विद्यते नित्यत्वस्थैर्यस्वभावत्वादिः, स चानित्यवृत्तीतिपदेन निरस्तः । अथ चानित्ये एव केवले यो धर्मोऽनित्यत्वादिः विद्यते, स नित्ये आत्मनि पक्षीकृतेऽसंभवादेव निरस्तः । एतावता शब्देतरानित्यनित्ययुगलवर्ती एकैकनित्यमात्रानित्यमात्रवर्ती च धर्मः साध्यरूपतया निषिद्धः । अवशिष्टश्च साध्यधर्मो शब्दप्रतियोगिकः शब्दात्मान्योन्याभावः शब्दात्मान्योन्यत्वादिर्वा पक्षे आत्मनि सिध्यति । ननु सिध्यतु शब्दप्रतियोगिकः शब्दात्मान्योन्याभावादिः पक्षे, परं शब्दस्यानित्यत्वं कथं सिध्यतीत्याशङ्क्य आह—स च धर्म इति । स धर्मः शब्दात्मान्योन्याभावादिर्नित्ये आत्मनि बोधितः साधितः सन् शब्दस्यानित्यत्वमादाय पर्यवस्यति विश्राम्यति । यतः आत्मनि वर्तनेऽपि तस्य धर्मस्यानित्यवृत्तित्वं तदैव स्यात्, यद्यनित्यः शब्दः स्यात् । आत्मनो नित्यत्वात् । आत्मनित्यत्वे च वादिप्रतिवादिनोरवि-

१ 'स च धर्मश्शब्द' इति ख पुस्तकपाठः ।

वादात्। तस्य धर्मस्य शब्दात्मभ्यामन्यत्र घटादौ चावर्तनात्। तस्मात्पारिशेष्याच्छब्दस्यैवानित्यत्वमायातम्। शब्दानित्यत्वे च तस्य धर्मस्य शब्दरूपेऽनित्ये वर्त्तनादनित्यवृत्तित्वमुपपन्नमेवेत्यर्थः। साध्यधर्ममाचष्टे—स च शब्देति। स च धर्मः शब्दात्मव्यतिरिक्तविश्वप्रतियोगिकः शब्दात्मान्योन्याभाव एवेत्यर्थः। उपलक्षणं चैतत्। तेन शब्दात्मान्यान्यत्वशब्दात्मान्यतरत्वादिः शब्दात्ममात्रवृत्तिरन्योऽपि साध्यधर्मो बोद्धव्यः।

ननु तथापि दृष्टान्ते घटे तथाभूतधर्मस्य असंभवात् साध्यविकलत्वम्। न। घटेऽपि शब्देतरानित्यनित्ययुगले न वर्तते अनित्यवृत्त्यपि घटत्वम्। अतस्तेनैव व्याप्तिरिति न दोषः। इति प्रथमोदाहरणम्॥

(भुवन०)—सपक्षधर्मं प्रतिपिपादयिषुराशङ्कते—नन्विति। परिहरति—न घटेऽपीति। अत्र च दृष्टान्तीभूते घटेऽपि घटत्वमस्तीत्यध्याहारः। तच्च शब्देतरानित्यनित्ययुगले न वर्तते। घटरूपानित्ये एव तस्य वर्त्तनात्। तत एव च तत् अनित्यवृत्त्यप्यस्ति। अतस्तेनैव घटत्वेनैव व्याप्तिरिति भावः। उपलक्षणं चैतत्। तेन पटादीनां दृष्टान्तत्वे पटत्वादयो धर्माः ज्ञेयाः। अत्र व्याप्तिश्चेत्थं विधेया—यत् यत् प्रमेयं तत्तच्छब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवत् यथा घटादि। न चाकाशादिषु मेयत्वे सत्यपि शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यधर्मवत्त्वं नास्तीत्यनैकान्तिकत्वमिति वाच्यम्। आकाशादीनां पक्षतुल्यत्वात्। अयमर्थः—यथा आत्मात्र पक्षीकृतस्तथाकाशादिकमपि पक्षीक्रियते। तथाहि—आकाशं शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवत् मेयत्वात् घटादिवत्। एवं च सति नहि पक्षे पक्षतुल्ये वा व्यभिचारः। ततश्च यथा पक्षे सन्दिग्धसाध्यत्वेन व्याप्तेरभावेऽपि व्यभिचारो नास्ति, तथा पक्षतुल्येऽपीत्यर्थः। ननु यादृशो धर्मः पक्षे साध्यरूपः तादृशः सपक्षे नास्ति। मैवम्। शब्दपरावर्तं विनैव आत्मा शब्देतरेत्यादिभिरेव शब्दैः पक्षे शब्दात्मान्योन्याभावस्य दृष्टान्तीभूते घटे घटत्वस्य चोपपत्तेरिति प्रथममहाविद्याव्याख्या॥

(अथ द्वितीयानुमानम्।)

अथ प्रकारान्तरेण शब्दानित्यत्वसाधनं दर्शयितुमनित्यत्वानुमानसंग्राहिकां कारिकामाह—

२ अपक्षसाध्यवद्वृत्ति विपक्षे पक्षिते न यत्।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम्॥ २॥

आकाशः आकाशशब्देतरानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान्।

अस्य च पूर्वस्मादयमेव भेदो यत्पक्षीकृतस्यैव विपक्षस्य व्यावृत्तिः, न सर्वस्य। पूर्वस्मिंस्तु यावद्विपक्षव्यावृत्तिरिति।

अयमर्थः—अपक्षो यः साध्यवान् सः अपक्षसाध्यवान्। तत्र यद्वर्तते

---

१ 'तरानित्ययुगं' इति क ख पुस्तकपाठः।

तदपक्षसाध्यवद्वृत्ति, तद्यन्न भवति । विपक्षे आकाशादौ च पक्षिते पक्षीकृते यन्न वर्तते तत्साध्यते इति संबन्धः । किंभूतं साध्यते । विपक्षगं, विपक्षे इत्यर्थः । उपलक्षणपक्षीकृते इति यावत् ।

अथ पदयोजना—अत्र आकाशेत्यनेन विपक्षे इति व्याख्यातम् । शब्देतरानित्येत्यनेन अपक्षसाध्यवद्वृत्तीति । अनित्यवृत्तीत्यनेन साध्यवद्वृत्तितायुक्तमिति । **इति पदयोजना ॥**

(अथ द्वितीयानुमानम् ।)

(भुवन०)—अथ शब्दानित्यत्वसाधनायैव द्वितीयानुमानवाच्यां कारिकां व्याख्यातुमाह—अपक्षेतीति ।

" अपक्षसाध्यवद्वृत्ति विपक्षे पक्षिते न यत् ।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम् " ॥ २ ॥

एतस्यार्थः पूर्ववत् । अस्य चेत्यादि । अयमर्थः । पूर्वस्मिन्ननुमाने आत्मा शब्देतरानित्यनित्येत्यत्र नित्यपदेन सर्वेऽपि नित्याः पदार्थाः वर्जिताः । आकाशः आकाशशब्देतरानित्यवृत्तित्वेत्यत्र तु नित्यपदस्थाने आकाशपदप्रक्षेपेण पक्षीकृतस्याकाशस्यैव व्यावृत्तिर्न तु सर्वनित्यपदार्थानामिति । अथानुमानम्—आकाशः आकाशशब्देतरानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान् मेयत्वात् घटवत् । आकाशश्च शब्देतरानित्याश्च तत्र वृत्तिर्येषां तद्भावः तत्त्वम् । तदनधिकरणं चासौ अनित्यवृत्तिधर्मश्चेति विग्रहः ।

अथ व्यावृत्त्यचिन्ता[1]—आकाशोऽनित्यवृत्तिधर्मवानितिकृते सत्तया सिद्धसाधनम् । तदर्थं शब्देतरेतिपदम् । तथापि घटाकाशसंबन्धः शब्देतरानित्यघटे एव वर्तते इति तेन सिद्धसाधनम् । तद्व्यावृत्त्यर्थमनित्यवृत्तित्वानधिकरणेति पदोपादानम् । तथाप्याकाशपरमाणुसंयोगः शब्देतरानित्यवृत्तित्वानधिकरणो भवति, नित्ये परमाणावेव वर्तनात् । अतस्तेन सिद्धसाधनम् । तदर्थमनित्यवृत्तीतिपदग्रहणम् । तेनेदृशमनुमानं स्यात्—आकाशः शब्देतरानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवानिति । तथाप्येवंविधधर्मस्य अन्यत्र अदृष्टचरत्वादप्रसिद्धविशेषणः पक्षः । न हि अनित्ये वर्तते, शब्देतरानित्ये च न वर्तते इति धर्मः संभवति । यो हि अनित्यवृत्तिः स शब्देतरानित्ये वर्तते यथा घटत्वादि । तथा च सपक्षाभावेन अन्वयित्वमेव व्याहन्यते । तदर्थमाकाशग्रहणम् । तथा च न कश्चिद्दोषः । आकाशशब्देतरानित्यमेलके यो न वर्तते, (सः) अनित्यवृत्तिरपि भवति । एवंभूतश्च धर्मो दृष्टान्ते घटे घटात्मा-

१ 'व्यावृत्तिचिन्ता' इति न पुस्तकपाठः ।

वादात्। तस्य धर्मस्य शब्दात्मभ्यामन्यत्र घटादौ चावर्तनात्। तस्मात्पारिशेष्याच्छब्दस्यैवानित्यत्वमायातम्। शब्दानित्यत्वे च तस्य धर्मस्य शब्दरूपेऽनित्ये वर्त्तनादनित्यवृत्तित्वमुपपन्नमेवेत्यर्थः। साध्यधर्ममाचष्टे—स च शब्देति। स च धर्मः शब्दात्मव्यतिरिक्तविश्वप्रतियोगिकः शब्दात्मान्योन्याभाव एवेत्यर्थः। उपलक्षणं चैतत्। तेन शब्दात्मान्यान्यत्वशब्दात्मान्यतरत्वादिः शब्दात्ममात्रवृत्तिरन्योऽपि साध्यधर्मो बोद्धव्यः।

ननु तथापि दृष्टान्ते घटे तथाभूतधर्मस्य असंभवात् साध्यविकलत्वम्। न। घटेऽपि शब्देतरानित्यनित्ययुगले न वर्तते अनित्यवृत्त्यपि घटत्वम्। अतस्तेनैव व्याप्तिरिति न दोषः। इति प्रथमोदाहरणम्॥

(भुवन०)—सपक्षधर्मं प्रतिविपादयिपुराशङ्कते—नन्विति। परिहरति—न घटेऽपीति। अत्र च दृष्टान्तीभूते घटेऽपि घटत्वमस्तीत्यध्याहारः। तत्र शब्देतरानित्यनित्ययुगले न वर्तते। घटरूपानित्ये एव तस्य वर्त्तनात्। तत एव च तत् अनित्यवृत्त्यप्यस्ति। अतस्तेनैव घटत्वेनैव व्याप्तिरिति भावः। उपलक्षणं चैतत्। तेन पटादीनां दृष्टान्तत्वे पटत्वादयो धर्माः ज्ञेयाः। अत्र व्याप्तिश्चेत्थं विधेया—यत् यत् प्रमेयं तत्तच्छब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवत् यथा घटादि। न चाकाशादिषु मेयत्वे सत्यपि शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यधर्मवत्त्वं नास्तीत्यनैकान्तिकत्वमिति वाच्यम्। आकाशादीनां पक्षतुल्यत्वात्। अयमर्थः—यथा आत्मात्र पक्षीकृतस्तथाकाशादिकमपि पक्षीक्रियते। तथाहि—आकाशं शब्देतरानित्यनित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवत् मेयत्वात् घटादिवत्। एवं च सति नहि पक्षे पक्षतुल्ये वा व्यभिचारः। ततश्च यथा पक्षे सन्दिग्धसाध्यत्वेन व्याप्तेरभावेऽपि व्यभिचारो नास्ति, तथा पक्षतुल्येऽपीत्यर्थः। ननु यादृशो धर्मः पक्षे साध्यरूपः तादृशः सपक्षे नास्ति। मैवम्। शब्दपरावर्तं विनैव आत्मा शब्देतरेत्यादिभिरेव शब्दैः पक्षे शब्दात्मान्योन्याभावस्य दृष्टान्तीभूते घटे घटत्वस्य चोपपत्तेरिति प्रथममहाविद्याव्याख्या॥

(अथ द्वितीयानुमानम्।)

अथ प्रकारान्तरेण शब्दानित्यत्वसाधनं दर्शयितुमनित्यत्वानुमानसंग्राहिकां कारिकामाह—

२ अपक्षसाध्यवद्वृत्ति विपक्षे पक्षिते न यत्।
साध्यवद्वृत्तितायुक्तं साध्यते तद्विपक्षगम्॥ २॥

आकाशः आकाशशब्देतरानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान्।

अस्य च पूर्वस्मादयमेव भेदो यत्पक्षीकृतस्यैव विपक्षस्य व्यावृत्तिः, न सर्वस्य। पूर्वस्मिंस्तु यावद्विपक्षव्यावृत्तिरिति।

अयमर्थः—अपक्षो यः साध्यवान् सः अपक्षसाध्यवान्। तत्र यद्वर्तते

---

१ 'तरानित्ययुगं' इति क ख पुस्तकपाठः।

ते इति नानाविपक्षवृत्तिः। तस्मादन्यः नानाविपक्षवृत्त्यन्यः। अनेकविपक्षा-त्तिरित्यर्थः। भिन्नस्य धर्मो भिन्नधर्मः। नानाविपक्षवृत्त्यन्यश्चासौ भिन्नधर्म-ाति नानाविपक्षवृत्त्यन्यभिन्नधर्मः। सः पक्षिते पक्षीकृते वास्तवे वा पक्षेऽस्ति ाध्यते इत्यर्थः। भिन्नधर्म इति। भिन्नस्य धर्मत्वं पक्षापेक्षया बोद्धव्यम्। क्षाच्छब्दाद्भिन्नस्येत्यर्थः, न तु भिन्नश्चासौ धर्मश्चेति भिन्नधर्मः। एतदेवापि ाध्यपर्यवसानाय भिन्नस्य धर्मः इति।

(अथ तृतीयानुमानम्।)

(भुवन०)—अथ पक्षमेव पक्षीकृत्य प्रवर्त्तनानमहाविद्यावाच्यकारिकां व्याचिख्यासुराह—' ापक्षेतीति।

" अपक्षसाध्यवद्वृत्तिविपक्षान्वयवर्जितः।
नानाविपक्षवृत्त्यन्यभिन्नधर्मोऽस्ति पक्षिते " ॥ ३ ॥

पूर्वस्मादित्यादि। पूर्वस्मादनुमानादस्य अयमेव भेदो यदत्र वास्तवः सत्यः एव शब्दः पक्षो आकाशात्मादिः। पुनरप्यनेकविपक्षव्यावृत्तिश्चेत्यादि। पुनरपि पूर्वस्मादनुमानादयं विशेषो दनेकविपक्षव्यावृत्तिश्च। पूर्वस्मिन्ननुमाने तु पक्षितस्यैवैकस्य विपक्षस्य व्यावृत्तिरिति। नानावि-ाक्षवृत्त्यन्यः इति। नानाविपक्षेषु न वर्तते एकस्मिँस्तु वर्तते एव। भिन्नधर्मः इति। पक्षापेक्षया ापरो यो भिन्नः पदार्थः तस्य धर्मः। एतदेवेति। भिन्नस्य धर्मः इति एतदेव साध्यपर्यवसानाय ानित्यत्वरूपसाध्यसिद्ध्यै भवति इत्यर्थः। अस्यां कारिकायामथवेति वक्तव्ये महाविद्याकर्तुरपक्षेति दं प्रमादात्पतितम्। " अथवा साध्यवद्वृत्तिविपक्षान्वयवर्जितः " इति तु पाठो युक्तः।

इदानीमनुमानश्लोकपदयोजना—अत्र अपक्षसाध्यवद्वृत्तीति अशब्दा-नित्येत्यनेन व्याख्यातम्। विपक्षान्वयवर्जितः इति नित्यवृत्त्यन्येत्यनेन। नाना-विपक्षवृत्त्यन्येति नानानित्यावृत्तिरित्यनेन व्याख्यातम्। भिन्नस्य धर्मः इत्य-शब्दधर्मवानित्यनेन। इति योजना॥

(भुवन०)—अथानुमानम्—शब्दः अशब्दानित्यनित्यवृत्त्यन्यनानानित्यावृत्त्यशब्दधर्मवान् मेयत्वात् घटादिवत्। अपक्षसाध्यवद्वृत्तीति। अत्रानुमाने अशब्देति यदुक्तं तदर्थमपि कारिकायां अपक्षेति भणनादुक्तम्। अयं भावः। पूर्वत्र अपक्षेतिकारिकायामुक्तं तदपेक्षया अनुमाने शब्देतरे-त्युक्तम्। तत्र च साध्यो धर्मो विपक्षस्य पक्षीकृतत्वात् शब्दात्मान्योन्याभावादिः। स च शब्देतरे-त्युक्तं यदि न स्यात्, तदा नित्ये आत्मनि अनित्ये च शब्दे तस्य धर्मस्य वर्तनात् वाद्यभिप्रायेण अनित्यनित्यवृत्तित्वानधिकरणत्वं न स्यात्। तेन शब्देतरेति भणितम्। अस्मिंश्चानुमाने साध्यो धर्मो वास्तवस्यैव पक्षस्य पक्षीकृतत्वादनित्यत्वादिः। स चानित्ये एव वर्तते न नित्ये। तस्मादत्राश-ब्देति पदं व्यर्थम्।

---

१ 'एतदेव साध्य' इति घ पुस्तकपाठः।

अत्र शब्देतरानित्यनित्ययुगले यो न वर्तते, यो नानानित्येष्वपि न वर्तते, सः अशब्दधर्मः शब्देऽनित्यत्वमेव । तथाहि—अनित्यनित्ययुगले यो न वर्तते, तस्य प्रकारत्रयमत्र घटते । उभयत्र यो न वर्तते, सोऽपि युगले न वर्तते । नित्ये वा केवले यो न वर्तते, सोऽपि युगले न वर्तते । अनित्ये वा केवले यो न वर्तते, सोऽपि युगले न वर्तते । अत्र च अशब्दधर्मवानित्यनेन वृत्तिसाधनेन सर्वथा अत्र अवृत्तिस्तावन्निषिद्धा । अतः एकैकवृत्तिरवशिष्यते । तत्र नानाविपक्षवृत्त्यन्येत्यनेन नित्यवृत्तिः प्रत्युक्ता । अतः परिशेषादनित्यवृत्तिरेवावशिष्यते । तच्चानित्यत्वमेवेति साध्यसिद्धिः । तस्य च इदमेव अशब्दधर्मत्वं यत्सकलानित्यसाधारण्यमिति न कश्चिद्दोषः ॥

(भुवन०)—अशब्दधर्मवानित्यनेन वृत्तिसाधनेनेति । वर्तनं वृत्तिः । तत्साधनेन एवंविधो धर्मः क्वापि वर्तते एव । सर्वत्र न तस्य अवृत्तिरित्यर्थः । एतावता उभयत्रानित्यनित्ययोर्यो धर्मो न वर्तते, तस्य प्रथमप्रकारोक्तस्य निषेधः कृतः इति भावः । यद्यशब्दधर्मः तर्हि शब्दे कथं साध्यते इत्याशङ्क्याह—तस्य चेदमेव अशब्दधर्मत्वमिति । शब्दस्यैव स धर्मो न भवति किन्तु सकलानित्यानां धर्मः इत्यर्थः ।

अथ व्यावृत्त्यचिन्ता—अत्र शब्दः अशब्दधर्मवानितिकृते साधारणधर्मवानित्यर्थः स्यात् । तथा च सत्तया सिद्धसाधनं, तस्याः साधारणत्वात् । तदर्थं नानानित्यावृत्तिरित्युक्तम् । तथा चैवमनुमानं स्यात्—शब्दो नानानित्यावृत्त्यशब्दधर्मवान् । तथा च घटशब्दान्योन्याभावेन सिद्धसाधनम् । तदर्थमनित्यनित्यवृत्त्यन्येति प्रक्षिप्तम् । तथा सति एतावती प्रतिज्ञा स्यात्—शब्दोऽनित्यनित्यवृत्त्यन्यनानानित्यावृत्त्यशब्दधर्मवानिति । तथा च घटशब्दान्योन्याभावेन सिद्धसाधनता परिहृता । तस्य प्रतिवाद्यभिप्रायेण नित्ये शब्दे अनित्ये घटे च वर्तमानत्वान्न नित्यानित्यावृत्तित्वम् । एवं सति यद्यपि साध्यमनित्यत्वं सिध्यति, तथाप्याकाशादौ तथाभूतस्य धर्मस्य असंभवात्, अन्वयित्वव्याघातः । विपक्षस्य संभवात् । तदर्थमशब्देति पदम् । तथा सत्याकाशादौ शब्दान्योन्याभावः एवंत्वसौ यद्यपि नित्यानित्यवृत्तिर्न भवतीत्युच्यते, तथापि अशब्दानित्यनित्यवृत्तिर्भवतीति न व्यभिचाराशङ्कापि । इति तृतीयोदाहरणम् ।

---

१ 'नित्यवृत्तिनित्यत्वं' इति क ख पुस्तकपाठः । २ 'अनित्यानित्ययोर्वा नित्यं' इति ख पुस्तकपाठः । ३ 'अर्थनेन अन्य' इति क पुस्तकपाठः । ४ 'शब्दाकाशान्यो' इति न पुस्तकपाठः । ५ 'नित्यानित्यावृत्तित्वं' इति न पुस्तकपाठः । ६ 'नित्यानित्यावृत्तिनं' इति न पुस्तकपाठः ।

(भुवन०)—तथा च सत्तया सिद्धसाधनमिति । अशब्दा घटादयः, तत्र वर्तनादशब्दधर्मत्वं तस्याः । ततः सिद्धसाधनं तयेत्यर्थः । तथा च घटशब्दान्योन्याभावेन सिद्धसाधनमिति । शब्दो नानानित्यावृत्त्यशब्दधर्मवान् इति प्रतिज्ञायां घटशब्दान्यविश्वप्रतियोगिको यो घटशब्दान्योन्याभावः तेन सिद्धसाधनं स्यात् । घटशब्दान्योन्याभावस्य नानानित्येष्ववर्तनात्, घटे वर्तमानत्वेन अशब्दधर्मत्वाच्चेत्यर्थः । अत्र च अनित्यत्वं साध्यो धर्मः, अथवा घटशब्दान्यतरत्वादिः । स च घटशब्दयोरेव वर्तनाच्छब्दस्यानित्यत्वे नित्यत्वे वा नानानित्येषु न वर्तते । अशब्दो घटादिस्तद्धर्मश्चास्ति, परं स धर्मः घटशब्दान्यतरत्वादिः अनित्यनित्यावृत्तित्वदैव, यदि शब्दस्यानित्यत्वं स्यात् । अन्यथा स धर्मो नित्ये शब्दे अनित्ये घटे च वर्तनादनित्यनित्यवृत्तिरेव स्यात् । तस्माच्छब्दः अनित्यः स्वीकार्यः । अत्र दृष्टान्ताः घटाकाशादयः तद्धर्माश्च सर्वेऽपि ज्ञेयाः । तत्र सर्वत्र च घटत्वाकाशत्वादीनां स्वस्वमात्रनिष्टधर्मेण साध्यानुगमो द्रष्टव्यः । अत्रानुमाने नानेति पदमाकाशादिदृष्टान्तार्थम् । अन्यथा आकाशे आकाशत्वं यदस्ति तन्नित्ये आकाशे वर्तनान्नित्यवृत्त्येव स्यात्, न नित्यावृत्ति । नानेति पदोपादाने चाकाशत्वादि यद्यपि नित्यावृत्ति न स्यात्, तथापि नानानित्येष्ववर्तनान्नानानित्यावृत्ति भवत्येवेत्यर्थः । इति तृतीयानुमानम् ॥

(अथ चतुर्थानुमानम् ।)

एवं शब्दानित्यत्वसाधनव्याजेन अभीष्टार्थसाधकप्रकारत्रयमुपदर्शितम् । इदानीं पृथिवीत्वसाधनव्याजेन अभीष्टान्तरसाधकं प्रकारान्तरं दर्शयितुं संग्राहकं श्लोकार्धमाह—

४ पक्षापक्षगतादन्यत्साध्यवद्द्वैधर्जितम् ॥ ४ ॥

गन्धवन्तो गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यन्यवन्तः ॥

अयमर्थः—पक्षो वास्तवः, अपक्षो विपक्षः, तत्र मिलिते गतं गमनं यस्य तत्पक्षापक्षगतम् । तस्मादन्यत् पक्षापक्षगतादन्यत् । तद्धर्मान्तरं साध्यते इति संबन्धः । किंभूतम् । साध्यवद्द्वैधवर्जितम् । साध्यवान् पक्षः, तत्र यत् द्वैधं, तत्र वृत्तिः अवृत्तिश्च तद्वर्जितम् । वर्तमानावर्तमानत्वरहितमित्यर्थः ।

अथ श्लोकपदानुमानयोजना—अत्र गन्धवदित्यनेन पक्षेति व्याख्यातम् । अगन्धेत्यनेन अपक्षेति व्याख्यातम् । अवृत्तीत्यनेन अन्यदिति, साध्यवद्द्वैधवर्जितमिति च गन्धवद्वृत्त्यवृत्त्यन्यधर्मवन्तः इत्यनेन, इति मिथो योजना ।

(अथ चतुर्थानुमानम् ।)

(भुवन०)—अथ पृथिवीत्वसाधनव्याजेन अभीष्टान्तरसाधकं कारिकार्द्धं व्याचिकीर्षुः आह—पक्षापक्षेतीति । तथाहि—

१ 'रहितपद' इति ख पुस्तकपाठः ।

" पक्षापक्षगतादन्यत्साध्यवद्वैधवर्जितम् " ॥ ४ ॥

पक्षो वास्तवः इत्यादि । पक्षो धर्मी, अपक्षो विपक्षः, तत्र मिलिते गतं गमनं यस्य तस्मादन्यद्धर्मान्तरं साध्यते । अयमर्थः—गन्धवन्तः पक्षः, तदन्योऽपक्षः, तदुभयवृत्तिर्मेयत्वादिः तस्मादन्यदभिप्रेतं साध्यं पृथिवीत्वं घटादौ साध्यते । साध्यवद्वैधवर्जितमिति । साध्यवान्पक्षः, तत्र यद्वैधं वृत्तिरवृत्तिश्च, तद्वर्जितं वर्तमानावर्तमानत्वरहितं, तत्पक्षेऽस्तीति वाक्यशेषः । यद्वा पूर्वश्लोकगतं 'अस्ति पक्षिते' इत्यनुवर्तते । तद्वा पक्षगमित्यग्रेतनं संबध्यते ।

अथ व्यावृत्त्यचिन्ता—गन्धवन्तो गन्धवद्वृत्तिमन्तः इति कृते तद्वृत्तिना धर्मेण सिद्धसाधनम् । तदर्थमगन्धवद्वृत्तिमन्तः इत्युक्तम् । एतावन्मात्रे च क्रियमाणे सत्तादिभिः साधारणैर्धर्मैः सिद्धसाध्यता, असाधरणैश्च विरोधः । तदर्थमुभयपदग्रहणम् । तथापि उभयवृत्तिधर्मेण सिद्धसाधनम् । तदर्थमवृत्तिपदग्रहणम् । तथापि घटत्वादीनां गन्धवत्त्वनिष्ठानां तथात्वात् तैः सिद्धसाधनम् । तदर्थं गन्धवद्वृत्त्यवृत्तिमन्तः इत्युक्तम् । तथापि स्वव्यक्तिमात्रनिष्ठानां घटत्वादीनां पटादिष्ववृत्तिरपि विद्यते । तदर्थमन्येति पदम् । गन्धवद्वृत्त्यवृत्त्यन्यवन्तः इत्येतावन्मात्रे च क्रियमाणे द्रव्यत्वादिभिरेव सिद्धसाधनम् । तदर्थं गन्धवद्वृत्तीत्युक्तम् । तथा सति विरोधः एव स्यात्पौनरुक्त्यं वा । वृत्त्यवृत्त्यन्येति पदस्य उभयार्थत्वात् । तदर्थमगन्धेतिपदप्रक्षेपः । आकाशे च गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यवृत्त्यन्यः शब्दः एव शब्दाश्रयभावो वा । यतो वृत्त्यवृत्त्यन्येति पदस्यार्थो द्वेधानामुभयावृत्तित्वं विद्यते । तदर्थं गन्धवदगन्धावृत्ति वर्तते एव न वर्तते एव वा । शब्दस्तु गन्धवति न वर्तते एवेति सर्वमवदातम् । एवं तेजस्त्वाद्यनुमानमूह्यम् । तथाहि—उष्णवन्तः उष्णवदनुष्णावृत्त्युष्णवद्वृत्त्यवृत्त्यन्यधर्मवन्तः मेयत्वात् घटवदित्यादि । इति चतुर्थोदाहरणम् ॥

(भुवन०)—अथानुमानम्—गन्धवन्तो गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यवृत्त्यन्यवन्तः मेयत्वात् आकाशवत् । गन्धवन्तो गन्धवद्वृत्तिमन्तः इति कृते तद्वृत्तिनेत्यादि । तद्वृत्ति गन्धवद्वृत्ति गन्धवत्त्वं । तेन सिद्धसाधनम् । तदर्थमगन्धवद्वृत्तिमन्तः इत्युक्तमिति । एवं च गन्धवन्तः अगन्धवद्वृत्तिमन्तः इति कृते सत्तादिभिः साधारणैर्धर्मैः सिद्धसाध्यता । गन्धवत्सु अगन्धवत्सु च सत्ताया विद्यमानत्वात् । असाधारणैरिति । असाधारणा ये जलधर्माः शीतस्पर्शवत्त्वादयः, तेजोधर्मा उष्णत्वादयः, तैर्विरोधः । गन्धवत्सु तेषामभावात् । तथापि उभयवृत्तिधर्मेण सिद्धसाधनमिति । अयमर्थः । गन्धवन्तो गन्धवदगन्धवद्वृत्तिमन्तः इति कृते उभयवृत्तिना सत्तादिना सिद्धसाधनम् । तदर्थमवृत्तिपदग्रहणमिति । अवृत्तिग्रहणे कृते च गन्धवन्तो गन्धवदगन्धावृत्तिमन्तः इति जातम् ।

१ 'एव शब्दो' इति ख पुस्तकपाठः । २ 'त्यन्यवन्तः' इति न पुस्तकपाठः । ३ 'चतुर्थोऽनुमानम्' इति क ख पुस्तकपाठः ।

तथापि घटत्वादीनामित्यादि । घटत्वं गन्धवति घटे वर्तमानं विद्यते, अगन्धवत्सु च जलादौ अवर्तमानम् । ततो युगलावृत्तित्वेन तस्य गन्धवदगन्धावृत्तित्वं विद्यते एव । तत्तेन सिद्धसाधनमित्यर्थः। तदर्थं गन्धवद्वृत्त्यवृत्तिमन्तः इत्युक्तमिति । एवं चोक्ते गन्धवन्तो गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यवृत्तिमन्तः इति प्रतिज्ञा जाता । एवमप्युक्ते च घटत्वादिभिरेव सिद्धसाध्यता । तेषां गन्धवदगन्धयुगलावृत्तित्वात् । गन्धवत्सु घटादिषु वर्तनेन गन्धवत्सु एव पटादिषु च अवर्तनेन गन्धवद्वृत्त्यवृत्तित्वाच्च, तदर्थमन्येति । तथा च गन्धवन्तो गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यन्यवन्तः इति सम्पूर्णा प्रतिज्ञा जाता ।

अथ गन्धवदगन्धावृत्तीति पदं मुक्त्वा गन्धवद्वृत्त्यवृत्त्यन्यवन्तः इति ग्रहणेन व्यावृत्तिचिन्तां करोति । तथा च करणे द्रव्यत्वेनैव सिद्धसाधनमित्याह—**द्रव्यत्वादिभिरेव सिद्धसाधनमिति** । द्रव्यत्वस्य गन्धवत्सु सर्वेषु वर्तनेन गन्धवद्वृत्त्यवृत्त्यन्यत्वात्, तदर्थं गन्धवद्वृत्तीति । एवं च कृते गन्धवन्तो गन्धवदवृत्तिगन्धवद्वृत्त्यवृत्त्यन्यवन्तः इति प्रतिज्ञा जाता । **तथा सति विरोध इति ।** अत्र वृत्त्यवृत्त्यन्य इति पदस्यार्थद्वयम् । यो गन्धवत्सु वर्तते एव, यश्च न वर्तते एव, तौ द्वावपि वृत्त्यवृत्त्यन्यपदेन सङ्गृहीतौ भवतः । तत्र यो गन्धवत्सु वर्तते एव स गन्धवदवृत्तिरित्युच्यमाने विरोधः पौनरुक्त्यं चेति । यश्च गन्धवत्सु न वर्तते एव स गन्धवदवृत्तिरित्युच्यमाने पौनरुक्त्यं । गन्धवदवृत्तिगन्धवद्वृत्त्यवृत्त्यन्यपदयोर्मध्ये एकेनैव साध्यसिद्धेः । **आकाशे च गन्धवदगन्धावृत्तीत्यादि** । आकाशे च दृष्टान्तीक्रियमाणे एवंविधः शब्दः एव । तस्य गन्धवत्सु अवर्तनेन अगन्धवत्सु च वर्तनेन गन्धवदगन्धावृत्तित्वं विद्यते एव । तथा तस्य गन्धवद्वृत्त्यवृत्त्यन्यत्वं चाप्यस्ति । एवमात्मादिरपि गन्धवत्त्वरहितः सर्वोऽपि पदार्थो दृष्टान्तत्वेन ज्ञेयः अगन्धवत्सु एव वर्तनात् । **शब्दाश्रयभावः इति** । शब्दस्य आश्रयः आधारः शब्दाश्रय आकाशः । शब्दाश्रयस्य भावः स्वरूपं शब्दाश्रयभावः आकाशत्वमित्यर्थः ।

अथैतस्यानुमानस्य व्याख्या । गन्धवन्तः सर्वे भूभेदाः । ते च जलानिलादिपदार्थाष्टकं वर्जयित्वा सर्वेऽपि ज्ञेयाः । तेषु भूभेदेषु धर्मो वर्तमानः जलादिषु अवर्तमानश्च स युगलावृत्तित्वेन गन्धवदगन्धावृत्तिः । पुनरपि च स किंविशिष्टः । गन्धवत्सु वृत्तिरवृत्तिश्च यस्य धर्मस्य ततोऽन्यः । ततो गन्धवदगन्धावृत्तिश्चासौ गन्धवद्वृत्त्यवृत्त्यन्यश्चेति विग्रहः । एवंविधो धर्मो गन्धवत्सु साध्यते । स च धर्मः पृथिवीत्वमेव । तच्च गन्धवत्सु वर्तनेन अगन्धवत्सु चावर्तनेन गन्धवदगन्धयुगलावृत्ति । तथा गन्धवत्सु तस्य वर्तनावर्तनं नास्ति, किन्तु वर्तनमेव । एवं सति दृष्टान्ते जलादौ जलत्वादिः आकाशादौ शब्दाश्रयत्वादिश्च धर्मो ज्ञेयः । अत्र च वस्तुस्थानुमानमाश्रित्यैव महाविद्या प्रवृत्ता इत्युच्यते । तथाहि—पृथ्वी द्रव्यत्वावान्तरजातिमती मूर्तद्रव्यत्वात् जलवत् इति तुल्यानुमानम् । गन्धवत्त्वेन गन्धवन्निष्ठसङ्ख्यया गन्धवद्व्यतिरिक्तविभिन्नप्रतियोगिकात्यन्ताभावेन च सिद्धसाध्यत्वादोषादिकं महाविद्या कुशलतरैः प्रयत्नतश्छिन्दनीया । एवं तेजस्त्वाद्यनुमानमूह्यमिति । यथा पृथिवीत्वं तथा तेजस्तु तेजस्त्वं साध्यम् । तथाहि—तेजोवन्तः तेजोवदतेजोवद्वृत्तिगन्धवद्वृत्त्यवृत्त्यन्यवन्तः मेयत्वात् घटवत् । अत्रैवंविधो धर्मस्तेजस्त्वं औष्ण्यं वा साध्यम् । एवं वायौ वायुत्वं जले स्नेहादि च विप्रतिपत्तौ साध्यम् । इति चतुर्थानुमानव्याख्यानम् ॥

(अथ पञ्चमानुमानम्)

पुनरपि शब्दानित्यत्वेसाधनप्रकारमाचक्षाणं संग्राहकं कारिकोत्तरार्धमाह—

५ पक्षापक्षगतादन्यत्साध्यवद्वृत्ति पक्षगम् ॥ ४ ॥

शब्दः शब्दाशब्दावृत्त्यनित्यवृत्तिधर्मवान् ।

अयमर्थः—पक्षो वास्तवः शब्दः एव । अपक्षः सपक्षविपक्षसाधारणः, तद्गतं तद्वृत्ति यद्धर्मान्तरं तस्मादन्यत् पक्षापक्षगतादन्यत् । तत्साध्यते इति संबन्धः । किम्भूतम् । साध्यवद्वृत्ति सपक्षवृत्ति । पुनः किम्भूतम् । पक्षगं वास्तवपक्षनिष्ठमित्यर्थः ।

(अथ पञ्चमानुमानम् ।)

(भुवन०)—अथ जातिसाधनच्छलेन अभीष्टसाधकं प्रकारं प्रदर्श्य पुनरपि शब्दानित्यत्वादिसाधकं कारिकोत्तरार्द्धं व्याकर्तुमाह—पक्षापक्षेतीति ।

" पक्षापक्षगतादन्यत्साध्यवद्वृत्ति पक्षगम् " ॥ ५ ॥

पक्षो वास्तवः शब्दः एव । अपक्षः सपक्षविपक्षरूपः, तद्वर्ति यद्धर्मान्तरं तस्मादन्यत् । एतावता त्रये यन्न वर्तते द्वये तु वर्तते एव, तत्पक्षगं वास्तवपक्षनिष्ठं साध्यते इति संबन्धः ।

अथ योजना—शब्दाशब्दावृत्तीत्यनेन पक्षापक्षगतादन्यदिति व्याख्यातम् । अनित्यवृत्तीत्यनेन साध्यवद्वृत्तीति । एवं च पक्षसपक्षविपक्षमेलके न वर्तते, सपक्षे च वर्तते । पक्षनिष्ठं च तदनित्यत्वमेव पर्यवस्यति ।

(भुवन०)—तथापि ध्वनिशब्दयोरित्यादि । शब्दः अशब्दावृत्त्यनित्यवृत्तिधर्मवानिति प्रतिज्ञायां ध्वनिशब्दयोर्ध्वनिशब्दान्यविश्वप्रतियोगिको योऽन्योन्याभावः तेन सिद्धसाधनम् । तस्य अशब्दं शब्दव्यतिरिक्तं विश्वं तत्रावर्तनादनित्ये ध्वनौ वर्तनाच्च । अत्र ध्वनिशब्देनावर्णात्मकाः निर्झरझात्कारचीत्कारपशुशब्दादयो गृह्यन्ते । ते चानित्या भाट्टैरप्यङ्गीक्रियन्ते ।

अथ व्यावृत्त्यचिन्ता—तत्र अनित्यवृत्तिधर्मवानिति कृते सत्तादिभिः सिद्धसाधनम् । तदर्थमशब्दावृत्त्यनित्यवृत्तिधर्मवानिति कृतम् । तथापि ध्वनिशब्दयोरन्योन्याभावः अशब्दवृत्तिर्भवति, अनित्ये ध्वनौ च वर्तते । अतस्तेन सिद्धसाधनम् । तदर्थं शब्देति पदं कृतम् । शब्दाशब्दावृत्तिधर्मवानित्येतावन्मात्रे च क्रियमाणे शब्दत्वेनैव सिद्धसाधनम् । तदर्थमनित्यवृत्तिपदग्रहणम् । इति पञ्चमानुमानम् ॥

---

१ °त्यत्वप्रका° इति क ख पुस्तकपाठः । २ °विपक्षसाधारणः, तद्वर्ति° इति ख पुस्तकपाठः ।

(भुवन०)—अथ अनित्यवृत्तिपदं विमुच्य शब्दपदं प्रक्षिप्य च व्यावृत्तिचिन्तां करोति—शब्दाशब्दावृत्तिधर्मवानिति । एवं च क्रियमाणे शब्दत्वेनैव सिद्धसाधनम् । तस्य युगलावृत्तित्वेन शब्दाशब्दावृत्तिधर्मत्वं विद्यते एव । तन्निवृत्त्यर्थमनित्यवृत्तिपदग्रहणम् ।

अथानुमानम्—शब्दः शब्दाशब्दावृत्त्यनित्यवृत्तिधर्मवान् मेयत्वात् घटवत् आकाशादिवद्वा । अत्र अशब्दशब्देन नित्यानित्यरूपं विश्वम् । तत्र केवले शब्दे ये धर्माः, शब्दव्यतिरिक्ते केवले नित्यानित्यरूपे विश्वे च ये धर्मास्ते युगलावृत्तित्वेन शब्दाशब्दावृत्तयो भवन्ति । तत्र ये शब्दव्यतिरिक्तानां धर्मास्तेषां शब्दे साधने व्याघातः । तस्माच्छब्दधर्माः श्रावणत्वशब्दत्वादयोऽत्र साध्याः । तेषां चानित्यवृत्तित्वं तदैव, यद्यनित्यः शब्दः स्यात् । दृष्टान्तीभूतघटाकाशादौ तद्धर्मेषु च सर्वत्र शब्दान्यत्वधर्मेण व्याप्तिः । तस्य चाशब्दे वर्तनात्, शब्दे चावर्तनात्, शब्दाशब्दावृत्तित्वमनित्यवृत्तित्वं चास्ति । इति पञ्चमानुमानम् ॥

(अथ षष्ठानुमानम् ।)

एवमन्वयमुखेन अनित्यत्वसाधकप्रकारानुक्त्वा व्यतिरेकमुखेनाह—

६ तत्तादात्म्यनिषेधान्यतत्स्थाभावविरोधिता ।

नित्यत्वं स्वप्रतियोगिकान्योन्याभावातिरिक्तशब्दगताभावप्रतियोगि ।

तेन नित्यत्वेन सह तादात्म्यनिषेधोऽन्योन्याभावः । शब्दस्येति ज्ञेयः[1] शब्दो नित्यत्वं न भवतीति स्वरूपः । तस्मादन्योन्याभावात् अन्यो यः, तत्स्थाभावः संसर्गाभावः शब्दे नित्यत्वं नास्तीतिस्वरूपः, तद्विरोधिता तस्मिन् प्रतियोगिता साध्यते । नित्यत्वस्येति शेषः । इति कारिकार्थः ।

इदानीं पदयोजना—अत्र स्वप्रतियोगिकान्योन्याभावातिरिक्तेत्यनेन तत्तादात्म्यनिषेधान्येति व्याख्यातम् । शब्दगताभावप्रतियोगीत्यनेन तत्स्थाभावविरोधितेति व्याख्यातमिति योजना ॥

(अथ षष्ठानुमानम् ।)

(भुवन०)—एवमन्वयमुखेनानित्यत्वसाधकप्रकारानुक्त्वा व्यतिरेकमुखेन साध्याभावं पक्षीकृत्य प्रवर्तमानमहाविद्यावाचककारिकार्धं व्याख्यातुमाह—तत्तादात्म्येतीति ।

" तत्तादात्म्यनिषेधान्यतत्स्थाभावविरोधिता " ॥ ६ ॥

एतद्व्याख्या वृत्तावुक्तैव । किञ्चित्तु विस्तरः प्रोच्यते । तेन नित्यत्वेन सह शब्दस्य यत्तादात्म्यनिषेधोऽन्योन्याभावः शब्दो नित्यत्वं न भवतीतिरूपः । " तादात्म्यनिषेधोऽन्योन्याभावः " इति तल्लक्षणात् । एतावता तादात्म्यनिषेधपदेन अन्योन्याभाव उक्तः । तस्मादन्यः अभावः । स च कः इत्याह—तत्स्थेति । तत्र शब्दे तिष्ठतीति तत्स्थः । स चासावभावश्च तत्स्थाभावः । तत्तादात्म्यनिषेधान्यश्चासौ तत्स्थाभावश्च । एवंविधस्त्वभावः कः इत्याह—संसर्गाभावः इति । संसर्गाभावोऽत्यन्ताभावः । स च शब्दे नित्यत्वं नास्तीति स्वरूपः । तद्विरोधितेति । तस्मिन्प्रति-

---

१ 'ज्ञेयम् ।' इति ख पुस्तकेऽधिकः पाठः ।

योगिता नित्यत्वस्य पक्षीकृतस्य साध्यते इत्यर्थः । इदमुक्तं भवति । नित्यत्वान्योन्याभावव्यतिरिक्त शब्दगताभावप्रतियोगित्वमनित्यत्वविरुद्धस्य नित्यत्वस्य साध्यते । अथैतदनुमानम्—नित्यत्वं स्वप्रतियोगिकान्योन्याभावातिरिक्तशब्दगताभावप्रतियोगि मेयत्वात् घटवत् आकाशादिवद्वा ।

अथ व्यावृत्त्यचिन्ता—अत्र नित्यत्वं शब्दगताभावप्रतियोगीति कृते अन्योन्याभावेन सिद्धसाधनम् । तदर्थमन्योन्याभावान्येति । तथापि घटः शब्दो न भवतीति घटप्रतियोगिकोऽन्योन्याभावस्तदतिरिक्तः शब्दगतोऽभावः शब्दनित्यत्वान्योन्याभावः एव भवति । तत्प्रतियोगित्वसाधने सिद्धसाधनम् तदर्थं स्वप्रतियोगिकेति पदम् । नित्यत्वं स्वप्रतियोगिकान्योन्याभावातिरिक्तमित्युक्ते सिद्धसाधनम् । तदर्थं शब्दगताभावप्रतियोगीति कृतम् । श्लोकेऽन्येति पदं सामान्याभिप्रायेणेति बोद्धव्यम् । इति षष्ठानुमानम् ॥

(भुवन०)—अथ व्यावृत्त्यानि । नित्यत्वं शब्दगताभावेत्यादि । शब्दगतान्योन्याभावं प्रति नित्यत्वस्य प्रतियोगित्वात् सिद्धसाधनम् । तदर्थमन्योन्याभावान्येति । तथा च सति अन्योन्याभावातिरिक्तशब्दगताभावप्रतियोगीति जातम् । तथापि घटः इत्यादि । घटः शब्दो न भवतीति घटप्रतियोगिकान्योन्याभावोऽपि शब्देऽस्ति । तस्माद्घटप्रतियोगिकान्योन्याभावादतिरिक्तो भिन्नः शब्दस्थो ऽभावो नित्यत्वप्रतियोगिकान्योन्याभावः एव स्यात् । नित्यत्वस्य तत्प्रतियोगित्वसाधने सिद्धसाधनम् । तदर्थं स्वप्रतियोगिकेतिपदम् । तथा च सति स्वप्रतियोगिकोऽन्योन्याभावो निषिद्धः । अन्ततो व्यावृत्त्यचिन्ताकृता । अथादितो व्यावृत्यचिन्तामाह—नित्यत्वं स्वप्रतियोगिकान्योन्याभावेत्यादि । नित्यत्वे नित्यत्वप्रतियोगिकान्योन्याभावादन्यत्वस्य स्वयमेव सिद्धत्वात् सिद्धसाधनमित्यर्थः । अत्र नित्यत्वस्य शाश्वतत्वात् प्रागभावप्रध्वंसाभावौ न सम्भवतः एव स्वप्रतियोगिकान्योन्याभावातिरिक्तेतिपदेन चान्योन्याभावो निषिद्धः । शेषस्तु अत्यन्ताभाव एवावशिष्यते । अभावश्च प्रतियोगिनं विना न संभवति । "प्रतियोगिज्ञानाधीनज्ञानः अभावः" इति वचनात् । ततश्च नित्यत्वस्य शब्दगतात्यन्ताभावप्रतियोगित्वे शब्दस्यानित्यत्वं सिद्धम् । अत्र नित्यत्वप्रतियोगिकान्योन्याभावातिरिक्तशब्दगतात्यन्ताभावप्रतियोगित्वं घटाकाशशब्दादिष्वपि विद्यते एव । शब्दत्वश्रावणत्वादिषु च शब्दगतान्योन्याभावप्रतियोगित्वमिति तेषां सर्वेषां सपक्षता श्लोके अन्येतिपदं सामान्याभिप्रायेणेत्यादि । अत्र कारिकायां तत्तादात्म्यनिषेधान्येत्यत्र अन्येति पदं यदुक्तं तत्सामान्याभिप्रायेण । तेनान्यपदस्थाने अतिरिक्तादयोऽपि शब्दाः ज्ञेयाः । तस्मादेव स्वप्रतियोगिकान्योन्याभावातिरिक्तेति प्रोक्तमनुमाने । इति षष्ठानुमानम् ॥

(अथ सप्तमानुमानम् ।)

इदानीं भेदसाधकं प्रकारं दर्शयति—स्वीकृतेति ।

७ स्वीकृतानन्यवृत्तित्वसंपन्नान्यत्वसाधनम् ॥ ५ ॥

शब्दाधिकरणं शब्दाधिकरणादन्यत् ।

अयमर्थः—अन्यत्र वर्तते इत्यन्यवृत्तिः । नान्यवृत्तिः अनन्यवृत्तिः । एकवृत्तिरित्यर्थः । तस्य भावोऽनन्यवृत्तित्वम् । स्वीकृतं च तदनन्यवृत्तित्वं चेति स्वीकृतानन्यवृत्तित्वम् । तेन स्वीकृतानन्यवृत्तित्वेन संपन्नं स्वीकृतानन्यवृत्तित्वसंपन्नम् । स्वीकृतं प्रतिवादिनैव । एकस्यामेवाकाशव्यक्तौ वर्तनात् । तस्मात्स्वीकृतानन्यवृत्तित्वसंपन्नादन्यत्वसाधनं क्रियते इत्यर्थः ।

(अथ सप्तमानुमानम् ।)

(भुवन०)—इदानीं भेदसाधकं प्रकारं दर्शयतीति । अयमर्थः—[illegible] शब्दः पदार्थस्य भेदं भिन्नत्वं दर्शयति कारिकार्धेन—स्वीकृतेतीति ।

" स्वीकृतानन्यवृत्तित्वसंपन्नान्यत्वसाधनम् ॥ ५ ॥

यस्मात् शब्दः आकाश एव वर्तते नान्यत्र, तस्मात् शब्दः अनन्यवृत्तिः [illegible] । [illegible] अनन्यवृत्तित्वम् । स्वीकृतमनन्यवृत्तित्वं यस्य शब्दस्य स स्वीकृतानन्यवृत्तिः [illegible] तस्मात् स्वीकृतानन्यवृत्तित्वसम्पन्नात् । अन्यत्वसाधनम् [illegible]

[illegible]नुमानम्—शब्दाधिकरणं शब्दाधिकरणादन्यत् [illegible] ।

अथ पदयोजना—शब्दाधिकरणादिति इत्यनेन स्वीकृतानन्यवृत्तित्वसंपन्नेति व्याख्यानम् । अन्यदित्यनेन अन्यत्वसाधनमिति [illegible] । अत्रैवकारपदोपादाने साकाङ्क्षत्वेन प्रतिज्ञाया [illegible] [illegible] । न व्याकृत्यान्तरमस्ति । भेदप्रसाधनप्रकारदर्शनमात्र[illegible] [illegible] । अपसिद्धान्तप्रसङ्गात् । इति सप्तमानुमानम् ॥ ७ ॥

(भुवन०)—अत्रैवकारपदोपादाने [illegible]

[illegible]

---

१ [illegible]

२ [illegible]

तस्माच्छब्दाधिकरणवहुत्वं पारिशेष्यात् सिद्धम् । आकाशे च मेयत्वं पुराप्युभयसिद्धं, भिन्नत्वं च प्रतिवादिनोऽसिद्धं अनेन अनुमानेन साध्यते । अत्राकाशं आकाशादन्यदेवमपि वदने अर्थस्य अनन्यत्वमेव, परं महाविद्यानुमानत्वेन किञ्चिद्वक्रच्छाययोक्तम् । एवं च सर्वेषामेकत्वेन अङ्गीकृतानामनेकत्वं साधनीयम् । अत्र च मुख्यानुमानमिदम्—दिक्कालाकाशाः अनेके, द्रव्यत्वात्, घटवत् । इयं च महाविद्या पक्षं पक्षयित्वा प्रवृत्ता । इति सप्तममनुमानम् ॥

(अथ अष्टमानुमानम् ।)

अथ पुनरपि सकर्तृकत्वसाधनव्याजेन सर्वसाधकप्रकारान्तरदर्शनाय सङ्ग्राहकं श्लोकमाह—पक्षापक्षेतीति ।

८ पक्षापक्षविपक्षान्यवर्गादेकैकमुद्धृतम् ।
भिन्नं साध्यवतस्तद्वदुद्धृतावधिभेदिनः ॥ ६ ॥

अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकान्यः ।

तस्य अयमर्थः—पक्षो वास्तवः संदिग्धकर्तृकः अङ्कुरादिः, अपक्षः सपक्षो निश्चितकर्तृको घटादिः, विपक्षोऽकर्तृकः आकाशादिः । तदन्यवर्गात्पक्षापक्षविपक्षान्यवर्गात् । अन्यतमवर्गादेकैकमुद्धृतं भिन्नं साध्यते इति सम्बन्धः । कस्मात् । साध्यवतः सकर्तृकात् । ततः किम्भूतात् । तद्वदुद्धृतावधिभेदिनः । तद्वान्साध्यवान् यो घटादिरुद्धृतः(स एव)प्रत्यवधित्वेन भेदो विद्यते यस्य साध्यवतः स तद्वदुद्धृतावधिभेदी तस्मात् । एतेन सपक्षस्यैव पक्षत्वमिति सूचितम् । तथा च विपक्षवर्गादेकोद्धाराभावेन असङ्गतत्वं परिहृतम् । यतोऽप्यत्र अन्यत्वं अन्यतमत्वं विवक्षितम् । अन्यतमत्वं च त्रयापेक्षया एकस्यापि भवति, द्वयोरपि भवति, व्यक्तिभेदेन त्रयाणामपि भवति । तत्र द्वयोरप्येकोद्धारः संभवत्येवेति न दोषः कश्चित् । एकैकेति वीप्सायाश्चरितार्थत्वात् । तथा चायमर्थः पर्यवसितः स्यात् । एतद्घटाङ्कुरादन्यद्विश्वं तस्मादन्यत्सकर्तृकम् । एतद्वयान्यतमत् । तदन्यत्वे साध्यत्वे घटः स्वरूपाद्भिन्नः इति विरुद्धम् । अतोऽङ्कुरात्सकर्तृकादन्यः इति परिशेषादागच्छति ।

अथ पदयोजना—अत्र पक्षापक्षविपक्षान्यवर्गादेकैकमुद्धृतमिति एतद्घटाङ्कुरान्यान्येत्यनेन व्याख्यातम् । भिन्नमित्युद्धृतविशेषणेन उद्धृतयोरेव पक्षसपक्षयोरेव प्रतियोगित्वख्यापनान्मध्यगतान्यपदद्वयोपादानमपि सूचितमिति पदयोजना ।

---

१ 'साध्ये घ' इति ख पुस्तकपाठः ।

(अथाष्टमानुमानम् ।)

(भुवन०)—पुनरपि सकर्तृकत्वसाधनव्याजेनेत्यादि । अयमत्र सकर्तृकत्वसाधनोपायो दर्शनानोऽस्ति । अनेन प्रकारेण अकर्तृकत्वपौरुषेयत्वापौरुषेयत्वाद्यपि सर्वं साधनीयम् । पक्षापक्षेतीति ।

" पक्षापक्षविपक्षान्यवर्गादेकैकमुद्धृतम् ।
भिन्नं साध्यवतस्तद्वदुद्धृतावधिभेदिनः " ॥ ८ ॥

भिन्नं साध्यते इत्यादि । मूलानुमानापेक्षया पक्षादयो ग्राह्याः । अत्र पक्षमध्यादङ्कुरः सपक्षमध्यात् घटश्च द्वावुद्धृतौ । तत्रानेन अनुमानेन सकर्तृकत्वसाध्यवतः अङ्कुराद्घटस्य भिन्नत्वं साध्यम् । तद्वदुद्धृतावधिभेदिन इति । तद्वान् सकर्तृकत्वसाध्यवान् यो घटादिः, स एव प्रत्यवधित्वेन प्रतियोगित्वेन भेदो यस्य अङ्कुरादेः साध्यवतः, स तद्वदुद्धृतावधिभेदी, तस्मात्तद्वदुद्धृतावधिभेदिनः । एतेन सपक्षस्यैव पक्षत्वं सूचितमिति । यदि सकर्तृकादङ्कुरात् घटो भिन्नः साध्यते, तदा मूलानुमानसपक्षस्य घटस्य पक्षत्वं सूचितमेवेत्यर्थः ।

अथानुमानम् । अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकान्यः [illegible] । तथा चायमर्थः इत्यादि । अयं घटः इति पक्षः । एतद्घटाङ्कुरादन्यो [illegible], [illegible] एतद्घटान्यतमत् । तच्चैतद्घटो वा अङ्कुरो वा । तत्रायं घटः एतस्मात् घटादन्य इति [illegible] न । [illegible] कोऽपि स्वस्मात् भिन्नः । परापेक्षयैव सर्वस्य भिन्नत्वात् । अतोऽङ्कुरात् सकर्तृकात् [illegible] इति परिशेषादागच्छति । सकर्तृकादङ्कुरादन्यत्वं घटस्य यदि च सिद्धं, तर्हि अङ्कुरः सकर्तृक [illegible] एव । अङ्कुरस्योपलक्षणत्वात् । भूभूधरादेरप्यनेनैवानुमानेन सकर्तृकत्वं साधनीयम् । [illegible] एव ईश्वरः इतीश्वरसिद्धिः ।

अथ व्यावृत्त्यचिन्ता—घटः सकर्तृकादन्यः इति [illegible] सिद्धसाधनम् । तदर्थमेतद्घटान्यसकर्तृकान्य इति [illegible] । तथापि [illegible] तथैव इत्यङ्कुरपदप्रक्षेपः । तथा [illegible] एतद्घटाङ्कुर [illegible] कान्यः । तथापि घटान्यत्वेन सिद्धसाधनं [illegible] । अयं घटः एतद्घटाङ्कुरान्यान्य [illegible] सिद्ध-साधनं, अङ्कुरत्वेन च [illegible] । [illegible] निति कृतम् । तथापि सिद्धसाधनं [illegible] । [illegible] त्यांनि । अथवा [illegible] किमुक्तम् । [illegible] । [illegible] पक्षत्वमपि सूचितं भवति । [illegible]

[illegible]
[illegible] । [illegible]

(भुवन०)—अथ व्यावृत्त्यचिन्ता । घटः सकर्तृकादन्य इति । यदि घटः सकर्तृकादन्यः इति क्रियते, तदा घटस्य सकर्तृकात्पटादन्यत्वेन सिद्धसाधनं स्यात् । तदर्थमेतद्घटान्यसकर्तृकान्य इतीति । एवं कृतेऽपि तथैव पूर्वोक्तप्रकारेणैव सिद्धसाधनम् । एतद्घटादन्यः सकर्तृकः पटः, तस्मादन्यत्वस्य घटे सद्भावात् । तथापि पटाद्यन्यत्वेन सिद्धसाधनमिति । एतद्घटाङ्कुराभ्यामन्यो यः सकर्तृकः पटः, तस्मादन्यत्वस्य घटे सद्भावात् सिद्धसाधनमित्यर्थः । घटत्वेन सिद्धसाधनं अङ्कुरत्वेन च व्याघातः इति । अयं घट एतद्घटाङ्कुरान्यान्यधर्मवानिति यदि क्रियते, तदैतद्घटाङ्कुराभ्यामन्यद्विश्वं, तस्मादन्यौ एतद्घटाङ्कुरावेव । तयोर्धर्माः घटत्वादयोऽङ्कुरत्वादयश्च । तत्र घटत्ववत्त्वे घटस्य साध्यमाने सिद्धसाधनम् । अङ्कुरत्ववत्त्वे च घटस्य साध्यमाने व्याघातः । अङ्कुरत्ववत्त्वस्य घटे अभावात् । तदर्थमेतद्घटाङ्कुरान्यान्येत्यादि । अत्र सकर्तृकपदक्षेपेऽपि सकर्तृकत्वस्याङ्कुरेऽद्यापि विवादास्पदीभूतत्वात् यद्यपि व्याघातो न सम्भवति, तथापि सकर्तृको यो घटस्तद्धर्मवत्त्वे घटस्य साध्यमाने सिद्धसाध्यता स्यादेवेत्यर्थः । अथवा प्रकारान्तरेणान्वयः इति । अन्वयः प्रकारान्तरेण सम्बन्धयोजनं क्रियते इत्यर्थः । एकैकमित्यादि । एकैकं उद्धृतं भिन्नं घटादि साध्यते । किम्भूतं । तद्वत् सकर्तृकत्वं यत् साध्यं तद्युक्तमित्यर्थः । पूर्वं तद्वदितिपदं 'उद्धृतावधिभेदिनः' इत्यनेन समस्तं कृतम्, अत्र तूद्धृतमित्येतस्य विशेषणं कृतमिति भेदः इत्यर्थः । अथ व्याप्तिः प्रदर्श्यते । यद्यत् प्रमेयं तत्तदेतद्घटाङ्कुरान्यान्यसकर्तृकान्यत् यथा आकाशादि । घटान्यत्वस्य आकाशादौ सर्वत्र सद्भावात् । अस्या महाविद्यायाः मुख्यानुमानमिदम्—भूभूधराङ्कुरादिसकर्तृकं कार्यत्वात्, घटवत् । इयं महाविद्या सपक्षं पक्षयित्वा प्रवृत्ता । इति अष्टमानुमानम् ॥

(अथ नवमानुमानम्)

अस्यैवानुमानस्य पदान्तरकरणेन भङ्ग्यन्तरं दर्शयति—

९ तस्यैव तदवृत्तेन योगो वात्र प्रसाध्यते ।

अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकाद्वृत्तिमान् ।

अयमर्थः—तस्यैवोपलक्षणस्य पक्षस्य घटस्य । तदवृत्तेनेति—एतद्घटाङ्कुरान्यान्यसकर्तृकावृत्तेन योगः संबन्धः साध्यते । वर्त्तनं वृत्तः(त्तिः)तेन वर्तनेन इत्यर्थः । अन्त्यस्य अन्यपदस्य स्थाने वृत्तिमानिति पदान्तरकरणेनेत्यर्थः । वाशब्दो भङ्ग्यन्तरसूचनार्थः । अत्रापि व्यावर्त्यानि पूर्वोक्तोदाहरणकथितान्येव । अर्थस्य अर्थ्यधीनत्वात् । इति नवममनुमानम् ॥

(अथ नवमानुमानम् ।)

(भुवन०)—तस्यैवेतीति ।

" तस्यैव तदवृत्तेन योगो वात्र प्रसाध्यते " ॥ ९ ॥

तस्यैवोपलक्षणस्येति । अङ्कुरस्य मुख्यानुमानापेक्षया पक्षत्वेऽप्युपलक्षणत्वेन घटस्य सपक्ष-न्यायादुद्धृत्य पक्षीकृतस्येत्यर्थः । अथानुमानम्—अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकावृत्तिमान् मेयत्वात् आकाशादिवत् वा । एतद्घटाङ्कुराभ्यामन्यद्विश्वं, तस्मादन्यौ एतद्घटाङ्कुरावेव सकर्तृकौ, तत्र यो न वर्तते तद्वान् पक्षीकृतो घटः साध्यते इत्यर्थः । तत्र घटे घटावृत्तिधर्मवत्त्वं विरुद्धं, तस्मात् सकर्तृकेऽङ्कुरे यो न वर्तते स एतद्घटाङ्कुरान्यान्यसकर्तृकावृत्तिर्घटत्वादिधर्मः, तद्वान् घट इत्यायातम् । तथा च सति अङ्कुरस्य सकर्तृकत्वं पारिशेष्यात्सिद्धम् । शेषं पूर्ववत् । इति नवमानुमानम् ॥

(अथ दशमानुमानम्)

पुनरप्येतदेवानुमानं पदान्तरोपादानेन भङ्ग्यन्तरेण दर्शयति—

१० तद्वृत्त्यवृत्तिरथवा प्रोद्धृतेऽत्र प्रसाध्यते ॥ ७ ॥

यथा—अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकधर्मविरही ।

अयमर्थः—तद्वृत्तिः यो धर्मः एतद्घटाङ्कुरान्यान्यसकर्तृकवृत्तिरित्यर्थः । तस्य धर्मस्य या अवृत्तिः वर्तननिषेधः । स चात्र घटे प्रसाध्यते इत्यर्थः । अत्र अथवा शब्दो भङ्ग्यन्तरसूचनार्थः एव । व्यावृत्त्यानि च तानि पूर्वतनान्येव । इति दशमानुमानं समाप्तम् ॥

(अथ दशमानुमानम् ।)

(मुक्त०)—तद्वृत्तीति ।

" तद्वृत्त्यवृत्तिरथवा प्रोद्धृतेऽत्र प्रसाध्यते " ॥ १० ॥

अथानुमानम्—अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकधर्मविरही मेयत्वात् गगनादिवत् । सकर्तृकघटाङ्कुरयोर्ये धर्मास्तेषां विरहो घटे साध्यते । तत्र घटे घटधर्मविरहस्यासंभवात् न । तस्मात्सकर्तृकाङ्कुरधर्माः अङ्कुरत्वादयः तेषां विरहो घटे प्रसाध्यते । तथा च सति सकर्तृकाङ्कुरधर्मविरही घटः तदैव, यद्यङ्कुरः सकर्तृकः स्यादित्यर्थः । शेषं पूर्ववदेव शेयम् । इति दशमानुमानम् ॥

(अथ एकादशानुमानम् ।)

एवमेकस्मिन्नेवार्थे सर्वसाधकं प्रकारत्रयं दर्शितम् । इदानीं पुनः शब्दानित्यत्वसाधनं प्रकारान्तरं दर्शयितुं संग्राहकं कारिकार्धमाह—

११ असाध्यान्यवियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते ।

शब्दः साध्याभावान्यवियुक्तान्यव्यावृत्तिमान्[1] ।

असाध्यं नित्यत्वं, तस्मादन्यत् अनित्यत्वम् । तस्मादसाध्यान्यात् अनित्यत्वात् वियुक्तोऽन्यो नित्यरूपः सोऽसाध्यान्यवियुक्तान्यः नित्यः । तस्मात्

1 'व्यावृत्तिः व्यावृत्तिः धर्मो' इति ख पुस्तके पाठः ।

वृत्तिर्वा व्यतिरेको वा प्रसाध्यते, शब्दे इति शेषः इति केचिद्व्याख्यातवन्तः। तदसंगतम्। तथा सति आकाशादौ सपक्षे तथाभूतनित्यत्वलक्षणधर्मव्यतिरेकस्वीकारे अनिष्टापत्तिः स्यात्। अयं चार्थः—असाध्यात् नित्यादन्यत् एतद्वियुक्तं शब्दव्यतिरिक्तं विश्वं एतद्द्वयव्यतिरेकेण भवति । तस्मादन्यदेतद्द्वयमेव। तस्माद्व्यावृत्तिमत्त्वे साध्ये शब्दः शब्दव्यावृत्तिमानित्युक्ते विरोधः स्यात्। अतः परिशेषात् नित्यः शब्दो न भवतीति नित्यव्यावृत्तिरागच्छति। सति चैवमर्थे शब्दः आकाशो न भवतीति शब्दमादाय व्याप्तिः ।

(अथ एकादशानुमानम्।)

(भुवन०)—असाध्यान्येतीति ।

"असाध्यान्यवियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते ॥"

इति केचिद्व्याख्यातवन्तः तदसङ्गतमिति । अस्मिन्व्याख्याने नित्यव्यावृत्तिः प्रसाध्या। तथा च सति आकाशे दृष्टान्तीक्रियमाणे नित्यव्यावृत्तौ स्वीक्रियमाणायामनिष्टापत्तिः स्यात्। आकाशस्य नित्यत्वात्। ततोऽन्वयित्वव्याघातात् इदं व्याख्यानमसङ्गतमित्यर्थः। अयं चार्थः इत्यादि। अत्रानुमानमध्ये एतदः प्रोक्तत्वात् कारिकार्थव्याख्यानावसरे सोऽनुक्तोऽपि गृह्यते। एतस्माच्छब्दाद्वियुक्तमेतद्वियुक्तं शब्दव्यतिरिक्तं विश्वम्। तत् किंविशिष्टम् । असाध्यान्यत् असाध्यात् नित्यादन्यत् असाध्यान्यत्। ततश्च असाध्यान्यच्च तत् एतद्वियुक्तं च असाध्यान्यैतद्वियुक्तमिति कर्मधारयः। एतावता नित्येन शब्देन च विरहितं विश्वं जातम् । ततोऽसाध्यान्यवियुक्तादन्यौ असाध्यान्यवियुक्तान्यौ, तौ च नित्यशब्दावेव । तयोर्व्यावृत्तिर्भिन्नत्वं शब्दे साध्यते ।

अथानुमानम्। शब्दः साध्याभावान्यैतद्वियुक्तान्यव्यावृत्तिमान् मेयत्वात् घटाकाशादिवत्। अतः परिशेषान्नित्यव्यावृत्तिरागच्छतीत्यादि। शब्दे शब्दव्यावृत्तिर्घटते न । तस्मान्नित्यव्यावृत्तिरायाति । तथा च नित्यव्यावृत्तौ सत्यां शब्दोऽनित्यो जातः एव । ननु एकस्माच्छब्दादपरः शब्दो व्यावर्तते इति शब्दव्यावृत्तिरपि शब्दे जाघटीत्येव, कस्मान्न घटते इत्युक्तम्। उच्यते। अत्र पक्षीकृतशब्दमध्ये सर्वे त्रिभुवनोदरविवरवर्तिनः शब्दाः गृहीताः । अयं शब्दः इत्यभणनात्। ततो न कश्चिद्दोषः। सति चैवमर्थे शब्दः आकाशो न भवति इत्यादि। अत्र साध्यतात्पर्ये द्वयमुद्रि[1]तं शब्दनित्यरूपम्। तत्रान्यव्यावृत्तिरिति भणने शब्दनित्यरूपपदार्थद्वयात् यदि व्यावृत्तिर्भवति, तदाप्यन्यव्यावृत्तिरुच्यते। द्वयोर्मध्ये एकस्माद्यदि व्यावृत्तिर्भवति तदाप्यन्यव्यावृत्तिरुच्यते। अन्यशब्दस्य साधारणत्वात्। ततोऽस्मिन्ननुमाने आकाशे दृष्टान्तीक्रियमाणे आकाशस्य नित्यरूपत्वान्नित्यव्यावृत्तिर्न घटते। ततः शब्दः आकाशरूपो न भवतीत्याकाशस्य शब्दाद्व्यावृत्तिः क्रियते। एवमात्मघटादावपि ज्ञेयम्।

अत्र पदयोजना सुगमैव ।

---

१ 'मुद्ररितं' इति ख, त, ध इति संज्ञितादर्शपुस्तकत्रयेऽपि पाठो दृश्यते। स च 'मुद्रितं' इति संभाव्यते।

(भुवन०)—अत्र पदयोजना सुगमैवेति । अत्र साध्याभावान्येत्यनेन असाध्यान्येति, एतद्वियुक्तान्येत्यनेन वियुक्तान्येति च, व्यावृत्तिमानित्यनेन व्यावृत्तिः साध्यते इति च व्याख्यातमित्येवं पदयोजना कार्या ।

अथ व्यावृत्त्यचिन्ता—अयं शब्दः साध्याभाववानिति कृते विपरीतसाधनं स्यात् । तदर्थं साध्याभावान्यवानिति कृतम् । तथापि शब्दत्वेन सिद्धसाधनम् । तदर्थं साध्याभावान्यैतद्वियुक्तवानिति कृतम् । तथाप्येतद्द्वयातिरिक्तेन शब्दत्वादिना सिद्धसाधनम् । तदर्थं द्वितीयान्यपदोपादानम् । तथापि एतदुभयातिरिक्ताद्विश्वस्मादन्यत् नित्यत्वमेव भवति । तेन सिद्धसाधनं स्यात्प्रतिवादिनः । तदर्थं व्यावृत्तिमानिति कृतम् । इति व्यावृत्त्यचिन्ता ॥ इत्येकादशोदाहरणम् ॥

(भुवन०)—अथ व्यावृत्त्यचिन्ता । तथापि शब्दत्वेन सिद्धसाधनमिति । अयमर्थः—यदि साध्याभावान्यवानिति क्रियते, तदा साध्याभावो नित्यत्वं तस्मादन्यच्छब्दत्वं, तद्वान् शब्दः स्यात्, तथा च सिद्धसाधनम् । तथाप्येतद्द्वयातिरिक्तेन शब्दत्वादिनेति । यदि साध्याभावान्यैतद्वियुक्तवानिति क्रियते, तदापि शब्दनित्यत्वद्वयव्यतिरिक्तं शब्दत्वमपि भवति । ततः शब्दत्वे शब्दे साध्यमाने सिद्धसाध्यतैव । तदर्थं द्वितीयान्यपदोपादानमित्यादि । तथा च सति साध्याभावान्यैतद्वियुक्तान्यः इति जातम् । तत्र साध्याभावो नित्यत्वं, तस्मादन्यदेतद्वियुक्तं शब्दव्यतिरिक्तं विश्वम् । एतावता एतदुभयादन्यद्विश्वं सिद्धम् । ततोऽप्यन्यदेतद्द्वयमेव । तत्र शब्दः शब्दवानिति तु भवति न । आत्माश्रयबाधकतर्कसद्भावात् । नित्यत्ववानिति तु कृते तादृगस्य प्रतिवादिनः सिद्धसाध्यतैवेत्यर्थः । तदर्थं व्यावृत्तिमानित्यादि । तथा च शब्दः साध्याभावान्यैतद्वियुक्तान्यव्यावृत्तिमानिति संपूर्णा प्रतिज्ञा जाता । साध्याभावान्यैतद्वियुक्तान्यच्च शब्दो वा नित्यत्वं वा । तत्र शब्दव्यावृत्तिमत्त्वं शब्दे व्याहतत्वात् घटाकाशादिसर्वसपक्षोपयोगि । नित्यत्वव्यावृत्तिमत्त्वं तु शब्दे सिध्यत् परिशेषाच्छब्दानित्यत्वं साधयति । अत्र अनित्यः शब्दः कृतकत्वाद्घटवदिति सुगमानुमानम् । इत्येकादशोदाहरणम् ॥

(अथ द्वादशानुमानम् ।)

पुनरप्येतदेव शब्दानित्यत्वानुमानं प्रथमान्यपदानुपादानेऽपि संभवतीति श्लोकार्धेन दर्शयति—असाध्येतीति ।

१२ असाध्यतद्वियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते ॥ ८ ॥

शब्दः साध्याभावतद्वियुक्तान्यव्यावृत्तिमान् ।

अत्रापि तच्छब्देन पक्षपरामर्शः । अयमर्थः—असाध्येन नित्येन, तेन च शब्देन वियुक्तं असाध्यतद्वियुक्तम् । एतद्द्वयातिरिक्तं विश्वम् । तस्मादन्यदेत-

द्वयमेव । तद्व्यावृत्तिमानित्युक्ते स्वव्यावृत्तिर्विरोधेन अनुपपन्ना नित्यत्वव्यावृत्तिमानयति । आकाशादौ शब्देन व्याप्तिः पूर्ववदेव । व्यावृत्त्यादीनि च पूर्वोक्तान्येवेति न पृथगभिहितानि । इति द्वादशानुमानम् ॥

(अथ द्वादशानुमानम् ।)

(भुवन०)—अथैतदेवानुमानमाद्यान्यपदानुपादानेन कारिकामध्येऽध्याहारितैतदः स्थाने तच्छब्दं च प्रयुज्य प्रकारान्तरेण दिदर्शयिषुः शब्दानित्यत्वसाधनाय कारिकार्द्धं व्याख्यातुमाह—असाध्येतीति ।

"असाध्यतद्वियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते" ॥ १२ ॥

तद्व्यावृत्तिमानित्युक्ते इत्यादि । शब्दः शब्दाद्व्यावर्तते इति तु घटते न । ततो नित्यत्वव्यावृत्तिः शब्दे परिशेषादागतैव । तथा च सति अनित्यत्वं सिद्धं शब्दस्य । शेषं सर्वं पूर्ववत् । इति द्वादशमुदाहरणम् ॥

(अथ त्रयोदशानुमानम् ।)

एवं शब्दानित्यत्वसाधकं प्रकारद्वयं प्रदर्श्य पुनरपि सर्वसाधकं प्रकारं दर्शयितुं संग्राहकं कारिकार्धमाह—

१३ पक्षेषु ये सन्ति विवादहीनाः
विहाय तानन्यतरः प्रसाध्यः ।

शब्दः संमतिपन्नैतन्निष्ठान्यधर्मवान् ।

अयमर्थः—पक्षेषु संदिग्धसाध्यवत्सु शब्दादिषु ये विवादहीनाः उभयवादिसंमता धर्माः शब्दत्वादिलक्षणाः सन्ति, तान् धर्मान् विहाय परित्यज्य अन्यतरो विप्रतिपन्नः प्रसाध्यः साधनीयः । पक्षेष्विति सामान्यपदोपादानेन वास्तवस्यैव पक्षस्य पक्षतेति सूचितम् । उदाहरणं च अतिसुगममेवेति न लेशतोऽपि व्याकृतम् । इति त्रयोदशानुमानम् ॥

(अथ त्रयोदशानुमानम् ।)

(भुवन०)—एवं शब्दानित्यत्वसाधकं प्रकारद्वयमिति । पूर्वोक्तं ह्यनुमानद्वयं साध्यपदविपर्यासं विना अनित्यत्वादन्यसाध्यसाधकं न भवति । तेन शब्दानित्यत्वसाधकमित्युक्तम् । पुनरपि सर्वसाधकमिति । अग्रेतनमनुमानं साध्यपदविपर्यासं विनापि पक्षविपर्यासेनैव स्वाभिमतसाध्यसाधकं भवतीति सर्वसाधकमित्युक्तम् । एवमन्यत्रापि यथायोगं ज्ञेयम् । पक्षेष्वितीति ।

"पक्षेषु ये सन्ति विवादहीनाः
विहाय तानन्यतरः प्रसाध्यः" ॥ १३ ॥

---

१ 'विमतमर्दसाथ' इति ख पुस्तकपाठः ।

अनुमानं यथा—शब्दः संप्रतिपन्नैतन्निष्ठान्यधर्मवान् मेयत्वात् घटवत् । शब्दः पक्षः । संप्रतिपन्ना वादिना प्रतिवादिना चाङ्गीकृताः, एतस्मिन् शब्दे निष्ठाः एतन्निष्ठाः । संप्रतिपन्नाश्च ते एतन्निष्ठाश्च संप्रतिपन्नैतन्निष्ठाः श्रावणत्वशब्दत्वादयः । तेभ्यो योऽन्यो धर्मः प्रतिवादिनो विप्रतिपन्नः अनित्यत्वलक्षणः, तद्वान् शब्दः इत्यर्थः । नित्यत्वं तु प्रतिवादिना प्रतिपन्नम् । तेन नित्यत्वं संप्रतिपन्नैतन्निष्ठान्यधर्मो न भवति, किन्त्वनित्यत्वमेवेति शब्दानित्यत्वसिद्धिः । अत्र व्याप्तिरेवम्—यद्यत् प्रमेयं तत्तत्संप्रतिपन्नैतन्निष्ठान्यधर्मवत् यथा घटः आकाशं वा । शब्दे ये संप्रतिपन्नाः श्रावणत्वादयः तेभ्योऽन्ये घटत्वानित्यत्वादयः, तद्वत्त्वस्य घटाकाशादिष्वपि सत्त्वात् । इति त्रयोदशोदाहरणम् ॥

(अथ अचतुर्दशानुमानम् ।)

अथ पुनरस्यैव श्लोकस्य तृतीयपादेन भङ्ग्यन्तरमस्यैव प्रकारस्य कथयति—

१४ पक्षोऽथवा साध्यविनाकृतेन ।

शब्दः साध्यव्यतिरिक्तैतद्धर्मातिरिक्तधर्मवान् ।

अथवा भङ्ग्यन्तरसूचनार्थः । अथवा पक्षः शब्दादिः साध्यविनाकृतेन साध्येन विनाकृतेन साध्यव्यतिरिक्तेन धर्मेण साध्यते । किम्भूतः साध्यते इत्याकाङ्क्षायामेतद्धर्मातिरिक्तधर्मवानिति पूर्वार्द्धादनुवर्तते । श्लोकस्यैकत्वादिति । अत्रापि उदाहरणं सुगममेवेति पूर्ववन्न व्याख्यातम् । इति चतुर्दशानुमानम् ॥

(अथ चतुर्दशानुमानम् ।)

(भुवन०)—पक्षोऽथवेतीति ।

" पक्षोऽथवा साध्यविनाकृतेन " ॥ १४ ॥

साध्येन विनाकृतेनेति भणनात् साध्यव्यतिरिक्तेति पदं जातम् । तद्धर्म एतद्धर्मातिरिक्तधर्मवानिति पूर्वार्द्धादनुवर्तते । ततः इत्यनुमानं जातम्—शब्दः साध्यव्यतिरिक्तैतद्धर्मातिरिक्तधर्मवान् मेयत्वात् घटाकाशादिवत् ॥

अत्रानुमानपदव्याख्या—शब्दः पक्षः, साध्यमनित्यत्वं, तद्व्यतिरिक्ताः अन्ये ये एतद्धर्माः शब्दधर्माः श्रावणत्वतत्त्वादयः, तेभ्योऽतिरिक्तः साध्यव्यतिरिक्तेति पदेन कृतकत्वादिरनित्यत्वधर्मः एव शब्दे आयाति । तद्वान् शब्दः साध्यते । अत्रापि साध्यव्यतिरिक्ता ये शब्दधर्माः तेभ्योऽतिरिक्ताः अन्ये घटत्वाकाशत्वैतत्त्वादयः, तद्वत्त्वेन घटाकाशादिषु व्याप्तिः । इति चतुर्दशानुमानम् ॥

(अथ पञ्चदशानुमानम् ।)

अथ पुनरस्यैव श्लोकस्य चतुर्थपादेन वास्तवमस्य प्रतिज्ञान्तरलेशेनापि अभीष्टसाधकः प्रकारः संभवतीति दर्शयति—विरुद्धेति ।

(भुवन०)—अथ व्यावृत्त्यचिन्ता । शब्दोऽवृत्तिधर्मवानितीति । वर्तनं वृत्तिः, न विद्यते
वृत्तिः यस्य सोऽवृत्तिः, स चासौ धर्मश्च, तद्वान् शब्द इति व्याघातः । तदर्थं नित्यावृत्तीत्यादि ।
व्याघातस्य पूर्वोक्तादितस्य निवृत्त्यर्थं नित्यपदं प्रक्षिप्तम् । तथा सति नित्यावृत्तिधर्मवानिति जातम् ।
तथापि शब्दत्वेन सिद्धसाधनम्, तदर्थं शब्दपदं प्रक्षिप्तम् । अथ पराशङ्कामुत्क्राम्य तां निराकुरुते—
तथापि शब्दत्वमित्यादि । तथापि एवं क्रियमाणेऽपि शब्दत्वं शब्दे वर्तते, नित्ये आत्मादौ च न
वर्तते इति युगलावृत्तित्वेन शब्दनित्यावृत्ति भवति । तस्मात्तेन सिद्धसाधनमिति न च वाच्यम् ।
नित्यपदसमानाधिकरणमित्यादि । शब्दश्चासौ नित्यश्चेत्येवं नित्यपदेन समानाधिकरणं नित्य-
पदसमानाधिकरणम् । किं तदित्याह—शब्दपदम् । तत् किं करोतीत्याह—व्यावर्तयति । कां कर्म-
तापन्नाम् । स्वनिष्ठामनित्यताम् । अयमर्थः—यदि शब्दनित्यपदयोर्विशेषणविशेष्यभावो जातः, तदा
शब्दः स्वस्मादनित्यतां व्यावर्तयत्येव । शब्दनित्ये वर्तयतीत्यादि । अत्र पूर्वप्रस्तुतं शब्दत्वं कर्म
नित्यपदसमानाधिकरणं शब्दपदं कर्तृ शब्दनित्ये वर्तयति । तथा च सति शब्दत्वं शब्दरूपे नित्ये
यदि वर्तते, तदा शब्दनित्यावृत्ति तन्न स्यात् । अनुमाने च शब्दनित्यावृत्तीत्युक्तम् । तस्मान्न सिद्ध-
साधनमिति सर्वमनवद्यमित्यर्थः । अथ व्याप्तिः—यो यः प्रमेयः स स शब्दनित्यावृत्तिधर्मवान्
यथा घटाकाशादिः । शब्दरूपो यो नित्यः, तत्र न वर्तन्ते ये धर्माः घटत्वाकाशत्वादयः, तद्वान्
घटाकाशादिरित्यर्थः । इति पञ्चदशोदाहरणम् ॥

(अथ षोडशानुमानम् ।)

अथ पुनरपि प्रथममेवानुमानं साध्याश्रयविपक्षव्यावर्तनेन भङ्ग्यन्तरेण
दर्शयति—अपक्षेति ।

१६ अपक्षसाध्यवद्वृत्तिविपक्षान्वयि यत्र तत् ।
साध्याश्रयविपक्षान्यविपक्षे व्यतिरेकभाक् ॥ १० ॥

यथा—शब्दः शब्देतरानित्यनित्यावृत्त्याकाशान्यनित्यमात्रवृत्तित्वानधिकरणाकाश-
धर्मवान् ।

इति षोडशानुमानात्मकदशश्लोकीनिरूपणविधानं समाप्तम् ॥

अस्यायमर्थः—अपक्षः पक्षादन्यो यः साध्यवान् सपक्षः । तद्वृत्ति विपक्ष-
वृत्ति च यत्र भवति, यश्च साध्याश्रयो यो विपक्षः आकाशः तस्मादन्यो यो
विपक्षो नित्यमात्रं तद्वृत्ति न भवति । तथाभूतं धर्मान्तरं साध्ये पक्षे साध्यते
इति संबन्धः ।

अथ पदयोजना—अत्र शब्देतरानित्येत्यनेन अपक्षसाध्यवद्वृत्तीति
व्याख्यातम् । नित्येत्यनेन विपक्षान्वयीति, अवृत्तीत्यनेन [illegible]. [illegible]

शान्येत्यनेन साध्याश्रयविपक्षान्येति । नित्यमात्रवृत्तित्वानधिकरणेत्यने विपक्षे व्यतिरेकभागिति योजना ।

(अथ षोडशानुमानम् ।)

(भुवन०)—साध्याश्रयविपक्षेत्यादि । अत्र साध्यः पक्षीकृतः शब्दः । तदाश्रयो विप आकाशः । तस्य व्यावर्तनेन निषेधनेनेत्यर्थः । अपक्षेतीति ।

" अपक्षसाध्यवद्वृत्तिविपक्षान्वयि यत्रतत् ।
साध्याश्रयविपक्षान्यविपक्षे व्यतिरेकभाक् " ॥ १६ ॥

अपक्षः पक्षादन्यः इत्यादि । अपक्षः पक्षादन्यो यः साध्यवान्, सपक्षो घटादिः । त विपक्षे आकाशादौ च युगलावृत्तित्वेन यन्न वर्तते । यच्च साध्याश्रयो यो विपक्षः इत्यादि साध्यते इति साध्यः पक्षः शब्दः । तदाश्रयो विपक्षः आकाशः । तस्मादन्यो विपक्षो नित्यमात्रे तत्र व्यतिरेकभाक् अवृत्तिभाक्, न वर्तते इत्यर्थः । अत्राकाशव्यतिरिक्तात्मादिनित्येषु वृत्तिनिषेधा दाकाशवृत्तित्वमनुज्ञातमेव । विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वात् । अत एव आकाशधर्मवानिति कारिकायामनुक्तमप्यनुमाने गृहीतम् । एवंविधं धर्मान्तरं पक्षे साध्यते इत्यर्थः । अथानुमानम् शब्दः शब्देतरानित्यनित्यावृत्त्याकाशान्यनित्यमात्रवृत्तित्वानधिकरणाकाशधर्मवान् मेयत्वात् घटा काशादिवत् ।

अथ व्यावृत्त्यचिन्ता—आकाशधर्मवानिति कृते नित्यत्वेन विपरीत साधनं स्यात् । तदर्थं नित्यमात्रवृत्तित्वानधिकरणेति । तथापि द्रव्यत्वेन व्याघातः । तदर्थमाकाशान्येति । तथापि द्रव्यत्वेन व्याघातस्तदवस्थः एव । तदर्थमनित्यनित्यावृत्तीति । तथापि न विवक्षितसिद्धिरिति शब्देतरेति पदं प्रक्षिप्तम् । इति सर्वमनवद्यम् । इति षोडशानुमानम् ॥

महाविद्यादशश्लोकी विवृतापि चिरन्तनैः ।
मन्दधीवृद्धिसिद्ध्यर्थं विवृतेयं यथागमम् ॥

इति महाविद्याविवरणं समाप्तम् ।

(भुवन०)—अथ व्यावृत्त्यचिन्ता । आकाशधर्मवानित्यादि । यदि शब्दः आकाशधर्मवानिति क्रियते, तदा साध्यमनित्यत्वं तैत्र न सिद्ध्यति, किन्तु नित्यत्वम् । तथा च सति विपरीतसाधनं स्यादित्यर्थः । तदर्थं नित्यमात्रवृत्तित्वेत्यादि । शब्दो नित्यमात्रवृत्तित्वानधिकरणाकाशधर्मवानिति यदि क्रियते, तदा द्रव्यत्वेन व्याघातः । यतो द्रव्यत्वं नित्यमात्रे एव न वर्तते, किन्तु अनित्ये घटपटादावपि वर्तते, ततो नित्यमात्रवृत्तित्वानधिकरणम् । आकाशेऽपि वर्तनात् । आकाशधर्मश्च द्रव्यत्वम् । तच्चेत् शब्दे साध्यते, तदा व्याघातः स्यादेव । शब्दस्य गगनगुणत्वात् । गुणे च

१ °त्वं तत्र सि° इति त ध पुस्तकपाठः ।

द्रव्यत्वाभावात् । तदर्थमाकाशान्येत्यादि । तथाच आकाशान्येति पदे प्रक्षिप्ते आकाशान्यनित्यमात्रवृत्तित्वानधिकरणाकाशधर्मवानिति जातम् । एवं चोच्यमाने द्रव्यत्वेन व्याघातः तदवस्थः एव । द्रव्यत्वस्य घटादिष्वनित्येष्वाकाशेऽपि च वर्तनात् । आकाशान्यनित्यमात्रवृत्तित्वानधिकरणत्वस्याकाशधर्मत्वस्य च विद्यमानत्वात् । तदर्थमनित्यनित्यावृत्तीत्युपात्तम् । **तथापि न विवक्षितसिद्धिरिति** । विवक्षितमत्र शब्दानित्यत्वं, तन्न सिद्ध्यति । यतः एवंविधः शब्दाकाशान्यतरत्वादिः साध्यो धर्मः उपपद्यते । तस्य च धर्मस्य शब्दानित्यत्वे स्वीक्रियमाणे सति, अनित्ये शब्दे नित्ये चाकाशे वर्तनादनित्यनित्यावृत्तित्वं न स्यात् । तस्माच्छब्दो नित्यः एवाङ्गीकर्तव्यः स्यात् । तथा च न विवक्षितानित्यत्वसिद्धिः । तदर्थं शब्देतरेति पदं प्रक्षिप्तम् । तथा च सत्येवंविधः साध्यो धर्मः शब्दाकाशान्यतरत्वादिः । स च शब्देतरस्मिन् अनित्ये न वर्तते, नित्ये चाकाशे वर्तते । तेन तस्य शब्देतरानित्यनित्ययुगलावृत्तित्वं आकाशे वर्तनादाकाशधर्मत्वं च तस्य विद्यते एव । स च धर्मः आकाशान्यनित्यमात्रवृत्तित्वानधिकरणं तदैव, यद्यनित्यः शब्दः स्यात् । शब्दस्य च नित्यत्वेऽङ्गीक्रियमाणे तस्य धर्मस्य आकाशान्यनित्यमात्रवृत्तित्वाधिकरणत्वमेव स्यात्, न तु तदनधिकरणत्वम् । तस्य धर्मस्य आकाशान्यनित्ये शब्देऽपि वर्तनात् । तस्मात्पारिशेष्याच्छब्दस्यानित्यत्वं स्वीकर्तव्यम् । अत्र च घटे दृष्टान्तीक्रियमाणे घटशब्दाकाशान्यतरत्वादिधर्मो ज्ञेयः । स च शब्देतरानित्यनित्यवृत्तित्वरहितोऽस्ति, शब्देऽपि वर्तनात् । एतावता शब्देऽनित्ये घटे, नित्ये चाकाशे वर्तते न तु शब्दादितरदेव यदनित्यं नित्यं च तयोर्युगले तथा । स चाकाशान्यनित्यमात्रे एव न वर्तते, अनित्ये घटेऽपि वर्तनात् । स चाकाशे वर्तनादाकाशधर्मोऽपि भवति । आकाशे चाकाशत्वादिः, आत्मादौ च घटशब्दाकाशात्मान्यतरत्वादिः । स च शब्देतरानित्यनित्यवृत्तित्वरहितोऽस्ति, शब्देऽपि च वर्तनात् । आकाशान्यनित्यमात्रवृत्तित्वरहितोऽप्यस्ति, घटेऽपि वर्तनात् । इदमत्राकूतम्—स धर्मः आकाशादन्यस्मिन्नित्यमात्रे एव न वर्तते, किन्त्वनित्ये घटेऽपि वर्तते एव । आकाशधर्मत्वं च तस्य प्रकटमेव । एवं चान्यस्मिन्नपि दृष्टान्तीक्रियमाणे यथायोगं धर्मयोजना कार्या इति सर्वं सुयौक्तिकम् । एषा च महाविद्या अनेकदोषदुष्टत्वेन चिन्त्येत्युक्तं महाविद्यावृहद्वृत्तिकृता । प्रस्तुतलघुवृत्तिकृतानेनापि च साध्यधर्मदृष्टान्तधर्माद्यकथनेन विशेषतो न व्याचक्रे केनापि हेतुना । तथापि वाचयितृविनेयजनमनःस्थिरीकरणाय अर्थगमनिकामात्रं कृतमस्तीति ज्ञेयम् । इति षोडशोदाहरणव्याख्यानं समाप्तमिति ॥

श्रीदेवसुन्दरगुरुप्रथितप्रतिष्ठ—
पट्टोदयाचलसहस्रकरोपमानाः ।
श्रीमत्तपागणमहार्णवपूर्णचन्द्राः
श्रीसोमसुन्दरगुरुप्रवरा जयन्ति ॥ १ ॥
तेषां गुरूत्तमानां शिष्यः श्रीभुवनसुन्दरः सूरिः ।
तनुते स्म महाविद्याविवृतेर्जयकारि टिप्पनकम् ॥ २ ॥[1]

इति श्रीभुवनसुन्दरसूरिविरचितं महाविद्याविवरणटिप्पनं समाप्तम् ।

---

१ इदं पद्यं ख पुस्तके न विद्यते ।

I

महाविद्याविडम्बनग्रन्थोल्लिखितानां ग्रन्थकारप्रभृतीनां नाम्नां सूचीपत्रम् ।

II

भुवनसुन्दरसूरिकृतमहाविद्याविडम्बनवृत्तौ उल्लिखितानां ग्रन्थकर्त्रादीनां नामानि.

III

भुवनसुन्दरसूरिणा महाविद्याविडम्बनवृत्तौ उद्धृतानां लक्षणादीनां संग्रहः।

IV

महाविद्याविडम्बनव्याख्यानगतानां पारिभाषिकशब्दानां सूचीपत्रम्।

V

महाविद्याविडम्बनादिग्रन्थचतुष्टयगतश्लोकानां

VI

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३	२५	प्रतिषधे	प्रतिषेधे
४	९	महविद्यां	महाविद्यां
२५	१३	धर्माणा	धर्माणां
४६	१६	°धिकरण°	°धिकरण°
७३	२३	सर्वविषयत्व°	सर्वविषयकत्व
८५	७	तन्त्रयाति°	तत्रयाति°
१०८	१५	°वंरुपत्वं°	°वंरूपत्वं°
१२६	२२	द्वीतिय:	द्वितीय:
१४४	२१	'उभयो: प' इत्यस्योपरि 'घ' पुस्तकमितोऽग्रे नोपलब्धमिति टिप्पनं पठनीयम् ।	
१५०	५	हृषपुर°	हर्षपुर°